कविभूषण -

श्रीगोपीनाथ पात्रविरचितः

कविचिन्तामणिः

SARASVATI
CSUGCKL
015:gxl
2
26335
Acc.No: 26335

संपादकः

डा. नारायण महापात्रः

CAT NO_ 8670
HOLD ID_21959
BOOK NO_ 2
LOCATION_ [illegible]
52-A-3

ग्रन्थनाम- **कविचिन्तामणिः**
ग्रन्थकर्ता- **श्रीगोपीनाथपात्रः**
संपादकः- **डा. नारायण महापात्रः**
संस्कृतशिक्षकः,बनमालिपुर, खोरधा, ओड़िशा- ७५२१०३
प्रकाशिका- **सरस्वती**
लोकभाषा-प्रचार-समितिः
शरधावालि, पुरी-७५२००२
(राष्ट्रियसंस्कृत-संस्थानस्य वित्तसाहाय्येन प्रकाशितः)
स्वत्त्वम् - संपादकेन संरक्षितम्
मुद्रकः - अभिजित् कम्प्युटराईजड् प्रिण्टिङ्गस्, पुरी-२
प्रकाशनवर्षम् - १९९८
संख्या - १०००
मूल्यम् 223/-

KAVICHINTAMANI
(A treatise on Sanskrit Poeties)
Author - ***Sri Gopinath Patra***
Editor : ***Dr. Narayan Mahapatra***
Sanskrit Teacher
Banamalipur, Khurda, Orissa-752103
Publisher : ***SARASVATI***
LOKABHASHA PRACHARA SAMITIH
SARADHABALI, PURI - 752002
Printed at : ***Abhijit Computerised Printings***
Red Cross Road, Puri-2
©: The Editor
Year of Publication - 1998
Number of Copies - 1000
Price......................

Published by the partial financial assistance of the
Rashtriya Sanskrit Sansthan, New Delhi.

समर्पणम्

श्रीकृष्णं भक्ततृष्णं नवघनवपुषं बर्हिबर्हावतंसं
श्रीराधावक्त्रचन्द्रामृतरसरसिकं मन्दहासानुरक्तम् ।
कालिन्दीतीरकुञ्जाभिलषितविपिने पुष्पगन्धाभिपूर्णे
क्रीडन्तं गोपिकाभिः प्रमुदितहृदयं नन्दसूनुं नमामि ॥

गोपीनाथपात्रविरचितस्य कविचिन्तामणेः

विषयानुक्रमणिका

प्रथमः किरणः

विषयः	पृष्ठाङ्कः
कविभेदादिनिरूपणम्	1-23
मङ्गलाचरणादिकम्	1
कविप्रशंसनम्	3
कविभेदाः	7
कविप्रभ्वोः परस्परशोभा	8
कविवचनम्	12
कविदूषणम्	12
काव्यकीर्तेः प्राशस्त्यम्	12
काव्यस्योपादेयत्वम्	13
कवित्वख्यातिहेतुः	16
श्रेष्ठचतुरजनानां स्वरूपम्	20
नायकलक्षणम्	21
काव्यादिगानस्थानम्	22
कविपुरस्कारफलम्	22
देवतासहितवर्ण-	

द्वितीयः किरणः

गणादिनिरूपणम्	24-44
मगणादीनां नाम्ना निर्देशः समस्तवाङ्मय व्यापकत्वं	24

विषयः	पृष्ठाङ्कः
मत्ता	52
मनोरमा	52
इन्द्रवज्रा	52
उपेन्द्रवजा	53
उपजातिः	53
शालिनी	53
वातोर्मी	54
अनुकूला	54
रथोद्धता	55
स्वागता	55
वंशस्थविलम्	55
इन्द्रवंशा	56
भुजङ्गप्रयातम्	56
स्रग्विणी	57
प्रमिताक्षरा	57
मन्दाकिनी	58
मालिनी	59
पञ्चचामरम्	60
शिखरिणी	60
पृथ्वीउपजातिः	56
पृथ्वी	65
मन्दाक्रान्ता	61
कुसुमितलतावेल्लिता	61
शार्दूलविक्रीडितम्	62
स्रग्धरा	62
अर्धसमवृत्ते सुन्दरीवृत्तम्	63
अनुष्टुब्वृत्तम्	63
आर्याजातिः	63
वाङ्मयस्य गद्यपद्यभेदेन द्वैविध्यम्	63

विषयः	पृष्ठाङ्कः
गद्यलक्षणं, चूर्णकादिभेदेन गद्यत्रैविध्यं च	63
चूर्णकम्	64
उत्कलिकाप्रायम्	64
वृत्तगन्धिः	65

चतुर्थः किरणः

काव्यनिरूपणम्	66-75
खण्डकाव्यमहाकाव्यभेदेन काव्यस्य द्विविधत्वम्	66
गीतानां खण्डकाव्यत्वम्	66
महाकाव्यम्	66
प्रबन्धगीतानां महाकाव्यत्वम्	66
काव्यस्वरूपम्	67
शब्दानां वाचकादिभेदेन त्रैविध्यम्	67
अर्थानां वाच्यादिभेदेन त्रैविध्यम्	67
अभिधादिभेदेन वृत्तीनां त्रिविधत्वम्	67
अभिधावृत्तिः	67
लक्षणावृत्तिः तद्द्वैविध्यं च	68
रूढिलक्षणा	68
प्रयोजनवतीलक्षणा	68
लक्षणायाः उपादानलक्षणभेदेन पुनर्द्वैविध्य- निरूपणम्	74,75
लक्षणलक्षणायाः जहल्लक्षणात्वम्	75
उपादानलक्षणायाः अजहल्लक्षणात्वम्-	76
व्यञ्जनावृत्तिनिरूपणम्	76
व्यञ्जनावृत्तेः शब्दशक्ति-भेदेन त्रिविधत्वम्	76
शब्दशक्तिमूला व्यञ्जनावृत्तिः	76
अर्थशक्तिमूला व्यञ्जनावृतिः	77
उभयशक्तिमूला व्यञ्जनावृत्तिः	77
वाक्यमहावाक्यभेदेन वाक्यस्य द्वैविध्यम्	71

विषयः	पृष्ठाङ्कः
वाक्यलक्षणम्	71
वाक्यस्योदाहरणम्	71
महावाक्यम्	72
ध्वनिगुणीभूतव्यङ्ग्यभेदेन काव्यस्य द्वैविध्यम्	72
ध्वनिकाव्यम्	72
गुणीभूतव्यङ्ग्यकाव्यम्	73
शय्या	73
कवित्वपाकभेदाः	73
द्राक्षापाकः	74
नारिकेलपाकः	74

पञ्चमः किरणः

नायकनायिकानिरूपणम्	76-104
रसस्वरूपनिरूपणम्	76
श्रृङ्गारादिरसविशेषनिर्देशः	76
रसेषु श्रृङ्गारस्य श्रेष्ठत्वम्	76
आलम्बनोद्दीपभेदेन विभावस्य द्वैविध्यम्	76
आलम्बनविभावनिरूपणम्	76
नायकलक्षणम्	77
धीरोदात्तादि भेदेन नायकस्य चतुर्विधत्वम्	77
धीरोदात्तः	77
धीरललितः	78
धिरप्रशान्तः	78
दक्षिणादि भेदेन नायकस्य चतुर्विधत्वम्	78
दक्षिणः	78
शठः	78
धृष्टः	79
अनुकूलः	79
प्रतिनायकलक्षणम्	80

विषयः **पृष्ठाङ्कः**

नायकानामवान्तर भेदगणने अष्टचत्वारिंशद् विधत्वम् 80

पीठमर्दादिश्रृङ्गारनायकासहायाः 80

पीठमर्दः 80

विटः 81

चेटः 81

विदूषकः 81

शृङ्गारनायकस्य अर्थचिन्तनसहायनिर्देशः 82

शृङ्गारनायकस्य षण्डादयः अन्तःपुरसहायाः 82

दण्डसहायाः 82

दूतानां दूतीनां च निसृष्टार्थादिभेदेन त्रैविध्यम् 83

निसृष्टार्थदूतलक्षणम् 83

मितार्थकदूतलक्षणम् 83

संदेशहारकदूतलक्षणम् 83

सात्त्विकनायकसहजगुणानां शोभादीनामष्टानां निरूपणम् 83

शोभा 83

विलासः 84

माधुर्यम् 84

धैर्यम् 84

गाम्भीर्यम् 85

तेजः 85

ललितम् 85

औदार्यम् 85

स्वकीयादिभेदेन नायिकानां त्रिविधत्वम् 86

स्वकीयानायिका 86

मुग्धा नायिका- 86

लज्जाढ्या 87

उत्पन्नयौवना 87

रतौवामा 87

नवोढा 87

विषयः **पृष्ठाङ्कः**

मध्या नायिका 88
प्ररूढयौवना 88
प्ररूढस्मरसंयुता 88
विचित्रसुरता 88
प्रगल्भा नायिका 88
कामान्धा 89
गाढतारुण्या 89
समस्तरतिपण्डिता 89
भावोन्नता 89
अल्पलज्जा 89
आक्रान्तनायिका 89
मानावस्थायां मध्यप्रगल्भयोः धीर-अधीर-धीराधीरभेदेन त्रिविधत्वम् 90
मध्या धीरा 90
मध्या अधीरा 91
मध्या धीराधीरा 91
प्रगल्भा धीरा 91
प्रगल्भा अधीरा 92
धृष्टा प्रगल्भा 92
ताडनकरी प्रगल्भा अधीरा 92
प्रगल्भा धीराधीरा 92
मध्यायाः प्रगलभायाश्च पुनः ज्येष्ठकनिष्ठभेदेन द्वैविध्यम् 93
ज्येष्ठा 93(?)
कनिष्ठा 93(?)
स्वकीयाया स्त्रयोदशविधत्वपरिगणनम् 93
परकीया नायिका 93
परकीया परोढाकन्यकाभेदेन द्वैविध्यम् 93
परोढा नायिका 93
कन्यका नायिका 94
सामान्यनायिका 94

विषयः पृष्ठाङ्कः
सामान्यनायिकानां वल्लभजनाः 95
नायिकायाः षोडशविधत्वपरिगणनम् 95
स्वाधीन भर्तृकाद्यवस्थाभेदेननायिकायाः पुनः अष्टविधत्वम् 95
स्वाधीनभर्तृका 95
खण्डिता 96
अभिसारिका 96
कान्तसमीपं गताभिसारिका 97
कुलजाभिसारिका 97
परकीयाभिसारिका 97
वेश्याभिसारिका 97
प्रेष्याभिसारिका 98
शुक्लाभिसारिका 98
कृष्णाभिसारिका 98
दिविसाभिसारिका 100
अभिसारस्थानानि 100
कलहान्तरिता 100
विप्रलब्धा 101
प्रोषितभर्तृका 101
वासकसज्जा 102
विरहोत्कण्ठिता 102
नायिकानामवान्तरभेदसंख्यानिर्देशः- 103

षष्ठः किरणः

भावादिसहजालंकार-निरूपणम् 105-117
भावादिसहजालंकाराणमष्टाविंशतिविधत्वम् 105
भावादीनामङ्गजादिभेदेन वर्गीकरणम् 105
भावः 105
हावः 106

विषयः पृष्ठाङ्कः
हेला 106
शोभा 107
कान्तिः 108
दीप्तिः 108
माधुर्यम् 108
प्रगल्भता 109
औदार्यम् 109
धैर्यम् 110
लीला 110
कुट्टमितम् 110
विलासः 111
चकितम् 111
मौग्ध्यम् 112
मदः 112
विभ्रमः 113
विच्छित्तिः 113
किलकिञ्चितम् 113
हसितम् 114
मोट्टायितम् 115
बिब्बोकः 115
विहृतम् 115
ललितम् 116
विक्षपः 116
कौतूहलम् 116
तपनम् 117
केलिः 117

सप्तमः किरणः

विषयः	पृष्ठाङ्कः
नायिकानामनुरागेङ्गितादिनिरूपणम्	118-122
मुग्धाकन्ययोरनुरागेङ्गितानि	118
सर्वासां नायिकानामनुरागेङ्गितानि	118
स्त्रीणां भावाभिव्यक्त्युपायाः	121
नायिकादूतीनां निरूपणम्	121
दूतीगुणाः	122

अष्टमः किरणः

उद्दीपनविभावादि	123-142
उद्दीपनविभावलक्षणम्	123
सुगन्धाढ्यवाताद्युद्दीपनानां निर्देशः	123
अनुभावलक्षणम्	123
भ्रूक्षेपाद्यनुभावनिरूपणम्	124
सात्त्विकभावलक्षणम्	
स्तम्भादिसात्त्विकभावनिरूपणम्	125
स्तम्भः	125
स्वेदः	126
रोमाञ्चः	126
स्वरभेदः	126
वेपथुः	127
विवर्णता	127
अश्रु	127
प्रलयः	127
व्यभिचारिभावलक्षणम्	128
निर्वेदादित्रयस्त्रिंशद्भावानांनाम्ना निर्देशः	128
निर्वेदः	128
आवेगः	129

विषयः	पृष्ठाङ्कः
दैन्यम्	129
श्रमः	129
मदः	130
जडता	130
औग्र्यम्	131
मोहः	131
विबोधः	131
स्वप्नः	132
अपस्मारः	132
गर्वः	132
मरणम्	133
आलस्यम्	133
अमर्षः	133
निद्रा	134
अवहित्था	134
औत्सुक्यम्	134
उन्मादः	135
शङ्का	135
स्मृतिः	136
मतिः	136
व्यधिः	136
त्रासः	137
व्रीडा	137
हर्षः	137
असूया	138
विषादः	138
धृतिः	138
चपलता	138
ग्लानिः	139

विषयः **पृष्ठाङ्कः**
चिन्ता 139
वितर्कः 140
स्थायिभावलक्षणम् 140
रत्यादिस्थायिभावानांनाम्ना निर्देशः 140
रत्यादिस्थायिभावानांलक्षणम् 140
स्थायिसंचारिसात्त्विकानां भावत्वोपपादनम् 142

नवमः किरणः

शृङ्गाररसनिरूपणम् 143-155
शृङ्गाररसस्वरूपम् 143
विप्रलम्भसंभोगभेदेनशृङ्गाररसस्य द्विविधत्वम् 143
विप्रलम्भशृङ्गारलक्षणम् 143
विप्रलम्भस्यचतुर्विधत्वम् 144
पूर्वरागविप्रलम्भनिरूपणम् 144
पूर्वरागे अभिलाषादीनां नाम्ना निर्देशः 145
अभिलाषाद्यवस्थानां निरूपणम् 145
अभिलाषः 146
चिन्ता 146
स्मृतिः 146
गुणकीर्तनम् 146
उद्वेगः 146
प्रलापः 146
उन्मादः 146
व्याधिः 146
जाड्यम् 147
मरणम् 147
पूर्वरागावस्थाविषयकं मतान्तरम् 148
पूर्वरागवर्णने कविसंमतःक्रमः 148

विषयः पृष्ठाङ्कः

नील्यादिभेदेन पूर्वरागस्य त्रिविधत्वम् 148

नीलीरागः 148

कुसुम्भरागः 149

मञ्जिष्ठारागः 149

मानविप्रम्भस्य निरूपणम् 149

प्रणयमानः 149

ईर्ष्यामानः 151

मानापनोदनोपायाः 151

प्रवासविप्रलम्भस्य निरूपणम् 152

प्रवासविप्रलम्भे स्मरदशानां विवरणम् 152

करुणविप्रलम्भशृङ्गाररसनिरूपणम् 154

संभोगशृङ्गारलक्षणम् 154

संभोगशृङ्गारस्य एकविधत्वम् 154

शृङ्गाररसे वर्णनीया विचाराः 154

विप्रलम्भस्य संभोगस्य पोषकत्वम् 155

विप्रलम्भसंभोगशृङ्गारयोः वर्णने पौर्वापर्यविचारः 155

दशमः किरणः

हास्यादिरसनिरूपणम् 156-163

हास्यरसः 156

हास्यभेदाः 156

करुणरसः 157

रौद्ररसः 157

वीररसः 158

वीररसस्य भेदाः 159

करुणविप्रलम्भशृङ्गाररसनिरूपणम् 152

भयानकरसः 158

दानवीरः 159

विषयः **पृष्ठाङ्कः**

धर्मवीरः 159
युद्धवीरः 159
दयावीरः 159
भयानकरसः 160
बीभत्सरसः 160
अद्भुतरसः 161
शान्तरसः 162
वत्सलरसः 162

एकादशः किरणः

रसविरोधादिनिरूपणम् 164-171
शृङ्गारादिरसानां मिथोविरोधविचारः 164
रसभावादीनां रसत्वविवेचनम् 164
भावनिरूपणम् 164
व्यभिचारिप्राधान्यस्योदाहरणम् 165
देवादिविषया रतिः 165
मुनिविषया रतिः 165
राजविषया रतिः 165
उद्बुद्धमात्रस्थायी 166
रसाभासभावाभासयो-र्निरूपणम् 166
शृङ्गाररसाभासः 166
उपनायकगतत्वे 166
मुनिपत्नीगतत्वे 167
गुरुपत्नीगतत्वे 167
बहुनायकगतत्वे 167
अनुभयनिष्ठत्वे 167
प्रतिनायकगतत्वे 167
अधमपात्रगतत्वे 168

विषयः	पृष्ठाङ्कः
तिर्यग्गतत्वे	168
हास्यरसाभासः	168
करुणरसाभासः	168
रौद्ररसाभासः	169
वीररसाभासः	169
भयानकरसाभासः	169
बीभत्सरसाभासः	169
अद्भुतरसाभासः	169
शान्तरसाभासः	170
भावाभासः	170
भावशान्तिः	170
भावोदयः	170
भावसन्धिः	171
भावशवलता	171

द्वादशः किरणः

गुणादिनिरूपणम्	172-180
गुणलक्षणम्	172
माधुर्यादिभेदेन गुणानां त्रिविधत्वम्	172
माधुर्यगुणः	172
ओजोगुणः	172
प्रसादगुणः	173
कैशिक्यादिभेदेन वृत्तीनां चतुर्विधत्वम्	173
कैशिकीवृत्तिः	174
आरभटीवृत्तिः	174
भारतीवृत्तिः	174
सात्त्वतीवृत्तिः	175
मध्यमारभटी-मध्यमकैशिकीसंज्ञकवृत्तिद्वयनिरूपणम्	175

विषयः	पृष्ठाङ्कः
मध्यमकैशिकी	175
मध्यमारभटी	176
वृत्तीनां रीतीनां च मिथो भेदः	176
अतिमृदुत्वादिसंदर्भनिरूपणम्	176
परुषकोमलवर्णनिर्देशः	177
रीतिलक्षणम्	177
वैदर्भ्यादिभेदेन रीतेश्चतुर्विधत्वम्	177
वैदर्भीरीतिः	177
गौडीरीतिः	177
पाञ्चलीरीतिः	178
लाटीरीतिः	178
श्लेषादीनां रीतिप्राणत्वम्	178
श्लेषः	179
प्रसादः	179
समता	179
माधुर्यम्	179
सुकुमारता	179
अर्थव्यक्तिः	179
उदारता	180
ओजः	180
कान्तिः	180
समाधिः	180

त्रयोदशः किरणः

दोषनिरूपणम्	181-199
दोषसामान्यलक्षणं पदादिगतत्वेन पंचविधत्वं च	181
पदगतदोषाणां निरूपणम्	181-185
दुःश्रवत्वम्	181

विषयः	पृष्ठाङ्कः
अश्लीलम्	181
अनुचितार्थता	182
अप्रयुक्तम्	182
ग्राम्यत्वम्	182
अप्रतीतत्वम्	182
संदिग्धत्वम्	182
नेयार्थत्वम्	183
निहतार्थत्वम्	183
अवाचकत्वम्	183
क्लिष्टत्वम्	184
विरुद्धमतिकारित्वम्	184
विधेयाविमर्शः	184
निरर्थकः	185
असमर्थत्वम्	185
च्युतसंस्कारता	185
पदांशगतदोषणां निरूपणम्	185
श्रुतिकटुः	185
अश्लीलत्वम्	185
नेयार्थत्वम्	185
वाक्यगतदोषाणां निरूपणम्	186-190
प्रतिकूलता	186
लुप्तविसर्गता	186
आहुतविसर्गता	186
अधिकपदत्वम्	186
न्यूनपदत्वम्	186
पुनरुक्तत्वम्	187
हतवृत्तत्वम्	187
पतत्प्रकर्षत्वम्	187
सन्धिविश्लेषः	187

विषयः	पृष्ठाङ्कः
सन्ध्यश्लीलत्वम्	187
अर्थान्तरैकपदत्वम्	187
समाप्तपुनरात्तत्वम्	188
अमतपरार्थता	188
वाच्यानभिधानत्वम्	188
भग्नप्रक्रमता	188
प्रसिद्धत्यामः	188
अस्थानस्थपदता	189
अस्थानस्थसमासता	189
संकीर्णत्वम्	189
गर्भितत्वम्	190
अर्थदोषनिरूपणम्	190-193
अपुष्टत्वम्	190
दुष्क्रमता	190
ग्राम्यत्वम्	190
व्याहतत्वम्	190
अनवीकृतत्वम्	191
प्रकाशितविरुद्धत्वम्	191
प्रसिद्धविरुद्धता	191
प्रकृतिविपर्ययः	191
शास्त्रविरुद्धता	191
सहचरभिन्नत्वम्	192
अविशेषत्वम्	192
अनियमत्वम्	192
अवाचकत्वम्	192
विधेयत्वम्	192
अनुवाद्यत्वम्	193
रसदोषनिरूपणम्	193-195
रसादीनां स्वशब्द-	193

विषयः	पृष्ठाङ्कः
परिपन्थिरसाङ्गस्य विभावादिग्रहणम्	193
अनुभावविभावयोः कृच्छ्रकल्पनम्	194
रसस्याकाण्डे प्रथनम्	194
रसस्याकाण्डे छेदः	194
रसस्य पुनः पुनः दीप्तिः	194
अनङ्गरसस्य कीर्तनम्	194
प्रकृतिविपर्ययः	195
अनौचित्यम्	195
दोषाणां प्रतिप्रसवः	195
दुःश्रवत्वस्य प्रतिप्रसवः	195
अश्लीलत्वस्य प्रतिप्रसवः	195
अप्रतीतत्वस्य प्रतिप्रसवः	195
कथितपदत्वस्य प्रतिप्रसवः	195
ग्राम्यत्वस्य प्रतिप्रसवः	196
पुनरुक्तत्वस्य प्रतिप्रसवः	197
न्यूनपदत्वस्य क्वचिद् गुणत्वमदोषत्वं च	197
समाप्तपुनरात्तत्वस्य क्वचिद्गुणत्वमदोषत्वं च	197
गर्भितत्वस्य प्रतिप्रसवः	197
पतत्प्रकर्षतायाः प्रतिप्रसवः	197
व्यभिचारिणः स्वशब्दोक्तेः प्रतिप्रसवः	197
अनुकारे सर्वदोषाणां प्रतिप्रसवः	197
अर्थनैर्मल्यकथनम्	197
गीतदोषाणां निरूपणम्	198-199
वाणीस्खलनादिगीतदोषाणां निर्देशः	198
धातुमात्वोः लक्षणम्	198
गीतेषु ह्रस्वदीर्घविपर्ययादेः विवेचनम्	199

चतुर्दशः किरणः

विषयः	पृष्ठाङ्कः
शब्दालंकार निरूपणम्	200-208
अलंकारसामान्यलक्षणम्	200
शब्दार्थगतत्वेन अलंकारस्य द्विविधत्वम्	200
शब्दालंकारनिरूपणम्	200-208
अनुप्राससामान्यलक्षणम्	200
अनुप्रासस्य पंचविधत्वम्	200
छेकानुप्रासः	200
वृत्यनुप्रासः	201
श्रुत्यनुप्रासः	201
अन्त्यानुप्रासः	201
लाटानुप्रासः	202
पुनरुक्तवदाभासः	203
यमकम्	203
यमकभेदानां बहुत्वकथनम्	204
यमकादौ डलोर्बवोर्लरोश्च ऐक्यनिर्देशः	204
महायमकम्	205
चित्रालंकारः	205
चित्रालंकारे पद्मबन्धः	205
प्रहेलिकायाः अलंकारत्वनिषेधः	205
च्युताक्षरादिप्रहेलिका निरूपणम्	205
च्युताक्षरा-दत्ताक्षरा-च्युतदत्ताक्षरा	205
क्रियागुप्तिः	206
बहिर्लापिका	206
अन्तर्लापिका	207

पंचदश: किरण:

विषय:	पृष्ठाङ्क:
अर्थालंकारनिरूपणम्	209-268
उपामाया: प्राथम्ये हेतु:	209
उपमालक्षणम्	209
पूर्णा-लुप्ता-भेदेन उपमाया: द्विविधत्वम्	209
पूर्णोपमा	210
लुप्तोपमा	210
अनन्वय:	211
उपमेयोपमा	211
प्रतीप:	211
रूपकम्	212
परिणाम:	213
उल्लेख:	214
स्मरणम्	215
भ्रान्तिमान्	215
सन्देह:	216
अपह्नुति:	217
उत्प्रेक्षा	217
अतिशयोक्ति:	218
तुल्ययोगिता	220
दीपकम्	221
कारकदीपकम्	222
आवृत्तिदीपकम्	222
प्रतिवस्तूपमा	223
दृष्टान्त:	223
निदर्शना	223
व्यतिरेक:	224
विनोक्ति:	225

विषयः	पृष्ठाङ्कः
समासोक्तिः	225
परिकरः	226
परिकराङ्कुरः	226
श्लेषः	226
अप्रस्तुतप्रशंसा	227
प्रस्तुताङ्कुरः	227
पर्यायोक्तम्	228
व्याजस्तुतिः	228
व्याजनिन्दा	229
आक्षेपः	229
विरोधाभासः	230
विभावना	230
विशेषोक्तिः	231
असम्भवः	231
असङ्गतिः	231
विषमम्	232
समम्	233
विचित्रम्	234
अधिकम्	234
अन्योन्यम्	235
विशेषः	235
अल्पम्	236
व्याघातः	236
कारणमाला	236
एकावली	237
मालादीपकम्	237
सारः	238
यथासंख्यम्	238
पर्यायः	238

विषयः	पृष्ठाङ्कः
परिवृत्तिः	239
परिसंख्या	240
विकल्पः	240
समुच्चयः	240
समाधिः	241
प्रत्यनीकम्	241
काव्यार्थापत्तिः	241
काव्यलिंगम्	242
अर्थान्तरन्यासः	242
विकस्वरः	243
प्रौढोक्तिः	244
सम्भावनम्	244
मिथ्याध्यवसितिः	245
ललितम्	245
प्रहर्षणम्	245
विषादनम्	248
उल्लासः	248
अवज्ञा	251
अनुज्ञा	252
लेशः	252
मुद्रा	253
रत्नावली	253
तद्गुणः	253
अतद्गुणः	254
अनुगुणः	254
मीलितम्	255
सामान्यम्	255
उन्मीलितनिमीलितौ	255
उत्तरालङ्कारः	256

विषयः	पृष्ठाङ्कः
सूक्ष्मम्	256
पिहितम्	257
व्याजोक्तिः	257
गूढोक्तिः	258
विवृतोक्तिः	258
युक्तिः	258
लोकोक्तिः	258
छेकोक्तिः	259
वक्रोक्तिः	259
स्वभावोक्तिः	260
भाविकम्	260
उदात्तम्	261
अत्युक्तिः	262
निरुक्तिः	262
प्रतिषेधः	262
विधिः	263
हेतुः	263
रसवदाद्यलङ्कारनिरूपणम्	264-265
तत्र रसवदलङ्कारः	264
प्रेयोऽलङ्कारः	264
ऊर्जस्व्यलङ्कारः	265
समाहितम्	265
संसृष्टिः	266
सङ्करः	267
अलंकाराणां काव्येषु अनिवार्यत्वम्	268

षोडशः किरणः

विषयः **पृष्ठाङ्कः**
इवार्थादिनिरूपणम् **269-275**
इवार्थकशब्दाः 269
एतेषामुदाहरणम् 269
पुंलिङ्गशब्दाः 269
स्त्रीलिङ्गशब्दाः 270
नपुंसकलिङ्गाः 271
निरोष्ठ्यपुंलिङ्गशब्दाः 272
निरोष्ठ्यस्त्रीलिङ्गशब्दाः 272
निरोष्ठ्यनपुंसकलिङ्गशब्दाः 273
अनुलोमप्रतिलोमशब्दाः 273
निरोष्ठिक्रियाः 274
पादपूरणोपयोगिनः सामान्यशब्दाः 274

सप्तदशः किरणः

काव्योचितं पुरादिवर्णन-निरूपणम् **276-293**
महाकाव्यादिप्रबन्धेषुपुरादिषु वर्ण्यानि 276
पुरे वर्ण्यानि 277
नृपे वर्ण्यानि 277
देव्यां वर्ण्यानि 278
देव्याः प्रत्यङ्गवर्णने क्रमः 278
राजपुत्रे वर्ण्यानि 279
मन्त्रिणि वर्ण्यानि 280
पुरोहिते वर्ण्यानि 281
गर्भिण्यां वर्ण्यानि 282
पुत्रादीनां जननसमये वर्ण्यानि 282
सभायां वर्ण्यानि 283
उद्याने वर्ण्यानि 284

विषयः	पृष्ठाङ्कः
सिन्धौ वर्ण्यानि	285
शैले वर्ण्यानि	285
नद्यां वर्ण्यानि	285
दूते वर्ण्यानि	286
सरस्यां वर्ण्यानि	286
प्रयाणे वर्ण्यानि	287
सेनादौ वर्ण्यानि	287
अश्वे वर्ण्यानि	287
घोटकानां जातिः	288
घोटकवयःक्रमः	289
अष्टमङ्गलहयः	289
पञ्चमङ्गलहयः	289
नन्दीमुखोऽश्वः	290
घोटकानां सहजगुणाः	290
घोटकानां दण्डप्रयोगकालः	290
आश्रमे वर्ण्यानि	291
पदातौ वर्णनीयाःगुणाः	292
वारणे वर्ण्यानि	292
नार्यां वर्ण्यानि	293

अष्टादशः किरणः

काव्योचितं प्रातःकालादि-वर्णन निरूपव्णम्	294-304
प्रभाते वर्ण्यानि	294
सूर्योदये वर्ण्यानि	294
चन्द्रोदये वर्ण्यानि	295
सन्ध्यायां वर्ण्यानि	296
वारिकेलौ वर्ण्यानि	296
सुरते वर्ण्यानि	297

विषयः **पृष्ठाङ्कः**

कसुमावचये वर्ण्यानि 297
स्वयंवरे वर्ण्यानि 298
सुरापाने वर्ण्यानि 298
विवाहे वर्ण्यानि 298
ग्रामे वर्ण्यानि 299
आखेटे वर्ण्यानि 299
देशे वर्ण्यानि 300
समरे वर्ण्यानि 300
विरहे वर्ण्यानि 301
मन्त्रे वर्ण्यानि 302
मन्त्रस्थानानि 303
स्यन्दने वर्ण्यानि 304

एकोनविंशः किरणः

काव्योचितं ऋतुवर्णननिरूपणम् 305-367
काव्येषु वसन्तवर्णनस्यप्राथम्ये हेतुः 305
काव्येषु ऋत्वन्तरवर्णनस्यप्राथम्ये निर्दोषत्वम् 305
वसन्ते वर्णनीयाः पदार्थाः 305-337
तत्र मलयपवनः 305
पुष्पयुक्ताः पादपादयः 306
सुरम्याः दिवसाः 306
सुखदाः प्रदोषाः 306
नारीणां कामवर्धनम् 306
मलयपवनस्य वारणत्वम् 306
वृक्षादीनां दलद्युभेदः 307
वृक्षादिषु मधुक्षरणादि 307
वसन्ते वर्ण्यानां वृक्षविशेषाणां नाम्ना निर्देशः 307
सहकारे वर्ण्याः पदार्थाः 308

वकुले वर्ण्याः पदार्थाः 308
पलाशे वर्ण्याः पदार्थाः 308
अशोके वर्ण्याः पदार्थाः 309
माधवीषु वर्ण्याः पदार्थाः 309
करके वर्ण्याः पदार्थाः 309
द्राक्षायां वर्ण्याः पदार्थाः 309
लवंगे वर्ण्याः पदार्थाः 309
भुर्जवृक्षे वर्ण्याः पदार्थाः 309
वसन्ते पुष्पविशेषेषु वर्ण्याः पदार्थाः 310-315
केतक्यां वर्ण्याः पदार्थाः 310
करके वर्ण्याः पदार्थाः 310
किंशुके वर्ण्याः पदार्थाः 312
केसरे वर्ण्याः पदार्थाः 313
सुदीर्घपुष्पेषु वर्ण्याः पदार्थाः 314
कलिकासु वर्ण्याः पदार्थाः 314
मल्लिकायां वर्ण्याः पदार्थाः 314
चक्राकारपुष्पेषु वर्ण्याः पदार्थाः 315
वसन्ते वर्ण्याःअपरे पदार्थाः 315-
मधुपः 315
पिकाः 316
रसिकाः 316
भृंगः 316
पक्षिणः 316
दोलाक्रीडाः 317
कौसुमकंचुकम् 317
पुष्पच्छत्रम् 317
दंपत्योः प्रेमकलहः 318
दंपत्योः मानभंगः 318
कुसुमावचायः 318
वनभ्रमणम् 319

कविगोष्ठी 319
चन्द्रकिरणाः 319
पुष्पमण्डपः 319
कुञ्जमन्दिरम् 320
रत्युत्सवादयः 320
वृक्षदोहदलक्षणम् 320
वृक्षलतादीनां दोहदवर्णनक्रमः 32-328
प्रियंगुलतायाः दोहदोपायः 321
केतक्याः दोहदोपायः 321
बकुलस्य दोहदोपायः 322
रसालस्य दोहदोपायः 322
कुरण्टकस्य दोहदोपायः 323
कर्णिकारस्य दोहदोपायः 323
सिन्धुवारकस्य दोहदोपायः 324
कुसुम्भस्य दोहदोपायः 324
श्यामालतायाः दोहदोपायः 324
तिलकस्य दोहदोपायः 325
पुंनागस्य दोहदोपायः 325
नमेरोः दोहदोपायः 326
मन्दारस्य दोहदोपायः 326
कोविदारस्य दोहदोपायः 327
चम्पकस्य दोहदोपायः 327
कदम्बस्य दोहदोपायः 328
मदनोत्सववर्णनम् 328
ऋतुक्रीडाविवेकमते वसन्तोत्सववर्णनक्रमः 328
मदनपुजनविधिः 329
मदनदिग्विजयक्रमः 329
मदनस्य नृपतित्वम् 330
मदनस्य सहचरः 330
मदनस्य सचिवः 330

मदनस्य पत्तनम् 330
मदनस्य वनिताः 331
मदनस्य लतागृहम् 331
मदनस्य दूतः 332
मदनस्य आनकः 332
मदनस्य गजः 332
मदनस्य अश्वः 332
मदनस्य सैनिकाः 333
मदनस्य रथः 333
मदनस्य सिंजिनी 333
मदनस्य धनुरादयः 333
मदनस्य सायकाः 333
मदनस्य सायकेषु चूतस्य प्राधान्यम् 334
मदनस्य पंचबाणानां प्रभावाः 334
मदनस्य परमायुधाः 335
मदनस्य केतनम् 335
मदनस्य खड्गादयः 335
मदनस्य चामरम् 335
मदनस्य छत्रम् 335
मदनस्य मर्दलः 336
मदनस्य सुषिरादिवाद्याः 336
मदनस्य गायकः 337
मदनस्य नर्तनशीलाः वेशांगनाः 337
ग्रीष्मे वर्ण्याः पदार्थाः 338-347
आतपसंयोगः 338
सूर्यरश्मेः तीक्ष्णत्वम् 338
दिशामुष्णता 338
भूमेः संतप्तिः 338
रात्रेः अल्पता 338
वनानां दाहः 338

दिवसस्य दीर्घता 338
तृष्णायाः वृद्धिः 338
ग्लानिः 338
स्वेदोत्पतिः 338
वनस्य संतप्त्यादयः 338
मन्मथस्य शान्तिः 338
कान्तालिंगने शीतलता 339
विरोधिजन्तूनामेकत्रस्थितिः 339
सरोवरादीनां जलशुष्कता 339
मृगतृष्णा 339
प्रपा 340
स्त्री 340
शीतलस्थानम् 340
हारादिभूषणानि 340
तन्वंशुकम् 341
सुभूषणम् 341
आम्रादेः फलपक्वता 341
सक्तु 342
पेयम् 342
सरोवरः 342
गिरिशृंगादेः स्फोटनम् 343
वृक्षादेः शुष्कपर्णता 343
व्यजनम् 343
वल्लकीनादः 343
औशीरव्यजनम् 343
दिशां धूमवर्णता 344
धूलिनां उद्धुतत्वम् 344
पथिकनां श्रमः 344
जलयंत्रगृहम् 345
गवाक्षानिलसेवनम् 345

स्नानादिभोगाः	346
जलक्रीडा	346
प्रभा	346
चन्दनालेपनम्	346
ग्रीष्मे वर्ण्यानां वृक्षविशेषाणां नाम्ना निर्देशः	347
ग्रीष्मे न वर्णनीयानां पदार्थानां नाम्ना निर्देशः	347
वर्षासु वर्णनीयाः पदार्थाः	347-356
सजलाः नीलमेघाः	347
घनानां संचरणम्	348
घनगर्जनम्	348
घनानां गिरिकूटे वासः	348
मेघज्योतिः	348
तमसः बाहुल्यम्	348
रमणीया वृष्टिः	348
करकापातः	348
चपलाप्रभा	348
इन्द्रधनुः	348
सूर्यादीनामदर्शनम्	348
वज्राघातात् वेपथु	349
गिरिशृंगस्य वज्रपातेन दारणम्	349
गिर्यादीनां रम्यत्वम्	349
जलनिर्झरादयः	349
प्रवाहस्य उत्कटनादः	349
पवनस्य वेगः	349
वृक्षादीनां भग्नत्वम्	349
नद्यादीनां गतेः उग्रता	349
जलजन्तूनां सुरतिः	350
भेकानामुच्चरवः	350
हंसानां मानसगतिः	350
चातकानां वृष्टिजलेन तृप्तिः	350

मयूराणां नृत्यम् 351

घृष्ट्यादीनां विलासः 351

बलाकानां संचारः 351

दात्यूहादीनां शब्दः 351

कृषिकाणां प्रमोदः 351

इन्द्रगोपः 352

मेघशब्देन विदूरभूमिषु रत्नोत्पत्तिः 352

पद्मादेः जलमग्नता 352

नारीणां प्रौढकामता 353

रसिकानां प्रेमाधिक्यम् 353

रतोत्सवः 353

कन्दलोत्पत्तिः 353

वनशोभा 353

घनकालस्य कामदेवत्वं राजत्वं वा 354

घनकालरूपस्य राज्ञः गजः 354

घनकालरूपस्य राज्ञः मर्दलः 354

घनकालरूपस्य राज्ञः पताका 354

घनकालरूपस्य राज्ञः धनुः 355

घनकालरूपस्य राज्ञः बाणाः 355

घनकालरूपस्य राज्ञः बाद्यः 355

घनकालरूपस्य राज्ञः स्तुतिपाठकाः 355

घनकालरूपस्य राज्ञः प्रतिहारः 355

घनकालरूपस्य राज्ञः नृत्यकारिणः 355

घनकालरूपस्य राज्ञः काहली 355

घनकाले वर्ण्यानां वृक्षविशेषाणां नाम्ना निर्देशः 355

घनकाले न वर्णनीयानां पदार्थानां नाम्ना निर्देशः 356

शरदि वर्ण्याः पदार्थाः 356-359

कमलविकासः 356

जलनिर्मलता 356

चन्द्रसूर्ययोः पटुत्वम् 356

कुसुमादीनां चारुता 357

सर्पाणां संचारः 357

मयूराणां मौनतादयः 357

हंसानां मानसत्यागादिः 357

नदीनां गतेः मन्दता 358

नदीतटानां रम्यता 358

घनानां विशदता 358

नभसः निर्मलता 358

दिशां प्रसन्नता 358

दूतीनां प्रेरणम् 358

शालीनां पक्वता 358

काशानां प्रफुल्लता 358

कलमगोपीनां गीतिः 359

कर्दमानां शुष्कता 359

मृगाणां सस्यभक्षणम् 359

वृषभाणां मत्तत्वम् 359

कामिनीनां मानपोषणम् 359

जनानां हर्षबाहुल्यम् 359

कान्तानामभिसारः 359

शरदि वर्ण्यानां पुष्पणां नाम्ना निर्देशः 359

शरदि न वर्ण्यानां पदार्थानं नाम्ना निर्देशः 359

हेमन्ते वर्ण्याः पदार्थाः 360-364

दिवसस्य लघुता 360

रात्रेः दीर्घता 360

उत्तरानिलस्य संचारः 360

हेमाद्रेः शृंगस्य वृद्धि 360

सुर्यस्य तेजोहानि 360

शालीनां पक्वतादयः 360

पद्मानां विलोपः 360

वह्निसेवा 360

मुग्धानां कान्तालिंगनम् 361
वरस्त्रियाः सुरतेच्छा 362
विपरीत रतिक्रीडा 362
गुरुवस्त्रादीनां व्यवहार: 362
हसन्तिकायन्त्रादीनां व्यवहारः 363
तैलमर्दनम् 363
घृतापूपादीनां भोजनम् 363
युवतीनां स्तनयो उष्णता 363
हेमन्ते वर्ण्यानां वृक्षाणां नाम्ना निर्देशः 363
हेमन्ते न वर्ण्यानां पदार्थानां नाम्ना निर्देशः 363
शिशिरे वर्ण्याः पदार्थाः 364-367
सूर्यरश्मेः स्वल्पता 364
सूर्यस्य न्युनोष्णता 364
तुषारस्य पतनम् 364
पद्मस्य परिदग्धता 365
गवाक्षस्य मुखसंरोधादयः 365
कस्तूर्यादेः लेपनम् 365
रसिकोरसि रसिकायाः स्थितिः 366
मृगनाभिभ्यः कस्तूर्याः उद्भवः 366
श्रीपुष्पादिषु रजसः उद्भवः 366
सरललोध्रादिगन्धाढ्यः पवनः 366
अश्वादेः धामनम् 366
शस्त्रादेः अभ्यासः 366
लवणस्यास्वादनम् 366
सूर्यकिरणस्य सेवनम् 366
गोधुमादिना धरणीरम्यता 366
वराहादीनां मत्तत्वम् 366
दारुनिर्जासोत्पत्तिः 367
कौषेयोत्पत्तिः 367
करीरकुसुमानां क्षतत्वम् 367
शिशिरे न वर्ण्यानां पदार्थानां नाम्ना निर्देशः 367

विंशः किरणः

काव्येषु पुत्रादीनां बाल्यकालादिषु चेष्टावर्णनम् 368-372
पुत्रादीनां बाल्यचेष्टाः 368
पुत्रादीनां पौगण्डचेष्टाः 368
पुत्रादीनां कैशोरयौवनचेष्टाः 369
कुमारीणां कैशोरयौवनचेष्टाः 370

एकविंशतितमः किरणः

उपमाननिरूपणम् 373-393
स्त्रीणां वेण्याद्यवयवानामुपमानानि 373
वेण्याः 373
ललाटस्य 373
कपोलस्य
भ्रुवोः 373
नेत्रयोः 374
कटाक्षस्य 374
श्रुतेः 380
नासादण्डस्य 382
निःश्वासपवनस्य 383
अधरस्य 383
दन्तानाम् 384
हासस्य 386
वचनस्य 387
रसनायाः 390
चिवुकस्य 390
वदनस्य 390
कण्ठदेशस्य 390
वाहुयुग्मयो 390

हासस्य 386
वचनस्य 397
रसनायाः 390
चिबुकस्य 390
वदानस्य 390
कण्ठेशस्य 390
पाणेः 390
अङ्गुल्याः 390
नखस्य 391
स्तनयोः 391
कट्याः 391
रोमाल्याः 391
नाभेः 391
त्रिवल्याः 391
जघनस्य 391
नितम्बस्य 392
चरमस्य 392
ऊरोः 392
जंघायुग्मस्य 392
पादयोः 392
पादाङ्गुल्याः 392
नखावल्याः 392
गतेः 392
कान्त्याः 392
सौकुमार्यस्य 392
स्त्रीणां कैशोरकादिवेषादि वर्णनम् 392
पुरुषांगानामुपमानानि 393

द्वाविंशतितमः किरणः

कविसंमत्यानिनिरूपणम् 394-410

अकीर्त्यादिवर्णने कविसंमतिः 394

कविसंमत्या श्वेतादिवर्णतया वर्णनीयपदार्थनिरूपणम् 396-400

श्वेतवर्णपदार्थाः 396

नीलवर्णपदार्थाः 399

शोणवर्णपदार्थाः 399

पीतवर्णपदार्थाः 399

धूसरवर्णपदार्थाः 400

कविसंमत्या वृत्ताद्याकारेण वर्णनीयपदार्थनिरूपणम् 400

संपूर्णगर्भवृत्ताकारपदार्थाः 400

वृत्ताकारपदार्थाः 400

त्रिकोणाकारपदार्थाः 401

वक्राकारपदार्थाः 401

तीक्ष्णपदार्थाः 401

लघुपदार्थाः 401

गुरुपदार्थाः 401

सुखदपदार्थाः 401

दुःखदपदार्थाः 401

स्थिरपदार्थाः 402

अस्थिरपदार्थाः 402

मन्दगामिपदार्थाः 402

क्रूरस्वरकारकपदार्थाः 402

बलिष्ठपदार्थाः 402

सुरूपसंपन्नपदार्थाः 402

उष्णपदार्थाः 403

मधुरपदार्थाः 403

अष्टभोगः 403

षोडशशृंगारः 403

कीर्त्यादिवर्णनक्रमः 403
लावण्यलक्षणम् 403
प्रेमादिलक्षणम् 404
रागलक्षणम् 404
पुरुषेषु वर्णनीयाः गुणाः 404
स्त्रीपुंसयोः सर्वाङ्गवर्णानक्रमः 405
एकस्मादारभ्य सहस्रं यावत् संख्यावाचकशब्दानां संकेतवर्णनम् 406-407
एकम् 406
द्वे 406
त्रिः 406
चतुः 406
पञ्च 406
षट् 406
सप्त 406
अष्टौ 406
नव 407
दश 407
एकादश 407
द्वादश 407
त्रयोदश 407
चतुर्दश 407
पञ्चदश 407
षोडश 407
अष्टादश 407
विंशः 407
शतम् 407
सहस्रम् 407
राजसभाप्रवेशार्हः पुरुषः 407
राजसभायोग्याः व्यवहाराः 408
कीर्तिप्रकाशपुरुषः 409

अकीर्तिप्रकाशपुरुषः 409
पराजितशत्रोः धर्माः 409
नृपाग्रभाषिणो जनाः 410

त्रयोविंशः किरणः

समस्यापूरणोपायनिरूपणम् 411-420
कल्पादिना समस्यापूरणनिर्देशः 411
कल्पादिना लघुपदार्थानां गुरुत्वादिवर्णनम् 411
कल्पादिकालेन 412
सिन्धुना 412
लघुभिः 412
विष्णोरघोमुखतादिना वैपरीत्यादिवर्णनम् 412
प्रतिविम्बवैपरीत्यम् 413
उदकादौ युग्मतावर्णनम् 413
चन्द्रादिना वर्णविपर्ययवर्णनम् 413
चन्द्रेण 413
अन्धकारेण 413
रविणा 414
अन्यवस्तूनां विपर्ययवर्णनम् 414
कुकीर्त्या 414
अन्यवस्तूनाम् 414
संध्यारागेण 415
वर्णान्तरसंयोगात् 415
दृष्टान्तवद्धयदिशब्दादिना 415
पदभङ्गादिना समस्यापूरण-वर्णनम् 415
पदभङ्गेन 415
देवप्रसादेन 416
प्रश्नोत्तरेण 416
समासविभिन्नसाध्यात् 416

हाटकेश्वरयात्रादिना स्वर्गादीनां पातालाद्यागमनवर्णनम् 416
हाटकेश्वरयात्रया 416
जगत्प्रलयेन 416
ग्रहास्तेन 416
पाथोधिमन्थसमयेन 416
प्रतिविम्बेन 417
संग्रामेण 417
हरिश्चन्द्रपुरेण 417
चन्दनशस्त्रपातेन 417
चण्डीशेन 417
सद्मना 418
गुरुतया 418
चित्रसमस्यापूरणोपायाः 418
क्षितिख्यातिकतिच्छमस्यानां कथनम् 419

चतुर्विंशतितमः किरणः

नायका (पुरुषा) दिनिरूपणम् 421-430
शशजातिपुरुषः 421
मृगजातिपुरुषः 421
वृषजातिपुरुषः 421
अश्वजातिपुरुषः 421
पद्मिनीस्त्री 422
चित्रिणीस्त्री 422
शंखिनीस्त्री 423
हस्तिनीस्त्री 423
देवसत्त्वा नायिका 423
गन्धर्वसत्त्वा नायिका 424
यक्षसत्त्वा नायिका 424

प्रेतसत्त्वा नायिका 424
नायिकाविशेषतोषकारिण: नायकविशेषा: 424
अन्तर्बाह्य भेदेन रतस्य द्विविधत्वम् 424
अन्तारतम् 424
बाह्यरतम् 425
चन्द्रकलानिरूपणम् 425
कामचालनविधि: 425
कामप्रदादिबन्धनिरूपणम् 426-427
कामप्रदबन्ध: 426
विपरीतबन्ध: 426
नागरबन्ध: 426
रतिपाशबन्ध: 426
रसबन्ध: 426
प्रियतोषणबन्ध: 426
स्मरपदबन्ध: 426
अर्धसंपुटबन्ध: 427
स्तनभरबन्ध: 427
रतिसुन्दरबन्ध: 427
ऊरुपीडकबन्ध: 427
स्मरचक्रबन्ध: 427
आलिङ्गनविधिनिरूपणम् 427-429
स्पृष्टकालिङ्गनम् 427
पीडकालिङ्गनम् 427
विद्धकालिङ्गनम् 427
घृष्टालिङ्गनम् 428
दुग्धजलालिङ्गनम् 428
ऊरूपगूहनालिङ्गनम् 428
लालाटिकालिङ्गनम् 428
जघनोपगूहनालिङ्गनम् 428
लतावेष्टितालिङ्गनम् 428

वृक्षारूढालिङ्गनम् 428
आलिङ्गनरहितस्यरतस्य निन्दा 429
बालादिनिरूपणम् 429
नायिकाविशेषवशीकारणोपायविशेषाः 429
ऋतुविशेषेषु सुखदा नायिकाविशेषाः 430
बालादिलालनोपायाः 430
स्त्रीपुंसयोःशरीरे कामस्य वासस्थानम् 430
चित्रिण्यादीनां रतितृष्णवर्धनकालनिर्देशः 430

पंचविंशतितमः किरणः

संगीतादिनिरूपणम् 431-458
संगीतोत्पत्तिप्रकारः 431
संगीतस्य प्रचारकाः 431
संगीतस्य प्रशस्तिः 431
संगीतस्य प्रयोजनम् 431
संगीतस्य स्वरूपम् 432
मार्गदेशभेदेन संगीतस्यद्विविधत्वम् 432
नादस्य वैशिष्ट्यम् 432
नादोत्पत्तिप्रकारः 432
नादपदस्य निरुक्तिः 432
मन्द्रादिभेदेन नादस्य त्रैविध्यम् 433
आहतादिभेदेन नादस्य द्वैविध्यम् 433
गीतस्य लक्षणम् 433
धातोः लक्षणम् 434
मातोः लक्षणम् 434
श्रुतिस्वरादनीनामुत्पत्तिक्रमः 434
पञ्चमादिस्वराणां श्रुतिसंख्यानिर्देशः 434
स्वरलक्षणम् 434
षड्जादिस्वराणां नाम्ना निर्देशः 434

षड्जादिस्वराणां लक्षणनिरूपणम् 434-435

षड्जस्वरः 434

ऋषभस्वरः 435

गान्धारस्वरः 435

मध्यमस्वरः 435

पञ्चमस्वरः 435

धैवतस्वरः 435

निषादस्वरः 435

षड्जादिस्वरविशेषख्यापकजीवविशेषाः 436

ग्रामलक्षणं, ग्रामस्यत्रिविधत्वं च 436

मूर्च्छनालक्षणम् एकविंशति विधत्वं च 436

तानलक्षणम् 436

तानस्य एकोनपञ्चाशद्विधत्वम् 436

रागसामान्यलक्षणम् 437

श्रीरागः 437

कर्णाटः 437

रेवगुप्तः 437

वसन्तः 437

भैरवम् 437

वङ्गालः 438

कामोदः 438

कामोदिका 438

वराडी 438

दक्षिणगुज्जरी 438

गुज्जरी 438

तोडी 439

मालश्रीः (मालसी?) 439

सिन्धुडा 439

रामकिरिः 439

पढमञ्जरी 439

वेलावली	440
गौडी	440
मेघराग:	440
नाट:	440
घण्टारव:	440
नटनारायण:	441
भूपति:	441
शंकराभरण:	441
गौड:	441
देशी	441
धनाशी	442
कोलाहल:	442
देशाख्य:	442
शबरी	442
मध्यमादि:	443
मल्लार:	443
देशकारि:	443
केदार:	443
मालवराग:	443
हिन्दोल:	443
गौरी	444
गुण्डकिरि:	444
गान्धार:	454
मेघरञ्जी	454
संकीर्णरागाणां निरूपणम्	444-445
पौरवी	444
कल्याणी	444
सारङ्गी	445
नट्टमल्लारिका	445
वल्लवी	445
मुखावरी	445
कर्णाटिका	445
आशावरी	445

रामकेरिः 445
रागतत्त्वनिर्णयस्य अशक्यत्वम् 445
रागाणां गानकालनिर्देशः 446
रागाणामकालगाने दोषः तत्प्रतिप्रसवश्च 446
शिक्षाकारादिभेदेन पञ्च-विधगायकानां निरूपणम् 447
शिक्षाकारः 447
अनुकारः 447
रसिकः 447
रञ्जकः 447
भावुकः 447
गायकानामेकलादिभेदत्रयनिरूपणम् 447
एकलगायकः 447
यमलगायकः 447
वृन्दगायकः 447
गायकदोषाः 447
तालाङ्गपरिभाषा 448
अनुद्रुतादिभेदेन तालाङ्गस्य पञ्चविधत्वम् 448
तालाङ्गविन्यासप्रकारः 448
तालघातस्थानोच्छ्राय कथनम् 449
तालशब्दस्य व्युत्पतिः 449
तालनिरूपणम् 449-451
कुड्डकतालः 449
आदितालः 449
एकताली 450
यतितालः 450
त्रिपुटातालः 450
झम्पकतालः 450
अड्डतालः 450
उपाड्डतालः 451
निःसारतालः 451
मण्ठकतालः 451
रूपकतालः 451
चञ्चत्पुटादितालानां स्वर्गावस्थितिसूचनम् 451

संगीते वाद्यानामनिवार्यत्वम् 451
ततादिभेदेन वाद्यनां चतुर्विधत्वम् 452
ततादिवाद्यभेदानां निरूपणम् 452
ततवाद्यम् 452
आनद्धवाद्यम् 452
धनवाद्यम् 452
ततादिवाद्यविषयनिर्देशः 452
नर्तनस्य नाट्यादिभेदेन त्रिविधत्वम् 452
नाट्यलक्षणम् 452
नृत्यलक्षणम् 453
नृत्ये विलासस्य लक्षणम् 453
नृत्तलक्षणम् 453
लास्यलक्षणम् 453
लास्यस्य स्फुरितयौवतभेदेन द्विविधत्वम् 453
स्फुरितलास्यलक्षणम् 453
यौवतलास्यलक्षणम् 453
लास्यताण्डवयोर्भेदः 453
सभानिवेशनप्रकारः 454
सभासदःलक्षणम् 454
नर्तकीलक्षणम् 455
नृत्यवर्ज्यस्त्रीलक्षणम् 455
अभिनयलक्षणम् 455
आहर्यादिभेदेन अभिनयस्य चतुर्विधत्वम् 455
नाट्यप्रयोगे अवधिः 455
ग्रन्थस्योपसंहरणम् 455-468
इष्टदेवतानुग्रहेण ग्रन्थस्य सदादृतत्वकामना 455
ग्रन्थस्य चिरस्थायित्वकामना 456
ग्रन्थकारस्य आश्रयदातुः परिचयः 457
ग्रन्थकारस्य पितुः परिचयः 457
ग्रन्थसमाप्तिसूचना 458

प्रस्तावना

०.१.०

प्रथितमेवेदं यत् वेदादिशास्त्रविमुखानां सुकुमारमतीनां राजपुत्रप्रायाणां विनेयानां सरसेन वर्त्मना कर्तव्यमुपदेष्टुं प्रवर्तमानानां काव्यानां निर्माणे विमर्शेन च व्युत्पादकेऽलङ्कारशास्त्रे कविशिक्षापरः कविचिन्तामणिसंज्ञकः कश्चन ग्रन्थो विराजते इति।

यस्य शास्त्रस्यावगमनेन स्वरूपदोषगुणालङ्कारादिनिर्णयपुरःसरं काव्यस्य निर्माणे विमर्शने शक्तिरुन्मिषति तदलङ्कारशास्त्रमिति विद्वांसः कथयन्ति।[१]

व्याकरणशास्त्रं भाषायां नैपुण्यमिवालङ्कारशास्त्रं काव्ये व्युत्पत्तिमुपकल्पयति। व्याकरणादिशास्त्रेषु निष्णातोऽपि विद्वान् अलङ्कारशास्त्रपरिचयं विना 'धीरो वरो नरो याति' इत्येवं प्रयोगे आहतविसर्गता नाम दोषो भवतीति, 'करकङ्कणकर्णावतंसा'दिपदानां काव्ये प्रयुक्तानां पूर्वाणि दुष्टानि पराण्यदुष्टानि च निर्णेतुं न शक्नोति। किं च न केवलं लौकिकानामपितु वैदिकानां वाक्यानां संपूर्णार्थावगमनाय शास्त्रस्यास्य सम्यग् ज्ञानं नितरामपेक्षितमस्ति। एतत्सर्वं मनसि कृतवतैवाचार्येण राजशेखरेण काव्यमीमांसायामलंकारशास्त्रस्य वेदाङ्गत्वमङ्गीकृतम्[२]। तथा चालंकारशास्त्रं व्याकरणादिशास्त्रवदवश्यमध्येतव्यं विद्यते।

०.१.१.० अलङ्कारशास्त्रस्य संज्ञाविशेषाः-

काव्यलक्षणादिनिरूपणपरं शास्त्रमेतद् अलङ्कारशास्त्रं, साहित्यशास्त्रं, क्रियाकल्पः, काव्यशास्त्रमिति बहुधा व्यवह्रियते।

---

(१) द्र. मम्म. का. प्र. (प्रस्तावना) पृ- १

(२) द्र. राज. का. मी.- २, पृ- ६

०.१.१.१ अलङ्कारशास्त्रम्-

काव्यलक्षणादिनिरूपणपरस्यास्य शास्त्रस्य अलङ्कारशास्त्रमिति संज्ञा सुप्रथितातिप्राचीना चास्ते । 'अलंक्रियते अनेन' इति करणव्युत्पत्या निष्पन्नोऽलंकारशब्दः उपमाद्यलंकारपरः, अलंकृतिरलंकार' इति भाव व्युत्पत्या निष्पन्नोऽलंकारशब्दः परं दोषापगमगुणालंकारसंवलननिमित्तककाव्यसौन्दर्यपरः इत्युपपादयति तत्रभवानालंकारिकधुरन्धरो वामनाचार्यः[३] । अलंकार-विषयकशासनपरत्वाच्छास्त्रस्यास्य अलंकारशास्त्रमिति संज्ञा अन्वर्था प्रचलति । सुप्रतिष्ठितकीर्त्तिभिः भामह-दण्डि-उद्भट-रुद्रट-वामनैश्चिरन्तनालंकारिकै-रलंकारा एव काव्ये प्रधानमिति सिद्धान्तीकृत्य 'प्राधान्येन व्यपदेशा भवन्ती'ति न्यायेन अनुमानापरपर्यायन्यायप्रधाने शास्त्रे न्यायशास्त्रव्यवहारवदलंकार-प्रधानेऽस्मिन् शास्त्रे अलंकारशास्त्रव्यवहारः समर्थितो वर्तते ।

०.१.१.२ साहित्यशास्त्रम्-

गच्छति काले काव्ये शब्दार्थसाहित्यतत्त्वविमर्शकैः कुन्तकाचार्यप्रभृतिभिरालंकारिकैः काव्यसौन्दर्याधायकयोः शब्दार्थयोरन्योन्यानतिरिक्तमनोहारिणीमवस्थितिं सुस्पष्टमुपपादयद्भिरलंकारशास्त्रं साहित्यशास्त्रमिति संज्ञान्तरेण व्यवहृतमास्ते । तथा चालंकारशास्त्रसंज्ञापेक्षया साहित्यशास्त्रमिति संज्ञा प्रचुरप्रचारा अनुवर्तते ।

'गुणवचनब्राह्मणादिभ्यः ष्यञ्'[४] इत्यनेन सूत्रेण सहितशब्दात् 'भावे ष्यञ्' प्रत्यये साहित्यपदं निष्पद्यते । काव्ये 'शब्दार्थयोः शोभाशालितां प्रति कापिअन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः साहित्यमि'ति[५] कुन्तकाचार्येण, 'शब्दार्थयोर्यथावत् सहभावेन विद्या साहित्यविद्या'[६] इति राजशेखरमहोदयेन च सुस्पष्टं साहित्यशब्दार्थः विशदीक्रियते ।

---

(३) द्र. वाम. का. सू. १-१/२,३

(४) द्र. पाणि. अष्टा. ५-१-१२४

(५) द्र. कुन्त. वक्रो. १/१७

(६) द्र. राज. का. मी.-२, पृ- १७

०.१.१.३ क्रियाकल्पः-

वात्स्यायनस्य कामसूत्रं रामायणस्य उत्तरकाण्डं[७] च आधृत्य अलंकारशास्त्रस्य 'क्रियाकल्प' इति संज्ञान्तरमासीदिति स्वकीये प्रबन्धे[८] डा. वें० राघवन्-महोदयेन प्रतिपादितम्। परन्तु तदपरैः नाङ्गीक्रियते[९]।

०.१.१.४ काव्यशास्त्रम्-

काव्यं शास्ति काव्यपरिशीलनरीतिमुपदिशतीति व्युत्पत्त्या, काव्यस्य निगूढतत्त्वानां शंसनं करोतीति युक्त्या वा अलंकारशास्त्रस्य काव्यशास्त्रमिति संज्ञा सूक्तेति अलंकारशास्त्रचरित्रकाराः केचित्[१०] कथयन्ति।

इत्थमलंकारशास्त्रं यद्यप्यलंकारशास्त्रप्रभृतिभिः संज्ञाविशेषैर्व्यवह्रियते तथापि काव्यतत्त्वसमीक्षणमेव तस्य परमं प्रयोजनमित्यत्र नास्ति काऽपि विप्रतिपत्तिः।

०.१.२ अलंकारशास्त्रस्य उद्भवकालः-

कदा केन वेदमलंकारशास्त्रं प्रथममाविष्कृतमिति कथनं दुःशकम्। वेदेषु उपमातिशयोक्त्यादीनामलंकाराणामुदाहरणानि बाहुल्येन लभ्यन्ते इत्यतोऽलंकारशास्त्रस्यापि वेदमूलत्वं वेदोपजीवकत्वं वेदाङ्गोपाङ्गसमानकालिकत्वं च प्रतिपत्तव्यं भवति।

किं चाग्नेयपुराणे तत्रभवता भगवता वेदव्यासेन दृश्यश्रव्यभेदोपेतं काव्यम्, अलंकाराः रसादयश्च निर्दिश्यन्ते। अतः पुराणकाले (द्वापरयुगे) अलंकारशास्त्रमेवासीदिति प्राचीनाः कथयन्ति। इदानीन्तनाः परमाग्नेयपुराणं पुराणान्तरापेक्षया अतीवार्वाक्तनमिति कथयन्तः अलंकारशास्त्रमप्यर्वाक्तनं[११] मन्यन्ते।

---

(७) द्र. वाल्मी. रामा. ७-९४-७

(८). द्र. J O R Vol-IX.PP.128-34

(९) द्र. काणे. पृ- ४२४-२६

(१०) द्र. कृष्ण..अलं. पृ- २१-२८

(११) द्र. काणे. पृ- १२

प्रथितादालंकारिकात् तत्रभवतो दण्डिनः (क्रि.प. ६६०-६८०) काश्यपवररुचिब्रह्मदत्तनन्दिस्वामिभिरलंकारशास्त्राणि विरचितान्यासन्निति काव्यादर्शस्य हृदयङ्गमाश्रुतानुपालिनीटीकाभ्यामवगम्यते इत्यपरे वदन्ति[१२]।

अलंकारशास्त्रचरित्रकाराः परमधुनोपलब्धेष्वलंकारशास्त्रेषु नाट्यशास्त्रं प्राचीनतममिति अभिप्रयन्ति, कथयन्ति चालंकारशास्त्रं भरतोपज्ञमिति । स चासौ नाट्यशास्त्रकारो भरतस्त्रेतायुगोद्भवः इति नाट्यशास्त्रपरिशीलनादवगम्यते । परं तु अद्योपलभ्यमानं नाट्यशास्त्रं क्रि.पू. द्वितीयशतके विरचितमिति समीक्षकाः कथयन्ति[१३]।

प्रथितवैयाकरणेन तत्रभवता पाणिनिना शैलालिकृशाश्विपदे व्युत्पादयता स्वपूर्ववर्तिनः शैलालिनः कृशाश्विनश्च नटविशेषान् अभ्युपगच्छता शिलालिना कृशाश्वेन च प्रोक्तानि नटसूत्राण्यासन् इत्यभ्युपगम्यते[१४]। पाणिनिपूर्ववर्तिना यास्काचार्येण निरुक्ते विविधोपमानां निरूपणं कृतं दृश्यते । यास्कात् प्राक्तनेनाचार्येण उपमायाः लक्षणमुपन्यस्तमास्ते[१५]। तथा च पाणिनेः (क्रि.पू.७००)प्रागेव अलंकारशास्त्रं प्रथितमासीदिति केचिदाहुः ।

अन्ये परं प्रसिद्धेषु अलंकारनिबन्धेषु कालिदासकृतिभ्यः उदाहरणपद्यानामुपदर्शनात् कालिदासात् (क्रि.पू. २००-१००) परमेवास्य प्रचुरप्रचारोऽभवदिति कथयन्ति[१६]।

पुनरन्ये शकक्षत्रपस्य रुद्रदाम्नः गिरिनगरशिलालेखे कतिपयालंकारिकसिद्धान्तानामुल्लेखो दृश्यते इत्यतः गिरिनगरशिलालेखकाले (क्रि.पू. १५०)अलंकारशास्त्राण्यासन् इत्यवधार्यते इत्याहुः[१७]।

आचार्येण राजशेखरेण काव्यमीमांसायां सकलसाहित्यप्रस्थानसंस्थापकानां नामानि पृथक् पृथक् प्रकटितानि । तेषु भरतातिरिक्तानां

---

(१२) द्र. काणे. पृ- ४, द्र. कृष्ण. अलं. पृ- १४

(१३) द्र. कृष्ण. अलं. पृ- ४८

(१४) द्र. पाणि. अष्टा. ४-३-११०

(१५) द्र. यास्क. निरु. ३/१३

(१६) द्र. मम्म. काप्र. (प्रस्तावना) पृ- १

(१७) द्र. काणे. पृ- ४१६

साहित्यप्रस्थानसंस्थापकानां ग्रन्थानामिदानीमनुपलम्भात् राजशेखरमतं काल्पनिकमित्येवाधुनिका मन्यन्ते[१८]।

यद्यपि निरुक्तरचनाकालिकानामलंकारग्रन्थानामिदानीमनुपलब्धिस्तथापि निघण्टुनिरुक्तादिषु अलंकारलक्षणानां निर्देशात् यास्काचार्यतः (क्रि.पू. ७००) प्रागेवालंकारशास्त्रं प्रादुरभूदिति वक्तुं शक्यते।

०.१.३.० अलंकारशास्त्रस्य विकाशक्रमः-

अलंकारशास्त्रस्य विकासमधिकृत्य चरित्रकाराः विप्रवदन्ते।

तथाहि- वेदाङ्गकालादेवप्रवृत्तायाः अधुनाप्यप्रतिहततया प्रवर्तमानायाः अलंकारशास्त्रधारायाः वेदाङ्गकालतः भामहपर्यन्ता दशा प्रारम्भिकदशेति, भामहादानन्दवर्धनपर्यन्ता दशा रचनात्मकदशेति, आनन्दवर्धनान्मम्मटपर्यन्ता दशा निर्णयात्मकदशेति, मम्मटाद् विश्वेश्वरपाण्डेयपर्यन्ता दशा व्याख्यात्मकदशेति च दशाचतुष्टयं केचिदैतिहासिकाः परिगणयन्ति[१९]।

ध्वनिसिद्धान्तं साहित्यस्य मानदण्डं मन्यमाना अन्ये परं ध्वनिसिद्धान्तात् काव्यशास्त्रस्येतिहासस्य प्रारम्भ इति स्वीकृत्य आदितः आनन्दवर्धनपर्यन्तं ध्वनिपूर्वयुगमिति, आनन्दवर्धनात् मम्मटं यावत् ध्वनियुगमिति, मम्मटात् परमिदानीं यावत् ध्वन्युत्तरयुगमिति अलंकारशास्त्रस्य युगत्रयमङ्गीकुर्वन्ति[२०]।

अलंकारशास्त्रविकासप्रकारं परिशील्य आदितः आनन्दवर्धनं यावत् प्रकाशावस्थेति, आनन्दवर्धनात् मम्मटं यावत् विकासावस्थेति, मम्मटात् परमद्य यावत् समन्वयावस्थेति अलंकारशास्त्रस्य अवस्थात्रयात्मना परिगणनं युक्ततरमिति वयमालोचयामः।

---

(१८) द्र. काणे. पृ- १, बल. संस्कृ. १ पृ- ६०१

(१९) द्र. कृष्ण. अलं. पृ-१७

(२०) द्र. हीरा. संस्कृ. पृ- १७२-७३

०.१.३.१ अलंकारशास्त्रस्य प्रकाशावस्था-

आत्मप्रकाश एवात्रालंकारशास्त्रस्य समभवत् । निघण्टुनिरुक्तादिषु अलंकारतत्त्वमस्फुटप्रकाशं दृश्यते । नाट्यशास्त्रे स्तोकप्रस्फुटितं सत् भामहकृतकाव्यालंकारस्य प्रादुर्भावं यावत् गूढस्वरूपमचलत् । शिलालेखेषु केवलमस्माभिस्तस्य पदचिह्नानि दृष्टानि। भामहस्य काव्यालंकारादलंकारशास्त्रं स्फुटप्रकाशं समभूत्। प्रकाशावस्थायामस्यां भरत-भामह-दण्डि-उद्भट-रुद्रट-वामन-आनन्दवर्धनैः रसालंकारध्वन्यादिसिद्धान्ताः प्रकाशिताः ।

०.१.३.२. अलंकारशास्त्रस्य विकासावस्था-

अलंकारशास्त्रस्य विकासः अवस्थायामस्यां समपद्यत। आनन्दवर्धनात् परमेव अलंकारशास्त्रे महत् परिवर्त्तनं संलक्ष्यते। अत्रैवालंकारिकाः मननशीलाः सन्तः साहित्यतत्त्वं सम्यक् पर्यशीलयन् रसादिसिद्धान्तानां गम्भीरपर्यालोचनं कृत्वा सत्यं तथ्यं चोद्घाटयन् । अस्यामेवावस्थायां मुकुलभट्ट-भट्टतौत-अभिनवगुप्त-कुन्तक-महिमभट्ट-क्षेमेन्द्र-मम्मटप्रमुखाः आचार्या अलंकारशास्त्रस्य विविधान् सिद्धान्तान् प्रतिष्ठाप्यालंकारशास्त्रं सर्वतोमुखं विकासं प्रापयन्।

०.१.३.३ अलंकारशास्त्रस्य समन्वयावस्था-

सकलानां साहित्यतत्त्वानां समन्वयः अस्यामवस्थायां प्रवर्त्तते । अत्र प्राक्तनाचार्याणां ग्रन्थानां व्याख्यानं संलक्ष्यते, नूतनतया निर्मितेषु ग्रन्थेषु प्राक्तनविचाराणां सम्यगालोचनाप्रचलति; रसरीतिगुणालंकारादीनां यथार्थत्वं सरलया रीत्या समुपस्थाप्यते । अत्र युगे रुय्यकपीयूषवर्षजयदेव-विद्याधर-विद्यानाथ-विश्वनाथ-जगन्नाथ-विश्वेश्वर-गोपीनाथप्रभृतयः प्रमुखाः आचार्या अलंकारशास्त्रसिद्धान्तानां समन्वयमुपपादयन्।

इत्थमलंकारशास्त्रस्य वैविध्यपूर्णो विकासः समभवदित्यलं बहुना ।

०.१.४.० संस्कृते आलंकारिकाः-

अपारेऽस्मिन् कविपरम्परावाहिनि संसारे अनेके आलंकारिका अलंकारप्रबन्धाश्चावभन् । परमेतदस्माकं दौर्भाग्यं यदिदानीं तेषां

बहूनामालंकारिकाणामलंकारप्रबन्धानां वा नामान्यपि सर्वैर्नावगम्यन्त इति। तस्मादैतिहासिकैः प्रचुरतया परिगण्यमानान् प्रथितांश्चालंकारिकान् तदीयान् प्रबन्धांश्चाधिकृत्य समासेनात्र प्रस्तूयते। तथा हि, भरत-भामह-दण्डि-उद्भट-वामन-रुद्रट-आनन्दवर्धन-राजशेखर-मुकुलभट्ट-भट्टनायक-भट्टतौत-कुन्तक-धनञ्जय-अभिनवगुप्त-भोजराज-महिमभट्ट-क्षेमेन्द्र-मम्मट-हेमचन्द्र-वाग्भट्ट(प्रथम)-शौद्धोदनि-रुय्यक-शारदातनय-जयदेव-विद्याधर-विद्यानाथ-अमरचन्द्र-देवेश्वर-विश्वनाथ-वाग्भट्ट(द्वितीय)-धर्मसूरि-सिंहभूपाल-गोविन्दठक्कुर-रूपगोस्वामि-भानुदत्त-अप्पयदीक्षित-केशवमिश्र-पण्डितराजजगन्नाथ-आशाधर-विश्वेश्वर-जगन्नाथमिश्र-नरसिंह-रघुनाथ-गोपीनाथप्रभृतयः आलंकारिका नाट्यशास्त्रप्रभृतीन् अलंकारग्रन्थान् निर्माय सुप्रथिताः सन्ति।

०.१.४.१ भरतः (क्रि.पू. ५००)[21]-

आचार्यभरतः उपलब्धेष्वालंकारिकेषु प्राचीनतमः। एतन्निर्मितं नाट्यशास्त्रमद्योपलभ्यमानं षट्सहस्रश्लोकोपेतं षट्त्रिंशदध्याययुतं कारिका-भाष्य-अनुवंश्यश्लोकसंज्ञकांशत्रयोपेतं नाट्योपकारकछन्दोऽलंकारसंगीतशास्त्र-तत्त्वान्युपपादयदलंकारशास्त्रे प्रथते।

०.१.४.२ भामहः-

क्रिस्तोः परं चतुर्थपञ्चमशतकयोर्मध्यभागे[22] रक्रिलगोमिसूनुना काश्मीरकेण भामहेन काव्यालंकाराख्योऽनवद्योलंकारग्रन्थो विरचितः दृश्यते। षट्परिच्छेदसमन्विते काव्यालंकारे काव्यतत्त्वानां सूक्ष्मसमीक्षा कृता लक्ष्यते। अत्र काव्यस्वरूपम्, काव्यस्योपादेयत्वादिनिर्णयः, काव्यगुणालंकाराः, दोषविचारः, न्यायनिर्णयः, शब्दशुद्धिरित्येते विषयाः साङ्गोपाङ्गं वर्णिताः सन्ति। अलंकारा एव काव्ये प्रधानमिति सिद्धान्तस्तथा

---

(२१) द्र. भर. नाट्य. (प्रस्तावना) पृ- ४३

(२२) द्र. भाम. काव्या. (प्रास्ताविकं) पृ-६

भामहेन काव्यालंकारे अनुप्रासयमकादयः अष्टात्रिंशदलंकारा विवेचिताः । वक्रोक्तिं विना अलंकारा नालंकारपदवीं लभन्ते इत्येतदत्र प्रतिपादितम् ।[२३]

०.१.४.३ दण्डी (क्रि.प. ६६०-८०)[२४]

काव्यादर्श-दशकुमारचरित-अवन्तिसुन्दरीकथासंज्ञकग्रन्थत्रयस्य रचयिता आचार्यो दण्डी आलंकारिकेषु सुप्रसिद्धो विद्यते । काव्यादर्शे एतदीयेऽलंकारप्रबन्धे वैदर्भमार्गस्य नितरां प्रशंसनात् तन्मार्गानुसारि-गुणालंकारोदाहरणप्रदर्शनाच्च दाक्षिणात्यो- वैदर्भोऽयं ग्रन्थकार इति विभाव्यते । चतुः परिच्छेदात्मके काव्यादर्शे काव्यलक्षणम्, तद्भेदाः, गिरां मार्गाः, श्लेषादिगुणाः, काव्यदोषाः, स्वभावोक्त्यादयः पञ्चत्रिंशदलंकाराः, प्रहेलिकाश्च विस्तरेणोपवर्ण्यन्ते ।

०.१.४.४ उद्भटः-

काश्मीरदेशोद्भवोऽयमाचार्यः राज्ञः जयापीडस्य सभामलंकृतवान् । अयमेव भटोद्भट इति उद्भटभट्ट इति उद्भट इति चालंकारिकैर्व्यपदिष्टो दृश्यते । राज्ञः जयापीडस्य सभापण्डितत्वादस्य कालः क्रिस्तोः परं ७७९ वत्सरादारभ्य ८१३ वत्सरपर्यन्तं आसीदिति तर्क्यते विद्वद्भिः । अतः उद्भटाचार्यः क्रि.प. अष्टमशतकस्योत्तरार्धे[२५] आसीदिति वक्तुं शक्यते ।

एतस्यैव काव्यालंकारसारसंग्रहाख्यो निबन्धः प्रथते । अत्र पुनरुक्तवदाभासादीनामेकचत्वारिंशदलंकाराणामेकोनसप्तत्या कारिकाभिर्विवेचनमुपकल्प्यते । अलंकारशास्त्रे उद्भटस्य प्रतिष्ठा महती वर्तते ।

०.१.४.५ वामनः-

काश्मीराधिपतेः राज्ञः जयापीडस्य सचिवः क्रिस्तोः

---

(२३) द्र. भाम. काव्या. १/१६

(२४) द्र. काणे. पृ- १६६, & D.G. C. S. D. Page-93.

(२५) द्र. काणे. पृ- १७४

परमष्टमशतकस्योत्तरार्धे[२६] प्रथितो वामनस्तु काव्यालंकारसूत्राणां तद्वृत्तेश्च कर्त्ता। काव्यालंकारसूत्रेषु तद्वृत्तौ च आलंकारिकतत्त्वानां सम्यक् विवेचनं क्रियते। पञ्चाधिकरणात्मके ग्रन्थेऽस्मिन् काव्यस्य स्वरूपम्, काव्यप्रयोजनम्, वैदर्भादिरीतयः, पदवाक्यवाक्यार्थदोषाः, शब्दार्थगुणाः, यमकानुप्रासोपमादयो द्वात्रिंशत् काव्यालंकाराः, प्रयोगशुद्धिः शब्दशुद्धिश्च विविच्योपस्थाप्यते।

०.१.४.६ रुद्रटः-

शतानन्दापरनामा वामुकसूनुः सामवेदी काश्मिरोद्भवः अयं रुद्रटः आर्याजातावनवद्यं हृद्यं च काव्यालंकाराख्यमलंकारग्रन्थं निर्ममे। रुद्रटविनिर्मिते काव्यालंकारे सकलानामालंकारिकसिद्धान्तानां सुविस्तृता समीक्षा विद्यते। अलंकाराणां सुव्यवस्थितं सुविस्तृतं वैज्ञानिकं च समीक्षणमस्मिन्नेव ग्रन्थे सर्वप्रथमं कृतं दृश्यते।यद्यपि भाषा-रीति-रसवृत्त्यादीनां तत्त्वानां सम्यग् विवेचनं ग्रन्थेऽस्मिन् विहितं तथापि ग्रन्थकर्तुरस्य अलंकारनिरूपणे नितरामासक्तिर्दृश्यते। वक्रोक्त्यादीनां द्विषष्टेरलंकाराणां विवेचनमत्रोपलभ्यते।

क्रिस्तोः परं नवमशतकस्य पूर्वार्धे प्रथितेन काव्यमीमांसाकारेण असकृत्स्मर्यमाणोऽयमाचार्यः रुद्रटः राजशेखरात् प्राक्तनः सन्, क्रिस्तोः परमष्टमशतकस्योत्तरार्धे[२७] इति कथयन्ति इतिहासकाराः।

०.१.४.७ आनन्दवर्धनः-

अलंकारशास्त्रे लब्धप्रतिष्ठं ध्वनिसिद्धान्तप्रतिपादकं ध्वन्यालोकमानन्दवर्धनः व्यरचयदिति प्रायः सर्वे विद्वांसः अभिप्रयन्ति[२८]। केचन परं ध्वनिकारिकाणां कर्ता कश्चिदन्यः, ध्वनिकारिकावृत्तेर्ध्वन्यालोकस्य कर्ता आनन्दवर्धन इति विवदन्ते[२९]। विवादोऽयं युक्तिहीन इति प्रथिता विमर्शकाः

---

(२६) द्र.काणे. पृ-१८९

(२७) द्र. काणे. पृ- १९६

(२८) द्र. आन. ध्वन्या. (पश्यन्ती) पृ- २४-४१

(२९) द्र. तत्रैव पृ- २०४-२६०

समर्थयन्ति[३०]। बहुमतं युक्तीश्च पुरस्कृत्य आनन्दवर्धनः एक एव ध्वनिकारिकातद्वृत्तिरूपं ध्वन्यालोकं विरचितवानिति अलंकारशास्त्रचरित्रकारा निर्णयन्ति।

विदुषामानन्दवर्धनः आनन्दवर्धनः काश्मीराधिपतेः राज्ञः अवन्तिवर्मणः साम्राज्ये प्रथितोऽभूदिति स्वीकृत्य आनन्दवर्धनः क्रिस्तोः परं नवमशतकस्योत्तरार्धे[३१] आसीदिति ऐतिहासिकाः कथयन्ति।

चतुरुद्योतोपेते ध्वन्यालोके ध्वनेः प्रतिष्ठापनम्, ध्वनिप्रकाराणां साङ्गोपाङ्गविवेचनम्, ध्वनेरुपयोगिता चोपपाद्यते। नासौ केवलं ध्वनितत्त्वविशारदः अपि तु काव्यनिर्माणे कुशलो दृश्यते। अर्जुनचरितम्, देवीशतकम्, विषमबाणलीला, तत्त्वालोकः, प्रमाणविनिश्चयटीकायाः टीका इत्येते ग्रन्थाः आनन्दवर्धनप्रणीताः विदुषां मनांसि रञ्जयन्ति।

०.१.४.८ भट्टनायकः- (क्रि.प. ९००-१०००)[३२]

हृदयदर्पणाख्यालंकारग्रन्थस्य कर्ता भट्टनायको नाट्यशास्त्रस्यापि व्याख्याता आसीदिति अभिनवगुप्ताचार्याणां ध्वन्यालोकलोचनस्य अभिनवभारत्याख्यनाट्यशास्त्रव्याख्यायाश्च परिशीलनेन ज्ञायते। किं तु हृदयदर्पणस्य नाट्यशास्त्रव्याख्यानस्य चानुपलम्भात् भट्टनायकस्य विस्तृतः परिचयो नोपलभ्यते। रुय्यक-जयरथ-महिमभट्ट-अभिनवगुप्तादिभिः भट्टनायकमतस्यानुवदनात् भट्टनायकः रुय्यकादिभिः प्राक्तनः स्यादिति वक्तुं शक्यते।

०.१.४.९ मुकुलभट्टः-

क्रिस्तोः परं दशमशतकस्य प्रथमे पादे[३३] काश्मीराधिपतेः अवन्तिवर्मणः (क्रि.प. ८५५-८८४) सभाकवेः भट्टकल्लटस्य पुत्रः मुकुलभट्टस्तु

---

(३०) द्र. रेवा. आन. पृ- ३५-५१

(३१) द्र. काणे. पृ- २५३, द्र. रेवा. आन. पृ- १५-१६

(३२) द्र. काणे. पृ- २८०

(३३) द्र. तत्रैव. पृ- २७३

अभिधावृत्तिमातृकाख्यं ग्रन्थरत्नं रचयामास । पञ्चदशकारिकामात्रोपेते स्वोपज्ञवृत्तियुते ग्रन्थेऽस्मिन् अभिधालक्षणयोः सुविस्तृतं सुसूक्ष्मं च समीक्षणं वर्तते ।

०.१.४.१० राजशेखरः- (क्रि.प. ८८४-९५९)[३४]

कर्पूरमञ्जरी-विद्धशालभञ्जिका-बालभारतादीनां प्रसिद्धानां प्रबन्धानां रचयिता कवेरकालजलदस्य प्रपौत्रो दर्दुरात्मजः यायावरकुलोत्पन्नः राजशेखरः क्रिस्तोः परं नवमदशमशतकयोरन्तिमाद्यभागयोः प्रसिद्धः काव्यमीमांसाख्यमलंकारशास्त्रं व्यरचयत् । अष्टादशाध्यायान्विते ग्रन्थेऽस्मिन् यद्यपि रसालंकारादीनां प्रमुखानां काव्यतत्त्वानां विचारो नैव वर्तते तथाप्यत्र कविसमयादीनां कविशिक्षापराणां काव्योपयोगितत्त्वानां विस्तृतं विवेचनं विद्यते ।

०.१.४.११ भट्टतौतः-

'रसस्त्वनुकार्यः' इत्यस्य मतस्य प्रबलविरोधी आचार्याभिनवगुप्तपादस्य गुरुपादो भट्टतौतः क्रिस्तोः परं दशमशतकस्योत्तरार्धे[३५] लोचनाभिनवभारत्यादिषु बहुधोल्लिखितमद्यानुपलभ्यमानं काव्यकौतुकाख्यं ग्रन्थं निर्ममे ।

०.१.४.१२ कुन्तकः-

क्रिस्तोः परं दशमशतकस्योत्तरार्धे[३६] वक्रोक्तिरेव काव्यस्य जीवितमिति नूतनं स्वाभिमतं किञ्चित् तत्त्वं प्रतिष्ठापयन् काश्मीरः कुन्तकाचार्यः चतुरुन्मेषसमन्वितं वक्रोक्तिजीविताख्यं कंचिदलंकारग्रन्थमारचयत् । अत्र वक्रोक्तेः काव्यजीवितत्वं प्रतिपाद्य वर्णविन्यासवक्रता, पदपूर्वार्धवक्रता, प्रत्ययवक्रता, वाक्यवक्रता, प्रकरणवक्रता, प्रबन्धवक्रता इति वक्रतायाः विविधान् प्रकारान् आचार्यकुन्तकः विस्तरेण प्रतिपादयति ।

---

(३४) द्र. राज. कर्पू. (प्रास्ताविकं) पृ- ५

(३५) द्र. काणे. पृ- २७५

(३६) द्र. कुन्त. वक्रो. (भूमिका) पृ- १५

०.१.४.१३ धनञ्जयः-

क्रिस्तोः परं दशमशतकस्योत्तरार्धे[३७] मालवेन्द्रमुञ्जमहीशविदग्धगोष्ठीगरिष्ठो विष्णोस्तनयः धनञ्जयः त्रिशतकारिकोपेतं प्रकाशचतुष्टयसमुल्लसितं दशविधरूपकनिरूपकं दशरूपकाख्यं ग्रन्थं विरचितवान् । तस्यानुजेन धनिकेन अवलोकाख्या दशरूपकव्याख्या लिखिता । अवलोकव्याख्यां विना धनञ्जयस्य दशरूपकमपूर्णं दुरधिगमं च वर्तते ।

०.१.४.१४ अभिनवगुप्तः-

क्रिस्तोः परं[३८] दशमैकादशशतकयोश्चरमाद्यपादयोः मध्यभागे काश्मीरः नरसिंहगुप्ततनयः काश्मीरशैवदर्शनविचक्षणः भट्टतौतोत्पलदेवादिभ्योऽधिगतसमस्तसाहित्यतत्त्वः महामाहेश्वराचार्याभिनवगुप्तपादः ध्वन्यालोकस्य लोचनसंज्ञकं व्याख्यानं नाट्यशास्त्रस्याभिनवभारत्याख्यां व्याख्यां च निर्ममे । ग्रन्थकारहृद्गतस्याभिप्रायस्योद्घाटने आचार्याभिनवगुप्तपादस्य सामर्थ्यमनितरसाधारणमिति विद्वांसः प्रशंसन्ति ।

०.१.४.१५ भोजराजः-

क्रिस्तोः परमेकादशशतकस्य[३९] पूर्वार्धे शृङ्गारैकरसवादिना पारमारवंशावतंसेन सिन्धुलात्मजेन महाराजेन भोजेन शृङ्गारप्रकाशसरस्वतीकण्ठाभरणाख्यौ अलंकारनिबन्धौ विरचितावासाते । तत्र शृङ्गारप्रकाशे शृङ्गाररसस्यैव रसत्वं प्रतिपाद्यते । सरस्वतीकण्ठाभरणे तु काव्यगुणदोषालंकारादीनां सम्यग् विवेचनं विद्यते ।

०.१.४.१६ महिमभट्टः-

क्रिस्तोः परमेकादशशतकस्य प्रथमार्धे[४०] महिमभट्टाभिधः काश्मीरो

---

(३७) द्र. काणे. पृ- ३०७

(३८) द्र. काणे. पृ- ३०३

(३९) द्र. काणे. पृ- ३२६

(४०) द्र. काणे. पृ- ३१९

विद्वान् सर्वमपि ध्वनिमनुमाने अन्तर्भावयितुं प्रौढया शैल्या विमर्शत्रयोपेतं व्यक्तिविवेकाख्यं ग्रन्थं व्यरचयत्।

०.१.४.१७ क्षेमेन्द्रः-

क्रिस्तोः परमेकादशशतकस्य[४१] मध्यभागे औचित्यप्रस्थानप्रवर्तकः काश्मीरेषु प्रथितस्य राज्ञोऽनन्तस्य तत्सूनोः कलशस्य च सचिवः सिन्धोः प्रपौत्रः प्रकाशचन्द्रात्मजः कवीन्द्रः क्षेमेन्द्रः कविकण्ठाभरण-औचित्यविचारचर्चा-सुवृत्ततिलकसंज्ञकान् ग्रन्थान् विरचितवान्। औचित्यविचारचर्चायां क्षेमेन्द्रः औचित्यस्य काव्यात्मत्वमुपपादितवान्।

०.१.४.१८ मम्मटः-

क्रिस्तोः परमेकादशशतकस्योत्तरार्धे[४२] काश्मीरभूसुरवंशभास्वरमणिः शैवागमतत्त्वविशारदोऽनुपमपाण्डित्यमण्डितः वाग्देवतावतारो जैयटात्मजः मम्मटाचार्यः दशोल्लासैरुल्लसितं सकलालंकारसिद्धान्तानामाकरं कारिकावृत्त्युदाहरणोपेतं काव्यप्रकाशाख्यमनवद्यमलंकारशास्त्रमलिखत्। विलसत्स्वपि असंख्येषु व्याख्यानेष्वयं ग्रन्थः दुरधिगमो विद्यते।

०.१.४.१९ हेमचन्द्रः-

क्रिस्तोः परमेकादशशतकान्त्यद्वादशशतकाद्यभागयोः[४३] चालुक्यकुलोद्भवस्य गुर्जराधिपतेः सिद्धराजजयसिंहस्य तत्सूनोः कुमारपालस्य च गुरुणा धुन्धुकाख्यग्रामोद्भवेन चाचात्मजेन जैनाचार्येण चन्द्रशिष्येण हेमचन्द्रेण समस्तसाहित्यतत्त्वसमन्वितः काव्यानुशासनाख्यः स्वकृतालंकारचूडामणिव्याख्योपेतः कश्चिदलंकारग्रन्थः विलिखितः प्रथते।

०.१.४.२० वाग्भट्टः (प्रथमः)-

क्रिस्तोः परमेकादशशतकोत्तरार्धद्वादशशतकपूर्वार्धयोः[४४] राज्ञो जयसिंहस्य (क्रि.पू. १०९३-११४३) सचिवेन, सोमसुतेन वाग्भट्टाचार्येण

---

(४१) द्र. काणे. पृ- ३३१, क्षेमे. कवि. (भूमिका) पृ- ८

(४२) द्र. काणे. पृ- ३४२, मम्म. का. प्र. (प्रस्तावना) पृ- ४

(४३) द्र. काणे. पृ- ३६०-३६१

(४४) द्र. काणे. पृ- ३५७, वाग्भ. वाग्भटा. (भूमिका) पृ-४

पञ्चपरिच्छेदैरुपेतः दृश्यश्रव्यकाव्यविवेचनपरः वाग्भट्टालंकाराख्यः कश्चिदलंकारग्रन्थो विरचितो वर्तते।

०.१.४.२१ शौद्धोदनिः-

क्रिस्तोः परं द्वादशशतकस्य पूर्वार्धे[४५] अलंकारविद्यासूत्रकारो जैनाचार्यः परमकारुणिको भगवान् शौद्धोदनिः अलंकारसूत्रसंज्ञकं कंचन ग्रन्थं विनिर्मितवान्। ग्रन्थमेतमाधृत्यैव केशवमिश्राख्यः कश्चिदालंकारिकोऽलंकारशेखराख्यं कंचित् ग्रन्थं रचितवान्।

०.१.४.२२ रुय्यकः-

क्रिस्तोः परं द्वादशशतकस्य पूर्वार्धे[४६] कवेर्मङ्खकस्योपाध्यायः राजानकतिलकतनयः काश्मीरः रुचकापरनामा राजानकरुय्यकः अलंकारसर्वस्व-काव्यप्रकाशसंकेत-व्यक्तिविवेकविचार-सहृदयलील-साहित्यमीमांसासंज्ञकान् अलंकारप्रबन्धान् विरचितवान्। एष्वलंकारसर्वस्वं नितरां प्रसिद्धं वर्तते।

०.१.४.२३ शारदातनयः-

क्रिस्तोः परं द्वादशशतकस्य चरमचरणे त्रयोदशशतकस्य प्रथमार्धे[४७] च उत्तरभारते मरुत्तरजनपदे माठरपूजासंज्ञकेऽग्रहारे वर्तमानेन काव्यप्रकाशटीकाकर्तुः भट्टगोपालात्मजेन दिवाकरभट्टशिष्येण शारदातनयेन भावप्रकाशनसंज्ञको नाट्यविषयकः कश्चिद्ग्रन्थो विनिर्मितः। नाट्यतत्त्वविवेकपरेऽस्मिन् ग्रन्थे नायकनायिकारसभावादयः साहित्यशास्त्रसम्बन्धिनो विचाराः विस्तरेण विवेचिताः सन्ति।

---

(४५) द्र. कृष्ण. अलं. पृ-

(४६) द्र. काणे. पृ- ३५४

(४७) द्र. कृष्ण. अलं. पृ- २९३

०.१.४.२४ पीयूषवर्षजयदेवः-

क्रिस्तोः परं त्रयोदशशतकस्योत्तरार्धे[४८] कौण्डिन्यकुलतिलकः सुमित्रागर्भसंभवो महादेवतनयः पीयूषवर्षापरनामा जयदेवश्चन्द्रालोकाख्यं दशमयूखोपेतं प्रसिद्धं कंचिदलंकारग्रन्थं विरचितवान् । अत्रत्यानि पद्यानि लक्ष्यलक्षणसमन्वितानि सन्ति पठितृणां सुगमानि विद्यन्ते ।

०.१.४.२५ विद्याधरः-

क्रिस्तोः परं त्रयोदशशतकस्य चरमचरणे चतुर्दशशतकस्य प्रथमचरणे[४९] च उत्कलाधिपतेः शृङ्गाररसाभिमानिनो नरसिंहदेवस्य चित्तमनुवर्तमानेन कविना विद्याधरेण स्वरचितैः रुचिरैरुदाहरणैः शोभितमेकावल्याख्यमलंकारशास्त्रं विरचितम् ।

०.१.४.२६ विद्यानाथः-

क्रिस्तोः परं चतुर्दशशतकस्य[५०] प्रथमे चरणे काकतीयवंशावतंसस्य एकशीलाधिपतेः प्रतापरुद्रदेवस्य गुणानाश्रित्य तैलङ्गेन कविना विद्यानाथेन काव्यतत्त्वनिरूपणपरः स्वाश्रयदातृप्रतापरुद्रवर्णनपरैः स्वयं विरचितैरुदाहरणपद्यैरुपेतः प्रतापरुद्र-यशोभूषणाख्यः प्रबन्धो विरचितो वर्तते । प्रबन्धोऽयं दक्षिणभारते प्रचुरप्रचारो विद्यते ।

०.१.४.२७ अमरचन्द्रः-

क्रिस्तोः परं त्रयोदशशतकस्य मध्यभागे[५१] जिनदत्तसूरिशिष्यो जैनोऽमरचन्द्रः परमोपादेयं कविशिक्षाप्रदं काव्यकल्पलताख्यं सूत्रात्मकं ग्रन्थं

---

(४८) द्र. कृष्ण. अलं. पृ- २३५, विश्व. सा. द. (प्रस्तावना) पृ- २९, काणे. पृ- ३६३

(४९) द्र. काणे. पृ- ३६५

(५०) द्र. कृष्ण. अलं पृ- ३२९, विद्या. प्र. रु. Introduction P.4.

(५१) द्र. काणे. पृ- ४८७

विरचितवान् । तेषां सूत्राणां वृत्तिं च स्वमित्रेण गुणचन्द्रेण सहायं लिखितवान्।

०.१.४.२८ देवेश्वरः-

क्रिस्तोः परं चतुर्दशशतकस्यादौ[५२] कविकल्पलताख्यमतिप्रसिद्धं कविशिक्षापरमलंकारशास्त्रं श्रीमद्वाग्भट्टात्मजेन मालवेन्द्रमहामात्येन कवीश्वरेण देवेश्वरेण विरचितम् । कविकल्पलतेयं काव्यरचनाभियोगभाजां नितरामुपकारिणी विद्यते।

०.१.४.२९ विश्वनाथः-

क्रिस्तोः परं चतुर्दशशतकस्यादौ[५३] उत्कलेषु कपिञ्जलकुलतिलकः श्रीमन्नारायणदासप्रपौत्रः चन्द्रशेखरात्मजः सान्धिविग्रहिकमहापात्रोऽष्टादश भाषाभिज्ञः साहित्यविद्यार्णवकर्णधारः ध्वन्यध्वनिपुरोगः कविचक्रवर्ती विश्वनाथो दशपरिच्छेदोपेतं साहित्यदर्पणसंज्ञकं कंचिदलंकारग्रन्थं विनिर्मितवान्। अन्वर्थसंज्ञोऽयं साहित्यदर्पणः सर्वैः प्रशंस्यमानः काव्यस्वरूप-रस-रीति-दोष-गुणालंकार-नाट्यतत्त्वादिसमन्वितः कश्चिदलंकारग्रन्थो वर्तते।

०.१.४.३० वाग्भट्टः (द्वितीयः)-

क्रिस्तोः परं चतुर्दशशतके[५४] नमिकुमारतनयो जैनाचार्यो वाग्भट्टः (द्वितीयः) पञ्चाध्यायोपेतमलंकारतिलकटीकायुतं सूत्रात्मकं काव्यानुशासनसंज्ञकं कंचन ग्रन्थं विनिर्मितवान्।

०.१.४.३१ धर्मसूरिः-

क्रिस्तोः परं चतुर्दशशतकस्योत्तरार्धवर्तिनः राज्ञः सर्वज्ञसिंहभूपालात्

---

(५२) द्र. कृष्ण. अलं. पृ- २२४

(५३) द्र. काणे. पृ. ३४७

(५४) द्र. कृष्ण. अलं पृ-

प्राचीनः क्रिस्तोः परं चतुर्दशशतकस्य मध्यभागे[५५] तैलङ्गदेशोद्भवत्रिकलिंगानामभिनववाराणसीकटकमधिवसन् धर्मसूरिसंज्ञकः आलंकारिकः साहित्यरत्नाकरसंज्ञकं श्रीरामचन्द्रवर्णनपरोदाहरणोपेतं ग्रन्थं निर्माय प्रथितो वर्तते ।

०.१.४.३२ सिंहभूपालः-

क्रिस्तोः परं चतुर्दशशतकस्य चरमे चरणे[५६] आन्ध्रमण्डलाधीशः सिंगप्रभोः पौत्रोऽनन्तनरेन्द्रनन्दनः रेचलकुलोत्पन्नः श्रीसिंहभूपालः रसार्णवसुधाकरसंज्ञकं नायक-नायिका-रस-भावादितत्त्वनिरूपणपरं विलासत्रयोपेतं कंचन अनवद्यं ग्रन्थं विरचितवान् ।

०.१.४.३३ गोविन्दठक्कुरः-

क्रिस्तोः परं पञ्चदशशतके[५७] मैथिलः केशवात्मजो गोविन्दठक्कुरो यद्यपि कस्यापि स्वतन्त्रस्यालंकारग्रन्थस्य निर्माता न वर्तते तथापि काव्यप्रकाशस्य टीकारूपं काव्यप्रदीपसंज्ञकमपूर्वं ग्रन्थं कंचिद्विरचय्य आलंकारिकेषु प्रथते ।

०.१.४.३४ रूपगोस्वामी

क्रिस्तोः परं पञ्चदशशतकस्यान्तिमचरणे षोडशशतकस्याद्यार्धे च चैतन्यदेवमतानुयायी वंगदेशवासी श्रीकुमारतनयः रूपगोस्वामिपादः उज्ज्वलनीलमणि-भक्तिरसामृतसिन्धु-नाटकचन्द्रिकाख्यान् ग्रन्थान् निर्मितवान् । तत्राद्ययोः ग्रन्थयोः आलंकारिकसिद्धान्ताः अन्त्ये तु नाट्यतत्त्वानि चोपपाद्यन्ते ।

०.१.४.३५ भानुदत्तः-

क्रिस्तोः परं षोडशशतके[५८] गणेश्वरमिश्रात्मजो भानुदत्तमिश्रः

---

(५५) द्र. धर्म. सा. र. (प्रास्ताविकं) पृ- ३/४

(५६) द्र. सिंह. रसा. Introduction Page. LXXVI.

(५७) द्र. विश्व. सा. द. (प्रस्तावना) पृ- ३५

(५८) द्र. भानु. रस. (भूमिका) पृ- ७, (प्रस्तावना) पृ- १७, काणे. पृ- ३८२

रसमञ्जरी-रसतरङ्गिणी-अलंकारतिलकाख्यमतिरमणीयं ग्रन्थत्रयं ग्रथितवान्। अस्मादर्वाक्तनाः अलंकारशास्त्रकाराः नितरां प्रभाविताः सन्ति। भानुदत्तस्य रसमञ्जर्याख्ये ग्रन्थे स्वरचितैरुदाहरणैः सावयवः शृङ्गाररसः रसतरङ्गिण्यां सर्वे रसाः अलंकारतिलके सर्वे चालंकारसिद्धान्ताः पर्यालोचिताः सन्ति।

०.१.४.३६ अप्पयदीक्षितः-

क्रिस्तोः परं षोडशशतकस्योत्तरार्धे सप्तदशशतकस्याद्यपादे[५९] च भारद्वाजकुलभास्वरमणिः रङ्गराजाध्वरीन्द्रनन्दनः शतप्रबन्धप्रबन्धकः विद्वद्गोष्ठीगरिष्ठः सकलशास्त्रमर्मज्ञः अप्पयदीक्षितश्चित्रमीमांसा-कुवलयानन्द-वृत्तिवार्त्तिकाख्यमनुपममलंकारग्रन्थत्रयं व्यरचयत्। चित्रकाव्यमीमांसात्मकश्चित्रमीमांसाख्यः, जयदेवस्य चन्द्रालोकस्य पञ्चममयूखमाधृत्य प्रवर्तमानः उपमाद्यलंकारप्रतिपादकः कुवलयानन्दसंज्ञकः, अभिधा-लक्षणा-व्यञ्जनाख्य-वृत्तित्रयविचारपरः वृत्तिवार्तिकसंज्ञकश्चास्यालंकारग्रन्थः साहित्यशास्त्रे महीयते। अप्पयदीक्षितोऽयं शतग्रन्थनिर्मातृत्वेन प्रथते।

०.१.४.३७ केशवमिश्रः-

क्रिस्तोः परं षोडशशतकस्योत्तरार्धे[६०] वर्तिनः राज्ञः कल्याणचन्द्रस्य सभामलंकुर्वन् तत्रभवान् केशवमिश्रः जैनाचार्यस्य भगवतः शौद्धोदनेः काव्यानुशासनसूत्राण्याधृत्य अलंकारशेखराख्यं ग्रन्थं विरचितवान्। तत्र सर्वेऽप्यालंकारिकसिद्धान्ताः कविसमयादयश्च सम्यगुपपाद्यन्ते[६१]।

०.१.४.३८ पण्डितराजजगन्नाथः-

क्रिस्तोः परं सप्तदशशतके[६२] तैलङ्गकुलावतंसः पेरुभट्टतनयः[६३] प्रकाण्डपाण्डित्यमण्डित पण्डितेन्द्रो जगन्नाथः रसगङ्गाधरसंज्ञकं

---

(५९) द्र. A.G. C.AP. Page-9.

(६०) द्र. काणे. पृ- ३९२

(६१) द्र. केश. अलं.

(६२) द्र. विश्व. सा. द. (प्रस्तावना) पृ- ३६.

(६३) द्र. पण्डि. रस. १/३

प्रौढमलंकारग्रन्थं, भामिनीविलासप्रभृतीन् बहून् काव्यविशेषान् विरचय्य प्रथितोऽभूत्।

०.१.४.३९ आशाधरः-

क्रिस्तोः परं सप्तदशशतकस्योत्तरार्धे[६४] धरणीधरशिष्येण रामजीभट्टसूनुना गुर्जरेण आशाधरेण त्रिवेणिका-कोविन्दानन्द-अलंकारदीपिकाख्याः अलंकारग्रन्थाः विलिखिताः। तत्र त्रिवेणिकायामभिधालक्षणाव्यञ्जनाव्यापाराः, कोविदानन्दे शब्दव्यापाराश्च प्रतिपाद्यन्ते। अलंकारदीपिका तु कुवलयानन्दस्य व्याख्यानरूपा अतिरमणीयतरा वर्तते।

०.१.४.४० विश्वेश्वरः-[६५]

क्रिस्तोः परमष्टादशशतकस्योत्तरार्धे आलमोडाप्रदेशोद्भवो लक्ष्मीधरतनयो विश्वेश्वरपाण्डेयः अलंकारकुलप्रदीप-अलंकारकौस्तुभ-अलंकारमुक्तावली-कवीन्द्रकर्णाभरण-काव्यतिलक-व्यङ्ग्यार्थचन्द्रिकादीनलंकारग्रन्थान् निर्माय आलंकारिकेषु नितरां प्रथितो वर्तते। एष्वलंकारकौस्तुभः कश्चन नव्यन्यायशैल्या विनिर्मितः प्रौढो ग्रन्थो वर्तते।

०.१.४.४१ नरसिंहः-

क्रिस्तोः परमष्टादशशतकस्य मध्यभागे[६६] अभिनवकालिदासापराख्यः महीशूरराज्यमलंकुर्वाणः शिवरामसुधीनन्दनो नरसिंहो नञ्जराजयशोभूषणाख्यमलंकारग्रन्थं निर्मितवान्। तत्र सर्वाण्यालंकारिकतत्त्वानि नञ्जराजयशःपरैः स्वकृतैरुदाहरणैः सुस्पष्टमुपवर्ण्यन्ते।

०.१.४.४२ जगन्नाथमिश्रः-

क्रिस्तोः परमष्टादशशतकस्य मध्यभागे[६७] उत्कलाधिपतिहरिकृष्णवीरकेशरिणोः राज्यान्तराले उत्कलेषु प्रथितः रामचन्द्रमिश्रतनयो

---

(६४) द्र. कृष्ण. अलं. पृ- २८०
(६५) द्र. हीरा. संस्कृ. पृ- १८९
(६६) द्र. कृष्ण. अलं. पृ- २९२
(६७) द्र. जग. र. क. (उपोद्धातः) पृ- 'घ'

जगन्नाथमिश्रः दशपल्लवशोभितं पञ्चाशद्दलमण्डितं रसकल्पद्रुमाख्यमन्वर्थसंज्ञमनवद्यमलंकारग्रन्थं व्यरचयत्। अत्रिरसाभिव्यक्तिप्रकारः सरलया शैल्या उपपाद्यते। शृङ्गारादिरसानां सूक्ष्मभेदोपभेदवर्णनपुरःसरोदाहरणप्रदर्शनमतीव रमणीयं वर्तते।

०.१.४.४३ रघुनाथः-

क्रिस्तोः परमष्टादशशतकस्य प्रथमार्धे[६८] उत्कलेषु कौण्डिन्यकुलमण्डनः सुन्दरग्रामनिवासी रघुनाथदासः दशपरिच्छेदोपेतं समस्तसाहित्यतत्त्वसमन्वितं साहित्यभूषणसंज्ञकं कंचन ग्रन्थं विनिर्मितवान्। प्रकाण्डपाण्डित्यमण्डितोऽयं रघुनाथदासः माघ-भारवि-नैषध-भट्टि-रघुवंश-कुमारसम्भवादीनां काव्यानां व्याख्याता कालनिर्णयादीनां बहूनां स्मृतिशास्त्राणां निर्माता चासीदिति ऐतिहासिका अभिप्रयन्ति।

०.१.४.४४ गोपीनाथः-

क्रिस्तोः परमष्टादशशतकस्य[६९] मध्यभागे उत्कलेषु प्रथितः करणकुलसंभवः कविभिषग्वरवासुदेवपात्रतनयः कविभूषणः गोपीनाथपात्रः कविशिक्षापरं पञ्चविंशकिरणोपेतं कविचिन्तामणिसंज्ञकं कंचिदलंकारग्रन्थं निर्ममे। एतं ग्रन्थं ग्रन्थकर्तारं चाधिकृत्याग्रे विस्तरेण प्रस्तुमः।

इत्थं संस्कृते अलंकारशास्त्रं भरतादिभिर्बहुभिरालंकारिकैर्विरचितैर्विविधैर्ग्रन्थैः समृद्धं सत् काव्यतत्त्वजिज्ञासूनां विपुलं ज्ञानमुपकल्पयतीत्येतत्तत्त्वजिज्ञासूनाममन्दमानन्दमुपकल्पयतीत्यलं बहुना।

०.२. अलंकारशास्त्रे कविचिन्तामणिः-

काव्यविषयकव्युत्पत्तिजननमेवालंकारशास्त्राणां परमं प्रयोजनम्। तच्च स्थावरजङ्गमात्मकलोकवृत्तस्य छन्दोव्याकणाभिधानकोषकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानां सम्यग् ज्ञानेनैव संपद्यते। तदर्थं प्राक्तनालंकारिकाः भामहदण्डिरुद्रटवामनाः स्वस्वग्रन्थेषु काव्यतत्त्वैः सह लोकन्याय-शब्दशुद्धि-

---

(६८) द्र. K.M.D.S.M. Vol.II, Page-CLXI.

(६९) द्र. अत्रैव (प्रस्तावना) पृ- ३१, & S.R. H.G. Part-II, P.P.115-152

छन्द-औचित्य-प्रहेलिका-कविसमयादीनि तत्त्वानि प्रत्यपादयन् । गच्छता कालेन इयं परंपरा परिवृत्ताभूत् । काव्यनिर्माणोपयोगिनां शब्दशुद्धिप्रभृतीनां विचाराणां पृथक् पृथगुपपादनं च समभवत् । तथा च राजशेखरेण काव्यमीमांसायां कविसमयो विशदीकृतः, अमरचन्द्रदेवेश्वरादिभिः कविशिक्षापराः ग्रन्थाः विनिर्मिताः । तदनु समन्वयकालिकेष्वलंकारग्रन्थेषु आलंकारिकसिद्धान्तैः सह काव्योपयोगिनां कविसमयादीनां समावेशनं यद्यप्येकत्र प्रायो न दृश्यते । तथापि शौद्धोदन्यादीनां कतिपयानामेवालंकारिकाणामलंकारसूत्रादिग्रन्थेषु आलंकारिकतत्त्वैः सह अंशतः समावेशितानां कविसमयादीनां काव्यनिर्माणोपयोगिनां विचाराणामेकत्रैव संकलनस्य आवश्यकतां मनसि कृत्य गोपीनाथपात्रेण सरलेन मार्गेण कवीनां विमर्शकानां च प्रशिक्षणाय कविचिन्तामणिसंज्ञकोऽयं ग्रन्थो विरचितो वर्तते । काव्यशास्त्रपरम्परायां कविचिन्तामणिः प्रायः एक एव ग्रन्थो दृश्यते यत्रालंकारिकसिद्धान्तैः सह काव्यनिर्माणोपयोगीनि छन्दःशास्त्रकामशास्त्रादितत्त्वानि एकत्र विस्तरेण संनिवेशितानि सन्ति । तथा चालंकारशास्त्रेण कविचिन्तामणेरस्य महान् सम्बन्धो वर्तते इत्यत्र नास्ति काचित् विप्रतिपत्तिः ।

चिन्तामणिचिन्तनेन त्रिपुरादेवीवरप्रसादेन कवित्वं सिद्ध्यतीति प्रचलति कश्चिद्विश्वासः । चिन्तामणिमन्त्रचिन्तनेन श्रीहीरतनयः श्रीहर्षः प्रकाण्डपाण्डित्यं प्राप्य काव्यकर्मणि कुशलोऽभूदिति नैषधीयचरितपरिशीलनेन ज्ञायते । तद् यथा-

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभंग्या महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः ॥

(श्रीहर्ष नैष. १/१४५)

तथा च चिन्तामणिमन्त्रमधिकृत्य नैषधीयचरिते चतुर्दशसर्गे नैषधकारेण श्रीहर्षेण स्वाभिमतं स्पष्टीकरोति ।[७०]

---

(७०) द्र. श्रीहर्ष नैष. १४/८५-८७

एतन्मनसि कृतवता गोपीनाथपात्रेण स्वग्रन्थः कविचिन्तामणिरिति व्यवहृतः स्यादिति तर्क्यतेऽस्माभिः। चिन्तामणिरुपासकानां चिन्तितार्थमिव कविचिन्तामणिरयं कवीनां चिन्तितार्थमुपकल्पयतीति वक्तुं शक्यते। कविचिन्तामणौ कविस्वरूप-रस-रीति-गुणालंकारादिभिः प्रसिद्धैः काव्यतत्त्वैः सार्धं काव्योपयोगिनां वृत्त-कविसमय-कामशास्त्र-संगीतशास्त्रसम्बद्धानां विचाराणामुपवर्णनं सम्यक् कृतमास्ते। अतः कविचिन्तामणिमेनमुपास्य कवित्वकामः कश्चित् कवित्वमाप्तुं समर्थो भवेत् इत्यत्र नास्ति कश्चित् संशयः।

०.३.०. कविचिन्तामणेः कर्त्ता-

उत्कलानामभिमानपत्रं करणकुलसंभवः कविभिषग्वरवासुदेवपात्रतनयः कविभूषणविरुदभाक् गोपीनाथपात्राख्यः कश्चिद्विद्वान् कविचिन्तामणिसंज्ञकमलंकारग्रन्थं व्यरचयदिति सुप्रथितं वर्तते। कविचिन्तामणिकर्तुः गोपीनाथपात्रस्य देशकालादिकमधिकृत्य विदुषां विविधानि मतानि प्रवर्तन्ते।

०.३.१. गोपीनाथपात्रस्य देशः-

बहवो विद्वांसः गोपीनाथपात्रः पारलाखिमुण्डिनगरे वसति स्मेत्यभिप्रयन्ति। गङ्गवंशस्येतिहासकारेण सत्यनारायणराजगुरुमहोदयेन असौ गोपीनाथः उत्कलेषु पारलाखिमुण्डिनगरे अवसदिति प्रतिपादितम्[७१]। ऐतिहासिककेदारनाथमहापात्रेणापि गोपीनाथपात्रः पारलाखिमुण्डिनगरे न्यवसदिति उट्टङ्कितम्[७२]। समीक्षकनीलमणिमिश्रमहोदयेनापि गोपीनाथपात्रस्य पारलाखिमुण्डिनिवासत्वमङ्गीकृतम्[७३]। पारलाखिमुण्डिनगर्याः 'अङ्कसाहि' संज्ञिकायां वीथ्यां गोपीनाथपात्रस्य निवासः आसीदिति काह्नुचरणमिश्रैः स्पष्टीकृतम्[७४]। केचित् परं तस्य निवासः बडखिमुण्डिजनपदमासीदिति मन्यन्ते[७५]। पारलाखिमुण्डिनगरे कवेः गोपीनाथपात्रस्य वंशधराणामधुनापि निवाससद्भावात् कविचिन्तामणेः कर्ता

---

(७१) द्र. S.R. H.G. Part-II, P-127.

(७२) द्र. K.M. D.S.M. Vol.II, P. CXCV.

(७३) द्र. नील. ओ.सं.ले. पृ- ७६-७७

(७४) द्र. काह्नु. आलो. पृ- १५८-६७

(७५) द्र. P.M. C.O.S.P. Pp. 196-97.

गोपीनाथपात्रः पारलाखिमुण्डिनगरे न्यवसदिति बहुमतं सुत्तनीऽज्ञीनानीति वक्तुं शक्यते ।

०.३.२. गोपीनाथपात्रस्य कालः-

कविचिन्तामणिकर्तुः कविभूषणस्य गोपीनाथपात्रस्य कालनिर्णये यद्यपि काठिन्यं नोपलभ्यते, गोपीनाथपात्रस्याश्रयदात् राज्ञो गजपति-जगन्नाथनारायणदेवस्य कालस्य गङ्गवंशेतिहासप्रणेत्रा सत्यनारायणराजगुरु-महोदयेन १७५१क्रिस्तुवत्सरतः १७७० क्रिस्तुवत्सरं यावदिति युक्तिभिः प्रतिपादितत्वात्[७६] तथाप्यत्र किंचिदुच्यते गोपीनाथपात्रः 'रामचन्द्रविहाराख्यं' किंचिन्महाकाव्यं व्यलिखत् । तच्च १७३४ क्रिस्तुवत्सरे आनन्दसंवत्सरे संपूर्णमभवदिति विमर्शका अभिप्रयन्ति ।[७७] तादृशस्य पाण्डित्यमण्डितस्य अशीतिसर्गात्मकस्य सुविपुलस्यातिरमणीयस्य रामकाव्यस्य निर्माणं प्रौढेनैव कर्तुं शक्यते इत्यतः 'रामचन्द्रविहार' निर्माणकाले गोपीनाथपात्रः प्रायत्रिंशद्वत्सरः स्यादिति तर्क्यते । तेन गोपीनाथपात्रः प्रायः १७०४ क्रिस्तुवत्सरे जातः स्यादिति अनुमीयते । पुरा जनाः प्रायः पञ्चसप्तत्यधिकसंवत्सरान् जीवन्ति स्म । अतः क्रिस्तोः परमष्टादशशतकस्य पूर्वार्धतः मध्यभागमध्ये (क्रि.प. १७०४-१७८०) गोपीनाथपात्र आसीदिति वक्तुं शक्यते ।

०.३.३. गोपीनाथपात्रस्य वंशः-

स्ववंशमधिकृत्य गोपीनाथपात्रेण स्वग्रन्थेषु विशिष्य किमपि नोच्यते । कविचिन्तामणौ अन्ते गोपीनाथः आत्मानं वासुदेवपात्रतनयं करण (कायस्थ)-कुलोत्पन्नं च कथयति[७८] । तथा च वासुदेवमात्रः गोपीनाथस्य पिता, करणकुलं च गोपीनाथस्य वंश इति ज्ञायते । गोपीनाथस्य पिता वासुदेवपात्रः कविः, भिषक्श्रेष्ठः, धर्मज्ञः, वाद्यविद्याप्रवीणः, राजसभासु नियुक्तः, विद्वांश्चासीदिति कविचिन्तामणेरन्तिमपद्यादवगम्यते[७९] ।

---

(७६) द्र. S.R. H.G. Part-II, Pp. 115-152.

(७७) द्र. केदा. खुरु. पृ- २२०-२२१, द्र. नील. ओ. रान. पृ- २६,
द्र.K.M. D.S.M. .Vol.II, Page. CXCVI.

(७८) द्र. अत्रैव किरणान्तवाक्यानि ।

(७९) द्र. अत्रैव ग्रन्थान्तपद्यम् । (XXV.138)

भिषग्वरो वासुदेवपात्रोऽयं राज्ञः गजपतिजगन्नाथनारायणदेवस्य सभाकविः, चिकित्सकश्चासीदिति केचन विद्वांसोऽभिप्रयन्ति[८०] । एतदनुरोधेनैतत् स्वीकरणीयं भवति यत् गोपीनाथपात्रस्य (१७०४ क्रिस्तुवत्सरे जातः स्यादिति तर्क्यमाणस्य) पिता वासुदेवपात्रः गोपीनाथपात्रस्य जन्मनः पञ्चविंशतिवत्सरेभ्यः प्राक् (प्रायः १६७९ क्रिस्तुवत्सरे) जातो भवेत्, तथा जगन्नाथनारायणदेवस्य राज्यकाले (१७५१ क्रिस्तुवत्सरे) असौ वासुदेवो द्वासप्ततिवत्सरः वृद्धः स्यात् । ततश्चैतत्तर्कयितुं शक्यते यत् वासुदेवो न केवलं राज्ञो गजपतिजगन्नाथनारायणदेवस्य अपि तु तत्पितुः गजपतिप्रतापरुद्रनारायणदेवस्यैव (क्रि.प. १७०९-५१) सभामलंकृतवान् स्यादिति । अयमपि वासुदेवपात्रः कविभूषणविरुदभागासीदिति गङ्गवंशेतिहासकारा राजगुरुमहोदयाः कथयन्ति[८१] ।

वासुदेवपात्रोऽयं महाभारतमुत्कलभाषायां पद्यरूपेण व्यलिखदिति जनश्रुतिः । परं तु तद्रचितं महाभारतमधुना नोपलभ्यते । उत्कलराज्यसंग्रहालयस्य हस्तलिखितग्रन्थालये करणकुलसंभूतेन केनचित् सदाशिवात्मजेन वासुदेवेन उत्कलभाषायां विरचितस्य महाभारतस्य विराटपर्वणः कश्चिद्हस्तालिखितो ग्रन्थो[८२] यद्यप्युलभ्यते तथापि महाभारतस्य विराटपर्वणोऽस्य लेखको वासुदेवः गोपीनाथपात्रस्य पिता एवेति स्वीकर्तुं न शक्यते यतो हि वासुदेवोऽयं सदाशिवदासात्मजः सन् दासोपाह्व भवेत्, गोपीनाथपात्रस्य पिता तु पात्रोपाह्वो वर्तते । तथा चोभयोरपि वासुदेवयोः करणकुलसंभवत्वे संभवत्यपि उपाह्वभेदात् गोपीनाथपात्रस्य पिता वासुदेवपात्रः उत्कलभाषायां महाभारतं व्यलिखदित्येषा जनश्रुतिश्चिन्त्या वर्तते ।

भिषक्चिन्तामणेः[८३] कर्ता चक्रपाणिः आत्मानं गोपीनाथज्येष्ठात्मजचक्रपाणिरिति अध्यायान्तवाक्येषु प्रकटीकरोति । स्ववंशादिकमधिकृत्य हस्तलिखितग्रन्थेऽस्मिन् भिषक्चिन्तामणौ यत्सर्वं लिखितमासीत् तत्सर्वं

---

(८०) द्र. K.M. D.S.M. Vol.II, Page. CXCV.

(८१) द्र.S.R. H.G. Part-II, Page. 142.

(८२) द्र. MSS. No. O.L. 54 (A)

(८३) द्र. MSS. No. AY.165.

कीटद्रष्टं वर्तते। तथापि गोपीनाथस्य कविचिन्तामणिवत् भिषक्चिन्तामणिरिति नामसादृश्यात् कस्याचित्तद्वंशोद्भवायाः [८४]विष्णुप्रियायाश्चक्रपाणेः गोपीनाथात्मज-त्वाङ्गीकाराच्च भिषक् चिन्तामणिकर्ता चक्रपाणिः कविभूषणगोपीनाथपात्रस्य ज्येष्ठः पुत्रः स्यादिति संभाव्यते।

गङ्गवंशेतिहासानुशीलनादेतज्ज्ञायते यत् करणवंशे प्रबलपराक्रमो राज्ञो गजपतिजगन्नाथनारायणदेवस्य सचिवः प्रथितस्य आन्ध्रविजयनगराधिपस्य सीतारामराजस्य तदनुयायिनो विजयरामराजस्य च विजेता कुर्मनाथपात्रः, चौरपञ्चाशिकाकर्ता लक्ष्मीनारायणपात्रश्च गोपीनाथपात्रस्य वंशजौ आस्ताम् इति[८५]।

गोपीनाथपात्रस्य वंशावलिमधिकृत्य यद्यपि किमपि बाह्यं प्रमाणं नोपलभ्यते, तथापि १९८३ क्रिस्तुवत्सरे[८६] पारलाखिमुण्डिनगरे सर्वेक्षणं कृतवता मया यदधिगतं तदत्रप्रासङ्गिकं न स्यादित्यभिप्रेत्योपस्थाप्यते।

गोपीनाथपात्रस्य वंशो वैद्यपात्रवंश इति प्रथितो वर्तते। 'अङ्कसाहि' संज्ञिका काचित् वीथी उत्कलान्तर्गते पारलाखिमुण्डिनगरे विद्यते। तस्यां वीथ्यां गोपीनाथस्य वंशजाः निवसन्ति। पूर्वैः गोपीनाथवंशजै तद्वीथ्यां सानराधाकान्तमठसंज्ञया प्रथितः राधाकान्तमठः कश्चित्प्रतिष्ठापितो वर्तते, यत्र राधाकृष्णयोरतिकमनीयं विग्रहयुगलं विराजते। प्रत्यहं प्रातः सायं च तत्र तालमृदङ्गादिवादनसहितं भव्यं मनोज्ञं च देवार्चनं प्रचलति। तत्रैव देवविग्रहस्य पुरतः उपविश्य गोपीनाथः कविचिन्तामणिप्रभृतीन् ग्रन्थान् व्यलिखदिति श्रूयते।

पारलाखिमुण्डिनगरे कविभूषण-उच्चप्राथमिकविद्यालयसंज्ञकः कश्चिद् विद्यालयः प्रतिष्ठापितो वर्तते। इदानीं वैद्यपात्रवंश्याः उत्कलेषु विविधस्थानेषु उद्युक्ताः सन्ति। सानराधाकान्तमठे कविभूषणवंशोद्भवा काचित् पंचाशीतिवत्सरा आजन्मब्रह्मचारिणी विष्णुप्रियादासी. तदानीम् (1983 A.D.) आसीत्। तयोपस्थापितः वैद्यपात्रवंशोवृक्षोऽत्रोपस्थाप्यते।

---

(८४) द्र. अत्रैव (प्रस्तावना) पृ- ३५

(८५) द्र. S.R. H.G. Part-II, P. 169.

(८६) द्र. २०-६-१९८३ दिनाङ्के मया सर्वेक्षणं कृतमासीत्।

+++ इतः परेषां सा विष्णुप्रिया किमपि न जानाति।

श्रीगोपीनाथपात्र-विरचितः


वासुदेवपात्रः
गोपीनाथपात्रः (कविचिन्तामणिकर्ता)
चक्रपाणिः
+++
दामोदरः
राधाचरणः
विश्वम्भरः
रघुनाथः
नरसिंहः
निमाइचरणः
गौराङ्गः
अगाधुः
जगन्नाथः
वैष्णवः
+++
+++
वृन्दावनः
गौराङ्गः (संन्यासी)
+++
+++
दीनबन्धुः
दामोदरः
चैतन्यः
माधवः
चक्रपाणिः
बालुङ्ग
वनमाली
कम्बुपाणिः
+++
+++
+++
+++
+++
नन्दकिशोरः
+++
गोराचान्दः
नित्यानन्दः
सदानन्दः (संन्यासी)
विष्णुप्रिया (संन्यासिनी)
दीनबन्धुः (संन्यासी)

(इयं संन्यासिनी विष्णुप्रिया वंशवृक्षस्योपस्थापिका)

+++ इति चिह्नेन सूचितानां जनानां विषये सा विष्णुप्रिया किमपि न जानाति इति उक्तवती।

०.३.४. गोपीनाथस्य आश्रयदाता-

गङ्गवंशेतिहासकारो राजगुरुमहोदयोऽभिप्रैति यत् कविभूषण-गोपीनाथपात्रः पारलाखिमुण्डिराज्याधिपतेः गजपतिजगन्नाथनारायणदेवस्य (क्रि.प. १७५१-१७७०) सभामलंकृतवान्[८७]। बहवो विमर्शकाः एतदेव मतमभ्युपगच्छन्ति[८८]। परं तु काह्नुचरणमिश्रमहोदयः गोपीनाथपात्रः पारलाखिमुण्डिराज्याधिपतेः सर्वज्ञजगन्नाथनारायणदेवस्य (क्रि.प. १६८१-१६९७) सभामलंकृतवानिति कथयति[८९]।

अत्र काह्नुचरणमिश्रमहोदयानां मतमसमीचीनमिवाभाति यतो हि पारलाखिमुण्डिराज्याधिपस्य सर्वज्ञजगन्नाथनारायणदेवस्य गोपीनाथपात्रस्य च काले महदन्तरं वर्तते। सर्वज्ञजगन्नाथनारायणदेवस्य राज्यकालः क्रि.प. १६८१-१६९७ इति मिश्रपादेन वर्णितमास्ते। गङ्गवंशेतिहासकारेण राजगुरुमहोदयेन तु क्रि.प. १६८६-१७०२ इति निर्णितमास्ते[९०]। गोपीनाथपात्रस्तु क्रि.प. १७०४-वत्सरे जातः स्यादित्युपलभ्यमानैः प्रमाणैरस्माभिनिर्णीतं वर्तते। तस्मात् गोपीनाथपात्रः कथंचित् सर्वज्ञजगन्नाथनारायणदेवस्य सभायां भवितुं नार्हति। तथा च गोपीनाथपात्रस्य आश्रयदाता पारलाखिमुण्डिराज्येश्वरो गजपतिजगन्नाथनारायणदेव एवेत्यस्माभिरालोच्यते। अत्र कविचिन्तामणौ प्रतिकिरणमन्ते उपलभ्यमानम्- "इति श्रीमत्खिमुण्डिमहाराज्येश्वरगङ्गवंशावतंसवीर-श्रीगजपतिजगन्नाथ-नारायणदेवमहाराजविद्वत्सभाराजितप्रबन्धकवितप्रकाशक-करणकुलसंभव-कविभिषग्वरवासुदेवपात्रतनयः श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ ......किरणः[९१]।" इति वाक्यं प्रबलं प्रमाणं वर्तते।

---

(८७) द्र. S.R. H.G. Part-II, PP.141-142.

(८८) द्र. KM. DSM. Vol.II, P.CXCV.
नील.ओ.सं.ले. पृ- ७६-७७

(८९) द्र. काह्नु. आलो. पृ- १४६-६७

(९०) द्र. S.R. H.G. Part-II, P.P. 100-1

(९१) द्र. अत्रैव किरणान्तवाक्यानि।

०.३.५.० गोपीनाथस्य कृतयः-

कविभूषणः गोपीनाथपात्रः उत्कलभाषायां रामचन्द्रविहाराख्यं किञ्चिन्महाकाव्यम्, अन्यानि बहूनि सरसपद्यानि, संस्कृते भृङ्गदूताख्यं किञ्चित् दूतकाव्यं, कविचिन्तामणिसंज्ञकमलंकारग्रन्थं च व्यरचयत्।

०.३.५.१. रामचन्द्रविहारम्-

अशीतिछान्दा(सर्गा)त्मकं रामचन्द्रविहाराख्यं महाकाव्यमेकमुत्कलभाषायां गोपीनाथेन विनिर्मितमास्ते । अद्यावधि काव्यमेतत् प्रकाशितं नोपलभ्यते । अस्य महाकाव्यस्य हस्तलिखितं मातृकाद्वयं भुवनेश्वरे उत्कलराज्यसंग्रहालयस्य हस्तलिखितग्रन्थालये सुरक्षितमस्ति[९२] ।

काव्यमिदमतिरमणीयं रसालंकारादिभिः सुसज्जितं वर्तते । रामायणकथामाधृत्य विरचितेऽस्मिन् महाकाव्ये भगवतः श्रीरामचन्द्रस्य जन्मनः आरभ्य स्वर्गारोहणं यावद्वृत्तं मनोज्ञया शैल्या वर्णितमस्ति । काव्येऽस्मिन् रामचन्द्रविहारे काव्ये वर्णनीयानि प्रातः-सन्ध्या-ऋतु-वनाश्रम-शैल-नदी-सागरादीनि नितरां रमणीयेन मार्गेण वर्णितान्युपलभ्यन्ते । प्रातःसन्ध्यादिवर्णने उत्कलेषु कविसम्राट्पदमलंकुर्वाणमुपेन्द्रभञ्जमपि गोपीनाथोऽतिशेते । रामचन्द्रविहारमेतत् कविचिन्तामणेः पूर्वं निर्मितमिति गोपीनाथेन स्पष्टीकृतमस्ति[९३] । काव्यमेतत् क्रि.प.१७३४ वत्सरे निर्मितमिति विद्वांसोऽभिप्रयन्ति[९४] ।

०.३.५.२. अन्यानि उत्कलभाषापद्यानि-

एतदतिरिक्ततया उत्कलभाषायां गोपीनाथेन बहूनि सरसानि पद्यानि रामचन्द्रविहारमहाकाव्यस्य निर्माणात् पूर्वं विरचितान्यासन्निति कविचिन्तामणिपद्यादेव ज्ञायते[९५] । रामचन्द्रविहारमहाकाव्यस्य रचनायाः प्राक् किमपि काव्यादिकं निर्माय अनेन कविभूषणविरुदं कस्मादपि प्राप्तं स्यादिति

---

(९२) द्र. MSS. No. O.L. 1258 & MSS. No. CY.1157.

(९३) द्र. अत्रैव १/५

(९४) द्र. केदा. खुरु. पृ- २२०-२१, नील.ओ.राम. पृ- २६

(९५) द्र. अत्रैव १/५

रामचन्द्रविहारस्य प्रथमछान्द(सर्ग)स्य अन्तिमपद्ये कविभूषणपदस्य प्रयोगादनुमीयते[९६]। उत्कलराज्यसंग्रहालयस्य हस्तलिखितग्रन्थालये हस्तलिखितग्रन्थयुगलं लभ्यते यत्र गोपीनाथेन लिखितानि कानिचित् हृद्यानि उत्कभाषापद्यानि दृश्यन्ते[९७]।

०.३.५.३. भृङ्गदूतम्-

कालिदासस्य मेघदूतकाव्येन प्रभावित इव गोपीनाथो भृङ्गदूताख्यं किञ्चित् दूतकाव्यं संस्कृते विरचितवानिति "यथा च मम भृङ्गदूते" - इत्यनेन वाक्येन सार्धं कविचिन्तामणौ उदाहृतात्-

एतद्वल्लीभवनमनिशं चन्द्रमोभानुयुक्तं
सद्यः सान्द्रैर्बहुलविदलैर्यूयमासाद्य सख्यः।
स्वच्छाभिर्वा वसनरुचिभिः शीघ्रमाच्छादयध्वं
नो पश्यामो मनसिजहतं पूर्णपीयूषभानुन्॥

इत्यस्मात् पद्यात् ज्ञायते[९८] भृङ्गदूतमेतदिदानीं यावत् कुत्रापि नोपलभ्यते।

एतदतिरिक्ततया कविचिन्तामणौ उदाहृतानि शताधिकानि स्वरचितानि रमणीयानि पद्यानि सन्ति। तानि कवेः पाण्डित्यं बहुशास्त्रनैपुण्यं च समर्थयन्ति।

०.३.५.४ कविचिन्तामणिः-

कविभूषणोपाधिना गोपीनाथेन विरचितेषु ग्रन्थेषु मूर्धन्यः पञ्चविंशतिकिरणोपेतः कविचिन्तामणिसंज्ञकः अलंकारग्रन्थो वर्तते। अत्र प्रसिद्धैः रसरीतिगुणालंकारादिभिरालंकारिकसिद्धान्तैः सह कविभेदाः काव्यरचनोपयोगिनामक्षराणां गणानां स्वरूप-देवता-फलादिनि काव्योपयोगिन्यो वृत्तयः, काव्येषु ऋत्वादिवर्णनक्रमा., समस्यापूरणोपायाः, कविभिरवधेयाः कविसमयाः, काव्योपयोगिनः कामशास्त्रसिद्धान्ताः,

---

(९६) द्र. "भणे गोपीनाथकविभूषण ए गीत।
शुभगप्रथमछान्द होइला समापत॥"
(रामचन्द्रविहारकाव्ये प्रथमछान्दे (सर्गे) अन्तिमपद्यमेतत्)

(९७) द्र. MSS. No. O.L. 1774(C) & O.L. 2142 (B)

(९८) द्र. अत्रैव १९ पृ- ३३७

संगीतशास्त्रसिद्धान्ताश्च सम्यक् निर्दिश्यन्ते। ग्रन्थेऽस्मिन् कविभिरादरणीयानां विभिन्नानां पूर्वाचार्याणां मतानामुद्धरणं दृश्यते । मनोज्ञैरुदाहरणैर्ग्रन्थोऽयं पठितॄणां मनांसि भृशमाकर्षति। सरलैः पदसंदर्भैः गुम्फितोऽयं ग्रन्थो दुर्बोध्यं काव्यतत्त्वं बालानामपि सुलभमुपकल्पयति । ग्रन्थोऽयं सर्वेषामेव काव्यतत्त्वजिज्ञासूनामवश्यमध्येतव्यो विद्यते ।

०.४. कविचिन्तामणेः प्रतिपाद्यम्-

कविचिन्तामणिः काव्यशिक्षापरः कश्चित् ग्रन्थो वर्तते । तत्र कविभेदादिनिरूपणपरे प्रथमे किरणे कविशिक्षापरस्यास्य संग्रहग्रन्थस्य सप्रयोजनत्वं प्रख्याप्य कविस्वरूपं, कविभेदाः, काव्यस्योपादेयत्वं, कवित्वख्यातिहेतुः, श्रेष्ठचतुरजनानां स्वरूपं, काव्यादिगानस्थानं, कविपुरस्कारफलं च इत्येते विषयाः उपस्थाप्यन्ते।

गणनिरूपणपरे द्वितीये किरणे छन्दःसु अपेक्षितानां गणानामकाराद्यक्षराणां स्वरूपदैवत-वर्ण-लिङ्ग-शुभाशुभफलादिकं सम्यगुपवर्ण्यते।

वृत्तनिरूपणपरे तृतीये किरणे वृत्तजातिसंज्ञकछन्दोभेदनिर्देशपुरःसरं काव्योपयोगिनां शशिवदनादीनां पञ्चचत्वारिंशद्वृत्तानां चूर्णकोत्कलिकाप्रायवृत्तगन्धिसंज्ञकभेदोपभेदस्य गद्यस्य च लक्षणोदाहरणानि चोपन्यस्यन्ते।

काव्यनिरूपणात्मके चतुर्थे किरणे महाकाव्यादीनां स्वरूपं, अभिधादिव्यापाराः, पदादीनां स्वरूपं, ध्वनि-गुणीभूतव्यङ्ग्यादिकाव्यभेदाः, कवित्वपाकभेदाश्च इत्येते विषयाः उपवर्ण्यन्ते।

नायकनायिकानिरूपणपरे पञ्चमे किरणे धीरोदात्तादिनायकभेदाः पीठमर्दादयः शृङ्गारनायकसहायाः, शोभादयः सात्त्विका गुणाः, स्वकीयादयः स्वाधीनभर्तृकादयश्च नायिकाभेदाः विविधैरुदाहरणैर्विविच्यन्ते।

भावादिसत्त्वजालंकारनिरूपणपरे षष्ठे किरणे अङ्गजाः भावादयः, अयत्नजाः शोभादयः, सहजाः लीलादयश्च नायकालंकाराः सोदाहरणमुपवर्ण्यन्ते।

अनुरागेङ्गितादिनिरूपणपरे सप्तमे किरणे मुग्धादीनां नायिकाभेदानामनुरागेङ्गितादीनि सभेदादूत्यश्च प्रपञ्चिताः सन्ति।

उद्दीपनविभावादिनिरूपणपरे अष्टमे किरणे चन्द्रचकोरादीन्युद्दीपनानि भ्रूक्षेपाद्यनुभावाः स्तम्भादिसात्त्विकाः निर्वेदादयो व्यभिचारिणश्च भव्यैरुदाहरणैरुपपादिता दृश्यन्ते।

विप्रलम्भसंभोगशृङ्गारनिरूपणात्मके नवमकिरणे शृङ्गाररसस्य स्वरूपं पूर्वरागादिविप्रलम्भभेदाश्च सोदाहरणं वर्ण्यन्ते।

हास्यादिरसनिरूपणपरे दशमे किरणे हास्य-करुण-रौद्र-वीर-भयानक-बीभत्स-अद्भुत-शान्त-वत्सलानां रसानां प्रभेदाः सोदाहरणं वर्ण्यन्ते।

परस्परविरोधिरसादिनिरूपणपरे एकादशे किरणे शृङ्गारादिरसविरोधिनो रसाः, भावाः रसाभासाः, भावाभासादयश्च स्पष्टीक्रियन्ते।

गुणवृत्त्यादिनिरूपणपरे द्वादशे किरणे माधुर्यादयो गुणाः, कैशिक्यादिवृत्तयः, वैदर्भ्यादयो रीतयः, श्लेषादयस्तत्प्राणाश्चोपवर्ण्यन्ते।

दोषादिनिरूपणपरे त्रयोदशकिरणे पद-पदांश-वाक्य-अर्थ-रस-गीतदोषाः, तेषां प्रतिप्रसवाश्च विशदीक्रियन्ते।

शब्दालंकारनिरूपणपरे चतुर्दशकिरणे अनुप्रास-पुनरुक्तवदाभासः-यमक-पद्मबन्धादिचित्रकाव्यानि प्रहेलिका-अन्तर्लापिका-बहिर्लापिकादयश्च निर्दिश्यन्ते।

अर्थालंकारपरे पञ्चदशकिरणे उपमादयः शतमलंकाराः सुखबोध्यैर्लक्षणैः रमणीयैरुदाहरणैश्चोपन्यस्यन्ते।

इवादिशब्दनिरूपणपरे षोडशकिरणे काव्यनिर्माणोपयोगिनः सादृश्यबोधकाः इवार्थकशब्दाः, निरोष्ठ्यक्रियाः, अनुलोमप्रतिलोमशब्दाः, निरोष्ठ्यशब्दाः, पादपूरणोपयोगिनः सामान्यशब्दाश्चोपस्थाप्यन्ते।

काव्योचितवर्णननिरूपणात्मके सप्तदशकिरणे पुर-नृप-देवी-राजपुत्र-मन्त्रि-पुरोहितप्रभृतीनां वर्णने वर्णनीयानि वस्तूनि निर्दिश्यन्ते।

काव्योचितवर्णननिरूपणपरे अष्टादशकिरणे महाकाव्यादौ प्रकृतिवर्णने वर्णनीयाः सन्ध्या-चन्द्रोदय-जल-केलि-सुरतादिवर्णनक्रमः कीर्त्यन्ते।

काव्योचितवर्णननिरूपणपरे एकोनविंशे किरणे वसन्तादीनां षडृतूनां वृक्षदोहदादीनां च वर्णनक्रमः सोदाहरणमुपदिश्यते ।

काव्योचितवर्णननिरूपणपरे विंशे किरणे काव्येषु पुत्रादीनां बाल्याद्यवस्थावर्णने वर्णनीया चेष्टाविशेषाः निर्दिश्यन्ते ।

उपमाननिरूपणपरे एकविंशकिरणे काव्येषु स्त्रीणां वर्णने विविधानामवयवानामुपमानानि, अवस्थाविशेषानुरोधेन वेषवर्णनक्रमः, पुरुषाणां वर्णने विविधानामवयवानामुपमानानि चोपन्यस्यन्ते ।

कविसमयादिनिरूपणपरे द्वाविंशे किरणे कविसमयः, राजसभायामुचिता व्यवहारक्रमाः प्रदर्श्यन्ते ।

समस्यापूरणोपायनिरूपणपरे त्रयोविंशकिरणे सोदाहरणं सविस्तृतं च समस्यापूरणोपायाश्चोपवर्ण्यन्ते ।

कामशास्त्रसंमतनायकादिनिरूपणपरे चतुर्विंशे किरणे काव्योपयोगिनः कामशास्त्रसंमताः, स्त्रीपुरुषलक्षणादयः, कामचालनोपायाः, रतिबन्धाः, आलिङ्गनप्रकाराः, वशीकरणोपायादयश्चोपवर्ण्यन्ते ।

संगीतनिरूपणपरे पञ्चविंशे किरणे संगीतोत्पत्तिक्रमः, नादादीनां स्वरूपम्, श्रीरागादीनां पञ्चाशद्रागाणां स्वरूपम्, गानकालादयः, गायकभेदाः, तालस्वरूपादयः, कुड्डकादीनामेकादशतालानां लक्षणोदाहरणानि, वाद्यभेदाः, नाट्यभेदाश्च निर्दिश्यन्ते । किरणेऽस्मिन् कवेराश्रयदातुः स्वपितुश्च परिचयो संग्रहेण दीयते ।

इत्थं कविचिन्तामणिसंज्ञकेऽस्मिन् ग्रन्थे कवीनां काव्यरचनायां सहृदयानां काव्यविमर्शने चोपकारकाः छन्दःशास्त्रादिशास्त्रसंबन्धिनो विचाराः आलंकारिकसिद्धान्ताश्च सरलया रीत्या सन्निवेशिताः सन्ति । तथा च कविचिन्तामणिरियं न केवलं कवीनामपितु सहृदयानां च चिन्तितमर्थमुपकल्पयतीत्यत्र नास्ति कश्चित् संशयः ।

०.९.०. कविचिन्तामणेः वैशिष्ट्यम्-

संस्कृते काव्यकल्पलता-कविकल्पलतादयो ग्रन्थाः छन्दःशुद्धि-

शब्दशुद्धि-कविसमयादीन् काव्यनिर्माणोपयोगिनो विचारविशेषान् उपवर्ण्णयन्तः काव्यनिर्माणोद्युक्तानां जनानां काव्यनिर्माणशक्तिं जागरयन्ति। तथैव ध्वन्यालोक-काव्यप्रकाश-रसगङ्गाधरप्रभृतयो ग्रन्थाः रसवस्त्वलंकार ध्वनिगुणीभूतव्यंग्यचित्रप्रभृतीन् आलंकारिकसिद्धान्तान् प्रतिपादयन्तः सहृदयेषु काव्यविमर्शनपाटवमुपकल्पयन्ति । काव्यनिर्माणे काव्यविमर्शने च जनान् व्युत्पादयन्तः अलंकारशेखरादयश्च प्रबन्धाः संस्कृते दृष्टिपथमवतरन्ति । इत्थं विविधप्रकारैः प्रवर्तमाना अलंकारग्रन्थाः कवीनां कवित्वं सहृदयानां विमर्शकत्वं च सफलं कुर्वन्ति।

कवीनां सहृदयानां चानल्पमुपकुर्वतां ग्रन्थानामन्यतमो भवति गोपीनाथपात्रविरचितः कविचिन्तामणिः। काव्येषु वर्णनीयतया निर्दिश्यमानेषु नगरादिषु वर्णनीयाः प्राचामाचार्याणां ग्रन्थेषु संगृह्य निर्दिष्टाः वस्तुविशेषाः अत्र विस्तरेणोपस्थाप्यन्ते। तदुक्तम्-

अथो बहूनां ग्रन्थानां सारमादाय संमुदा।
कविचिन्तामणिं कुर्वे प्रबन्धं सर्वसम्मतम्॥
ग्रन्थान्तरेषु सूक्तानि यानि पूर्वैर्विचक्षणैः।
लक्ष्यणान्यपि तान्यत्र वक्ष्यन्ते हृष्टमानसैः॥
पूर्वग्रन्थानुसारेण कुत्र कुत्र विचार्य च।
लक्षणानि विरच्यन्ते पद्यैर्गद्यैः सुबोधकैः॥

इति।(१/६-८)

ग्रन्थोऽयं केवलं प्राचामभिप्रायाणां संकलनमिति वा न मन्तव्यम्। प्राचामचार्याणामभिप्रायाणामत्र सर्वसुलभया शैल्या निरूपणात्। तदत्र ग्रन्थान्तरापेक्षया कविचिन्तामणेर्वैशिष्ट्यमीषत् प्रस्तूयते।

०.५.१

कविचिन्तामणौ गोपीनाथपात्रेण निर्दिष्टानि वृत्तादीनां लक्षणानि ग्रन्थान्तरगतवृत्तादिलक्षणापेक्षया सुलभानि सुस्पष्टानि च सन्ति। यथा-

कविचिन्तामणौ	ग्रन्थान्तरेषु
१. सुन्दरीवृत्तलक्षणम्- रसिके रतिदायिनि प्रभे रमणीयाम्बुजचारुलोचने। अयुजोर्यदि सौ जगौ समे यदि सभ्राश्च लगौ च सुन्दरी॥ (पृ- ६८)	अयुजोर्यदि सौ जगौ युजोः सभरा ल्गौ यदि सुन्दरी तदा। (गङ्गा.छ.म. पृ- १४२)
२. कलहान्तरितालक्षणम्- प्राणेशं चाटुकुर्वन्तं या परित्यज्य कोपतः। अनुतापं व्रजेत् सा तु कलहान्तरितोच्यते॥	(क) कलहान्तरितामर्षाद् विधूतेऽनुशयार्तियुक्। (धन. दश. २. २६) (ख) कोपात् प्रियं परमाणुद्य पश्चात्तापसमन्विता। कलहान्तरिता नाम सूरिभिः परिकीर्तिता॥ (विद्या. प्र.रु. १. ५८) (ग) चाटुकारमपि प्राण- नाथं रोषादपास्य या। पश्चात्तापमवाप्नोति कलहान्तरिता तु सा॥ (विश्व. सा. द. ३-८२)
३. औत्सुक्यलक्षणम्- यद्विलम्बासहत्वं त- दौत्सुक्यं परिकल्पितम्। अभीष्टार्थानवाप्तेस्तु चित्ततापत्वरादिकृत्॥ (पृ- १३३)	(क) कालाक्षमत्वमौत्सुक्यं मनस्तापत्वरादिकृत्। (विद्या. प्र.रु.पृ- १७९) (ख) इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता। चित्ततापत्वरास्वेद- दीर्घनिःश्वसितादिकृत्॥ (विश्व.सा.द. ३-१५९)

०.९.२

कविचिन्तामणौ विविधग्रन्थेभ्यः संकलितानि उदाहरणानि ग्रन्थान्तरेषु उदाहृतेभ्यः पद्येभ्यो नितरां रमणीयानि वर्तन्ते । यथा-

कविचिन्तामणौ	ग्रन्थान्तरेषु
१. स्रग्विणीवृत्तस्योदाहरणम्-	
अङ्गनामङ्गनामन्तरा माधवो माधवं माधवं चान्तरेणाङ्गना । इत्थमाकल्पिते मण्डले मध्यगः संजगौ वेणुना देवकीनन्दनः ।। (पृ- ९४)	इन्द्रनीलोपलेनैव या निर्मिता शातकुम्भद्रवालंकृता शोभते । नव्यमेघच्छविः पीतवासा हरे- र्मूर्तिरास्तां जयायोरसि स्रग्विणी ।। (गङ्गा.छ.म. पृ- ९१)
२. छेकानुप्रासोदाहरणम्-	
राजराजसमैश्वर्यः शास्त्रभासुरधीरधीः । राजराजद्यशो रेजे रामो दाशरथी रथी ।। (पृ- २०१)	(क) आदायवकुलगन्धा- नन्धीकुर्वन् पदे पदे भ्रमरान् । अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः ।। (विश्व.सा.द. पृ-६१०)
	(ख) महीमहीनविभवे धत्ते क्षेमंकरे करे । राजन्यजन्यविजयी राजा राजद्गुणोदयः ।। विद्या.प्र.रु. पृ- २४६)
३. अन्योन्यालंकारोदाहरणम्-	
कान्ते कज्जलरेखया सुरुचिरं नेत्रद्वयं राजते राजत्येव सुलोचनेन ललिता रेखाञ्जनेनार्पिता । हारैरेव विराजतस्तव कुचौ हाराः कुचाभ्यां सदा ग्रीवा कण्ठविभूषणेन सुमुखि ! ग्रैवेयकं ग्रीवया ।। (पृ- २३८)	(क) त्वया सा शोभते तन्वी तया त्वमपि शोभसे । रजन्या शोभते चन्द्र श्चन्द्रेणापि निशीथिनी ।। (विश्व.सा.द. पृ-८०३)
	(ख) त्रियामा शशिना भाति शशी भाति त्रियामया ।। पीयू.चन्द्रा.पृ-१६२)

कविचिन्तामणौ	ग्रन्थान्तरेषु
४- स्वयं दूत्या उदाहरणम्-	
इयं सुरतरङ्गिणी न	पन्थिअ पिपासिओ विअ लच्छीअसि
पुनरत्र नौसंगमो	जाति ता किमण्णत्तो।
भवत्तरणिमज्जनःपथिक	ण मणं वि वारओ इध अत्थि
नात्र भीतिं भज।	घरे घणरसं पिअन्ताण॥
निधाय हृदिनिर्भरं	(पथिक पिपासित इव लक्ष्यसे
विपुलचारुकुम्भद्वयं	यासि तत् किमन्यत्र।
स्वनद्धनघनागमे घन-	न मनागपि वारक इहास्ति
रसस्य पारं व्रज॥	गृहे घनरसं पिबताम्॥)
(पृ- १२१)	(इति संस्कृतछाया)
	(विश्व.सा.द. पृ- १९४)

०.९.३

गोपीनाथपात्रः कविचिन्तामणौ विलक्षणतया कवेः स्वरूपं गुणदोषादीन् सम्यक् निर्दिशति। कवेरीश्वरत्वं युक्तिभिः प्रतिपादयति, स्पर्शमणिर्यथा लोहमुत्तमं स्वर्णं कुरुते तथा सत्कविः इतरं काव्यनिर्माणनिपुणं करोति इति कवेर्वैशिष्ट्यं प्रथयति, कविपोषकाणां नृपादीनामपि कीर्तिर्दिङ्मण्डलव्यापिनी भवतीति, काव्यनिर्माणादुपलभ्यमाना कीर्तिः कीर्त्यन्तरापेक्षया श्रेष्ठा भवतीति च प्रतिपादयति।

०.९.४.

किं च गोपीनाथपात्रः कविचिन्तामणौ काव्ये प्रयुज्यमानानामवर्णादीनां वर्णानां मगणादीनां गणानां च बीज-प्रयोगकालादीन् ग्रन्थान्तरेभ्यः संगृह्य एकत्रोपस्थापयति। यथा-

वर्णानां बीज-प्रयोगकाल-फलानि (पृ-३९-४०)

वर्णाः	बीजम्	प्रयोगकालः	फलम्
अ आ ए क च ट त प य श	वायुः	सौम्यवारे उदयात् पञ्चदण्डपर्यन्तः	शोकवृद्धिः
इ ई ऐ ख छ ठ थ फ र स	वह्निः	भौमवारे उदयात् षड्दण्डपर्यन्तः	मृत्युः
उ ऊ ओ ग ज ड द व ल ह	भूः	भानुवारे उदयाद् अष्टदण्डपर्यन्तः	द्रव्यलाभः
ऋ ॠ औ घ झ ढ ध भ व क्ष	जलम्	चन्द्रवारे उदयात् चतुःदण्डपर्यन्तः	हर्षवृद्धिः
लृ लॄ अं ङ ञ ण न म	व्योम	वृहस्पति-शुक्र- शनिवारेषु उदयात् सप्तदण्डपर्यन्तः	धनहानिः

वर्णानामधिदेवतावर्णफलानि (पृ- ३४-३७)

अक्षरम्	अधिदेवता	वर्णः	फलम्
अ	सर्वः	रक्तः	सर्ववशीकरणम्
आ	पराशक्तिः	श्वेतः	आकर्षणम्
इ	विष्णुः	श्यामः	रक्षा
ई	मायाशक्तिः	पीतः	स्त्रीवशीकरणम्
उ	वसुः	कृष्णः	राजवशीकरणम्
ऊ	भूमिः	श्यामः	लोकवशीकरणम्
ऋ	वह्निः	पीतः	गृहविनाशः
ॠ	शिखण्डी	अञ्जनकृष्णः	ज्वरनाशः
ऌ	अश्विन्यौ	सितः	ज्वरः
ॡ	अश्विन्यौ	रक्तः	ज्वरः
ए	वीरभद्रः	पीतः	सर्वार्थसिद्धिः
ऐ	वाणी	हिमधवलः	वाक्सिद्धिः

वर्णानामधिदेवतावर्णफलानि (पृ- ३४-३७)

अक्षरम्	अधिदेवता	वर्णः	फलम्
ओ	ईश्वरः	ज्योतिःशुक्लः	सर्वफलसिद्धिः
औ	आदिशक्तिः	शुक्लः	सर्वानुसिद्धिः
अं	महेशः	रक्तः	सर्वसुखलाभः
अः	कालरुद्रः	रक्तः	सर्वनिकृन्तनम्
क	प्रजापतिः	पीतः	पुष्टिः
ख	जाह्नवी	क्षीरधवलः	पापनाशः
ग	गणनाथः	रक्तः	विघ्ननाशः
घ	भैरवः	....?	शत्रुनाशः
ङ	कालवीजः	काशधवलः	सर्वफललाभः
च	दण्डरुद्रः	अञ्जनकृष्णः	परनाशः
छ	भद्रकाली	....?	जयलाभः

वर्णानामधिदेवतावर्णफलानि (पृ- ३४-३७)

अक्षरम्	अधिदेवता	वर्णः	फलम्
ज	दम्भकरी	.....?	जयलाभः
झ	अर्धनारीशः	श्यामरक्तः	भयम्
ञ	कालः	पीतः	रोगविनाशः
ट	भृङ्गी	गौरः	सिद्धिलाभः
ठ	चन्द्रः	सितः	मृत्युनाशः
ड	एकनेत्रः	पीतकालः	जयलाभः
ढ	यमः	नीलः	मृत्युनाशः
ण	नन्दी	रक्तः	सर्वसिद्धिः
त	वसुः	श्वेतः	सर्वजयः
थ	ब्रह्मा	कुन्दधवलः	जयलाभः
द	दुर्गा	श्यामः	सर्वार्थसिद्धिः

वर्णानामधिदेवतावर्णफलानि (पृ- ३४-३७)

अक्षरम्	अधिदेवता	वर्णः	फलम्
ध	धनदः	पीतः	अर्थसिद्धिः
न	अर्कः	रक्तः	रोगनाशः
प	रुद्रः	श्वेतः	भाग्यसिद्धिः
फ	रतीशः	क्षीरधवलः	भद्रम्
ब	वरुणः	धूम्रः	वृद्धिः
भ	विष्णुः	----?	ज्ञानसंपत्तिसिद्धिः
म	मदनः	श्यामः	सर्वजयः
य	वायुः	कृष्णः	उच्चाटनम्
र	वह्निः	रक्तः	----?
ल	पृथिवी	पीतः	----?
व	वरुणः	शुक्लः	रोगनाशः
श	लक्ष्मीः	श्यामः	श्रीलाभः
ष	सूर्यः	रक्तः	सर्वार्थसिद्धिः
स	शक्तिः	रक्तः	श्रीलाभः
ह	शशी	शुभ्रः	स्फटिकशोभा
क्ष	विद्या	क्षीरधवलः	सर्वसौख्यम्

वर्णानां लिङ्गम् (पृ- ३७-८)

वर्णाः	लिङ्गम्
अ इ उ ए ओ अं क च ट त प ग ज ड द ब स ह	पुंलिङ्गम्
आ ई ऊ ऐ औ अः ख छ ठ थ फ घ झ ढ ध भ श ष ल व	स्त्रीलिङ्गम्
ऋ ॠ लृ ॡ ङ ञ ण न म य र क्ष	नपुंसकलिङ्गम्

ककारादीनां जातिः (पृ-३८)

वर्णाः	जातिः
क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण	ब्राह्मणः
त थ द ध न प फ ब भ म	क्षत्रियः
य ल श ष स ह	वैश्यः
र व क्ष	शूद्रः

वर्गाक्षराणां ग्रहाः (पृ- ४०)

वर्गाः	ग्रहाः	वर्गाः	ग्रहाः
स्वराः	सूर्यः	तवर्गः	वृहस्पतिः
कवर्गः	कुजः	पवर्गः	शनिः
चवर्गः	काव्यः	यवर्गः	चन्द्रः
टवर्गः	बुधः	---	---

गणानां स्वरूप-अधिदेवता-जाति-फलानि (पृ-२८)

गणाः	स्वरूपम्	अधिदेवता	जातिः		फलम्
			साहित्य-चूडामणौ	कवि-गजाङ्कुशे	
मगणः	त्रिगुरुः ऽऽऽ	ऊर्वी	शूद्रः	शूद्रः	श्रीवृद्धिः
यगणः	आदिलघुः ।ऽऽ	वारि	विप्रः	द्विजः	धनलाभः
रगणः	मध्यलघुः ऽ।ऽ	अग्निः	क्षत्रियः	राजा	मृत्युः
सगणः	अन्त्यगुरुः ।।ऽ	पवनः	चण्डालः	चण्डालः	देशभ्रमणम्
तगणः	अन्त्यलघुः ऽऽ।	द्यौः	विप्रः	द्विजः	शुभप्राप्तिः
जगणः	मध्यगुरुः ।ऽ।	सूर्यः	क्षत्रियः	राजा	रोगप्राप्तिः
भगणः	मुखगुरुः ऽ।।	तारकेशः	वैश्यः	वैश्यः	यशोलाभः
नगणः	त्रिलघुः ।।।	स्वः	विप्रः	द्विजः	दीर्घजीवनम्

गणानां कुलगोत्रादीनि (पृ- २६-२७)

गणः	कुल	गोत्रम्	ग्रहः	राशिः	नक्षत्रम्	गणः	गुणः	वर्णः	योनिः	स्वरः	दैवतम्	फलम्	स्वरुपम्
मगणः	शूद्रः	काश्यप गोत्रम्	सौम्यः	वृश्चिकः	ज्येष्ठा	देवगणः	रजः	केकिकला-पवत्नीलः	हरिणः	गांधारः	मही	श्रीलाभः	त्रिगुरुः SSS
यगणः	?	याज्ञवल्क्य गोत्रम्	शुक्रः	धनुः	स्वातिः	मनुष्यगणः	सत्त्वम्	रौप्यधवलः	नकुलः	मध्यमः	वरुणः	धनलाभः	आदिलघुः ISS
रगणः	क्षत्रियः	कौशिक गोत्रम्	भौमः	?	कृत्तिका	राक्षसगणः	तमः	कदली दलहरितः	अश्वः	ऋषभः	अनलः	मृत्युलाभः	मध्यलघुः SIS
संगणः	अन्त्यजः	गौतम गोत्रम्	शुक्रः	तुला	स्वातिः	राक्षंसगणः	तमः	?	महिषः	पंचमः	वातः	भ्रमणम्	अन्त्यगुरुः IIS
तगणः	द्विजः	वासिष्ट गोत्रम्	बृहस्पतिः	कर्कटकः	पुष्या	देवगणः	सत्त्वम्	कृष्णः	मेषः	षड्जः	व्योम	शुभम्	अन्त्यलघुः SSI
तगणः	क्षत्रियः	भार्गव गोत्रम्	सूर्यः	मकरः	उत्तर फालगुनी	मनुष्यगणः	तमः	रक्तः	धेनुः	धैवतः	भास्वान्	रोगप्राप्तिः	मध्यगुरुः ISI
भगणः	वैश्यः	आङ्गिरस गोत्रम्	चन्द्रः	वृषभः	मृगशिरा	देवगणः	रजः	शुक्लः	अश्वः	निषादः	चन्द्रः	कीर्त्तिलाभः	आदिगुरुः SII
नगणः	विप्रः	?	?	?	?	?	?	विद्युत् पीतः	?	?	इन्द्रः	शुभम्	त्रिलघुः III

'?' इति चिह्नितस्थानेषु अपक्षितानां वस्तुनां निर्देशः पद्येषु नास्ति ।

नक्षत्राणां गणकूटयोनिकूटौ (पृ-३३)		
नक्षत्राणि	गणाः	योनयः
अश्विनी	देवगणः	अश्वः
द्विजाः	मनुष्यगणाः	गजः
कृत्तिका	राक्षसगणः	मेषः
रोहिणी	मनुष्यगणाः	पन्नगः
मृगशिरा	देवगणः	पन्नगः
आर्द्रा	मनुष्यगणः	श्वा
पुनर्वसुः	देवगणः	विडालः
पुष्या	देवगणः	मेषः
अश्लेषा	राक्षसगणः	विडालः
मघा	राक्षसगणः	मूषकः
पूर्वफाल्गुनी	मनुष्यगणाः	मूषकः
उत्तरफाल्गुनी	मनुष्यगणाः	धेनुः
हस्ता	देवगणः	महिषः
चित्रा	राक्षसगणः	व्याघ्रः

नक्षत्राणां गणकूटयोनिकूटौ (पृ-३३)		
नक्षत्राणि	गणाः	योनयः
स्वातिः	देवगणः	महिषः
विशाखा	राक्षसगणः	व्याघ्रः
अनुराधा	वेवगणः	मृगः
ज्येष्ठा	राक्षसगणः	मृगः
मूला	राक्षसगणः	श्वा
पूर्वाषाढा	मनुष्यगणः	नकुलः
उत्तराषाढा	मनुष्यगणः	सिंहः
श्रवणा	देवगणः	नकुलः
धनिष्ठा	राक्षसगणः	सिंहः
शतभिषा	राक्षसगणः	अश्वः
पूर्वभाद्रपदा	मनुष्यगणः	मर्कटः
उत्तरभाद्रपदा	मनुष्यगणः	धेनुः
रेवती	देवगणः	गजः

उपरिनिर्दिष्टं वर्णादीनां बीजप्रयोगकाल-देवतावर्णाफलादिकं कवीनां महते उपकाराय कल्पते इत्यत्र नास्ति काचित् विप्रतिपत्तिः ।

०.५.५.

गोपीनाथपात्रः कविचिन्तामणौ काव्योपयोगिनि श्लोकादिवृत्तानि श्रुतबोधादिग्रन्थानुरोधे कथयति। परं कचिल्लक्षणे सौष्ठवमापादयितुं स्वकीयं किमपि वाक्यं संयोजयति । यथा-

कविचिन्तामणौ	ग्रन्थान्तरेषु
(१) श्लोकवृत्तं यथा-	
पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः । गुरुः षष्ठं च पादानां शेषेष्वनियमो मतः ॥	श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् । द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥
(पृ- ६५)	(कालि.श्रुत. पृ- ५)
(२) शशिवदनावृत्तं यथा-	
मृदुवचने स्यात् शशिवदना न्यौ ।	शशिवदना न्यौ ।
(पृ- ४८)	(गङ्गा.छ.म. पृ- १८)
(३) प्रमाणिकावृत्तं यथा-	
शृणु त्वमेव सुन्दरि प्रमाणिका जरौ लगौ ।	प्रमाणिका जरौ लगौ ।
(पृ- ५०)	(गङ्गा.छ.म. पृ- २३)
(४) इन्द्रवज्रावृत्तं यथा-	
कान्ते महाराजसुते प्रसन्ने स्यादिन्द्रवज्रा यदि तौ जगौ गः ।	स्यादिन्द्रवज्रा यदि तौ जगौ गः ।
(पृ- ५२)	(गङ्गा.छ.म. पृ- ३३)
(५) शार्दूलविक्रीडितवृत्तं यथा-	
बाले मञ्जुलपुष्पवेष- रचने संपूर्णचन्द्राननने । सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम् ।	सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम् ।
(पृ- ६२)	(गङ्गा.छ.म. पृ- ७९)

(५) आर्याजातिर्यथा-

कविचिन्तामणौ	ग्रन्थान्तरेषु
यस्याः प्रथमे पादे	यस्याः प्रथमे पादे
द्वादशमात्रास्तथा तृतीयेऽपि ।	द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादशद्वितीये	अष्टादशद्वितीये
चतुर्थे पञ्चदशार्यापि ॥	चतुर्थे पञ्चदशः सार्या ॥
(पृ- ६३)	(कालि.श्रुत. पृ- २)

०.९.६

गोपीनाथः कविचिन्तामणौ खण्डकाव्यादीनां लक्षणोदाहरणान्युपस्थापयति। एतदतिरिक्ततया उत्कलादिराज्येषु 'चउतिशा' पदेन प्रचुरप्रचारं ककारादिक्षकारान्तैश्चतुस्त्रिंशता अक्षरैरुपनिबध्यमानं खण्डकाव्यं किंचित् परिगणयति। (पृ- ६८)

०.९.७.

गोपीनाथः कविचिन्तामणौ काव्येषु अभ्युपगम्यमानायाः लक्षणायाः रूढावुपादानलक्षणा, रूढौ लक्षणलक्षणा, प्रयोजने लक्षणलक्षणाचेति चतुर एव प्रभेदान् प्रदर्शयति, नेतरान्।

०.९.८

कविचिन्तामणौ नायकलक्षणं ग्रन्थान्तरापेक्षया विलक्षणं वर्तते यथा-

कविचिन्तामणौ

कुलीनः सुश्रीकः परमचतुरः पण्डितवरः
सुरागी तेजस्वी तरुणवपुरूपादिसहितः।
सदा पात्रे त्यागी चतुरजनसंगोक्तिनिरतः
गुणासक्तो नेता सदयहृदयो भूषणरुचिः ॥(किरण-५, पृ-७७)

ग्रन्थान्तरेषु

(क) त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता ॥
(विश्व.सा.द. ३/३०)

(ख) यशःप्रतापसुभगो धर्मकामार्थतत्परः ।
धुरंधरो गुणाढ्यश्च नायकः परिकीर्त्तितः ॥
(विद्या.प्र.रु. १/२६)

०.९.१.

ग्रन्थान्तरापेक्षया पीठमर्द-विट-चेट-विदूषक-रसाभासानामुदाहरणानि अधिकतया दीयन्ते ।

पीठमर्दो यथा-

कोऽयं कोपविधिः प्रयच्छ करुणागर्भं वचो जायतां
पीयूषद्रवदीर्घिकापरिमलैरामोदिनी मेदिनी ।
आस्तां वा स्पृहयालुलोचनमिदं व्यावर्तयन्ती मुहु-
र्यस्मै कुप्यसि तस्य सुन्दरि तपोवृन्दानि वन्दामहे ॥
(पृ- ८०)

विटो यथा-

आयातः कुमुदेश्वरो विजयते सर्वेश्वरो मारुतः
भृङ्गः स्फूर्जति भैरवो न निकटं प्राणेश्वरो मुञ्चति ।
एते सिद्धरसाः प्रसूनविशिखो वैद्योऽनवद्योत्सवो
मानव्याधिरसौ कृशोदरि कथं त्वच्चेतसि स्थास्यति ॥
(पृ- ८१)

चेटो यथा-

सा चन्द्रसुन्दरमुखी स च नन्दसूनु-
र्दैवान्निकुञ्जभवनं समुपाजगाम ।
अत्रान्तरे सहचरस्तरुणः कठोरः
पानीयपानकपटेन सरः प्रतस्थे ॥ (पृ- ८१)

विदूषको यथा-

आनीय नीरजमुखीं शयनोपकण्ठ-
मुत्कण्ठितोऽस्मि कुचकञ्चुकमोचनाय ।
अत्रान्तरे मुहुरकारि विदूषकेण
प्रातः स्वनत्तरुणकुक्कुटकण्ठनादः ॥ (पृ- ८१)

शृङ्गाराभासो यथा- मुनिपत्नीगता रतिः-

उटजेभ्यो वज्रन्तीनां संभ्रमादुटजान्तरम् ।
प्रेक्षणीयं मुनिस्त्रीणां कुचमूलमवल्कलम् ॥(पृ- १६७)

गुरुपत्नीगता रतिः-

को विवेको विमूढानां यन्मन्मथवशंवदाः ।
गुरुदारेषु वन्द्येषु तरलीकुर्वते मनः ॥ (पृ- १६७)

प्रतिनायकनिष्ठारतिः-

वीर ! त्वामवलोक्याजौ वरवैरनिवारणम् ।
उपभोक्तुं श्रिया सार्धं सेवन्ते शात्रवस्त्रियः ॥(पृ- १६७)

हास्याभासो यथा -

गुरुपादाः समायान्ति मायापाटवपण्डिताः ।
कपटोत्कटकृष्णाख्या भाषिणः पिशुनोत्तमाः ॥
(पृ- १६८)

करुणाभासो यथा -

विललाप स वाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ॥
(पृ- १६८)

वीराभासो यथा -

कालक्रमातिविषमे पापीयसि कलौ युगे ।
द्रविणार्थं जिघांसन्ति ब्राह्मणानपि वर्वराः ॥
(पृ- १६९)

बीभत्साभासो यथा -

पश्य पश्य मुखभ्रश्यत् कदन्नकणकाङ्क्षिणः ।
प्रत्यङ्गनं विचेष्टन्ते काका इव महाजनाः ॥(पृ- १६९)

अद्भुतरसाभासो यथा -

शून्येऽपि गगनाभोगेऽवलम्बविकलीकृतः ।
चित्रं संचित्रसंचारश्चन्द्रमा न स्खलत्यसौ ॥(पृ- १६९)

शान्ताभासो यथा -

सन्ततानन्तनामोक्तिर्वाचालरसनाञ्चलः ।
मनो विनोदयत्येष यवनोऽपि द्विजन्मनाम् ॥

(पृ- १७०)

०.५.१०

कविचिन्तामणौ बहिर्लापिकान्तर्लापिकासंज्ञकौ प्रहेलिकाभेदौ सोदाहरणं निर्दिश्येते ।

तत्र बहिर्लापिका यथा-(पृ- २०६)

कः स्वर्गाधिपतिः सुधाकरतनुः पूर्णा कदा दृश्यते
कः पातालतले बलिं निजपदात् प्राव्राजयत् कोकयोः ।
प्रातः कः खलु जायते सिततनुः का सर्वदा लोच्यते
या प्रश्नोत्तरमध्यवर्णघटिता भूत्यै सदा नोऽस्तु सा ॥

अस्यार्थः- स्वर्गाधिपतिः कः ? वासवः । सुधाकरतनुः कदा पूर्णा दृश्यते ? पर्वणि । निजपदात् पातालतले बलिं कः प्राव्राजयेत् ? वामनः । प्रातः कोकयोः खलु निश्चितं को जायते ? सङ्क्रमः । सिततनुः का सर्वदा लोच्यते ? बलाका । एवंप्रश्नोत्तरंमध्यवर्णघटिता या सर्वमङ्गला सा नोऽस्माकं भूत्यै सम्पदे सदास्तु ।(पृ- २०७)

अन्तर्लापिका यथा- (पृ- २०७

को निर्दग्धस्त्रिपुरजयिना कश्च कर्णस्य हन्ता
नद्याः कूलं विघटयति कः कः परस्त्रीरतो वा ?
कः संनद्धो भवति समये भूषणं किं कुचानां
किं वा दुःखं भवति महतां ? "मानपूजापहारः" ॥

अस्यार्थः- कः त्रिपुरजयिना निर्दग्धः ? मारः । कश्च कर्णस्य हन्ता ? नरः । नद्याः कूलं कः विघटयति ? पूरः । कः परस्त्रीरतः ? जारः । कः समरे संनद्धो भवति ? परः । कुचानां किं भूषणम् ? हारः । महतां किं वा दुःखं भवति ? मानपूजापहारः । इति । 'मानपूजापहारः' इत्यत्र 'मा-न-पू-जा-प-हा' इत्येतेषां वर्णानां क्रमशः 'रः' इत्यनेन वर्णेन सह पठने संभवन् शब्दः पद्यस्य पादत्रयगतानां प्रश्नानां. 'मानपूजापहारः' इत्ययं शब्दश्चतुर्थपादगतस्य प्रश्नस्य चोत्तरतां वहति ।

०.५.११.

गोपीनाथः कविचिन्तामणौ काव्योपयोगिनः सादृश्यवाचकान् इवादिशब्दान्, निरोष्ठ्यशब्दान्, निरोष्ठ्यक्रियाः, पादपूरणोपयोगीनि ‘श्री भोहेही’त्यादीन्यव्ययानि चैकत्र संगृह्णाति, महाकाव्यादिप्रबन्धेषु पुरादिषु मानवनिर्मितप्रदेशेषु प्रातःकालादिप्राकृतिकवस्तुषु च वर्णनीयान् पदार्थान् विस्तरेण निर्दिशति । एतत् कवीनां महते उपकाराय कल्पते ।

०.५.१२.

गोपीनाथः प्राचामाचार्याणां मतमनुसृत्य कविचिन्तामणौ सुलभया शैल्या वसन्तादिऋतुवर्णने वर्णनीयानां पदार्थविशेषाणां वर्णनक्रमं विविधैरुदाहरणैरुपदर्शयति । वसन्ते मलयानिलवर्णनं यथा-

कान्ताकलापसुरतश्रमघर्महन्ता
कासारसारसकुलोदरगन्धचौरः ।
उत्तुङ्गचन्दनमहीरुहरुद्धवेगो
मन्दानिलो वहति मन्मथरङ्गसंगी ।। इति ।(पृ- ३०५)

प्रावृषि हंसानां मानसगमनवर्णनं यथा-

हंसपङ्क्तिरपि नाथ ! संप्रति
प्रस्थिता वियति मानसं प्रति ।
चातकोऽपि तृषितोऽम्बु याचते
दुःखिता पथिक ! सा प्रिया च ते ।। इति । (पृ- ३५०)

हेमन्ते सूर्यस्य तेजोराहित्यवर्णनं यथा-

शीतार्ता इव संकुचन्ति दिवसा नैवाम्बरं शर्वरी
मुञ्चत्यम्बुजवान्धवोऽपि हुतभुक्कोणाश्रितो भास्करः ।
त्वं चानङ्ग ! हुताशभाजि हृदये सीमन्तिनीनां मुहुः !
नास्माकं वसनं न वा युवतयः कुत्र व्रजामो वयम् ।। इति ।(पृ- ३६०)

अन्यच्च पुत्रादीनां बाल्यादौ वयसि चेष्टादीन्, स्त्रीणां पुंसां च सर्वावयवानामुपमानानि, कविसमयादीन्, समस्यापूरणोपायान्, चुम्बनादिकामशास्त्रसिद्धान्तान्, स्वरतालरागादिसंगीतशास्त्रसिद्धान्तांश्च कविचिन्तामणौ सम्यगुपदर्शयन् कविभूषणः गोपीनाथः कविचिन्तामणिं कवीनामुपकारकं कल्पयति ।

०.६.०. कविचिन्तामणौ आभासमाना दोषाः-

कविचिन्तामणौ कवीनां सहृदयानां चोपादेयेषु अनेकेषु विचारेषु उपवर्णितेषु सत्स्वपि तद्वर्णनप्रसङ्गे अनवधानादिभिः कारणैः ग्रन्थकारः क्वचित् स्खलति। तदत्र किंचित् प्रस्तूयते।

०.६.०.

गणस्वरूप निरूपणे गोपीनाथकविभूषणः तगणस्य शुभदत्वं कथयति। (पृ. २६) ईषदग्रे परं -

"तगणः शुभगणसंयुक्तः शुभदो भवेदिति चेत् तदपि न युक्तम्।" (पृ. ३०) इति कथयति। अत्र तगणस्य शुभगणसंयोगे 'शुभदत्वं युक्तमि'ति कथनं प्रागुक्तेन तगणस्य शुभदत्व-कथनेन विरोधमुपकल्पयतीति ग्रन्थे पुर्वापरविरोधः संपद्यते।

०.६.२.

क्वचित् सिद्धान्तः उदाहरणे न समन्वेति। यथा-

"प्राकृतो यगणो नित्यं श्रीकृतिः कथ्यते बुधैः।
स एव विकृतिं याति सगणानुगतो यदि" ॥ (पृ. २९)

इत्यनया करिकया प्रस्तुतस्य सिद्धान्तस्य 'अवलम्बस्व हेरम्बम्' इत्यस्मिन् उदाहरणे समन्वयो न भवति यगणस्याभावात्।

०.६.३.

कविचिन्तामणौ क्वचित् छन्दोदोषो दृश्यते। यथा- "सन्तोषैर्वचनर्विलासिनि शृणु त्वम्" (पृ- ६३) इत्यत्र लसत्कलाकर-प्रभामुखि शृणूत्तमे दृढम् (पृ. ६४) इत्यत्र च शृकारस्य संयुक्ताक्षरताभावात् तस्मिन् परे पूर्वस्य लघोर्गुरुत्वाभावात् क्रमशः प्रहर्षिणीवृत्तस्य पंचचामरवृत्तस्य च लक्षणं न संगच्छते, छन्दोभङ्गश्च भवति।

०.६.४.

क्वचित् कविचिन्तामणौ प्रयुक्तानि पदानि विवक्षितमर्थं न बोधयन्ति स्थालीपुलाकन्यायेनात्र किंचिदुदाह्रियते। यथा-

"पादैरुक्तादिसंज्ञं स्याच्छन्दः षड्विधमुच्यते।" (पृ- ४८)

"भवेत् प्रगल्भधीरा सा बाह्यादरप्रकाशिता।" (पृ- ९४)

इत्यनयोर्वाक्ययोः प्रथमवाक्ये षड्विंशतिविधमिति, द्वितीयवाक्ये बाह्यादरप्रकाशकारिणी'ति च विवक्षितमर्थं बोधयितुं 'षड्विधं' 'बाह्यादरप्रकाशिता' इत्येतौशब्दावसमर्थौ वर्तेते।

०.६.५.

क्वचित् कविचिन्तामणौ अस्पष्टार्थानि पदानि प्रयुक्तानि सन्ति। यथा-

कामबाणाग्निसंतप्ता या कान्तमभिसारयेत्।
स्वयं चाभिसरत्यन्तं साभिसारवती स्मृता॥ (पृ- ९६)

इत्यत्र 'स्वयं चाभिसारत्यन्तम्' इत्यत्र अन्तपदार्थः अस्पष्टो वर्तते।

०.६.६.

क्वचित् पदानां लिङ्गविपर्ययो वचनविपर्ययश्च दृश्यते। यथा-

"कृत्रिमं काननं कुन्दं कमलं भवनालयम्।" (पृ- २७१)

इत्यत्र पुंलिङ्गम् आलयशब्दः आलयमिति नपुंसकलिङ्गे प्रयुक्तो वर्तते। एवमत्र भवनालयमित्यत्र भवनालययोः समासात् द्विवचने प्रयोक्तव्ये एकवचनं प्रयुक्तमास्ते।

०.६.७.

कविचिन्तामणौ प्रयुक्तानि कानिचित् पदानि असंगतार्थानि वर्तन्ते। यथा- दानवीरलक्षणपरे-

"एतैर्व्यक्तीकृतः शत्रूत्साहस्थायी समुत्कटः।" (पृ- १८९)

इत्यस्मिन् वाक्ये प्रयुक्तं शत्रूत्साहपदं दानवीररसस्थायिभावस्य वाचकं न वर्तते, दयोत्साहस्यैव दानवीरे स्थायिभावत्वाभ्युपगमात्। यथा च-

"निर्घोषः सैन्यढक्कानां मृगादीनां पलायनम्।
तेषां संत्रासनाशित्वं व्याघ्रसिंहादिगर्जनम्॥" इति। (पृ-२९९)

अत्र आखेटे व्याघ्रसिंहादिगर्जनस्य मृगत्रासनाशकत्वं न युज्यते, व्याघ्रसिंहादिगर्जनस्य मृगत्रासकारित्वात्।

०.६.८.

कविचिन्तामणौ क्वचिदुपस्थापितस्य पूर्वपक्षस्य समाधानमकृत्वा विषयान्तरं प्रस्तूयते। यथा-

"ननूक्तं प्रपाणकरसवद्विभावादीनामेकीभावो रसः।

अथ रसाभासभावाभासौ साहित्यदर्पणे-

अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः।'' (पृ-१६६)

इत्यत्र रसस्वरूपविषयकं पूर्वपक्षमसमाधाय रसाभासभावाभासयोर्लक्षणं प्रस्तूयते। अतोऽत्र पूर्वोत्तरवाक्ययोः संगतिर्न भवति।

०.६.९.

कविचिन्तामणौ क्वचिदालंकारिकसिद्धान्तविरोधो दृश्यते। यथा- ‘‘सशंखचक्रो हरिः' इंत्यादौ शंखचक्रसंयोगेन हरिशब्दात् विष्णुरिति व्यञ्जनावृत्त्या व्यंग्यार्थः प्रतीयते।'' (पृ-७६) इति गोपीनाथः कथयति। एतदालंकारिकसिद्धान्तविरुद्धमास्ते। तथा हि-

‘‘शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः[९९]।'' इति वाक्यपदीयवाक्यानुरोधेन संयोगादयोऽभिधानियामकत्वेन स्वीक्रियन्ते। तथा च-

‘‘यमानीलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु।
शुकाहिकापिभेकेषु हरिर्ना कपिले त्रिषु॥[१००]

इत्यमरोक्तदिशा यमाद्यनेकार्थवाचकस्य हरिशब्दस्यार्थस्य अनवच्छेदे शंखचक्रसंयोगोऽनेकार्थस्य हरिशब्दस्य विष्णुवाचकत्वं नियन्त्रयति। अत्रोऽत्र विष्णुरित्यर्थः अभिधावृत्त्या प्रतिपन्नः सन् वाच्यार्थः, न तु व्यञ्जनावृत्त्या प्रतिपादितो व्यंग्यार्थः। तस्मादत्र ‘‘हरिशब्दात् विष्णुरिति व्यञ्जनावृत्त्या व्यंग्यार्थः प्रतीयते'' इति ग्रन्थकारवचनमालंकारिकसिद्धान्तविरोधमावहति।

०.६.१०.

कविचिन्तामणौ अर्थालंकारनिरूपणावसरे बहुत्र कुवलयानन्दवाक्यं चन्द्रालोकवचनमिति निर्दिश्यते।

०.६.११.

कविचिन्तामणौ उद्धृतेषु ग्रन्थान्तरवाक्येषु क्वचित् पाठविपर्यासो दृश्यते। यथा-

---

(९९) द्र. भर्तृ. वाक्य.

(१००)द्र.अम. अ. को. पृ- ३-३-१७५

“न भावहीनोऽस्ति रसो न भावो रसवर्जितः ।
परस्परकृता सिद्धिरनयो रसभावयोः ॥”[१०१] (पृ- १६९)

इति साहित्यदर्पणे उद्धृतं नाट्यशास्त्रस्यानुवंश्यश्लोकमुद्धरन् ‘न भावो रसवर्जितः’ इत्यस्य स्थाने ‘न रसो भाववर्जितः’ इति पठति । पाठविपर्ययोऽयं वाक्यार्थे मूलग्रन्थवैपरीत्यमापादयति ।

०.७. कविचिन्तामणेरुपादेयता-

कविचिन्तामणावस्मिन् क्वचित् स्थलेषु ग्रन्थकारस्य स्खलनं यद्यपि विमर्शकानां दृष्टिपथमायाति तथापि गुणबाहुल्यात् “निमज्जतीन्दोः किरणेष्विवाङ्कः” इति महाकविवचनानुरोधेन गुणबहुलो ग्रन्थोऽयं कवीनां सहृदयानां च सुतरामुपयोगी वर्तते ।

आलंकारिकसिद्धान्तसंकलनात्मकस्यास्यकविचिन्तामणेरुपादेयताम्-

मधुरमधु नवीनं सन्ततं मक्षिकाया
मुखगलितमपीच्छेत् सादरं सद्रसज्ञः ।
विरलतरलमुक्ता शुक्तिजातापि रम्या
नरपतिवरकण्ठे कण्ठभूषा न किं स्यात् ॥ (पृ- ३)

इत्यनेनाप्रस्तुतप्रशंसात्मकेन पद्येन गोपीनाथपात्रः समर्थयति ।

कवीनां सहृदयानां च नितरामुपकारकस्याद्यावधि कुत्रचित् समग्रतया अप्रकाशितस्य कविभूषणगोपीनाथपात्रविरचितस्य कविचिन्तामणेः संपादनं प्रकाशनं चालंकरशास्त्राभिरतस्य लोकस्य महते प्रयोजनाय स्यादित्यालोच्य तत्रास्माभिरुद्युज्यते ।

०.८.०. कविचिन्तामणेः मातृकाणां परिचयः-

गोपीनाथपात्रविरचितः कविचिन्तामणिः ‘श्रीकृष्णं भक्ततृष्णम्’ इत्यतः ‘सप्तगणाधिपाः’ इत्येतत्पर्यन्तं ब्रह्मपुरतः मनोरमासंज्ञिकायां पत्रिकायां मुद्राप्य प्रकाशितं भागं विना अद्यावधि समग्रतया प्रकाशितो न दृश्यते । कविचिन्तामणेरस्य पञ्चमातृकाः भुवनेश्वरस्थः ओडिशा(उत्कल) राज्यसंग्रहालयस्य हस्तलिखितग्रन्थालये, एका मातृका मद्रासस्थ-शासकीय-हस्तलिखितग्रन्थालये (Goverment Oriental Manuscripts Library, Madras) इत्याहृत्य षट् मातृका उपलभ्यन्ते । तथा हि-

---

(१०१)द्र. विश्व. सा. द. ३-२६०, पृ- २२६

ओडिशाराज्यसंग्रहालयस्य हस्तलिखितग्रन्थालये AL. 4 संख्योपेता अत्र भु. 1 संकेतोपेता तालपत्रेषु उत्कललिप्यां लिखिता क्वचित् कीटदष्टा १६२ पत्र (Folios) संबलिता संपूर्णा च काचित् प्रथमा मातृका, SMS. 11 संख्योपेता अत्र भु. 2 संकेतान्विता कर्गजपत्रेषु (on paper) उत्कललिप्यां श्रीमता बि. मिश्रेण २४-७-१९३९ दिनाङ्के समापिता ३२० पृष्ठसमन्विता समीचीनस्वरूपा द्वितीया मातृका, (AL. 64) संख्योपेता अत्र भु. 3 संकेतान्विता तालपत्रेषु उत्कललिप्यां लिखिता १३२ पत्र (Folios) संवलिता क्वचित् पार्श्वे नष्टग्रन्थभागा बहुपत्रविलुप्ता प्रतिलिपिकारस्य प्रमादात् पंचविंशतिकिरणोपेताऽपि चतुर्विंशतिकिरणोपेततामापादिता केनचिद् दीक्षितगोपीनाथमहापात्रेण परिशोधिता संपूर्णा तृतीया मातृका, (CY. 465-66) संख्योपेता अत्र भु. 4 संकेतोपेता कर्गजपत्रेषु उत्कललिप्यां लिखिता १९९ पृष्ठसंवलिता श्रीमता मानगोविन्दमहासूपकारेण २३-१२-१९७१ दिनाङ्के विलिख्य संपूर्णतां प्रापिता क्वचित् विलुप्तग्रन्थभागा प्रतिलिपिकारस्य प्रमादात् पञ्चविंशतिकिरणोपेतापि चतुर्विंशतिकिरणान्वित-तामापादिता समीचीनस्वरूपा चतुर्थी मातृका, AL. 5 संख्योपेता अत्र भु. 5 संकेतोपेता तालपत्रेषु उत्कललिप्यां लिखिता ९३ पत्रसमन्विता ग्रन्थपातबहुला पञ्चदशकिरणोपेता अपूर्णा पञ्चमी मातृका इत्येवं कविचिन्तामणेः पञ्चमातृकाः उपलभ्यन्ते । एतदतिरिक्ततया मद्रासस्थ-शासकीय-हस्तलिखितग्रन्थालये R-2925 संख्योपेता अत्र 'म' संकेतोपेता कर्गजपत्रेषु पारलाखिमुण्डिनिवासिना ओडिआभाषातत्त्वग्रन्थकारेण उत्कलेषु सुप्रथितेन गोपीनाथनन्दशर्मणा १९२० क्रिस्तुवत्सरे देवनागरीलिप्यां लिखितः १०१ पत्रसंवलिता लेखनप्रमादात् पञ्चविंशतिकिरणोपेतापि चतुर्विंशतिकिरणोपेततामापादिता काचित् संपूर्णा समीचीना च मातृका वर्तते । तदित्थमद्य मनोरमापत्रिकायां १९५४ क्रिस्तुवत्सरे प्रकाशितः कविचिन्तामणेः कश्चन भागः अत्र 'ब्र' संकेतोपेतः अन्याः षट् मातृकाश्चेति कविचिन्तामणेः सप्त प्रतयः उपलभ्यन्ते ।

०.८.२. कविचिन्तामणेर्मूलमातृकानिर्णयः-

कविचिन्तामणेः गोपीनाथपात्रेण स्वयं लिखिता कापि मातृका अद्यावधि कुत्रापि नोपलभ्यते। अद्य उपलभ्यमानाः कविचिन्तामणेः मातृकाश्च विभिन्नेभ्यो मूलेभ्यः समागता इति तासां पाठानां परिशीलनेन ज्ञायते। तथा चोपलभ्यमानानां षण्णामपि तासां मातृकाणां पार्थक्येन षट् मूलमातृकाः भवितुमर्हन्ति। तासां च मूलानि अन्यानि कानिचित् भवितुमर्हन्ति। तथा च कविचिन्तामणेः मूलमातृका निर्णेतुमशक्या वर्तते।

कविचिन्तामणेः उपलब्धासु षट्सु मातृकासु का वा ग्रन्थकृद् गोपीनाथपात्रविलिखितायाः परममूलमातृकायाः नितरां समीपवर्तिनी स्यादित्यत्र किंचिद् विचार्यते-

इदानीमुपलभ्यमानानां षण्णां मातृकाणां मध्ये ‘म’ भु:2, भु.4 मातृकाः यथाक्रमं १९२०, १९३९, १९७१ क्रिस्तुवत्सरे विलिखिता वर्तन्ते इति तत्तन्मातृकान्ते प्रतिलिपिकारेण विलिखितमास्ते। तालपत्रमातृकाणां लेखनकालस्तु कुत्रापि सूचितो न दृश्यते। तथापि मातृकाणां लिपिलेखनक्रमपरिशीलनेन एतज्ज्ञायते यदतिशिथिलापि भु.5 संकेतोपेता मातृका असंपूर्णेत्यतः भु.1, भु.3 मातृकाभ्यामर्वाचीना स्यादिति वक्तव्यं भवति। भु.1 भु.3 मातृकयोर्मध्ये भु.3 मातृकायां भु.1 मातृकापाठापेक्षया बहुषु स्थलेषु पाठाधिक्यमुपलभ्यते। भु.1 मातृकायाः लिपिः प्राचीना उत्कललिपिर्भवति, किंतु भु. 3 मातृकायाः लिपिस्तु अर्वाचीना उत्कललिपिः वर्तते। भु.3 मातृकायाः अन्ते “श्रीमद्गोपीनाथकविभूषणकृतौ दीक्षितगोपीनाथमहापात्रपरिशोधितभूयिष्ठे कविचिन्तामणौ” इति कथनात् परिशोधनस्य अनन्तरकाले संभवात् च भु.3 मातृका अर्वाचीना भु.1 मातृका तदपेक्षया प्राचीना चेति वक्तुं शक्यते। तस्मात् भु.1 मातृकायाः पाठाः संस्करणेऽस्मिन् अतिशयेन समादृताः सन्ति।

कविचिन्तामणेरद्योपलभ्यमानाः षट् मातृकाः, प्रकाशितः कविचिन्तामणेः कश्चिद्भागः इत्येतानाधृत्य कविचिन्तामणेः पाठसमीक्षात्मकं नूतनं किंचित् संस्करणं लोकोपकारायास्माभिरुपकल्पितं वर्तते।

०.९. ग्रन्थसंपादनक्रमः-

गोपीनाथपात्रविरचितः कविचिन्तामणिरयं शोधपद्धत्यनुरोधेन संपादितो वर्तते । अस्य संपादने प्रवृत्तैरस्माभिरादृतायां भुं. १ मातृकायामुपलभ्यमानेषु पाठेषु लेखकप्रमादादिभिर्कारणैः संभाव्यमानानां दोषाणामपाकरणे अपेक्षितेषु स्थलेषु सूचनाः प्रदत्ताः सन्ति । पाठदोषवदाभासमानानां पाठानां पार्श्वे वृत्तावरणे प्रश्नचिह्नेन सह (?) अपेक्षितानि शोधनानि संसूचितानि वर्तन्ते । एवमेव क्वचिदवश्यमपेक्षितानां मातृकासु अनुपलभ्यमानानां च पदानां वाक्यानां वा उपकल्पनं चतुष्कावरणान्तर्गतं सत् [ ]सूचितमास्ते। अस्माभिरनादृतानि पाठान्तराणि सर्वाण्यपि विमर्शपद्धत्यनुरोधेन अभ्युपगतस्य ग्रन्थभागस्य अधस्तात् पादटिप्पण्यां समावेशितानि सन्ति । अपेक्षितेषु स्थलेषु गुणदोषाद्याविष्करणार्था टिप्पणी च पादटिप्पणीमधोऽधः संयोजिता वर्तते । ग्रन्थान्ते कविचिन्तामणेः उदाहरणानां वर्णानुक्रमानुरोधिनी सूची च वाचकानां सौकर्याय संनिवेशिता वर्तते ।

०.१०. उपसंहारः-

नाधिकं किञ्चिदवशिष्यते वक्तुमित्युपसंहारेऽस्माभिः परं येषां मार्गदर्शनादृते ग्रन्थोऽयं कदापि सुसंस्कृतो न स्यादित्याशंके ते श्रीमन्तोऽस्मद् गुरुचरणाः स्वर्गताः डॉ० उण्डमने शङ्करभट्टमहोदयाः तथा च येषां मुहुर्मुहुरुत्प्रेरणं विना कार्यमिदं न पूर्यते ते चास्मदीयाः दिवंगताः पितृपादाः प्रणम्यन्ते ।

अवसरेऽस्मिन् ग्रन्थमिमं लोकलोचनगोचरतामापादयितुं बहुधा प्रोत्साहयन्तः ओडिशाराज्यसंग्रहालयस्य हस्तलिखितग्रन्थालयाध्यक्षपदान्निवृत्तव्यापाराः दिवंगता पंडितनीलमणिमिश्रपादाः तिरुपतिकेन्द्रीयसंस्कृतविद्यापीठस्य प्राचार्यपदान्निवृत्ताःस्वर्गताः डा बालसुबह्मण्यमहाभागाश्च संस्मर्यन्ते ।

ग्रन्थस्यास्य शोधकार्यसंपादनकाले ग्रासवासाद्युपकल्पयद्भ्यः तिरुपति-उत्तराधि-श्रीवैष्णवमठाधीश-श्रीमदनिरुद्धरामानुजदास-पादेभ्यःसमुपाह्रियन्ते धन्यवादसन्दोहाः ।

येषां येषां विदुषां पुस्तकानां च साहाय्येन पूर्यते कार्यमिदं तेऽपि सांप्रतं कथं वा विस्मर्यन्ते ।

संशोधनादि विशिष्टं साहाय्यं विदधतः श्रीमन्तः श्रीकान्तशतपथिनः कया वा विधया सभाजनीया इति न ज्ञायते ।

ग्रन्थस्यास्य प्रकाशनाय सर्वविधसौविध्यमुपकल्पयते लोकभाषाप्रचारसमितेः महासचिवाय चानुजकल्पाय डॉ० सदानन्ददीक्षिताय विलसन्त्वनेके आशीर्वादाः ।

ग्रन्थस्य प्रकाशनेच्छायां बलीयस्यां सत्यां सुतरामसमर्थोऽहं नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानेन प्रकाशनभारः स्वीक्रियते इति स्वीकृतिपत्रं प्राप्य समुत्साहितः सन् कृतज्ञतां विज्ञापयामि संस्थानाधिकारिभ्यः ।

एवमयं ग्रन्थस्तोषयिष्यति विपश्चितां मनांसीति संपद्यमानोऽप्यक्षरसंयोजनदोषादस्माकं मतिमान्द्याद् वा क्वचन स्खलनं जनयेच्चेत्तर्हि गुणैकपक्षपातिनः मर्पयिष्यन्तीति प्रर्थना ।

अपि च -

ग्रन्थोऽयं रसगर्भवाक्यमधुरः पीयूषसारोपमो
लोकानां बहुगद्यपद्यविसरद्बुद्धिप्रदस्तत्क्षणात् ।
नानाकाव्यकलाविलासचतुराभीकालिकण्ठस्थितः
सत्काव्योचितवर्णनागुणयुतः सौख्यप्रदो राजतु ॥

इति ग्रन्थकारवचनेन ग्रन्थस्यास्य शुभाशंसां कामयमानेन वृथा पल्लवितात् प्रसंगादस्मात् विरम्यते । इति शम् ।

विदुषां वशंवदः
नारायणमहापात्रः

ACCESSION NO. ....
DATE ....

[प्रथमः किरणः]

श्रीकृष्णं भक्ततृष्णं नवघनवपुषं बर्हिबर्हावतंसं
श्रीराधावक्त्रचन्द्रामृतरसरसिकं मन्दहासानुरक्तम् ।
कालिन्दीतीरकुञ्जाभिलषितविपिने पुष्पगन्धाभिपूर्णे
क्रीडन्तं गोपिकाभिः प्रमुदितहृदयं नन्दसूनुं नमामि ॥१॥

वन्दे सदा व्यासशुकौ महर्षीन्
[१]वाल्मीकिसद्गौतमनारदादीन् ।
येषां पुराणादिवचो निशम्य
जगज्जना मोक्षपदं लभन्ते ॥२॥

✮
सदा साधुगुणाढ्यानां मधुरालापवादिनाम् ।
अज्ञानकुलहन्तॄणां श्रीगुरूणां प्रसादतः ॥३॥

[२]कवित्वेषु रसाढ्येषु गद्यपद्यात्मकादिषु ।
मतिर्मे भवतु ख्याता निर्मला[३] मन्दचेतसः ॥४॥

पादटिप्पणी-

---

(१) भु 1 भु 2) वाल्मीकिनं गौतम० । (३) भु 3) 'निखिला' ।
(२) भु 1 भु 2) 'कवित्वेषु....मन्दचेतसः' इति नोपलभ्यते ।

टिपणी.

✮ सदा साधु-.... प्रसादतः' इत्यनेन एकवाक्यतामापन्नः कवित्वेषु... मन्दचेतसः'' इत्ययं श्लोकः भु 1. भु 2. मातृकालिपिकाराभ्यां प्रमादात् परित्यक्तः स्यादिति तर्क्यते ।

पूर्वं रामविहारगीतमतुलं राज्ञां [४]सदोमण्डनं
सत्काव्यं सरसोत्कलीयवचनैर्युक्तं मयोक्तं महत् ।
इत्याद्या बहवो [५]रसोक्तिरचिता भक्त्या जनैरादृता
ग्रन्थाश्चित्रकवित्वभाववचना[६]लंकारसंराजिता: ।।५।।

अथो बहूनां ग्रन्थानां सारमादाय [७]संमुदा ।
कविचिन्तामणिं [८]कुर्वे प्रबन्धं सर्वसंमतम् ।।६।।
ग्रन्थान्तरेषु सूक्तानि यानि पूर्वैर्विचक्षणै: ।
लक्षणान्यपि तान्यत्र [९]वक्ष्यन्ते हृष्टमानसै: ।।७।।
पूर्वग्रन्थानुसारेण [१०]कुत्र कुत्र विचार्य च ।
[११]लक्षणानि विरच्यन्ते पद्यैर्गद्यै: सुबोधकै: ।।८।।
पण्डिता: कवय: सर्वे शृणुध्वं साधुचेतस: ।
कवीनां कामदातारं प्रबन्ध[१२]मिममुत्तमम् ।।९।।

पा.टि..

(४) म) 'मण्डलम्' । (५) ब) '-भरिता' । (६) भु 3 भु 4 म) लंकारिणो राजिता:' । ब) लंकारनीराजिता: । (६) भु 3 भु 4 भु 5 म ब) वुद्धिदम् । (८) भु 3 भु 4 म ब) 'नाम कुर्वेऽहं ग्रन्थमुत्तमम्' । (९) भु 3) 'बोधार्थं तूच्यते मया' । भु 4 ब) 'सुबोध्यानि करोम्यहम्' । भु 5 म) 'सुबोध्यान्युच्यते मया' । (१०) भु 3 भु 4 ब) 'क्वचित् क्वचिदुपोह्य' । (११) भु 3) 'पद्यैर्गद्यैर्बुधैश्चोक्तै रच्यन्ते लक्षणान्यपि' । भु 4) 'पद्यैर्गद्यैर्बन्धेनोक्तैर्लक्षणं संनिवेश्यते' । भु 5) पद्यैर्गद्यैर्बुधेनोक्तैर्लक्षणानि विरच्यते' । म) 'पद्यैर्गद्यैर्बुधोक्तैश्च लक्षणानि विरच्यते' । ब) 'पद्यैर्गद्यैर्विधानोक्तैर्लक्षणं संनिवेश्यते' । (१२ भु 5) '-ममुमुत्तमम्' ।

मणिरूत्तमसूत्रेण ग्रथितो [१३] हि विराजते ।
दर्पणः पारदेनैव कान्तिमान् जायते परम् ॥१०॥
यदा नव्यं काव्यं सरसकविभिः शोधिततमं
तदा भव्यं लोके सदसि [१४] विदुषां भूपसदसि ।
सदारामः पुष्पैरधिकसुखदः कान्तिभरितो
यथा सत्संस्कारैर्भवति जगतां पूजिततमः ॥११॥

[१५] सहृदयानन्दे —☆

'रत्नस्य काव्यस्य च नूतनस्य तुल्यः स्वभावः प्रतिभाति मह्यम् ।
मृजाभिरेते निपुणैः कृताभिः समश्नुवाते हि गुणान्तराणि ॥"

[१६] मधुरमधु नवीनं संततं मक्षिकाया
[१७] मुखगलितमपीच्छेत् सादरः सद्रसज्ञः ।
[१८] विरलतरलमुक्ता शुक्तिजातापि रम्या
नरपतिवरकण्ठे कण्ठभूषा न किं स्यात् ॥१२॥
यदि मूढैर्विनिन्द्योऽयं प्रबन्धस्य च का क्षतिः ।
भेकैर्दूरीकृतं पद्मं भ्रमरैरादृतं न किम् ॥१३॥

पा.टि...

(१३) म) भुवि राजते । (१४) भु 1 भु 2) 'नृपकविसभायां गुरुतरम्' ।
(१५) भु 1 भु 2 सहृदयानन्दे – 'रत्नस्य' इत्यादि पद्यं नास्ति ।
(१६) भु 1 ब 'मधुरगानम्' । (१७) भु 1 भु 2) 'मपीच्छेदादरः' ।
भु 2 ब) 'मपीच्छत्यादरः' । भु 5) 'मपासीत् सादरम् ।' म) 'मपीच्छेत्सादरम् ।'
(१८) म) 'विमल' ।

टि.

☆ कृष्णा. सह. I/5

बालकानां प्रबोधाय सत्कवीनां सुखाय च ।
प्रबन्धोऽयं भवत्वाशु भूदेवानामनुज्ञया ॥१४॥

अथ कविः सिंहभूपालीये –●

शुचिर्दक्षः शान्तः सुजनविनुतः सूनृतरतः
कलावेदी विद्वान् मृदुपदकृतिः[१९] काव्यचतुरः ।
कृतज्ञो दैवज्ञः सदयहृदयः सत्कुलभवः
शुभाकार[२०]च्छन्दोगुणगणविवेकी स च कविः ॥१५॥

अभीकः सर्वज्ञश्चतुरवचनव्यूहजनक-
श्चिरंजीवी लोके प्रमुदितमना एव सततम् ।
प्रसन्ना वाग्देवी वसति वदने[२१] यस्य वरदा
सदा[२२] देवैस्तुल्यः स जयति मुदा सज्जनकविः ॥१६॥

इदं पद्यं मम । अभीको निर्भये कवाविति विश्वः ।

'नासर्वज्ञः' कविर्भवेत् इति ग्रन्थान्तरे ।

◆ "जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति येषां यशःकाये जरामरणजं भयम् ॥"

☆ "वाग्देवी वदनाम्बुजे वसति चेत् को नाम दीनो जनः ।"

इति भर्तृहरिणोक्तम् ।

पा.टि.

(१९) भु 5) 'कलमृदुकृतिः' (२०) भु 5) 'शुभाचार' ।
(२१) भु 4) 'सदने' । (२२) भु 4) 'सद्यः' ।

टि.

● पद्यमिदमुपलभ्यमाने सिंहभूपालविरचिते रसार्णवसुधाकरे नोपलभ्यते ।

◆ द्र. भर्तृ. नीति. 24. ☆ भर्तृहरिशतकेषु नोपलभ्यते । द्र. भर्तृहरिशतकत्रयम् ।

तथा[२३] हि मम --

साधुश्रेष्ठवचोभिरर्चितपदोऽलंकारभावान्वितः[२४]
सत्प्रीतिः सुखदश्च लक्षणधरो राजोत्तमाराधितः ।

सर्वज्ञः[२५] सुगुणार्थरीतिनिपुणो[२६] लोके यशोविश्रुतः
सत्पादः कुमुदावृतो विजयते राजोपमः सत्कविः[२७] ॥१७

ईश्वरस्य परं स्थानं कवेश्चित्तं रसान्वितम् ।
तद्वाणीश्वरवाणीत्वात् कवीश्वर इति स्मृतः ॥१८॥

ईश्वरः सृष्टिकर्ता च कवितासृष्टिसृक्[२८] कविः ।

पा.टि...

(२३) भु 4 .ब्र) 'तथा हि मम' इति नोपलभ्यते । (२४) ब्र) 'साधुः श्रेष्ठ'-
(२५) भु 3) 'सत्कविः' । (२६) भु 3) 'नीतिनिपुणो' ।
(२७) भु 3) 'सत्कविः' इत्यस्मात् परम् 'ईश्वरस्य' इत्यस्मात् पूर्वं च-
''स...पा...मः श्लोक... तुरियां... शास्त्र यशः यस्य सः । कौ मोदते इति कुमुदः । द्वितीयपक्षे कुमुदानि कैरवाणि तैरावृतो वेष्टितः । काव्यश्रवणदूरस्थोऽपि समीपस्थो ये यस्य.... वन्त, त इति न्यायाच्च कुमुदबन्धुत्वात् । शोभनाः गुणाः प्रसादादयः अर्थाः अभिधेयादयः वाच्यलक्ष्यव्यंग्याः । सत्कविलक्षणयुक्तः अङ्कयुक्तः, राजश्रेष्ठैः संभावितः, अन्यत्र चन्द्रवंशप्रभवैः राजश्रेष्ठैः स्वकुलमुख्यत्वात् पूजितः । नीतयो रीतयः वैदर्भ्यादयश्च तेषु निपुणः तद्युक्त्या वा काव्यनिर्माणकुशलः इत्यर्थः । चन्द्रपक्षे शोभनगुणेनाल्हादकत्वेन हेतुना अर्थस्य पुरुषार्थविशेषभूतस्य कामस्य प्रापणचतुरः कामोद्दीपनत्वात् । यशोभिः ख्यातः चन्द्रस्तु यश इति विश्रुतः, कीर्तिरिति कविभिः वर्णितः ।.... कः स्वार्थे कः । काव्यस्य कर्तारं कुरुते इत्यर्थः ।'' इत्यधिकः कीटद्रष्टः ग्रन्थभागो दृश्यते । (२८) ब्र) सृष्टिकृत् ।

तयोरेवैक्यधर्मत्वात्[२९] कवीश्वर इति स्मृतः ॥१९॥[३०]

अपि च - ''जयन्ति ते सुकृतिनो' इत्यादि ।

यथा स्पर्शमणिर्लोहं कुरुते स्वर्णमुत्तमम् ।

तथैवान्यं कविश्रेष्ठः[३१] कुरुते काव्यकर्तृकम् ॥२०॥

उक्त्यासत्या[३२] कवेर्वाचो[३३] मिथ्याचातुर्यमिश्रिताः[३४]

पा.टि..

(२९) भु 5) '- तयोरद्वैक-' । (३०) भु 3 भु 4 भु 5 म ब्र) 'स्मृतः' इत्यस्मात् परम् 'अपि' इत्यस्मात् पूर्वं च-

अमृतादधिकं कवेर्वचो विषतुल्यं यदि रोषमिश्रितम् ।
रसनावसतिस्थितानिशं कविमाता हि भवेत् सरस्वती ॥

कविकण्ठपाशे च-

''जगदुदयस्थितिविलये महिताः खलु लोकविख्याताः ।
शापानुग्रहकुशला देवा ऋषयो नरा ये वै ॥
तेषामीश्वरसदृशां काव्यग्रथनं लक्षणं यस्मात् ।
न प्रत्यवायदोषस्तेषां तेजो विशेषेण ॥''

इत्यलं गुणदोषगणगवेषणया ।

यमोपमः कोपगुणैर्नियुक्तः शिलोपमः शान्तिगुणाभिरामः ।
देवोपमः सर्वसुखप्रदः स्यात् कवीश्वरो राजति लोकपूज्यः ॥

निरङ्कुशाश्च कवय' इति ग्रन्थान्तरे ' इत्यधिकं दृश्यते । (परं तु भु 3 भु 5 म पाठेषु 'लक्षणमि'त्यत्र 'सलक्षणमिति', 'कोपगुणैर्नियुक्तः' इत्यत्र 'कोपगुणेन युक्तः' 'जलोपमः' इत्यत्र 'शिलोपमः' इति च पठ्यन्ते ।)

(३१) भु 3 'कविः श्रेष्ठः' । (३२) भु 2 भु 4) 'भक्त्यासत्याः' । भु 5) 'उक्ताः सत्याः' । (३३) भु 1 भु 2 भु 3 भु 4 म) 'कविर्वाचो' । (34) ब्र) '-दूषिताः' ।

[३५]कुर्वते तु बलात् शीघ्रं [३६]स्ववशं [३७]जनमानसम् ।।२१।।

इमानि पद्यानि मम ।[३८]

अथ श्रीगीतगोविन्द[३९]श्रुतिरञ्जिनीटीकायां✩ कविभेदानाह –

रोचको वाचकश्चार्थः शिल्पिको मार्दवानुगः ।
भूषार्थी च विवेकी च कवयः सप्त [४०]कीर्तिताः ।।२२।।

तत्र रोचककविः● —

पा.टि...

(३५) भु 1 भु 2 मु 4 म ब) 'कुरुते' । (३६) म) 'स्ववश्यम्' ।

(३७) ब) 'जनमानसम्' इत्यस्मात् परम 'इमानि' इत्यस्मात् पूर्वं च-

"शास्त्रदृष्टिकविरेव जगत्यां चित्तयानगतिहेतुरमूल्यः ।
सन्ततं त्रिपुरमण्डलचारी भव्यगोचरमतिर्जनदक्षः ।।"

इत्यधिकं दृश्यते ।

(३८) भु 3 भु 4 भु 5 म) 'मम' इत्यस्मात् परम् 'अथ श्रीगीत' (पृ7) इत्यस्मात् पूर्वं च- 'शास्त्रदृष्टिकविरेव' इत्यादि पद्यं अधिकं लभ्यते, (परं भु 4. पाठे चित्तयानम्' इत्यत्र कीर्तियानम्, भु 5. पाठे 'चिन्तयन्ति' इति च पठ्येते ।

(३९) भु 1 भु 2 भु 4) 'श्रीगोविन्द-' । (४०) भु 2) प्रकीर्तिताः ।

टि.

✩ टीकेयं नोपलभ्यते । परं तु कविभेदप्रख्यापका इमे श्लोका अमृतानन्दयोगिविरचिते अलंकारसंग्रहे उपलभ्यन्ते । द्र. अमृ.अलं. II / 2-5.

● पदमिदमनपेक्षितम् ।

आवापोद्धारकृद् यावन्मनसो [४१]रुचिरात्मनः ।
रोचको वाचकः [४२]शब्दवागाडम्बरकारकः ॥२३॥
[४३]आर्योऽभिधेयचित्रार्थी शिल्पको [४४]द्व्यचित्रकृत् ।
शब्दार्थमार्दवापेक्षी कविः स्यान्मार्दवानुगः ॥२४॥

अलंकारैकनिष्ठो यो [४५]भूषणार्थी बुधैर्मतः ।
☆ [४६]शास्त्रालंकारसंस्कारी विवेकी कविपुंगवः ॥२५॥

एतेषामु[४७]दाहरणं विमृग्यम् ।

पा.टि...

(४१) म) रुचिरात्मकः । भु 1 भु 2 भु 3 भु 4 भु 5 म) 'रुचिरात्मनः' इत्यस्मात् परं 'रोचको' इत्यस्मात् पूर्वं च - 'आत्मनः स्वस्य, मनसोऽन्तःकरणस्य रुचिर्यथा तथा । आवापोद्धारकृत् - पदविन्यासः आवापः, पदानिक्षेपणमुद्धारः । एतौ आवापोद्धारौ करोतीति आवापोद्धारकृत्'' इत्यधिकं दृश्यते । (४२) भु 1 भु 5) 'शब्दवाचा' । भु 2 म) शब्दो वाचा । (४३) भु 3) 'अथाभिधेयचित्तोऽर्थी । भु 4) 'अथार्थोभि-' । भु 5) 'अथोऽभि-' । ब्र) 'अथाभिधेयचित्रोर्थी' । (४४) भु 3) 'बन्धचित्रकृत्' । भु 4) 'दक्षचित्रकृत्' । भु 5) 'पदचित्रकृत्' । (४५) भु 3 भु 4 म ब्र) 'भूषार्थी विबुधैर्मतः' । (४६) भु 1 भु 2 भु 3 म ब्र) 'शास्त्रालं:.... कविपुंगवः' इति पद्यार्धं नोपलभ्यते । (४७) भु 3) 'हरणानि मृग्यानि' । ब्र) 'हरणानि विमृश्यानि' ।

टि.____

☆ उद्देश्यक्रमप्राप्तं विवेकिकविलक्षणपरं 'शास्त्रालंकारसंस्कारी विवेकी कविपुंगवः' इति वाक्यं भु 1 भु 2 भु 3 भु 4 म.ब्र) संज्ञिकासु मातृकासु लिपिकारप्रमादात् परित्यक्तं स्यात् ।

कविप्रभ्वोः परस्परशोभामाह ग्रन्थान्तरे-

कविना च विभुर्विभुना च कविः
कविना विभुना खलु भाति सभा ।
मणिना वलयं वलयेन मणिः
मणिना वलयेन विभाति[४८] करः ॥२६॥

यथा च मम --

सभा सभ्यैर्युक्ताप्यतिसुखयुताप्यर्थनिकरै-
र्विचित्रा रम्यापि प्रवरचतुरैरुत्तमजनैः ।
न शोभाढ्या[४९] मुख्या यदि कविवरैरेव रहिता
यथा मन्दाराख्यैस्तरुभिरतिहीनं सुरवनम् ॥२७

ग्रन्थान्तरे च –

"नभोभूषा पूषा नलिनवनभूषा मधुकरो[५०]
वचोभूषा सत्यं वरयुवतिभूषा सुगुणता ।
मनोभूषा हर्षो मधुसमयभूषा पिककुलं
सभाभूषा विद्वान्[५१] सकलगुणभूषा वितरणम् ॥"

तथा च मम --

सदसो वरभूषणं कविः
कवितावाङ् मतिभूषणं सदा ।
नगरस्य विभूषणं नृपो
रमणीनां दयितो विभूषणम् ॥२८॥

पा. टि..........

---

(४८). भु3) 'च भाति'। (४९) भु 1 भु 2 भु 5) 'शोभा नो'। भु 3) 'शोभाढ्यो'। (५०) भु 1 भु 2 भु 4 म ब्र) 'मधुकरा'। (५१) भु 4 भु 5 म ब्र) 'विद्या'।

ग्रन्थान्तरे --

“विनयेन विना का श्रीः का निशा शशिना विना ।
रहिता सत्कवित्वेन कीदृशी वाग् विजृम्भते ॥”

नवरत्नमालायां च –✩

नीतिर्भूमिभुजां नतिर्गुणवतां ह्रीरङ्गनानां धृति-
[५२]र्दम्पत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो गिराम् ।
लावण्यं वपुषः [५३]स्मृतिः सुमनसः शान्तिर्द्विजस्य क्षमा
शक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं (शीलं?) सतां [५४]मण्डनम् ॥

सद्गुणार्पित[५५]बुद्धीनां मन्त्रिवाक्यप्रवर्तिनाम् ।
राज्ञां सत्करुणास्नेहैः कवयः सुखिनः सदा ॥२९॥

वीणादौ वाद्यभेदे स्वभिनयसहिते नृत्यरङ्गे च गीते
सत्काव्यालापगाने कविषु बुधजने चन्दनादौ सुगन्धौ ।
वाक्ये चातुर्ययुक्ते युवतिजनरसे साधुगोष्ठ्यां सभायां
[५६]यच्चित्तं नैव मग्नं भवति जगति तद्विन्ध्यपाषाणतुल्यम् ॥३०॥

पा.टि...

(५२) भु 4) ‘दग्धायोः’ । (५३) भु 5) ‘श्रुतिः’ । (५४) भु 3) ‘मण्डनम्’ इत्यस्मात् परं ‘सद्गुणा’ इत्यस्मात् पूर्वं च - “मनश्चित्तस्य स्मृतिरविस्मरणं, दम्पत्योर्मण्डनं धृतिः सन्तोषः” “धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिष्विति विश्वः” । बुद्धेः विज्ञानवत्तायाः कविता मण्डनम् इत्यग्रिमेणान्वयः ।” इत्याधिकं दृश्यते । (५५) भु 5) ‘जीवीनाम्’ । (५६) भु 4) ‘यसच्चित्तम्’ ।

टि.____

✩ पद्यमिदं क्षपणककवेरिति संस्कृतशब्दकौस्तुभकारेण निर्दिश्यते ।

द्र. चतु. सं.श.कौ पृ. 1359.

अनादरेणाप्रियभाषणेन
कुर्वन्ति ये काव्यकृतः[५७] प्रकोपम् ।
नराधमास्ते पशवश्च निन्द्या
अकीर्तिदुःखैर्विमुखा[५८] भवन्ति ॥३१॥
कवयो रसवक्तारः स्थिताश्चेद्धनवर्जिताः ।
राज्ञो निर्गुणता लोके विख्याता भवति ध्रुवम् ॥३२॥

[५९] इदं पद्यद्वयं मम । तथा च **भर्तृहरिणोक्तम्** -- ☆

"शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः ।
तज्जाड्यं वसुधाधिपस्य सुधियस्त्वर्थं विनापीश्वराः
कुत्स्याः[६०] स्युः कुपरीक्षका न मणयो यैरर्घतः[६१] पातिताः[६२] ॥"

[६३] **ग्रन्थान्तरे** -- ☆☆

"दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम् ।
रमयन्ति जगन्ति गिरः कथमिव कवयो न ते वन्द्याः ॥"

पा.टि.

(५७) भु 3 भु 4 भु 5 म) 'काव्यकरस्य कोपम्' । (५८) भु 4 भु 5) 'विमुखी' (५९) भु 1 भु 2 म) 'इमानि पद्यानि' । (६०) भु 2) 'कुत्साः' । (६१) भु 1 भु 2) 'यैरर्पातः' । (६२) भु 3) 'पातिताः' इत्यतः परं ग्रन्थान्तरे' इत्यस्मात्पूर्वं च 'विषये देशे । बहुमूल्या मणयो यैरर्घतो मूल्यमल्पं कृत्वा पातिताः ते कुपरीक्षकाः कुत्स्याः निन्द्याः न स्युः ?.अपि तु त एव निन्द्याः स्युः । मणयस्तु महार्घा एवेत्यर्थः ॥" इत्यधिकमस्ति । (६३) भु 4) 'ग्रन्थान्तरे' इति नास्ति ।

टि.

☆ द्र. भर्तृ नीति. 15.

☆☆ द्र. रुद्र. काव्य. IX / 6.

अथ कविवचनं कथमित्याह –

गुणाढ्यं सद्रम्यं सरलसफलं मङ्गलपरं
महद्धक्षं[६४] मन्द्रं[६५] ललितरसभावादिसहितम् ।
सदानन्दारूढं बहुतरसुधापूरसदृशं[६६]
प्रशस्यं लोकेषु प्रविशतु सदा सत्कविवचः ॥३३॥

कविदूषणगणमाह --

शास्त्रादौ ज्ञानहीनं[६७] सदसि कटुगिरः क्रोधलज्जादिगर्वा[६८]
निन्दोक्तिर्युक्तिवादैः[६९] सपदिकलहता भूषणैर्वर्जितत्वम् ।
दारिद्र्यं स्वल्पलोकेष्वभिमतवचनं छद्मचित्तं गुणाढ्ये
मालिन्यं मूकतैतत् कथयति निपुणो दूषणं काव्यकर्तुः[७०]॥३४

दुर्लभः सुगुणी राजा[७१] गुणाढ्यः सचिवस्तथा ॥
दुर्लभः सत्कविश्रेष्ठः काव्यकीर्तिश्च दुर्लभा ॥३५

पा.टि..

(६४) भु 5) 'महद्वन्द्यम्' । (६५) म) 'मन्त्रम्' । (६६) भु 3 भु 4 भु 5 मब्र) 'पुरसरसम्' । (६७) म) 'ज्ञानहानिः' । (६८) भु 1) क्रोधः' इत्यस्मात् परः 'कलहता' इत्यस्मात् पूर्वश्च ग्रन्थांशः कीटदष्टः । (६९) भु 1 भु 2) 'रचित-' । (७०) भु 3) 'काव्यकर्तुः' इत्यस्मात् परं 'दुर्लभः सुगुणी'इत्यस्मात् पूर्वं च- "ज्ञानहीनम् - हीनमिति, नपुंसके भावे क्तः, हानिरभाव इत्यर्थः । सपदि कलहो यस्य सः तस्य भावः सपदिकलहता ।" इत्यधिकं दृश्यते ।

(७१) भु 1) 'राजा' इत्यस्मात् परः 'श्रेष्ठः' इत्यस्मात् पूर्वश्च ग्रन्थांशः कीटदष्टः

चिरकालस्थिता लोके काव्यकीर्तिर्दिगन्तगा ।
[७२]सादरा सकलैर्लोकैरचिरा अन्यकीर्तयः ॥३६॥

इदं पद्यत्रयं मम । भर्तृहरिणोक्तम् -- ☆

"[७३]क्षमी दाता गुणग्राही स्वामी [७४]पुण्येन लभ्यते ।
अनुकूलः शुचिर्दक्षः कविर्विद्वांश्च दुर्लभः ॥"

अथ काव्यस्योपादेत्वमाग्नेयपुराणेऽप्युक्तम् –

"नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ॥"३७॥

● [७५]शक्तिलक्षणं काव्यप्रकाशादिषु देवतानुग्रहजन्यपदपदार्थस्मृतिहेतुर्भावनाख्यसंस्कारः शक्तिः । शक्तिः कवित्वबीजभूतसंस्कारविशेषः । यां विना कवित्वं न प्रसरेत् । प्रसृतं वोपहसनीयं स्यात् ।

विष्णुपुराणे --

"काव्यालापश्च ये केचित् गीतिकान्यखिलानि च ।
शब्दमूर्त्तिधरस्यैते विष्णोरंशा महात्मनः ॥"३८॥

साहित्यदर्पणे -- ☆☆

"अदोषं गुणवत्काव्यमलंकारैरलंकृतम् ।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति ॥"३९

☆☆☆ "धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च [७६]साधुकाव्यनिषेवणम् ॥"४०॥

पा.टि..

(७२) भु 3) 'आदरा सकलैर्लोकैरचिरास्त्व' । भु 4) 'सादृश्यं सकलैर्लोकैर्निर्चिराण्य' । (७३) भु 4) 'क्षमा' । (७४) भु 4) 'स्वानि' । (७५) भु 3) 'शक्तिलक्षणं काव्यप्रकाशदिषु' इति नास्ति । (७६) भु 2) 'निषेवणम्' इत्यस्मात् परं 'काव्यप्रकाशे' इत्यस्मात् पूर्वं च शक्तिलक्षणपरं वाक्यमुपलभ्यते ।

टि.

☆ भर्तृहरिशतकेषु नोपलभ्यते । लभ्यते परं हितोपदेशे । द्र.नारा. हितो. II/140.

● मम्म. का.प्र. पृ. ११. ☆☆ भोज. सर. I/2. ☆☆☆ भाम. काव्या I/2.

काव्यप्रकाशे - ☆

''काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृत्तये कान्तासंमिततयोपदेशयुजे ॥४१॥

काव्यं कीर्तिगुणानुरागकरणं[७७] सज्ज्ञानसंवर्धनं
सर्वामङ्गलहन्तृकं सुखकरं कन्दर्पसौख्यप्रदम् ।
लोके निर्मलबुद्धिदातृ कुरुते वाक्चातुरीं सर्वदा
नित्यं राजसभासु मोदमखिलं दत्ते गुणाढ्यास्वपि ॥४२॥
लावण्यैर्भूषणैः किं वा यदि सच्चतुरोक्तयः ।
अस्ति चेत् कविता रम्या निर्धनत्वेन किं कवेः ॥४३॥

[७८]
इदं पद्यद्वयं मम ।

भर्तृहरिणोक्तम्– ☆☆

''स्वर्गः किं यदि शोभना[७९] नववधूः किं वा विभूषाविधि-
र्लावण्यं यदि किं सुधाकरकरैः शृङ्गारगर्भा गिरः ।
मृत्युः किं यदि निर्गुणेष्वभिरुचिः किं धिग्यदि प्रार्थना
सज्ज्ञानं यदि किं सुखैः सुकविता यद्यस्ति राज्येन किम् ॥''
काव्यानां सुरसास्वादः सत्क वीनां च संगिता ।
सत्पात्रे त्यागिता चैतत्[८०] सुफलं[८१] नरजन्मनः ॥४४॥
इदं पद्यं मम ।

पा.टि...

(७७) भु 1 भु 2) 'गुणानुसंग' । (७८) ब्र) 'इदं पद्यद्वयं मम' इति नोपलभ्यते । (७९) भु 1. भु 2 भु 4) 'किं निजशोभना' । भु 5) 'को नयशोभना' । म) 'किं नु यशोभवा' । (८०) म) 'चैव' । (८१) भु 3 म) 'साफल्यम्' ।

टि.

☆ द्र मम्म. का. प्र. I/2. ☆☆ पद्यमिदं भर्तृहरिशतकेषु नोपलभ्यते ।

भर्तृहरिणोक्तम् -- ✩

“अग्रे गीतं सरसकवयः पार्श्वतो दाक्षिणात्याः
पश्चाल्लीलावलयरणितं चामरग्राहिणीनाम् ।
८२
यद्यप्येवं कुरु भवरसास्वादने लम्पटत्वं
नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥”

आस्वादयन्ति गुणिनः सत्काव्यरसमुत्तमम् ।
यथा पुष्परसं भृङ्गा जानन्ति न हि पक्षिणः ॥ ४५॥

इदं पद्यं मम । ग्रन्थान्तरे च-

८३
“कविः करोति पद्यानि लालयन्ति धिया जनाः ।
तरुः प्रसूते पुष्पाणि मरुद् वहति सौरभम् ॥”

कविरेव विजानाति कवीश्वरपरिश्रमम् ।
८४
न हि कन्या विजानाति कामिनीकामवेदनाम् ॥४६॥

प्रतापरुद्रयशोभूषणे (साहित्यरत्नाकरे?) -- ✩✩

८५ ८६
“रसप्रसरनिर्भराः कविगिरां प्रसाराः परां
मुदं विदधते हृदि म्रदिमभाजि काव्यामृतैः ।
सुधाकरकराङ्कुरव्यतिकरेण चन्द्रोपलाः
८७
द्रवन्ति शिशिराः सदा न खलु वन्ध्यविन्ध्योपलाः ॥”

पा.टि...

(८२) ब्र) ‘यद्यस्त्येवम्’ । (८३) भु 1 भु 2 भु 3 भु 4 भु 5) ‘लोलयन्ति’ । ब्र) ‘लालयत्युत्तमो जनः’ । (८४) भु 3) ‘कन्या’ इत्यस्य शिरोभागे ‘अजातयौवनेत्यर्थः’ इति टिप्पणी दृश्यते । (८५) भु 4) ‘-निर्भराम्’ । (८६) भु 4) ‘प्रसरापराः’ । (८७) भु 1 भु 2) ‘सदा न पुनः’ । भु 3) ‘सदारबन्ध्य’ । भु 5) ‘चिरादपि न’ ।

टि.

✩ द्र. भर्तृ. वैरा/66. ✩✩ पद्यमिदं प्रतापरुद्रयशोभूषणे नोपलभ्यते, । लभ्यते परं साहित्यरत्नाकरे । द्र. धर्म. सा. र. I/30.

गोवर्धने --

“अधरस्य मधुरिमाणं कुचकाठिन्यं दृशोस्तैक्ष्ण्यम् ।
कवितायाः परिपाकम् अनुभवी[८८] रसिको विजानाति ॥”

तथा च मम --

कविजनसरसोक्तिः सादरापि त्रिलोके
विरहितगुणचित्ते राजते नैव लोके ।
विगततरुणताभानायिकोरोजयुग्मे[८९]
मृगमदवरपत्रं[९०] मौक्तिकालिर्यथैव[९१] ॥४७॥

ग्रन्थान्तरे --

“अश्रीके न च परिशोभते[९२] सुविद्या
कान्तेव प्रवयसि मुग्धयौवनश्रीः[९३] ।
भारत्या रहितजने न भाति लक्ष्मी-
र्मुक्तालिः स्खलितकुचे वधूरसीव ॥”

अथ कवित्वख्यातिहेतुमाह --

कृपाभिर्भूपानां प्रबलसुकृतैः[९४] सद्वितरणैः
कविनामानन्दैर्धनचययुतैर्गानमधुरैः ।
प्रशंसाभिस्तेषां बहुगुणवतामादरभरै-
र्महाकाव्यं क्षिप्रं प्रचरति यशोदातृ जगति ॥४८॥

पा.टि..

(८८) भु 3 भु 4 भु 5) ‘अनुभव-’ । (८९) भु 1 भु 2) ‘तरुणशोभा-’ ब) ‘तरुणशोभे’ । (९०) भु 1 भु 2) ‘वरमृगमदपत्रम्’ । भु 3) ‘मृगमदरस पत्रम्’ (९१) भु 3) ‘-र्यथैव’ इत्यस्मात् परं ‘ग्रन्थान्तरे’ (पृ.16) इत्यस्मात् पूर्वं च- ‘विगता तारुण्यभा यस्यास्तादृश्या नायिकायाः’ इत्यधिकं दृश्यते । (९२) भु 3) ‘उपरिशोभते न’ । (९३) भु 1 भु 2 भु 4 भु 5) ‘यौवनस्त्री’ । म) ‘यौवनस्त्रीः’ । ब) ‘यौवनस्था’ । (९४) भु 3 भु 5 म) ‘मधुरवचनैः’ ।

पूज्या राजसभासु या च कविता ख्याता भवेत् सा चिरं
              ९५   ९६
      नो चेत्कुत्र न राजते बलवतीं प्राप्नोति निन्दां मुहुः ।
९७   ९८
नानालंकृतिभावरीतिसहिता या भाग्यहीनाद् वधूः
          ९९
      कस्मिन् राजति नो यथा प्रियतमस्नेहातिहीना सती ।४९

ग्रन्थान्तरे --

"कविता वनिता चैव स्वयमेवागता वरा ।   १००
      बलादाकृष्यमाणाचेत् सरसा विरसा भवेत् ॥'
कविता वेशबालेव भाति लोकप्रकाशिता ।
१०१   १०२
धनमाकृष्यमाणा च परस्य हृदयं परम् ॥५०॥

पा.टि...

(९५) भु 3) 'क्वापि' । (९६) भु 1 भु 2) 'राजतेऽतिकृशताम्' । भु 4) 'राजते बलवताम्' । (९७) भु 3 भु 5) नानारीतिगुणानुभाव । (९८) भु 2) 'भाग्य हीना' । (९९) भु 3) 'क्वापि भ्राजति' ।

(१००) भु 3) 'भवेत्' इत्यस्मात् परं 'कविता' इत्यस्मात् पूर्वं च-

"जनकः कविरेव गायकः कृतपुष्टिः खलु काव्ययोषितः ।
अविवेकजनः सहोदरः रसिकः सत्पतिरेव पण्डितः ॥"

कृतपुष्टिः गानकर्ता कविरेव काव्यस्त्रियाः पिता । विवेकशून्यो जनस्तु सहोदरः । पितृभातृरूपत्वात् न तौ तद्रसं जानीत इत्यर्थः । रसिकः पण्डितस्तु तस्याः पतित्वात् तद्रसमनुभवतीत्यर्थः ।" इत्यधिकं दृश्यते ।

भु 4 म.ब्र) भु 3 पाठवत् केवलं 'जनकः' इत्यादि पद्यं दृश्यते; न तु तद्व्याख्यानम् । (१०१) भु 3 भु 4 ब्र) 'धनमाकृष्य गृह्णाति परस्य' ।

(१०२) भु 3) 'परम्' इत्यस्मात् परं 'काव्यम्' इत्यस्मात् पूर्वं च-

"वेशो वेश्याजनसमाश्रयः, तत्र स्थिता बाला वेश्येत्यर्थः" इत्यधिकं दृश्यते ।

काव्यं स्वनामभणितं सुरसोक्तियुक्तं
लोके प्रकाशयति यश्चतुरो जनाग्र्यः ।
लब्ध्वा च यज्ञफलमाशु स एव[१०३] लोके
कीर्तिं तनोति विमलां भुवि[१०४] राजमानाम्[१०५] ॥५१॥
यथा पीयूषपानेन देवा[१०६] अमरसंज्ञिताः ।
काव्यामृतेन नामानि नराणाममराण्यपि[१०७] ॥५२॥

पा.टि...

(१०३) भु 5) 'च सर्वलोके' । (१०४) भु 4 .ब्र) 'तु विराजमानाम्' ।

(१०५) भु 3 भु 4 म.ब्र) 'राजमानाम्' इत्यस्मात् परं 'यथा' इत्यस्मात्पूर्वं च-

“भुवि यज्ञफलं वितन्वते निजनामाङ्कितकाव्यसंपदः ।
अत एव नृपोत्तमः सहसा तद्व्यसायिको भवेत् ॥”

इत्यधिकं दृश्यते ।

(१०६) भु 3 भु 4 भु 5 ब्र) 'देवतामर' ।

(१०७) भु 3 भु 4 भु 5 म) 'नराणाममरण्यपि' इत्यस्मात् परम् 'अग्रहारात्' इत्यस्मात् पूर्वं च-'यस्य कीर्तिः स जीवति इति भावः ।'

श्रीनामाङ्कितमौज्ज्वल्यं कविनाम स्थितं यदि ।
प्रबन्धे सिद्धिमाप्नोति चतुर्वर्गफलं कविः ॥
प्रीत्या समर्पितकृतिः कविरेव तुल्यः पुत्रादिभिर्भवति भूवलयेश्वरस्य ।
धर्मादिवर्गमचिरं लभते नरेन्द्रो यद्येष दत्तविभवः कृतकाव्यबन्धे ॥”

उज्ज्वलमेव औज्ज्वल्यम्, स्वार्थे ष्यञ् । इत्यधिकं दृश्यते । परं तु भु 4) पाठे 'सिद्धि'- इत्यत्र 'शीघ्र' इति 'यद्येष' इत्यत्र 'यद्येव' इति च पठ्येते किन्तु भु 5. म) पाठे परं 'श्रीनामाङ्कित' इत्यत्र 'श्रीवर्णाङ्कित'- इति 'सिद्धि'-इत्यत्र 'शीघ्र'- इति च दृश्येते ।

अग्रहारात् सरस्यादेः प्रासादाच्च व्रतात् सुतात् ।
आरामात् सर्वकीर्तिभ्यः काव्यकीर्तिर्दिगन्तगा[१०८] ॥ ५३॥

[१०९] इदं पद्यचतुष्टयं मम । भर्तृहरिणोक्तम् - ✫ (?)

"संसारविषवृक्षस्य द्वे एव रसवत्फले ।
काव्यामृतरसास्वादः संगमः सज्जनैः सह ॥"

[११०] कर्पूरं नवमालती मलयजं कस्तूरिका कुङ्कुमं
ताम्बूलं नवयौवनं सुकविता गीतं च शीतोदकम् ।
वीणा सज्जनसंगतिः प्रियतमा शुभ्राम्बरं चन्द्रमाः
संसारोऽयमसार एव हि गुणैरेतैर्व्रजेत् सारताम् ॥५४॥

[१११] संसारश्रान्तचित्तानां तिस्रो विश्रामभूमयः ।
अपत्यं च कवित्वं च सतां संगतिरेव च ॥५५॥
नृत्यगीतादिभिर्भोगै रसिको नैव मण्डनैः ।
यः काव्यसुरसाभिज्ञः रसिकः सो[११२]ऽपि कथ्यते ॥ ५६॥
कर्पूरचन्दनादीनां पुष्पाभरणवाससाम् ।
गजाश्वोत्तमशय्यानां भोगात् काव्यरसो वरः[११३] ॥ ५७॥

पा.टि...

(१०८) भु 3) 'दिंगन्तगा' इत्यस्मात् 'परम्' 'इदम्' इत्यस्मात् पूर्वं च- 'अग्रहारो ब्राह्मण- ग्रामः' इत्यधिकं दृश्यते । (१०९) भु 3 भु 4 भु 5 म ब्र) इमानि पद्यानि' ।

(११०) भु 3 भु 4 भु 5 म.ब्र) 'कर्पूर मित्यादि पद्यं नोपलभ्यते' ।

(१११) भु 3 भु 4 भु 5 म.ब्र) 'संसारेत्यादि पद्यं नोपलभ्यते ।

(११२) भु 3 भु 4) 'स हि' । (११३) भु 4 भु 5 म) 'वरम्' ।

टि.____

भर्तृहरिशतेकेशु पद्यमिदं नास्ति, अस्ति परं हितोप्रदेशे ✫ द्र. नारा. हितो. I/153

विद्याढ्यः प्रभुरेव यः सुमतिभिः सार्धं गुणज्ञैर्महान्
नित्यं सत्कविभिश्च साधुपुरुषैर्लोकेष्वमात्यादिभिः ।
सान्द्रानन्दरसानुकूलहृदयो भोगं[११४] प्रशंसादृतं
विद्योक्तिप्रवरं[११५] वचश्च[११६] तनुते तस्यैव कीर्तिर्वरा[११७] ॥५८॥

व्यसनकुलबिमुक्ता भव्यकाव्यानुरक्ताः
स्फुरितविमलपद्या भूभृतः शास्त्रनेत्राः[११८] ।
रसभृतकवितायाः[११९] कुर्वते यत्र गानं
सुरपतिरमृतौघैस्तत्र वृष्टिं तनोति ॥५९॥

यथा रसिकसंसर्गात् सुन्दरी रसिका भवेत् ।
तथा गुणज्ञपाठत्वात् कविता सुखदोज्ज्वला ॥६०॥

सत्काव्यश्रवणाच्चैव वृद्धोऽपि रसिको भवेत् ।
पुरातनोऽपि वृक्षः स्याच्चन्दनं मलयानिलात् ॥६१॥

अथ श्रेष्ठचतुरजनानाह --

ये कान्ताजनरञ्जकाः कविवचः शृण्वन्ति ये सादरं
ये भूपालसभास्थिताः सुमतयो ये धर्मविद्यारताः ।
ये वक्रोक्तिविलासिनः सुकवयो विप्राशिषामोदिन[१२०]-
स्ते लोके चतुरोत्तमा निगदिता राजन्ति तेषां गिरः॥६२॥

पा.टि..

(११४) भु 3 म) 'वचनो भोगं'। भु 5) 'वचनाभोगम्' । ब्र) 'वचनाभोगैः' । (११५) भु 3 भु 4 म.ब्र) 'विद्योक्त्या' । (११६) भु 3 भु 4 म.ब्र) 'वचो वितनुते ।' (११७) भु 3) 'कीर्तिर्वरा' इत्यस्मात् परं 'व्यसन'- इत्यस्मात् पूर्वं च- ''यः प्रभुः प्रशंस्य......व्याप्तं....एव भोगं भोग्यवस्तु विस्तारयति तस्यैव कीर्तिः सर्वतः श्रेष्ठा'' इति कीटदष्टा टिप्पणी दृश्यते । (११८) भु 1 भु 2) हृष्टचित्ता नृपाद्याः । (११९) भु 1 भु 2) सुरसभरितकाव्यम्' ।(१२०) भु 5) 'विप्राग्रणी' ।

अथ काव्यभणितनायकमाह-

१२१ कलाभिज्ञो विद्वान् मधुरवचनोल्लासितमना:
कृपालंकाराढ्यो विनय[१२२]सहितो नीतिनिपुणः ।
विवेकी भावज्ञः कविषु कवितास्वेव सुमति-
र्नियुक्तोऽयं नेता कृतिषु रसगर्भश्चतुरधीः ॥६३॥

[१२३] इमानि पद्यानि मम । साहित्यचन्द्रोदये-

"कलाप्रवीणो भावज्ञो वदान्यः कविताप्रियः ।
महानुभावो विनयी नायकः परि[१२४]कीर्तितः ॥"

पा.टि..

(१२१) भु 3 भु 4 .ब्र)कलाज्ञानी (१२२)भु 1 भु 2) 'हृद्यो' ।

(१२३) भु 1 भु 2) 'इमानि पद्यानि मम' इति नोपलभ्यते ।

(१२४) भु 3 भु 4 भु 5 म.ब्र) 'परिकीर्तितः' इत्यस्मात्परम् 'अथ' इत्यस्मात्पूर्वं च-

ताम्बूलपुष्परुचिरांशुकभूषणैर्वा भूपो दयार्द्रवचनैः कविमर्चयित्वा ।
नाम्नात्मनो जगति कारयति द्युतिस्थो धर्मादिकीर्तिविदितः कवितां प्रबन्धाम् ॥ १॥
स्मितसरसमुखेन्दुर्भूषणैर्दिव्यमाल्यैः मदनरुचिशरीरश्चामरैर्वीज्यमानः ।
मधुर पटुवचोभिर्भूपरत्नः सभायां सरसकविकराभ्यामाशु चोपैतु काव्यम् ॥२॥

शुभसम्बत्सरे मासे शुभे वारे सुतारके
शुक्लपक्षे शुभे लग्ने शुभदायां तिथौ तथा ॥३॥
सुमुहूर्ते सुयोगे च सुराशौ निर्मलालये ।
पुष्पाभरणवासोभिः मण्डितः कविरुत्तमः ।
सरसां कवितां कुर्यात् प्रीतिचित्तो रसान्वितः ॥४॥

नित्यं वाग्देवतायाः स्तवनविदितवाक् पूजितेष्टादिदेवो
नित्यं सद्व्याकरण.......मतिमान् साधुसङ्गानुरक्तः ।
नित्यं नानाभिधानार्थबलरसकलालंकृतिज्ञः श्रुतिज्ञः
नित्यं कृत्वा कवित्वं जयति कवीश्वरो (कविवरो ?) विद्यमानः सदःसु ॥५॥

इत्यधिकं दृश्यते ।

अथ काव्यादिगानस्थानविशेषमाह –

पुष्पामोदिवने वसन्तसमये ग्रीष्मे सरस्तीरके
[१२५] वर्षर्तौ सुखदे सुहर्म्यशिखरे सौधे शरत्कालके।
हेमन्ते शिशिरे च रम्यसदने वातायनैर्वर्जिते
सत्काव्यं कलयन्ति ये च गुणिनो धन्या नृपास्ते भुवि ॥६४॥

[१२६] अथ कविपुरस्कारफलमाह –

नृपोत्तमा ये [१२७] कवये गुणज्ञाः
[११८] संभावनामादरभावयुक्ताम्।
[१२९] वाग्भिरसाढ्यैर्ददतेच नित्यं [१३०]
तेभ्यः प्रसन्नो भगवान् रमेशः ॥६५॥

तथा हि -ये भूपा रसगर्भवाक्यचतुरा द्रव्यादिभिर्भूषणैः
सान्द्रस्नेहरसोक्तिभिः कविजनानाराधयन्त्याशु च।
तेषां कीर्तिरुदेति निर्मलतरा दिङ्मण्डले सन्ततं
पद्मेषु प्रियता यथा दिनमणेः ख्याता भवेत् [१३१] सर्वदा ॥६६॥

पा.टि

---

(१२५) भु 4) 'वर्षायाम्'। (१२६) ब) 'अथ कविपुरस्कारफलमाह' इति नोपलभ्यते। (१२७) भु 4) 'न वयो'। (१२८) भु 1 भु 2) संभावनां सादरद्रव्य'। (१२९) भु 1 भु 2) 'हर्षाढ्यवाग्भि'। (१३०) भु 3) 'रमेशः' इत्यस्मात् परं 'तथा' इत्यस्मात् पूर्वं च 'कवये कविं प्रसादयितुम्' इत्यधिकं दृश्यते। (१३१) भु 3 भु 4 भु 5 म.ब्र) 'सर्वदा' इत्यस्मात् परं 'ग्रन्थान्तरे' इत्यस्मात् पूर्वं च-

"ताम्रपत्रलिखिता नियमोक्तिं यो ददाति नृपतिर्वरवृत्तिम्।
सादराय कवये रसयुक्तः प्राप्तवांछितसुखः स च पूज्यः ॥"

इत्यधिकं दृश्यते।

ग्रन्थान्तरे –

वसु यच्छतु वा न वा नरेशो यदि कर्णे कविभारतीं शृणोति[१३२]।
[१३३] रतिमिच्छतु वा न वा नवोढा यदि केलीगृहदेहलीनुपैति ॥

यथा च मम –

राजा[१३४] संश्रृणुते च यद्यपि वरं सत्काव्यकर्तुर्वच[१३५]-
स्तस्मै तन्न[१३६] ददातु वित्तमखिलं[१३७] श्रेष्ठं विभूषादिकिम्[१३८]।
लोकानन्दकरं नवं जलमुचां श्रुत्वा रवं सत्वरं
स्नेहाधिक्यमतिर्विदूरधरणी रत्नप्रसूर्नैव[१३९] किम्[१४०] ॥६७॥

इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति जगन्नाथनारायणदेव[१४१] महाराज-विद्वत्सभाराजित[१४२]-प्रबन्धकविताप्रकाशक-करणकुलसंभव-कविभिषग्वर-वासुदेवपात्रतनय-श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ कविभेदादिनिरूपणं नाम प्रथमः किरणः।

पाटि..........

(१३२) भु 3) 'करोति'। (१३३) भु 1 भु 2 भु 4) 'यथा च मम' इति नास्ति। (१३४) भु 3 भु 4 म.ब्र) राजाकर्णयते'। (१३५) ब्र) 'वाचो तस्मै'। (१३६) भु 3) 'किन्न'। (१३७) भु 1 भु 2 भु 4 म) 'द्रव्यमखिलं।' ब्र) 'द्रव्यमतुलम्'। (१३८) भु 4 ब्र) 'विभूषान्वितम्'। (१३९) भु 3 ब्र) 'रत्नप्रसूते न'। भु 4) 'रत्नप्रसूनेन'। (१४०) भु 3) 'किम्' इत्यस्मात् परम् 'इति' इत्यस्मात् पूर्वं च- ''यदि आकर्णयते, अपि शब्दस्तु विभूषादिकमित्यनन्तरं योज्यः' स्नेहाधिक्यमतिर्यस्याः'' इति टिप्पणी दृश्यते। (१४१) ब्र) 'नारायण' इति नोपलभ्यते। (१४२) ब्र) 'कविविद्वत्सभा'।

* * *

[द्वितीयः किरणः]

अथ नानाविधछन्दःशास्त्रसंमतान् काव्योपयोगिनो गणादीनाह-

[१]मगणो यगणश्चैव रगणः सगणस्तथा ।
तगणो जगणश्चैव भगणो नगणादयः ॥१॥

आदिपदात् गुरुलघू ज्ञेयौ । गणसंख्या- छन्दोमञ्जर्यादिषु –☆

[२]“म्यरस्तजभ्नगैर्लान्तैरेतैर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना[३]” ॥२॥

[४]गुरुलघुलक्षणं तत्रैव --☆☆

[५]सानुस्वारश्च [६]दीर्घो च [७]विसर्गी च गुरुर्भवेत् ।
[८]वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा ॥३॥

पा.टि...

(१) भु 3 भु 4 म.ब्र) मगणो...ज्ञेयौ' इति नोपलभ्यते । (२) भु 5) म्यरस्त....रक्षरैः' इति नोपलभ्यते । (३) भु 3) 'विष्णुना इत्यस्मात् परं 'गुरुलघु'इत्यस्मात् पूर्वं च- 'मयरसतजभनगलं इत्येतैर्दशभिर्गणैरित्यर्थः'इत्यधिकं दृश्यते । (४) भु 3 भु 4 भु 5 म) 'तत्रैव' इत्यस्मात् परं 'सानुस्वारश्च' इत्यस्मात् पूर्वं च- “गुरुरेको गकारस्तु लकारो लघुरेककः ।” इत्यधिकं दृश्यते ।
(५) भु 2 म) 'स्वानुस्वार' । (६) भु 3 भु 5) 'दीर्घश्च' ।
(७) भु 5) 'विसर्गश्च' । (८) भु 4 म) 'वर्णसं योग'- ।

टि.

☆ द्र गङ्गा. छ.म. I./7.

☆☆ तत्रैव I/11.

अथ गणस्वरूपमाह-तत्र मगणः --

श्रियो दाता मः स्यात् त्रिगुरुसहितः शूद्रकुलजो
ग्रहः सौम्यः केकिस्फुटतरकलापाधिकरुचिः ।
९
भवेद्राशिस्तस्मिन्नलिरथ तथा दैवतगणः
स्वरो गान्धाराख्यः कथित इति साहित्यमतिभिः ॥४ ॥
१०
रजोगुणः काश्यपगोत्रजश्च
तथा महीदैवतकः प्रसिद्धः ।
११
ज्येष्ठास्य नक्षत्रमवादी धीरैः
प्रोक्तस्त्वयं मो मृगयोनिकश्च ॥५॥

१२
यगणः -- १३ १४
रौप्याभो हयराशिकश्च धनदः शुक्रगहो यो गणो
लघ्वादिः सलिलाधिदेवरुचिरः स्याद्याज्ञवल्क्यं कुलम् ।
योनिः स्यान्नकुलोऽथ मानवगणः प्रोक्तः स्वरो मध्यम-
१५ १६
श्चोक्तः सत्त्वगुणस्तथास्य कथितं वाताह्वयं तारकम् ॥६॥

पाटि.

---

(९) भु 3) 'अलि:' इत्यस्य शिरोभागे 'वृश्चिक:' इति टिप्पणी दृश्यते ।
(१०) भु 2) 'गोत्रजस्तथा' । भु 3 भु 4 मब्र) 'गोत्रकश्च तथा' ।
(११) भु 2 म.ब्र) 'ज्येष्ठा स्वनक्षत्र' । भु 3 भु 4) 'अस्यापि शक्रर्क्ष' ।
(१२) भु 3) 'अथ यगण:' । भु 4) 'यगण:' इति नोपलभ्यते ।
(१३) भु 2 भु 4) 'रूप्याभो' । (१४) भु 1) 'हय' इंत्यस्य शिरोभागे 'धनु:' इति टिप्पणी दृश्यते । म) 'हरिराशिकश्च' ।
(१५) भु 2 म) 'तथा स्व' । (१६) ब्र) 'बाणद्वयम्' ।

रगणः[१७] –

क्षात्रः स्यात्कदलीदलाभरुचिरो भौमो ग्रहो[१८] रस्तथा
ज्ञेयो[१९] मध्यलघुमूर्तिं वितनुते तस्यानलो दैवतम् ।
ऋक्षं पावकनामकं निगदितं गोत्रं तथा कौशिकं
योनिर्वाज्यृषभः[२०] स्वरोऽसुरगणः[२१] प्रोक्तः प्रधानं तमः ॥७॥

सगणः[२२] --

अन्त्योगुरुः[२३] स्यात् सगणोऽन्त्यजातिः शुक्रग्रहो गौतमगोत्रजश्च[२४] ।
राशिस्तुला दैत्यगणश्च[२५] ऋक्षं स्वातिः[२६] स्वरः पञ्चम एव दिष्टः[२७] ॥८॥
तमोगुणो माहिषयोनिकस्तु[२८] वाताधिदेवो भ्रमणं तनोति ॥९॥

तगणः[२९] --

लघ्वन्त्यस्तगणो द्विजः शुभकरो व्योमाधिदेवस्तथा
राशिः कर्कटको ग्रहः सुरगुरुः षड्जस्वरः कृष्णभः ।
पुष्यर्क्षः कथितो विचक्षणवरैः सत्त्वातिसक्तस्तथा
मेषो योनिरथामृतौदनगणो वासिष्ठगोत्रोद्भवः ॥१०॥

पा.टि.

---

(१७) भु 3) 'अथ रगणः' । (१८) ब्र) 'भौमग्रहो' । (१९) भु 5) 'ज्ञेया' । (२०) भु 5 म) 'र्वाय्वृषभ' । भु 4 ब्र) 'र्वागृषभः' । (२१) म) 'स्वरोऽमरगणः । (२२) भु 3) 'अथ सगणः' । (२३) ब्र) 'अन्त्ये गुरुः' । (२४) भु 5 म) 'गोत्रकश्च' । (२५) भु 1) 'देवगणश्च' (२६) भ) भु 3) 'स्वाती' । (२७) भु 5) देवदृष्टः । (२८) मं) 'योनिकश्च' । (२९) भु 3) 'अथ तगणः' ।

[३०]जगणः —

क्षात्रो मध्यगुरुर्गणो मनुजनू[३१] रक्तप्रभो रोगदः[३२]
स्याद् भास्वानधिदैवतं च जगणः सूर्यो ग्रहो धैवतः ।
स्यात्तारोत्तरफल्गुनी[३३] निगदितस्तस्यैव[३४] राशिर्मृगो
गोत्रं[३५] शुक्लकुलं च तामसगुणः स्याद्धेनुयोनिः स्मृतः ॥११॥

[३६]भगणः —

गुर्वादिर्भगणश्च वैश्यजनितश्चन्द्राधिदेवस्तथा
शुक्लाभो वृषराशिकः सुरगणश्चन्द्रो ग्रहः संमतः[३७] ।
नक्षत्रं मृगशीर्षकं निगदितं सत्कीर्तिदाता शुभो
गोत्रं चाङ्गिरसं[३८] गुणोऽश्वरजसी[३९]☆ योनिर्निषादः स्वरः ॥१२॥

नगणः —

विद्युद्वर्णो नकारः खलु बहुशुभदो विप्रजातिर्गणानां
राजा स्वर्गाधिदेवस्त्रिलघुसमुदितः सर्वलोकेषु पूज्यः ।
ग्रन्थस्यादौ नियुक्तो यदि भवति सदा सर्वदोषान् निहन्ति
वासोऽलङ्कारदायी सपदि वितनुते जीवितं द्रव्यदाता ॥१३॥

पा.टि.……………………………………………………………

(३०) भु 3) 'अथ जगणः' । (३१) भु 4) गणोऽम्यनुजनू' । (३२) भु 4) भोगदः
(३३) भु 4) भु 5 म) 'तारश्चोत्तरफल्गुनी' । (३४) भु 2 ब्र) 'निगदिता तस्यैव' ।
(३५) ब्र) 'गोत्रो' । (३६) भु 3) 'अथ भगणः' । (३७) भु 5) 'संमदः' ।
(३८) भु 4) 'चाङ्गिरसो' । (३९) भु 5 ब्र) 'गुणोऽस्य रजसा' ।
भु 2) 'गुणोऽश्व रजस्रा' । भु 3) 'गुणोऽस्य च रजो' । भु 4) 'गुणोऽस्य जरसी' ।

टि.

☆ अत्र. गुणः रजः, योनिः अश्वः इत्यनेनाभिप्रायेण 'गुणोऽश्वरजसी' इति पाठः कल्पितः स्याद् वा ?

ग्रन्थान्तरे च --

उर्वी मस्त्रिगुरुः श्रियं वितनुते नः स्वस्त्रिलो जीवितं
४० रोऽग्निर्मध्यलघुर्मृतिं च पवनो देशभ्रमं सोऽन्त्यगुः ।
यो वार्यादिलघुर्धनं दिनमणिर्मध्ये गुरुर्जो रुजं
४१ ४२
तो द्यौरन्त्यलघुः शुभं मुखगुरुर्भस्तारकेशो यशः ॥१४॥
४३

अथ गणानां जातिविभागः साहित्यचूडामणौ —

“यनता विप्रसंजाता रजौ क्षात्रकुलौ तथा ।
४४ ४५
भगणं विट्कुलं प्राहुर्मगणं शूद्रमेव च ॥
४६ ४७ ४८
सगणश्चान्त्यजातिस्तु इत्येता गणजातयः” ॥१५॥

४९
कविगजाङ्कुशेऽपिः --

५० ५१
मः शूद्रो य्नौ द्विजौ श्रेष्ठौ रो राजा तो द्विजोत्तमः
५२ ५३
सश्चण्डालश्च भो वैश्यो जो नृपालो भवेत् क्रमात् ॥१६॥

पा.टि...

(४०) भु 4) 'वार्व्वादि' । (४१) भु 4) 'मुखं गुरुभि' । (४२) भु 5) 'यशः' इत्यस्मात् परं 'अथ' इत्यस्मात् पूर्वं च - 'तत्रोदाहरणम्' इत्यधिकः पाठः । (४३) भु 2) 'साहित्यचूडामणौ' इति नोपलभ्यते । (४४) भु 5) भगणो वैश्यकश्चैव मगणः शूद्र एव च' । (४५) भु 2 भु 3 भु 4 म) 'चैव मगणं' । (४६) म) 'भगण' । (४७) भु 2 म) 'जात्यस्तु' । (४८) भु 5) तत्येता' । (४९) भु 3) 'कविगजाङ्कुशेऽपि' इति नोपलभ्यते ।
(५०) भु 5) 'यो द्विजो श्रेष्ठो' । ब्र) 'स्नौ द्विजश्रेष्ठौ' ।(५१) भु 1 भु 2 भु 4) 'सो' । (५२) भु 1 भु 2 भु 4) 'तश्चाण्डालश्च' । (५३) भु 4) यो। ब्र) सो ।

५४
अथ यस्य गणस्य समीपे यो गणः शुभदायकः स उच्यते-

पद्यादेर्मगणस्यैव समीपस्थो यदा भवेत् ॥
सगणः शुभदो ज्ञेयस्तदुदाहृतिरुच्यते ॥१७॥

☆
'वागर्थाविव संपृक्तौ' इति रघुवंशे कालिदासवचनम् ।
यगणस्य साहित्यरत्नाकरे –☆☆

५५
प्राकृतो (प्रकृत्या?)यगणो नित्यं श्रीकृतिः कथ्यते बुधैः ।
स एव विकृतिं याति सगणानुगतो यदि ॥१८॥

यथा शाकिनीसहकारे -- ● 'अवलम्बस्व हेरम्बम्' इत्यादि ।

५६
एवं सर्वदा निन्द्यः सगणः । तस्य निर्दोषत्वमुच्यते साहित्यचन्द्रोदये-

५७
सौम्यग्रहाधिष्ठितत्वात् सगणः शुभदायकः ॥
५८
शुभग्रहाः सितेन्द्विज्याः पापा मन्दारभास्कराः ॥१९॥

शुक्रः सौम्यः प्रसिद्धः इति ।

पा.टि.

(५४) भु 3) 'यस्य यस्य गणस्य समीपे यो यो गणः' ।

(५५) भु 4) 'प्राकृतो' इत्यस्मादारभ्य 'शाकिनीसहकारे' इत्यन्तं यावत् ग्रन्थभागः नोपलभ्यते । (५६) भु 3) 'नित्यः' ।

(५७) भु 1 भु 2 भु 4) 'ग्रहानुष्ठितत्वात्' । (५८) भु 3) सौम्यग्रहाः ।

टि.

☆ कालि. रघु. I./ 1. ☆☆द्र. विश्वे. च. च. पृ./ 19

● 'प्राकृतो यगणो इत्यादि श्लोकोक्तः सिद्धान्तः 'अवलम्बस्व हेरम्बम्' इत्यादौ उदाहरणे न समन्वेति । यगणस्याभावात् ।

[५९]तगणस्य साहित्यरत्नाकरे --

"नित्यं भगणसांनिध्यात् सर्वाभीष्टफलप्रदः ॥
कर्तुः कारयितुश्चैव तगणो व्योमदैवतः" ॥२०॥

तत्रोदाहरणममरुककाव्ये[६०] – ☆ 'ज्याकृष्टबद्ध[६१]खटकेति ।

तगणः शुभगणसंयुक्तः शुभदो भवेदिति चेत् तदपि न[६२] युक्तम् ।
यथा चाटुकारसंग्रहे --

"कर्पूरधूलीरचितालवालः कस्तूरिकाकर्दमदोहदश्रीः ।
[६३]पन्नीरनीरैः परिषिच्यमानः प्राञ्चं गुणं मुञ्चति किं पलाण्डुः ॥"

● एवं न भवति (?) [६४]तथापि तगणोऽपि शुभदः ।
यथा साहित्यचन्द्रोदये –

"तगणः सर्वसौभाग्यदायकः सर्वदा भवेत् ॥

तत् कथं पदवाक्यप्रमाणज्ञैर्महाकविभिस्तद्ग्रन्थादौ नानालङ्कारेषु च तगणः शुभतम इत्यङ्गीकृत्य परिगृहीतः[६५] । तदुदाहरणानि वक्ष्यामः ।
यथा कुमारसम्भवे – ☆☆

"अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।"
इति । एवमन्येषु ज्ञेयम् ।

पा.टि...

(५९) भु 4) 'न गणस्य' । (६०) भु 1 भु 2 म) 'ममृककाव्ये' । भु 4) 'ममरुशतककाव्ये' । (६१) भु 3 भु 4 भु 5 म.ब्र) 'खटकामुखेति' । (६२) भु 5) 'चेत तददर्शनमुक्तम्' । (६३) भु 4 ब्र) 'पन्नीरनीरैरपिषिच्यमानः' । भु 5) 'पन्नीरनीरैरपिसेच्यमानः' । (६४) भु 1 भु 2 भु 4 भु 5 म.ब्र) 'तथापि' इति नास्ति । (६५) भु 3) 'परिगृहीतः' इत्यस्य पार्श्वे 'प्रयोज्यत्वेन स्वीकृतः' इति टिप्पणी दृश्यते ।

टि.

☆ द्र. अमरु. अ. श./1.

☆☆ द्र. कालि. कुमा. I/1.

● 'एवं न भवति ।' इत्यस्य वाक्यस्यार्थ 'पलाण्डुरिव तगणः स्वभावं न मुञ्चति ।' स्याद् वा ?

अथ जगणस्य चमत्कारचन्द्रिकायाम् --

"चवर्णो जगणश्चैव ब्रह्मनामाङ्कनेऽपि वा ॥२१॥

[६६]जगणो न दोषदश्च ।

मंगलार्थाभिधानेऽथ देवनामांकनेऽपि वा
वर्णा गणा न दूष्याश्च देवताधिष्ठिता अपि ॥२२॥

कविकण्ठपाशे - ☆☆

"देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ॥
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा" ॥२३॥

अथ मंगलशब्दानाह --

स्वर्णं रत्नजले च रौप्यमधुरे [६७]पीयूषपुष्पादिकं
[६८]सौगन्धादिशुभाढ्यतीर्थधरणीसद्देवतावाचकाः ।
सौन्दर्याव्ययशब्दकोमलरसा दिव्याम्बरे सागरः
शब्दा मंगलवाचकाश्च कथिताः सद्ग्रन्थकारोत्तमैः।२४।

अपि च साहित्यचूडामणौ --

"अथ विजयप्रणवश्रीपर्वचन्द्र[६९]सूर्यदीर्घायुः ।
[७०]आरोग्यमंगलकुशलसागरमेघाद्याः [७१]मंगलशब्दाः" ॥२५॥

जगणः सूर्याधिदैवतत्वात् न दूष्यः । "आरोग्यं भास्करादिच्छेत्" इति ।

पा.टि.

(६६) भु 3 भु 4 भु 5 म.ब्र) 'जगणो न दोषदश्च' इति नोपलभ्यते ।

(६७) भु 1 भु 2) 'पुष्पादिके' । भु 4) 'पुष्पाधिकं' । ब्र) 'पुष्पाटकं' ।

(६८) भु 4 .ब्र) 'सौगन्ध्यादि' । (६९) भु 3 म) 'सूर्यायुः' । भु 4) 'सूर्यायः' । भु 5) 'सूर्याभ्भः' । (७०) भु 3 भु 4 भु 5 म.ब्र) 'कुलसागर' ।

(७१) भु 5) 'मगंलाः शब्दाः' ।

टि.

☆ विश्वे. च.च. पृ/4 ☆☆ कारिकेयम् अमृतानन्दयोगिवीरचिते अलंकार संग्रहे दृश्यते । अमृ. अलं. I./ 35.

महाकविप्रबन्धे माघादौ काव्ये उदाहरणानि वक्ष्यामः।

माघकाव्ये -- ☆ [७२]'श्रियः पतिः श्रीमति शासितुं जगत्-
जगन्निवासो वसुदेवसद्मनि' इति ।

[७३]भारविकाव्ये -- ☆☆ [७४]
'श्रियः कुरूणामधिपस्य पालिनीम्' इति ।

नैषधीये -- ● 'निपीय यस्य क्षितिरक्षिणः [७५]कथाम्' इति ।

भोजराजीये -- [७६]'सुनीतिशास्त्रं सद्वैद्यम्' इति ।

एवं बहुषु ग्रन्थेषु दृष्टम् ।

अथ नगणस्य साहित्यचन्द्रोदये – [७७]

नगणस्य समीपस्थो दुर्गणः शुभदो भवेत् ।
[७८] अयःकाञ्चनताम्राणां स्पर्शवत् स्पर्शवेदिनः ॥२६॥

कविगजाङ्कुशे --

पर्वतानां यथा मेरुः सुराणां शंकरो यथा ।
मृगाणां च यथा सिंहो गणानां नगणस्तथा ॥२७॥

अथ नक्षत्रानुकूल्यं कविकण्ठपाशे --

एवं गणानां नक्षत्रं कर्तुर्जन्मर्क्षमेव च ।
कर्तुर्नामादिवर्णर्क्षं श्लोकस्याद्यक्षरर्क्षकम् ॥२८॥
आनुकूल्यं समुद्दिश्य श्लोकादौ रचयेद् बुधः ।
अन्यथा दोषबाहुल्यमुभयोः स्यान्न संशयः ॥२९॥

पा.टि......

(७२) भु 2) 'श्रियः पतिरिति' । (७३) भु 3 भु 4 भु 5) 'भारविकाव्ये' इति नोपलभ्येत । (७४) भु 2) 'श्रियः कुरूणामिति' । (७५) भु 2) 'रक्षिण इति' । (७६) भु 1 भु 2) 'शास्त्रेति' । (७७) भु 4) 'सुगणो' । (७८) भु 2 भु 4) 'गजाङ्कुशे' ।

टि. ---

☆ माघ. शिशु. I/1. ☆☆ भार. किरा. I/1. ● श्रीहर्ष नैष. I/1.

अथ गणकूटप्रकारः रत्नमालायाम् --

''[७९]अश्वी मृगशिरो हस्ता स्वातिः पुष्यपुनर्वसू ।
[८०]मैत्रश्रवणरेवत्य एते देवगणाः स्मृताः ॥३०॥
अग्निर्मघा विशाखा च अश्लेषा शततारका ।
धनिष्ठा चित्रसंयुक्ता ज्येष्ठा मूला च राक्षसाः ॥३१॥
तिस्रः पूर्वा रोहिणी च भरणी [८१]रौद्रमेव च ।
त्रिण्युत्तराणि विज्ञेया मानुषाः परिकीर्तिताः'' ॥३२॥

वसिष्ठसंहितायाम् --

''प्रीतिः [८२]स्ववर्गे नरदेवयोश्च
मध्यं हितं स्यात् सुररक्षसोश्च ।
मृत्युर्भवेद्राक्षसमर्त्ययोश्च
कलत्रभृत्यस्वजनेषु नित्यम्'' ॥३३॥

अथ योनिकूटप्रकारः --

अश्विनी शतभं वाजी भरणी रेवती गजः ।
पुष्यैव कृत्तिका मेषः पन्नगो रोहिणी मृगः ॥३४॥
मूलार्द्रे शुनकोऽश्लेषा [८३]विडालश्च [८४]पुनर्वसुः ।
मूषिकः कथितो धीरैर्मघार्क्षं पूर्वफल्गुनी ॥३५॥
उत्तराफल्गुनी धेनुस्तथैवोत्तर[८५]भाद्रवः ।
[८६]स्वातिः हस्ता [८७]सैरिभश्च व्याघ्रश्चित्रा विशाखिका ॥३६॥

पा.टि.

---

(७९) भु1 भु2 भु3 म ब्र) 'अश्विनी' । भु4) 'अश्विनो' । (८०) भु4) 'अनुराधाश्रवणरेवत्या' ।
(८१) भु 4) 'आर्द्रा एव' ।
(८२) भु 4) 'स्ववर्जे' । ब्र) 'मवर्णो'
(८३) भु 2) 'विण्ठलश्च' ।
(८४) भु 2) पुनर्वसौ । ।
(८५) भु 1) 'भाद्रिकः' । भु2) 'भाद्रकीम्' । ब्र) 'भाद्रपद्' ।
(८६) भु 4) 'स्वाती' ।
(८७) भु 2 भु 4 म) 'सौरभश्च' ।

मृगो ज्येष्ठानुराधा च कथिता कविसत्तमैः
पूर्वाषाढाभिजिद् [८८]बभ्रुरुत्तराषाढिका हरिः ॥३७॥
मर्कटः पूर्वभद्रा च धनिष्ठा सिंह उच्यते ।

[८९]तथा चमत्कारचन्द्रिकायाम् —☆

"कादिवर्णास्तत्तद्देवतामूर्त्तय इति ।
[न्यस्ताः काव्यमुखे वर्णास्तत्तद्दैवतमूर्त्तयः?]
कर्तुः कारयितुः श्रोतुः कल्पयन्ति शुभाशुभम्" ॥३८॥

[९०]अथाक्षरादिदेवतासहितवर्णफलनिरूपणमाह-ग्रन्थान्तरे—

अकारः सर्वदैवत्यो रक्तः सर्ववशंकरः ।
आकारःस्यात्पराशक्तिः श्वेत आकर्षणं फलम् ॥३९॥
[९१]इकारो [९२]विष्णुदैवत्यः श्यामो रक्षाकरो भवेत् ।
पीतो मायाशक्तिर्दैवमीकारः स्त्रीवशंकरः ॥४०॥
उकारो वसुदैवत्यः कृष्णो राजवशंकरः ।
ऊकारो [९३]भूमिदैवत्यः श्यामो लोकवशंकरः ॥४१॥
ऋकारो वह्निदैवत्यः पीतो गृहविनाशनः ।
शिखण्डिदेवो ॠकारः साञ्जनो ज्वरनाशनः ॥४२॥

पा.टि.……………………………………………………………………

(८८) भु 4) 'वभ्रू' । (८९) भु 2) 'तथा...मूर्त्तय इति' ग्रन्थभागः नोपलभ्यते । ब्र) तथा....शुभाशुभम्' इति ग्रन्थभागः नोपलभ्यते ।

(९०) 'अथाक्षरादिदेवतासहितवर्णफल'- इति ग्रन्थभागः नोपलभ्यते ।

(९१) म) 'ककारो' (९२) भु 5) 'विष्णुदैवत्यः' इत्यस्मात् परं श्यामो लोकवशंकरः' इत्यस्मात् पूर्वं च ग्रन्थभागो नोपलभ्यते । (९३) भु 3 .ब्र) 'विष्णुदैवत्यः' ।

टि.

☆ दिश्वे. च. च. I. पु./4.

अश्विदेवाव्ललृश्चैव[९४] सितरक्तौ ज्वरापहौ ।
एकारो वीरभद्रः स्यात् पीतः सर्वार्थसिद्धिदः॥४३॥
ऐकारो देवता वाणी[९५] वाक्सिद्धिर्हिमसंनिभः ।
ओकारमैश्वरं[९६] विद्याज्ज्योतिः[९७] सर्वफलप्रदम्[९८] ॥४४॥
औकारश्चादिशक्तिः स्याच्छुक्लः सर्वानुसिद्धिदः[९९] ।
अंकारश्च महेशः स्याद्रक्तः सर्वसुखप्रदः ॥४५॥
अःकारः[१००] कालरुद्रः स्याद्रक्तः सर्वनिकृन्तनः ।
प्रजापतिः ककारः स्यात् पीतः पुष्टिकरस्तथा ॥४६॥
खकारो जाह्नवी स्यात्तु क्षीराभः पापनशनः ।
गकारो गणनाथीयो रक्ताभो विघ्ननाशकृत् ॥४७॥
घकारो भैरवः स्यात्तु मुक्त्यर्थः शत्रुनाशनः ।
ङकारः कालबीजः स्यात् काशः सर्वफलप्रदः ॥४८॥

पा.टि..

(९४) भु 1 भु 2) 'अश्विनीभ्यां ललृ चैव' ।
भु 4 ब्र) 'अश्विनीभ्यां च लृ चैव' । भु 5) 'अश्विनीयौ लृलृ देवौ' ।
म) अश्विनीभ्यां लुलु चैव' ।
(९५) भु 3) 'देववान् वाणी' । भु 4) 'देववाणी' ।
(९६) भु 5) 'ओकार ऐश्वरं' । (९७) भु 2 भु 4 भु 5) 'विन्द्याज्जयोतिः' ।
(९८) भु 3.4. म) 'सर्वफलप्रदः' । (९९) भु 4) 'सर्वविसिद्धिदः' ।
(१००) भु 2 भु 4 म) 'अकारः' ।

चकारो दण्डरुद्रीयस्त्वञ्जनः[१०१] परनाशनः[१०२] ।
छकारो भद्रकाली स्याद्राजावर्ती[१०३] जयप्रदः ॥४९॥
जकारो दम्भकारी स्याद्राजावर्ती जयावहः[१०४] ।
झकारश्चार्धनारीशः श्यामो रक्तो भयावहः ॥५०॥
ञकारः[१०५] कालदैवत्यः पीतो रोगविनाशनः ।
भृङ्गीशश्च टकारस्तु गौरः सिद्धिप्रदायकः ॥५१॥
ठकारश्चन्द्रबीजं स्यात् सितो मृत्युविनाशनः
डकारश्चैकनेत्रः स्यात् पीतः[१०६] कालो जयावहः ॥५२॥
ढकारो यमबीजं स्यान्नीलो मृत्युविनाशनः ।
णकारो नन्दिदैवत्यो रक्ताभः सर्वसिद्धिकृत् ॥५३॥
तकारो वसुदैवत्यः[१०७] श्वेतः सर्वजयावहः ।
थकारो ब्रह्मणि[१०८] ज्ञेयः कुन्दाभस्तु जयप्रदः ॥५४॥
दुर्गाबीजं दकारः स्यात् श्यामः सर्वार्थसिद्धिदः ।
धकारो[१०९] धनदः स्यात्तु पीताभश्चार्थसिद्धिदः ॥५५॥
नकारश्चार्कदैवत्यो[११०] रक्तो रोगविनाशकृत् ।
पकारो रुद्रदैवत्यः श्वेतो भाग्यप्रदायकः ॥५६॥

पा.टि...

(१०१) भु 4) 'स्त्वङ्गनः' । (१०२) भु 2 ब्र) 'पुरनाशनः' ।
(१०३) म) 'स्यात्प्रजावर्ती' । भु 5) 'स्याद्राजावदभयप्रदः' । (१०४) म) 'नयावहः' ।
(१०५) भु 5) 'ओंकारः' । (१०६) भु 5) 'श्यामः सर्वार्थसिद्धिदः' ।
(१०७) भु 4) 'वासुदैवत्यः' । (१०८) भु 4 ब्र) 'ब्रह्मविज्ञेयः' ।
(१०९) भु 1) 'दकारो' । (११०) भु 1 भु 2 भु 4) 'नकार श्चार्थ' ।

फकारश्च रतीशः स्यात् क्षीराभो भद्रदायकः ।
बकारो वरुणस्वामी धूम्राभो बुद्धिदायकः ॥५७॥
भकारो विष्णुदैवत्यो ज्ञानसम्पत्प्रदायकः ।
मकारो मदनेशश्च श्यामः सर्वजयप्रदः ।
यकारो वायुदैवत्यः कृष्णः उच्चाटनप्रदः
रकारो वह्निदैवत्यो रक्ताभः संहृतेर्भयम् ॥५९॥
ळकारः पृथिवीबीजं पीतः स्यात् स्तम्भनं[१११] फलम् ।
वरुणः[११२] स्यात् वकारश्च शुक्लाभो रोगनाशनः[११३] ॥६०॥
लक्ष्मीबीजं शकारः स्यात् श्यामाभः श्रीकरो मतः ।
षकारः सूर्यदैवत्यो रक्तः सर्वार्थसिद्धिदः ॥६१॥
सकारः शक्तिबीजं स्याद्रक्ताभः श्रीकारो मतः ।
हकारः शशिबीजं स्यात् शुभ्रः[११४] स्फटिकशोभनः ॥६२॥
लकारश्चात्मतत्त्वः स्याद्रक्ताभः सर्वसिद्धिदः ।
विद्यातत्त्वं[११५] क्षकारः स्यात् क्षीराभः सर्वसौख्यकृत् ॥६३॥
इत्येवमधि[११६]दैवत्यफलवर्णाः क्रमेण तु ।
शुभाशुभफलान् वर्णान् काव्यादौ संप्रयोजयेत् ॥६४॥

अथ स्वराणां पुंलिङ्ग -स्त्रीलिङ्गनपुंसकलिङ्गत्वमाह - ग्रन्थान्तरे-

प्रथमश्च तृतीयश्च पञ्चमैकादशौ तथा ।
त्रयोदशः पञ्चदशः पुंलिङ्गास्तु स्वरा मताः[११७] ॥६५॥

पा.टि.

---

(१११) भु 5) 'स्ययनम्' । म) तम्भनम्' । (११२) भु 1 भु 2) 'वारुणः' ।
(११३) भु 5 ब्र) 'रोगनाशकः' । (११४) भु 1 भु 2) 'शूद्रः' ।
(११५) भु 5) 'विद्यातत्त्वं..सौख्यकृत्' इति कारिकार्धस्य स्थाने 'क्षकारश्चात्मतत्त्वः स्याद्रक्ताभः सर्वसिद्धिदः इति दृश्यते । (११६) भु5) 'इत्येतामधि' ।
(११७) 'स्वरा मताः' इत्यस्मात् परं द्वितीयश्च' इत्यस्मात् पूर्वं च- अ.इ. उ.ओ. अं. एते स्वराः पुंलिङ्गाः । इत्यधिकमस्ति ।

द्वितीयश्च चतुर्थश्च षष्ठश्च द्वादशस्तथा ।
चतुर्दशः षोडशश्च स्त्रीलिङ्गस्तु स्वरा मताः[११८] ॥६६॥
ऋ ॠ लृ ॡ इमे चैव चत्वारः स्युर्नपुंसकाः[११९] ।

अथ ककाराद्यक्षराणां पुंलिङ्गस्त्रीलिङ्गनपुंसकलिङ्गत्त्वमाह-

वर्गेष्वाद्यस्तृतीयश्च सकारश्च हकारकः ॥६७॥
एते द्वादशवर्णाः स्युः पुंलिङ्गत्त्वेन संमताः[१२०] ।
वर्गेष्वथ द्वितीयश्च चतुर्थश्च शषौ लवौ ॥६८॥
चतुर्दशैते वर्णाः स्युः स्त्रीलिङ्गत्त्वेन कीर्तिताः[१२१] ।
शेषा नपुंसका निन्द्यास्त्रिरूपत्वमिति स्मृतम्[१२२] ॥६९॥

अथ ककारादीनामक्षराणां जातिविवेकः - अलंकारसंग्रहे -- ☆

"कादयस्तु[१२३] पञ्चदश पूज्याः स्युर्ब्राह्मणाः स्मृताः ।
तादयो दशवर्णाश्च कथ्यन्ते[१२४] क्षत्रिया बुधैः ॥७०॥

पा.टि...

(११८) भु 5) 'मताः' इत्यस्मात् परं ऋ ॠ इत्यस्मात् पूर्वं च 'आ ई ऊ ऐ औ अः एते स्वराः स्त्रीलिङ्गाः" इति अधिकं दृश्यते। (११९) भु 4 ब्र) 'चत्वारस्तु नपुंसकाः' । (१२०) भु 5). 'संमताः' इत्यस्मात्परं 'वर्गेष्वथ' इत्यस्मात् पूर्वं च क. च. ट. त. प. ग.ज.ड.द.व.स.ह. एते द्वादशवर्णाः पुंलिङ्गाः' इति अधिकं दृश्यते।
(१२१) भु 5) 'कीर्तिताः' इत्यस्मात् परं 'शेषा नपुंसका' इत्यस्मात् पूर्वं च- 'ख.छ.ठ.थ.फ.घ. झ.ढ.ध.भ.श.ष.ल.व. एते चतुर्दशवर्णाः स्त्रीलिङ्गाः' इति अधिकं दृश्यते।
(१२२) भु 5) 'स्मृतम्' इत्यस्मात्परं 'ककारादीनामक्षराणां' इत्यस्मात् पूर्वं च- शेषा ये वर्णाः नपुंसकाः। ङ.ञ.ण.न.म.य.र.क्ष. एते अष्ट वर्णाः नपुंसकाः' इति अधिकं दृश्यते।
(१२३) भु 1 भु 2 भु 3 ब्र) 'द्विजातयः'।
(१२४) भु 1 भु 2 भु 4 म.ब्र) 'क्षत्रियः कथ्यते बुधैः।

टि.

☆ अमृतानन्दयोगिविरचिते अलंकारसंग्रहे इदं पद्ययुगलं नास्ति।

यलहाः शषसा वैश्यकुलजाः पूजिताश्च षट् ।
१२५
वक्षराः शूद्रकुलजास्त्रयो वर्णाः प्रकीर्तिताः'' ॥७१॥

१२६
अथाक्षराणाममृताक्षरविषाक्षरविवेकः कविकण्ठपाशे- १२७

अ क च ट त प य श-वर्गा अमृतानि विषाणि दीर्घाणि ।'

अथ भूतबीजानि साहित्यचूडामणौ-

समीरहुतभुग्धात्रीजलव्योमगुणादितः ।
१२८
पञ्चपञ्चविभागेन दशवर्गाः क्रमाक्षराः ॥७२॥

तथा च- अकारो वायुबीजं स्यादाकारैकारकौ तथा ।
१२९
कचटास्तपयाः षस्तु कथितः कविसत्तमैः ॥७३॥
इकारो दीर्घ ईकारश्चैकारः खछठास्थफौ ।
रसौ तु वह्निबीजं स्यादित्याहुः पूर्वपण्डिताः ॥७४॥
उकारद्वयमोकारो गजडा दवलाः स्मृताः ।
हकारः पृथिवीबीजं कथितं कोविदोत्तमैः ॥७५॥
१३० १३१
जलबीजमृकारः स्यादृकारौकारघास्तथा ।
१३२ १३३
झढधाश्च भवक्षाश्च नभोबीजमतः परम् ॥७६॥
लृलॄअंङा ञणौ चैव नमशाश्च विसर्गकः ।
पद्यादौ वायुबीजं स्यात् शोकवृद्धिकरं भवेत् ॥७७॥
मृत्युदं वह्निबीजं च भूबीजं द्रव्यदायकम् ।
हर्षदं स्यात् पयोबीजं नभोबीजं धनक्षयम् ॥७८॥

पा.टि..

(१२५) भु 1 भु 2 भु 4 ब्र) 'लक्षराः' । (१२६) भु 4) 'विषाक्षर' इति पदं नोपलभ्यते । ब्र) 'ममृतविषाक्षरत्व' । (१२७) भु 5) 'दीर्घाणी द्विविधाति' । म) 'द्विधानि' । (१२८) भु) 'दशवर्णाः' । (१२९) भु 2 भु 4) 'कचटास्ते पयाषस्तु' । म) 'कचटास्तपगाषस्तु' । (१३०) ब्र) 'स्याट्टकारौ' । (१३१) भु2 भु4 म) 'करपा स्तथा' । (१३२) भु2 भु4) 'झडधाभवलाख्याता' । (१३३) भु 5) 'नभो बीजं प्रयोक्तव्यम्' ।

अथ भूतबीज[१३४]प्रयोगकालमाह --

भानुवारे उदयादष्ट[१३५]दण्डपर्यन्तं भूबीजं प्रयोक्तव्यम् ।
चन्द्रवारे चतुर्दण्ड[१३६]पर्यन्तं जलबीजं प्रयोक्तव्यम् ।
भौमतारे षड्दण्ड[१३७]पर्यन्तं वह्निबीजं प्रयोक्तव्यम् ।
सौम्यवारे पञ्चदण्डपर्यन्तं वायुबीजं प्रयोक्तव्यम् ।
बृहस्पतिशुक्रशनिवारेषु सप्तदण्डपर्यन्तमाकाशबीजं प्रयोक्तव्यम् ।

अथ वर्गाक्षरग्रहाः प्रपञ्चसारे[१३८]--

तथा स्वरे[१३९] च सूर्योऽयं कवर्गेशस्तु लोहितः ।
चवर्गस्य प्रभुः काव्यः टवर्गस्य वुधेश्वरः[१४०] ॥७९॥
तवर्गेशः सुरगुरुः पवर्गस्य[१४१] शनीश्वरः
यवर्गस्य[१४२] च शीतांशुरिति सप्तगणाधिपाः ॥८०॥

तेषामरिमित्रविवेकः साहित्यचूडामणौ--

तिर्यगूर्ध्वमुखाकारा दशरेखाविनिर्मिताः ।
शोधयेदरिमित्राणि सुधीः षोडशकोष्ठकैः ॥८१॥

ततो वर्णविन्यासो यथा –

इन्द्वग्निरुद्रनवनेत्रयुगार्कदिक्षु-
ऋत्वष्टषोडशचतुर्दश भौतिकेषु ।

पाटि..

---

(१३४) भु 1 भु 2 भु 5) 'भूबीज' । (१३५) म) 'उदयाद्यष्ट' । (१३६) भु 2 भु 4) 'चतुर्दशदण्ड' । (१३७) भु 1 भु 2 भु 4 म) 'षष्ठदण्ड' । (१३८) भु 5) 'पञ्चसारे । (१३९) ब्र) 'स्वरेशः' । (१४०) भु 3) 'टवर्गस्येश्वरो बुधः' । ब्र) 'दवर्गस्य बुधः प्रभुः' । (१४१) भु 3) 'पवर्गस्येश्वरः शनिः' । म.ब्र) 'पवर्गस्य शनिश्चरः' । (१४२) भु 4) 'यवर्गस्याति' ।

पातालपञ्चदश[१४३]वह्निहिमांशु[१४४]कोष्ठे
वर्णान् लिखेत् लिपिभवान्[१४५] क्रमशस्तु धीमान् ॥८२॥

कोष्ठगणनाप्रकारः साहित्यचूडामणौ-

"गणयेत् प्रभुनामादि[१४६] वर्णकोष्ठादितः क्रमात् ।
पद्याक्षरस्य पर्यन्तं सिद्धादिचतुरः कविः" ॥८३॥

[१४७]कोष्ठगताक्षरफलानि शारदातिलके-

"सिद्धार्णा बान्धवाः प्रोक्ताः साध्यास्ते सेवकाः स्मृताः ।
सुसिद्धाः पोषका ज्ञेयाः शत्रवो घातका मताः"॥८४॥

अकारादिक्षकारान्तानामक्षराणां प्रत्येकं शुभाशुभफलानि वक्ष्यामः ।

चमत्कारचन्द्रिकायाम् - ✫

अकारः प्रीतिदायी स्यान्निषेधे तु विवर्णयः(विपर्ययः?) ।
आकारो हर्षदः सोऽपि क्रोधेत्यादिषु सोचितः[१४८] (नोचितः?) ॥८५॥
इकारादिचतुष्कञ्च कुर्यात्तुष्टिमनोरथौ ।
ऋकाराद्याश्च[१४९] चत्वारः सन्ततिस्तम्भहेतवः ॥८६॥
एकाराद्या[१५०] हि चत्वारः कामवाङ् मोक्षभूतिदाः ।
लक्ष्मीकरः कवर्गः स्याच्चवकारः कीर्तिनाशनः ॥८७॥

पा.टि...

(१४३) भु1) पातालपञ्चदश' इत्यस्मात् परं 'क्रमात्' इत्यस्मात् पूर्वं च ग्रन्थपातः ।
(१४४) म) 'कोष्ठैवर्गात्' । (१४५) भु 3) 'लिपिगतान्' ।
(१४६) म) 'प्रभुनामानि' । (१४७) भु 2 भु 4) 'कोष्ठगणा' । भु 5) 'पद्यगता' ।
(१४८) भु 5) 'शोचितं' । (१४९) भु1 भु2 भु3 म) 'ऋकारादीनि चत्वारि' ।
(१५०) भु 5) 'ऋकारादिश्च' ।

टि.

✫ विश्वे. च.च. पृ./4.

छजकारौ रोगहरौ झञौ तु मरणप्रदौ ।
टठकारौ भेदकरौ डढं[१५१] बोधनकान्तिकृत् ॥८८॥
आरोग्यकृण्णकारस्तु तकारः कीर्तिनाशनः ।
थकारो युद्धकारी[१५२] स्याद् दधकारौ धृतिप्रदौ ॥८९॥
नकारस्तापकृत्[१५३] केचित् अनिषेधे शुभप्रदः ।
रक्षादायी पकारः स्यात् फकारः स्याद् वसुप्रदः ॥९०॥
आरोग्यकृद्[१५४] बकारस्तु भकारो भाग्यकृद् भवेत् ।
मकारस्तापकृद् यस्तु श्रीदो रेफस्तु दाहकृत् ॥९१॥
लो जाड्यकृद् वकारस्तु भाग्यारोग्यफलप्रदः ।
ऊष्माणः सुखखेदश्रीनिर्वाणनिधयः क्रमात् ॥९२॥
क्षं विना क्रूरसंयुक्ताः सौम्यास्त्याज्या विषान्नवत्[१५५] ॥''

ग्रन्थादौ पकारप्रयोगेण दोषोऽस्ति । तत्कथम् ? उच्यते[१५६] –

☆'पः प्रतापी भयासौख्यमरणक्लेशतापकृत्[१५७]' ॥९३॥

पा.टि..

(१५१) भु 1 भु 2 भु 4 म) 'डढ बोधत्व' । (१५२) भु 4) 'बुद्धिकारी' । (१५३) भु 4) 'नकारः पाप कृत्' । भु 5) 'नकारस्तप' । (१५४) भु 4 भु 5) 'आकारकृद्' । (१५५) भु 3) 'क्षं विना.... विषान्नवत्' इत्यस्य. पार्श्वे 'क्षकारस्तु कषयोगजातः । तत्र ककारस्य सौम्यत्वेऽपि षकारस्य खेदजनकत्वात् तद्योगोऽपि क्षकारोऽग्राह्य एवेत्यर्थः ।' इति टिप्पणी दृश्यते । (१५६) भु3) 'तत् कथमुच्यते' इत्यस्य पार्श्वे- 'पकारस्य दोषकरत्वं कथमिति प्रश्ने. उच्यते इत्युत्तरम् ।' इति टिप्पणी वर्तते । (१५७) भु 5) 'रागकृत्' ।

टि.

☆ अमृ. अ.सं - I. 28 पृ./2.

पः 'पवर्ग' इत्यलङ्कारसंग्रहे । साहित्यरत्नाकरे दोषान्तरमाह- ✫

तथापि-'पकारो रेफसंयुक्तो हृतदोषः समः स्मृतः ।'

किं च चमत्कारचन्द्रिकायाम्-

१५८
पकारो रेफसंयुक्तः स्फुटं काव्यमुखे शुभम् ॥१४॥

१५९
उदाहरणानि वक्ष्यामः– 'प्रणम्य शम्भुं जगतः परम्' इति भारतरत्नकोषे ।

१६० १६१
'प्रणम्य शिरसा देवम्' इत्यादि प्रयोगबाहुल्यात् ज्ञेयम् ।

१६२
पकारप्रयोगे दोषो नास्ति । ननु केवलपकारप्रयोगे यदि दोषोऽस्ति तत् कथं चमत्कारचन्द्रिकायां 'रक्षादायी पकारः स्यात्' इति उक्तम् ।

१६३
उच्यते ह्रस्वः पकारोऽप्यमृताक्षरत्वात् न दोष' इति ।

अथाक्षराणां गद्यपद्येषु तत्तत्स्थानप्रयोगनिषेधाः साहित्यरत्नाकरे-

''षट्सप्तरुद्रसंस्था अकचटाः कलहप्रदायिका कर्तुः'' ॥१५॥

पाटि.

(१५८) भु 3) 'शुभः' । (१५९) भु 2) 'कोषे' ।

(१६०) भु 1 भु 2 भु 4 भु 5 म) 'वचन वाहुल्यत्' ।

(१६१) भु 3) समत्वं ज्ञेयम् ।

(१६२) भु 1 भु 2) 'पकार प्रयोगे दोषो नास्ति' । इति नास्ति ।

(१६३) 'पकारोप्यमृताक्षरत्वाच्च' । भु 2 भु 5 म) 'पकारोऽमृतात् क्षरत्वाच्च' । भु 4) 'पकारोऽप्यमृताक्षर' इत्यादि नोच्यते इति' ।

टि.

✫ यद्यपि मातृकासु 'सहित्यरत्नाकरे दोषान्तरमाह' इति दृश्यते तथाप्यत्र दोषान्तरत्वप्रतिपादकं प्रमाणवाक्यं प्रमादात् परित्यक्तं स्यात् ।

आयुःकीर्तिकरं प्रमोदजनकं लक्ष्मीमुदो वर्धनं
१६४
सर्वेषां श्रुतिरञ्जकं गुणपरं सौख्यं विधत्ते परम् ।
नानादोषहरं सदा जयकरं संपत्करं सर्वतः
कृत्यादौ विनियोजनं शुभकरं श्रीरक्षरं राजते ॥९५॥
१६५
इदं पद्यं मम । १६६ १६७

इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गंगवंशाबतंस-वीर
१६८
श्रीगजपतिजगन्नाथनारायणदेवमहाराज-विद्वतसभाराजित-प्रबन्धकविताप्रकाशक-
१६९
करणकुलसंभव-कविभिषग्-वरवासुदेवपात्रतनय-श्रीमद्गोपीनाथकविभूषणकृतौ
१७०
कविचिन्तामणौ गणादिनिरूपणं नाम द्वितीयः किरणः ।

पा.टि.

(१६४) भु 4 म) 'श्रुतिरञ्जनम्' ।

(१६५) भु 3 भु 4 भु 5 म) 'मम' इत्यस्मात् परम् 'इति' इत्यस्मात् पूर्वं च-
अथ काव्यपद्धतिः प्रतापरुद्रयशोभूषणे-
रसप्रधानाः शब्दार्था गुणालंकारवृत्तयः ।
रीतयश्चेयती शास्त्रप्रमेयं काव्यपद्धतिः ॥'' इत्यधिकमस्ति ।

(१६६) भु 5) 'इति' इत्यस्मादारभ्य 'पात्रतनयश्रीमद्' इत्यन्तं यावन् नोपलभ्यते ।

(१६७) भु 4) 'खिमडि' ।

(१६८) भु 1 भु 2) 'कविताप्रबन्ध' ।

(१६९) भु 2) 'विद्या' भूषण । (१७०) भु 3) 'निरूपणौ' ।

* * *

[तृतीयः किरणः]

अथ वृत्तानि --

छन्दःशास्त्रेष्वनेकानि सन्ति वृत्तानि भेदतः ।
[१] कानि कानि विलिख्यन्ते तेभ्यो लोकसुखाय च ॥
प्राचीनलक्षणैर्युक्तमुदाहरणमुच्यते ॥१॥
''पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ॥
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ॥२॥
सममर्धसमं वृत्तं विषमं चेति तत् त्रिधा ।
समं समचतुष्पादं भवत्यर्धसमं पुनः ॥३॥
आदिस्तृतीयवद् यस्य पादस्तुर्यो द्वितीयवत् ।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्तितम् ॥''४॥

समवृत्तं यथा वंशस्थादयः । अर्धसमं यथा छन्दोमञ्जर्याम् --

'स्मरवेगवती व्रजरामा केशववंशीरवैरतिमुग्धा ।
[२] रभसान्न गुरून् गणयन्ती केलिनिकुञ्जगृहाय जगाम ॥''

पा.टि...

(1) भु 3) 'लिख्यन्ते कानिचित् वृत्तं तेभ्यो लोकसुखेच्छया' ।

भु 4) 'लिख्यन्ते कानि कान्यत्र ते भो लोकसुखेच्छया ।'

भु 5 म) 'लिख्यन्ते कानि कान्यत्र तेभ्यो लोकसुखाय वै' ।

(2) भु 4 भु 5) 'रभसान्' । म) 'रभसाद् गुरून्' ।

टि ____

☆ गङ्गा. छ.म. I/4-6. ☆ तत्रैव III./ पृ १३९

विषमवृत्तं यथा – ☆

“[३]विललास गोपरमणीषु तरणितनया प्रभोद्गता[४] ।
कृष्णनयनचकोरयुगे दधती सुधांशुकिरणोर्मिविभ्रमम्[५] ॥”

☆☆ [६]‘प्रेङ्खे वा’ इति पुनः पिङ्गलमुनेर्विकल्पविधायकं सूत्रम् ।

यथा- कुमारसम्भवे - ●

[सा मङ्गलस्नानविशुद्धगात्री] गृहीतप्रत्युद्गमनीयवस्त्रा[७] ।
[निर्वृत्तपर्जन्यजलाभिषेका प्रफुल्लकाशा वसुधेव रेजे ॥]

इति ।

अत्र[८] प्रशब्दपरे[९] लघुत्वम् ।

पा.टि...

(३) भु 5) ‘विललाप’ । म) ‘विकलास’ । (४) भु 5) ‘प्रभोयश’ ।

(५) भु 5) ‘विभ्रमाम्’ । भु 3) ‘विभ्रमम्’ इत्यस्मात् परं ‘प्रेङ्खे इत्यस्मात् पूर्वं च- ‘अत्र पादत्रयस्य वर्णसाम्येपि गणभेदात् प्रत्येकं भेदः । चतुर्थस्तु बह्वक्षरत्वात् सर्वतो भिन्नः । याथा वा माघे- (XV/1)

“अथ तत्र पाण्डुजनयेन सदसि विहितं मधुद्विषः ।
मानमसहत न चेदिपतिः परवृद्धिमत्सरि मनो हि मानिनाम् ।”

अत्र प्रथमद्वितीययोः पादयोः वर्णसाम्येऽपि प्रथमतृतीययो द्वितीयचतुर्थयोश्च तदभावादर्धसमम् । सर्वेषां पादानां तदभावाच्च न सममिति ज्ञेयम् ।” इति अधिकं दृश्यते । (६) भु 1 भु 2 भु 3 भु 4) ‘प्रेङ्खे’ ।

(७) भु1 भु 2 भु 4 भु 5) ‘वस्त्रमित्यादि’ । म) ‘वस्त्रा इत्यादि’ ।

(८) म) ‘अतः’ । (९) भु 3) ‘प्रशब्दपरेपि तकारोपर्य्यकारस्य लघुत्वम्’ ।

टि.

☆ गंगा. छ.म. IV./146 ☆☆ तत्रैव पृ./७ ● कालि कुमा. VII / 11

[१०]तथा वा माघे – ☆

"प्राप्तनाभिह्रदमज्जनमाशु प्रस्थितं [११]निवसनग्रहणाय ।
औपनीविकमरुन्ध किल स्त्री वल्लभस्य करमात्मकराभ्याम् ॥"

[१२]अत्र ह्रशब्दे [१३]परेलघुत्वम् । तीव्रप्रयत्नोचारेणात्र लघुत्वमिति [१४]कण्ठाभरणकारः ।

यदुक्तम् – ☆☆

यदा तीव्रप्रयत्नेन संयोगादेरगौरवम् ।
न छन्दोभङ्गमप्याहुस्तदा दोषाय सूरयः ॥५॥

इति वृत्तलक्षणम् (?) अथ [१५]यतिलक्षणम् -- ☆☆☆

यतिर्जिह्वेष्ठविश्रामस्थानं कविभिरुच्यते ।
सा विच्छेदविरामाद्यैः पदैः कार्या निजेच्छया ॥६॥

● क्वचिच्छन्दःशास्त्रे यतिरभिहिता पूर्वकृतिभिः
[१६]पदान्ते सा शोभां व्रजति पदमध्ये त्यजति च ।
पुनस्तत्रैवासौ स्वरविहितसन्धिः श्रयति तां
यथा कृष्णः पुष्णात्वतुल[१७]महिमा मां करुणया ॥७॥

अयं श्लोकः छन्दोगोविन्दे ।

पा.टि...

(१०) भु 2) 'यथा माघे ' । (११) भु 1 भु 2) 'नुवसन' ग्रहणाय । भु 4) 'नु सवन ग्रहणाय ।' भु 5) 'नु वसने ग्रहणीयम्' । म) 'न वसनग्रणीयम्' । (१२) भु 5) 'हशव्दार्थे' । (१३) भु 1 . भु. 2 . भु 4 म) भु 3) 'परेऽपि भकारोपरीकारस्य' । (१४) भु 2 भु 4 मं) 'कण्ठाभरणैः' । भु3) 'कण्ठाभरणम्' । (१५) भु 4) 'इति तल्लक्षणम्' । भु 5 म) 'इति लक्षणम्' । (१६) भु 3) 'संशोभां" । (१७) भु 4) 'महिमा म' । भु 5) 'महिमानं' ।

टि. ___

☆ माघ. शिशु. X / 60. ☆☆ गङ्गा. छ.म. I. /पृ 8.

☆☆☆ गङ्ग. छ.म. I. /पृ.12. ● तत्रैव I / 13.

☆☆ श्वेतमाण्डव्यमुख्यास्तु नेच्छन्ति मुनयो यतिम् ।
यतिभङ्गो न दोष इति बहुग्रन्थेषु दृष्टम्[१८] ।
★★★ आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्धितैः[१९] ।
पादैरुक्तादिसंज्ञं[२०] स्याच्छन्दः षड्विधमुच्यते ▲ (षडविंशतिं गतम् ?)॥८॥
मृदुवचने स्यात् शशिवदना न्यौ ॥९॥

यथा - ● शशिवदनानां व्रजतरुणीनाम् ।
अधरसुधोर्मिं मधुरिपुरैच्छत् ॥"

स्फुरद्विद्रुमोष्ठि द्विया[२१] सोमराजी ॥१०॥

यथा - ★
"हरे सोमराजीसमा ते यशःश्रीः ।
जगन्मण्डलस्य च्छिनत्त्यन्धकारम् ।"

[इति] गायत्रीवृत्तम् ।

विद्याढ्ये मृगनेत्रे म्सौ[२२] गः स्यान्मदलेखा ॥११॥

यथा - ●●
"रङ्गे बाहुविरुग्णाद् दन्तीन्द्रान्मदलेखा ।

पा.टि.

(१८) भु 1 भु 2 म) 'दुष्टः' । (१९) भु 3) 'वर्द्धिते' । भु 5 म) 'वर्द्धते' ।
(२०) भु 2 भु 3) 'पादैरुक्थादिसंज्ञं' । (२१) भु 1 भु 2 भु 4 भु 5 म) 'द्विजा' ।
(२२) भु 4) 'म्नौ ग' । भु 5) स्यौ पवनदस्यन् मदेरखा ।

टि.

☆☆ द्र. तत्रैव I/14. ● द्र. तत्रैव I/15. ▲ अत्र 'षड्विधमुंच्यते' इति पाठोऽसमीचीन इव प्रतीयते छन्दसां षड्विंशतिविधत्वात् । तस्मादत्र 'षड्विधमुच्यते' इत्यस्य स्थाने 'षड्विंशतिं गतम्' इति पाठः स्यात् ।

तत्रैव I/15.

★ गङ्गा. छ.म. II./पृ18.

☆☆☆☆ तत्रैव II/पृ18

●● तत्रैव II/पृ20

भग्नाभून्मुरशत्रोः[२३] ★(लग्नाभून्मुरशत्रौ ?) कस्तूरीरसचर्चा ॥”

वृत्तमुष्णिक्[२४] [इति उष्णिग्वृत्तम् ?]

खञ्जनगञ्जननेत्रे चित्रपदा यदि भौ गौ[२५] ॥१२॥

यथा - ●

“यामुनसैकतदेशे गोपवधूजनकेलौ[२६] ।
कंसरिपोर्गतिलीला चित्रपदा जगदव्यात् ॥”

त्वं शृणु कान्ते रुचिरं भात्तलगा माणवकम् ॥१३॥

यथा - ★★

“चंचलचूलं[२७] चपलैर्वत्सकुलैः[२८] केलिपरम् ।
ध्याय सखे ! स्मेरमुखं नन्दसुतं माणवकम् ॥”

कान्ते शान्ते विद्धि क्षिप्रं मो मो गो गो विद्युन्माला ॥१४॥

यथा - ★★★

“वासोवल्ली विद्युन्माला[२९] बर्हिश्रेणी शाक्रश्चापः ।
यस्मिन् स स्यात्तापोच्छित्त्यै[३०] गोमध्यस्थः कृष्णाम्भोदः[३१] ॥”

पा.टि.

---

(२३) भु 4) 'भग्नाभून्मुर' । (२४) भु 5) 'वृत्तिं तिण्डकम्' । (२५) भु 1 भु 2 भु 4) 'यदा भोगौ' । (२६) भु 3 म) 'जलकेलौ' । (२७) भु 3) 'चञ्चलेचूडं' । भु 4) 'चञ्चले चूलं' । (२८) भु 5) 'दैत्यकुलैः' । (२९) भु 5) 'विद्युयान्माला बहिः' । (३०) भु 4) 'स्यात्तापछित्त्यै' । (३१) भु 1 भु 2 भु 4 भु 5) 'कृष्णाम्भोधः' । म) 'कृष्णाम्भोधिः' ।

टि.

★ 'भग्नाभून्मुरशत्रोः इति पाठे अन्वयस्यासंगतिर्भवति । तस्मादत्र 'लग्नाभून्मुरशत्रौ' इति पाठः स्यात् । द्र. गंगा. छ.म. /पृ20 ।

● द्र. तत्रैव. II./पृ21 ★★ तत्रैव /पृ22 ★★★ तत्रैव/पृ22.

त्वं निशमयाति[३२]भीरु ग्लौ रजौ समानिका तु ॥१५॥

यथा - ✩

“यस्य कृष्णपादपद्ममस्ति हृत्तडागसद्म । [३३]
धीः समानिका परेण नोचितात्र मत्सरेण ॥”

शृणु त्वमेव सुन्दरि प्रमाणिका जरौ[३४] लगौ ॥१६॥

यथा - ✩✩

“पुनातु भक्तिरच्युता सदाऽच्युताङ्घ्रिपद्मयोः ।
[३६] श्रुतिस्मृतिप्रमाणिका[३५] भवाम्बुराशितारिका ॥”

✩✩✩ ‘मतल्लिका मचर्चिका’ इत्यमरः । [इति अनुष्टुब् वृतम्]

शृणु शशिवदने कान्ते भुजगशिशुयुता[३७] नौ मः ॥१७॥

यथा - ●

“ह्रदतटनिकटक्षोणी भुजगशिशुयुता याऽसीत् । [३८]
मुररिपुदलिते नागे व्रजजनसुखदा साऽभूत् ॥”

त्वं शृणु वाचं सुन्दरि हे स्यान्मणिमध्यं चेद् भमसाः ॥१८॥

पा.टि.

(३२) भु 4) ‘निशामयाति’ । (३३) भु 5) ‘नोचित्रात्र’ ।
(३४) भु 5) ‘लग्नौ’ । (३५) भु 4) ‘प्रकाशिका’ ।
(३६) भु 3) ‘मतल्लिका मचर्चिका प्रकाण्डमुद्धतलजावित्यमरश्च’ ।
(३७) भु 5) ‘शशीयुता न्नौ मः’ । (३८) भु 4 भु 5) ‘सुखदास्याभूत्’ ।

टि.

✩ गङ्गा. छम.II. पृ/23 ✩✩ तत्रैव - पृ. /24 .
✩✩✩ अम. अ.को. I / 4-27 ● गङ्गा. छ. म. II पृ. /26

यथा - ☆ ३९ ४०

"कालियभोगाभोगगतस्तन्मणिमध्यस्फीतरुचा । ४१
चित्रपदाभो नन्दसुतश्चारु ननर्त स्मेरमुखः ॥"

४२

तरलायताक्षि सत्प्रभे सजरैर्भुजङ्गसङ्गता ॥१९॥

यथा - ☆☆ ४३ ४४

"तरला तरङ्गरिङ्गितैर्यमुना भुजङ्गसङ्गता ।
कथमेति वत्सचारकश्चपलः सदैव तां हरिः ॥"

[इति] बृहतीवृत्तः (बृहतीवृत्तम् ?)

४५ ४६

पङ्कजवक्त्रे त्वं शृणु कान्ते रुक्मवती सा यत्र भमौ स्गौ ॥२०॥

यथा - ☆☆☆

"कायमनोवाक्यैः परिशुद्धैर्यस्य सदा कंसद्विषि भक्तिः ।
राज्यपदे हर्म्यालिरुदारा रुक्मवती विघ्नः खलु तस्य ॥"

इयं रुक्मवती क्वचिच्चम्पकमाला ।

पा.टि.

---

(३९) भु 4) 'भाग्यं भोग' । (४०) भु 5) 'स्यान्तरुचा' ।

(४१) भु 3) 'स्मेरमुखः' इत्यस्मात् परं 'तरलायताक्षि' इत्यस्मात् पूर्वं च- "कालियस्य भोगाभोगः परिपूर्णभोगः कालियभोगिनः हि भोगो लक्ष्मीर्युतः कायः तद्जितः भोगिनो भोग इति विग्रहे गिकारस्य ह्रस्वत्वापत्तिः.......अविरोधेन वृत्तलक्षणाव्याप्तेः ।" इति कीटदष्टा टिप्पणी अधिका दृश्यते ।

(४२) भु 4) 'भुजङ्गिसङ्गिता' । भु 5) 'भुजङ्गसङ्गिता' । (४३) भु 3) 'तरङ्गितै' ।

(४४) भु 4 भु 5) 'सङ्गिता' । (४५) भु 5) 'उक्तवती' ।

(४६) भु 2 भु 5 म) 'स्मौ' ।

टि.

☆ तत्रैव पृ./26. ☆☆ तत्रैव 27. ☆☆☆ तत्रैव पृ./29.

मत्तः[४७] कान्ते शृणु रसयुक्ते ज्ञेया मत्ता मभसगसृष्टा[४८] ॥२१॥

यथा - ☆

पीत्वा मत्ता मधु मधुपाली कालिन्दीये तटवनकुञ्जे ।
उद्दीव्यन्तीः[४९] व्रजजनरामाः कामासक्ता मधुजिति[५०] चक्रे ॥

सुमणिमण्डिते लसत्कले नरजगैर्भवेन्मनोरमा ॥२२॥

यथा - ☆☆

"तरणिजातटे विहारिणी[५१] व्रजविलासिनीविलासतः ।
मुररिपोस्तनुः पुनातु वः सुकृतशालिनां[५२] मनोरमा ॥"

[इति पङ्क्तिवृत्तम् !] शशिवदनादिमनोरमावृत्तपर्यन्तमुदाहरणं छन्दोमञ्जर्याम् ।

कान्ते महाभूपसुते[५३] प्रसन्ने स्यादिन्द्रवज्रा यदि तौ जगौ गः[५४] ॥२३॥

यथा - **चौरपञ्चाशति** - ●

"बालेऽवलारत्न ! दयार्द्रचित्ते ! प्राणेश्वरि ! श्रीमति ! सुप्रसन्ने !
दासोऽस्मि ते सुन्दरि ! राजपुत्रि ! प्राणस्य रक्षां कुरु मे मृगाक्षि[५५] !"

पा.टि...

(४७) भु 5) 'मत्' । (४८) भु 5) 'मभिसग स्पृष्टा' । म) 'मभस्रग् सृष्टा' । (४९) भु 5) 'काचिद्दिव्यती' । भु 5) 'मधुजड' । (५०) म) 'का विरहिणी' । (५१) भु 5) 'वः' इति न दृश्यते ।(५२) भु 1 भु 2) 'शालिनी' । (५३) भु 3 भु 5) 'महाराज' । (५४) भु 5) 'मः' । (५५) भु 5) 'मृगाक्षि' इत्यस्मात् परः तृतीयकिरणसमाप्तिपर्यन्तः ग्रन्थभागो नोपलभ्यते ।

टि.

☆ तत्रैव. II. पृ./31 ☆☆ तत्रैव पृ/29. ● चौर 3. पृ/132. MISS No.144 (D) परं बिह्लणनाम्ना प्रकाशितायां चौरपंचाशिकायां पद्यमिदं नोपलभ्यते द्र. विह्ल. चौरपञ्चाशिका ।

[यथा वा] ☆

"गोष्ठे गिरिं सव्यकरेण धृत्वा रुष्टेन्द्रवज्राहतिमुक्तवृष्टौ ।
योगोकुलं गोपकुलं च सुस्थं चक्रे स वो रक्षतु चक्रपाणिः ॥"

५६
वदामि वामोरु वरानने चेदुपेन्द्रवज्रा प्रथमे लघौ सा ॥२४॥

यथा श्रीगीतगोविन्दे - ☆☆

५७
"स्मरातुरां दैवतवैद्य हृद्यत्वदङ्गसङ्गामृतमात्रसाध्याम् ।
विमुक्तवाधां कुरुषे न राधामुपेन्द्र वज्रादपि दारुणोऽसि ॥"

उपजातिः - ●

अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ।
५८
इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ॥२५॥

यथा च्छन्दोमञ्जर्याम् - ●●

"काचिन्मुरारेर्वदनारविन्दं सङ्क्रान्तमालोक्य जले नवोढा ।
व्यक्तं सलज्जा परिचुम्बितुं तत्तदर्थमेवाम्भसि- निर्ममज्ज ॥"

एवं बहूदाहरणानि काव्यादिषु विज्ञेयानि । उपजातिभेदाः छन्दोमञ्जर्यादिषु विज्ञेयाः ।

५९
कान्ते हृद्यां वाचमाकर्णय त्वं मत्तौ गौ चेत् शालिनी वेदलोकैः ॥२६॥

पा.टि...

(५६) भु 2) "वदामि...लघौ सा ।" इत्ययमंशः नोपलभ्यते ।
(५७) भु 4) 'दैवत वत' । (५८) भु 4) 'कलाढ्यवपि' । म) 'कलान्यास्यपि' ।
(५९) भु 3) 'मालिनी' ।

टि:

☆ गंगा. छ. म. II. पृ./33.   ☆☆ जय. गीत. IV / 20
● गंगा. छ.म. तिष्टुप्-३ तत्रैव पृ/34.   ●● तत्रैव पृ. /34.

यथा मम -

कामासक्ते काव्यगीतानुरक्ते
कामोत्कृष्टः कामुकश्चागतोऽसौ[६०] ।
पुष्पामोदैः पूरिते काननान्ते
काले चैत्रे क्रीडय त्वं सकान्ता ॥

छन्दोविद्यारसयुक्ते गुणाढ्ये
वातोर्मीयं गदिताम्भौ तगौ गः ॥२७॥

यथा छन्दोमञ्जर्याम् -☆

"ध्याता मूर्तिः क्षणमप्यच्युतस्य
श्रेणिर्नाम्नां गदिता हेलयापि ।
संसारेऽस्मिन् दुरितं हन्ति पुंसां
वातोर्मी[६१] पोत[६२]मिवाम्भोधिमध्ये ॥"

चञ्चलनेत्रे शृणु रसवाचं
स्यादनुकूला भतनगगाश्चेत् ॥२८॥

यथा - गोविन्दलीलामृते -

गोकुलबन्धो जय रससिन्धो
जागृहि तल्पं त्यज शशिकल्पम्[६३] ।
प्रीत्यनुकूलां श्रितभुजमूलां
बोधय कान्तां[६४] रतिभरतान्ताम्[६५] ॥

पा.टि...

(६०) भु 4) 'श्चगणेऽसौ' ।
(६१) भु 2 भु 4 म) 'वातोर्मीयं' ।
(६२) भु 1 भु 2 म) 'पोताम्भोधि' ।
(६३) भु 2.4) 'कल्पम्' ।
(६४) भु 2) 'कान्तम्' ।
(६५) भु 2) 'रतिभरतान्तम्' ।

टि. ____

☆ गङ्गा. छ. म. II. पृ./39

केतकीदलविनिन्दितप्रभे ! रात्परैर्नरलगै रथोद्धता ॥२९॥

यथा - रघुवंशे - ☆

"तौ सरांसि रसवद्भिरम्बुभिः
कूजितैः श्रुतिसुखैः पतत्रिणः ।
वायुभिः (वायवः?)सुरभिपुष्परेणुभिः
स्थावरा(छायया?)जलधरा सिषेविरे ॥"

चेत् भवेत् कुसुमहासिनि कान्ते स्वागता रनभगैर्गुरूणा च ॥३०॥

यथा- माघे - ☆☆

[६६]पानधौतनवयावकपङ्कं सुभ्रुवो वदनचुम्बनदक्षाः ।
भर्तुरोष्ठ[६७]दलनागरसेन स्वं किलाधरमुपालिररञ्जुः ॥

[इति त्रिष्टुब् वृत्तम्]

मुदा [६८]कलामण्डनि पश्य पण्डिता
वदन्ति वंशस्थबिलं जतौ जरौ ॥३१॥

यथा - नैषधीये - ●

[६९]"मरुल्ललत्पल्लवकण्टकैः क्षतं समुच्चरच्चन्दनसारसौरभम् ।
स वारनारीकुचसञ्चितोपमं ददर्श मालूरफलं पचेलिमम् ॥"

इदं तु वंशस्थमिति क्वापि ।

पा.टि...

(६६) भु 1.2.4) 'पादधौत' । (६७) भु 3.4. म) 'दलरागरसेन' ।

(६८) म) 'कलापमंडिनि' । (६९) म) मरु 'मरुल्लसत्प' ।

टि.

☆ कालि. रघु. XI / 11. ☆☆ माघ. शिशु. X / 26.

● श्रीहर्ष. नैष. I / 94

कान्तोत्तमे काञ्चनपुष्पशोभने
तच्चेन्द्रवंशा[७०] प्रथमाक्षरे गुरौ ॥३२॥

यथा छन्दोमञ्जर्याम् – ✩

"दैत्येन्द्रवंशाग्निरुदीर्णदीधिति:
पीताम्बरोऽसौ जगतां[७१] तमोहर:[७२] ।
यस्मिन् ममज्जुः शलभा इव स्वयं
ते कंसचाणूरमुखा मखद्विष: ॥"

मुदा राजकन्ये शृणु त्वं सुवाचं
भुजङ्गप्रयातं चतुर्भिर्यकारै: ॥३३॥

यथा गणेशाष्टके –

"गजेन्द्राननं ज्ञानगम्यं गरिष्ठं
महाबुद्धिदं सिद्धियुक्तं पवित्रम् ।
लसच्छातकुम्भद्युतिं स्थूलगात्रं
सदा तं नमाम्येकदन्तं गणेशम् ॥"

ललनाकुलमण्डनि सुप्रमदे
वद तोटकमब्धिसकारकृतम् ॥३४॥

यथा छन्दोमञ्जर्याम् – ✩✩

"यमुनातटमच्युतकेलिकला-
लसदङ्घ्रिसरोरुहसंगरुचिम् ।
मुदितोऽट[७३] कलेरपनेतुमघं
यदि चेच्छसि जन्म निजं सफलम् ॥"

पा.टि.……………………………………………………………

(७०) भु 4) 'चिच्चेन्द्र' । (७१) भु 1 मु 2 मु 4 म) जगति' ।
(७२) भु 4) 'तमो हरि:' । (७३) भु 2) 'मुनितोट' ।

टि. ---

✩ गङ्गा. छ.म. ॥ पृ./48. ✩✩ गङ्गा. छ.म. ॥/ पृ./51.

चारुगण्डस्थलीमण्डने चेत् भवेत्
कीर्तितैषा चतूरेफिका[७४] स्रग्विणी ॥३५॥

यथा कर्णामृते – ☆

"अङ्गनामङ्गनामन्तरा माधवो
[७५] माधवं माधवं चान्तरेणाङ्गना ।
इत्यमाकल्पिते मण्डले मध्यगः
संजगौ वेणुना देवकीनन्दनः ।

शृणु बालिके रसभरैर्मुदिते
[७६] **प्रमिताक्षरा सजससैः कथिता ॥३६॥**

यथा माघे – ☆☆

अथ लक्ष्मणानुगतकान्तवपु-
र्जलधिं व्यतीत्य शशिदाशरथिः ।
परिवारितः परित ऋक्षगणै-
स्तिमिरौघराक्षसकुलं बिभिदे ॥

बुधजनो मृगलोचनि (?) यद्यपि
द्रुतविलम्बितमाह नभौ भरौ ॥३७॥

यथा नैषधीये – ●

अमृतदीधितिरेष विदर्भजे
भजसि तापममुष्य किमंशुभिः ।
[७७] यदि भवन्ति मृताः सखि चन्द्रिकाः
शशभृतः क्व तदा परितप्यते ॥

पा.टि.

(७४) भु 4) 'चतू रेखिका' । (७५) भु 1 भु 2) 'इत्यमाकल्पते' ।
(७६) भु 4) 'यद्वा' । (७६) भु 4) 'भवन्त्यशृणः' ।

टि.

☆ लीला. कर्णा. II./25. MSS No L 560

☆☆ माघ. शिशु IX / 31. ● श्रीहर्ष. नैष IV / 104.

शृणु मदनविहारसन्मोदिते[७८]
[७९]ननररघटिता तु मन्दाकिनी ॥३८॥

यथा माघे – ☆

"अतिसुरभिरभाजि पुष्पश्रिया-
मतनुतरतयेव सन्तानक: ।
तरुणपरभृत: स्वनं रागिणा
मतनुत रतये वसन्तानक: ॥"

वचनविचित्रे शृणु मम वाचं
[८०] नयसहितौ न्यौ कुसुमविचित्रा ॥३९॥

यथा छन्दोमञ्जर्याम् – ☆☆

'विपिनविहारे कुसुमविचित्रा
कुतुकितगोपीमहितचरित्रा ।
मुररिपुमूर्तिर्मुखरितवंशा
चिरमवताद्वस्तरलवतंसा ॥"

[इति जगतीवृत्तम्] ●

सन्तोषैर्वचनविलासिनि (?) शृणु त्वं
[८१]न्याशाभिर्मनजरगा: प्रहर्षिणीयम् ॥४०॥

यथा माघे – ☆☆☆

'विम्बोष्ठं बहु मनुते तुरङ्गवक्त्र-
श्चुम्वन्तं मुखमिह किंनरं प्रियाया: ।
श्लिष्यन्तं मुहुरितरोऽपि तं निजस्त्री-
मुत्तुङ्गस्तनभरभङ्गभीरुमध्याम् ॥"

पा.टि...

(७८) भु 3 भु 4 म) 'भावोदिते' । (७९) भु 4) 'ननरर घटिका' । म) 'ननरघटिका' । (८०) भु 4) 'यथा छन्दोमञ्जर्याम्' इति नोपलभ्यते । (८१) भु 2 भु 4) 'त्वाशाभि' ।

टि. ____

☆ माघ. शिशु. VI / 67. ☆☆ गङ्गा. छ.म. II/ पृ. 55.

● अत्र शृकारे परे पूर्वस्य नकारोपरिस्थितस्य 'इ' कारस्य गुरुत्वं चिन्त्यम् ।

☆☆☆ माघ. शिशु IV./38

कामक्रीडाभावभरे भाविनि रम्ये
वेदै रंध्रैर्म्तौ यसगा मत्तमयूरम् ॥४१॥

यथा रघुवंशे – ☆ ८२
"हा तातेति क्रन्दितमाकर्ण्य विषण्ण-
८३
स्तस्यान्विष्यन् वेतसगूढं प्रभवं सः ।
शल्यप्रोतं प्रेक्ष्य सकुम्भं मुनिपुत्रं
८४
तापादन्तःशल्य इवासीत् क्षितिपोऽपि ॥"

[इति अतिजगतीवृत्तम् ।]

कान्ते कुरङ्गनयने चपलातिकान्ते
ज्ञेयं वसन्ततिलकं तभजा जगौ गः ॥४२॥

यथा कर्णामृते – ☆☆
"बालाय नीलवपुषे नवकिङ्किणीक-
जालाभिरामजघनाय दिगम्बराय ।
शार्दूलदिव्यनखभूषणभूषिताय ८५
नन्दात्मजाय नवनीतमुषे नमोऽस्तु ॥"

[इति शक्वरीवृत्तम्]

सखि यमककवित्त्वालापबुद्धे सुविद्ये
ननमयययुतेयं मालिनी भोगिलोकैः ॥४३॥

पा.टि...

(८२) भु 1 भु 2 भु 4 म) 'निषण्ण' । (८३) म) 'वेतसि' ।
(८४) भु 4) 'शल्यमिवा' । (८५) भु 1) 'नमेस्तु ते' । भु 3) 'नमस्ते' ।

टि.

☆ कालि. रघु. IX / 75 ☆☆ लीला. कर्णा. 74. /पृ 41. MSS No L 560.

यथा माघे – ☆

"विकचकमलगन्धैरन्धयन् भृङ्गमाला:
सुरभितमकरन्दं मन्दमावाति वात: ।
प्रमदमदनमाद्यद्यौवनोद्दामरामा –
रमणरभसखेदस्वेदविच्छेददक्ष: ॥"

[इति अतिशक्वरीवृत्तम्] ●

लसत्कलाकरप्रभामुखि (नने?) शृणूत्तमे दृढं
प्रमाणिकापदद्वयं वदन्ति पञ्चचामरम् ॥४४॥

यथा छन्दोमञ्जर्याम् – ☆☆

"सुरद्रुमूलमण्डपे विचित्ररत्नमण्डिते
लसद्वितानभूषिते सलीलविभ्रमालसम् ।
सुराङ्गनाभवल्लवीकरप्रपञ्चचामर – ८६
स्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ।"

[इति अष्टिवृत्तम् ।]

शृणु त्वं यद्येवं मदनसुरसासक्तहृदये
८७
रसै रुद्रैश्छिन्ना यमनसभला ग: शिखरिणी ॥४५॥

यथा श्रीगीतगोन्दि – ☆☆☆

"दुरालोक: स्तोकस्तवकानवकाशोककलिका-
८८
विकास: कासारोपवनपवनोऽपि व्यथयति ।

पा.टि.

(८६) भु 4) 'भजाम्यहम्' । (८७) म) 'ता:' ।
(८८) भु 1 भु 2 भु 4 म) 'विलास:' ।

टि.

☆ माघ. शिशु XI / 19.

● 'प्रभामुखि श्रृणूत्तमे' इत्यत्र शृकारे परे पूर्वस्य खिकारस्य गुरुत्वं न भवति, निमित्ताभावात् । तथा चात्र छन्दो लक्षणं न संगच्छते, तत्रापेक्षितानां गणानामनिर्देशात् । अप्यत्र 'प्रभामुखि' इत्यस्य स्थाने 'प्रभानने' इति स्यात् ?

☆☆ गङ्गा. छ.म. II /पृ 87 ☆☆☆ जय. गीत. II / 20.

अपि भ्राम्यद्भृङ्गीरणितरमणीयानुमुकुल –
प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥''

सुहासवति मे वचः शृणु सुधारसालापिनि
जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥४६॥

यथा श्रीगीतगोविन्दे –☆

'‘दृशौ तव मदालसे वदनमिन्दुरत्युज्ज्वलं
गतिर्जनमनोरमा विजितरम्भमूरुद्वयम् ।
रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवा-
वहो विबुधयौवतं वहसि तन्वि पृथ्वीगता ॥''

वामोरु त्वं शृणु मम वचो[८९] वृत्तलेखातिसक्तं
मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ॥४७॥

यथा कर्णामृते –☆☆

'‘वेणीमूले विरचितघनश्यामपिञ्छावतंसो
विद्युल्लेखावलयित इव स्निग्धपीताम्बरेण ।
मामालिङ्गन्मरकतमणिस्तम्भगम्भीरबाहुः
स्वप्ने दृष्टस्तरुणतुलसीभूषणो नीलमेघः ॥''

[इति अत्यष्टिवृत्तम्]

[९०]राजन्मुक्ताली[९१]रुचिरदशने शोभने लोलनेत्रे
स्याद् [९२]भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्भौ● (म्तौ?)नयौ यौ ॥४८॥

पा.टि...

(८९) भु 1 भु 2 म) 'वचनं' । (९०) म) 'विराजन्मुक्तारुचिरः'। (९१) भु 4) 'रचित' । (९२) भु 2) 'भुतर्त्यिश्वैः' । भु 4) 'भुतत्त्विश्वैः' । म) 'भुत्यश्वैः' ।

टि.

☆ जय.गीत. X./15. ☆☆ लीला. कर्णा. II./7. पृ.29.

● 'म्भौ नयौ यौ' इति पाठो न युक्तः, 'कुसुमितलतावेल्लिता' इति वृत्ते मगणात् परं भगणस्याभावात् तगणस्य सद्भावाच्च । तस्मादत्र म्भौ नयौ यौ इत्यस्य स्थाने म्तौ नयौ यौ' इति स्यात् । द्र. गंगा. च्छ. म/पृ 101

यथा छन्दोमञ्जर्याम् – ☆

“क्रीडत्कालिन्दीललितलहरी[९३]वारिभिर्दाक्षिणात्यै-
वर्तैः[९४] खेलद्भिः कुसुमितलता वेल्लिता मन्दमन्दम् ।
भृङ्गालीगीतैः किसलय[९५]करोल्लासितैर्लास्यलक्ष्मीं[९६]
तन्वाना चेतो रभसतरलं[९७] चक्रपाणेश्चकार ॥”

[इति धृतिवृत्तम् ।]

बाले मञ्जुलपुष्पवेषरचने सम्पूर्णचन्द्रानने
सूर्याश्वैर्मसजास्तताः[९८] सगुरवः शार्दूलविक्रीडितम् ॥४९॥

यथा श्रीगीतगोविन्दे – ☆☆

“आवासो विपिनायते प्रियसखीमालापि जालायते
तापोऽपि श्वसितेन दावदहनज्वालाकरालायते ।
सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयन् शार्दूलविक्रीडितम् ॥”

[इति अतिधृतिवृत्तम् ।]

वीणासङ्गीतगाने पिककलवचने कम्बुकण्ठे शृणु त्वं
म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ॥५०॥

यथा मम –

कालिन्दीतीरदेशे कुसुमितविपिने कोकिलालापयुक्ते
पूर्णेन्दोर्भानुजालैर्द्युतिचयपुलिने पद्मगन्धाभिपूर्णे ।
मन्दाढ्यैर्गन्धवाहैर्जनितसुखलतामन्दिरे शोभमाने
श्रीकृष्णो[९९] रासकेलौ रसभरितमनाः स्रग्धरा गोपरामा[१००] ।

पा.टि...

(९३) भु) ‘लुलित’ । (९४) भु 4) ‘र्वाणैः’ । (९५) भु 1 भु 2 भु 4) ‘कुसुमित’ । (९६) भु 4) ‘लक्ष्मं’ । (९७) भु 2 भु 4) ‘चते’ । (९८)भु 4) ‘स्तती’ । (९९)भु 2 भु 4 म) ‘श्रीकृष्ण’ ।(१००) भु 4) ‘गोपवामा’ ।

टि.

☆ गङ्गा. छ.म. II./पृ.101 ☆☆ जय. गीत. IV/10.

[इति प्रकृतिवृत्तम् ।]

रसिके रतिदायिनि प्रभे
रमणीयाम्बुजचारुलोचने ।
अयुजोर्यदि सौ जगौ समे
१०२ यदि सभ्राश्च[१०१] लगौ च सुन्दरी ।।५१।।

इदमेवोदाहरणम् । [इति अर्धसमवृत्तम् ।]

अनुष्टुब्वृत्तलक्षणं श्रुतबोधे –☆

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
गुरु षष्ठं[१०३] तु पादानां शेषेष्वनियमो मतः ।।५२।।

अथार्या –☆☆

यस्याः प्रथमे पादे द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थे[१०४] पञ्चदशार्याऽपि[१०५] ।।५३।।

यथा – [१०६]

'अधरस्य मधुरिमाणमि'त्यादि । ग्रन्थविस्तर भयादनुष्टुबार्यावृत्तलक्षणभेदा नोक्ताः ।

● गद्यं पद्यमिति प्राहुर्वाङ्मयं द्विविधं बुधाः ।
प्रागुक्तलक्षणं पद्यं गद्यं सम्प्रति गद्यते ।।५४।।
अपादः पदसन्तानो गद्यं तच्चु त्रिधा मतम् ।
चूर्णकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः ।।५५।।

पा.टि...

(१०१) भु 4) 'सत् भाश्च' । (१०२) भु 1 भु 2) 'इदमेवोदाहरणम्' इति नोपलभ्यते ।
(१०३) भु 3 भुं 4 म) 'च' । (१०४) भु 1 भु 2 भु 4 म) 'तथा चतुर्थे' ।
(१०५) भु 3 म) 'पञ्चदशार्या' । भु 4) 'पञ्चदश सार्या' ।
(१०६) म) मधुरिमाण 'मिति' ।

टि. ---

☆ कालि. श्रुतु. II/पृ8. ☆☆ कालि. श्रुत. 4./पृ3. ● गङ्गा. ध.म. VI./1-2

तत्र चूर्णकम् – ☆

अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः ।
तत्तु वैदर्भीरीतिस्थं[१०७] गद्यं हृद्यतरं भवेत् ॥५६॥

यथा छन्दोमञ्जर्याम् – ☆☆

स हि त्रयाणामेव जगतां पतिः परमपुरुषः पुरुषोत्तमो दृप्तदानवभरेण[१०८] भङ्गुराङ्गीमवनीमवलोक्य करुणार्द्रहृदयस्तस्या भारमवतारयितुं रामकृष्णस्वरूपेणांशतो[१०९] यदुवंशेऽवततार । यस्तु प्रसङ्गेनापि स्मृतोऽर्चितो वा गृहीतनामा वा पुंसां संसार [सागर] पारमवलोकयति ।

अथोत्कलिकाप्रायम् – ●

भवत्युत्कलिकाप्रायं समासाढ्यं दृढाक्षरम् ।

यथा - भोजराजचंप्वाम्[११०] – ☆☆☆

"ततस्तस्यां नाग-पुंनाग-ताल-हिन्ताल-तमाल-कृतमाल-रसाल-बकुल-बञ्जुल-तिलकामलक-कुटज-लिकुच-कताकाङ्कोल-लवङ्ग-विकङ्कत-केतक-कदम्बोदुम्बर-कपित्थाश्वत्थ-कुरुबक-मरुबक-तिन्दुक-माकन्द-चन्दन-स्यन्दन-चम्पक-चाम्पेय-पनस-वेतस-पलाश-पाटल-प्रियालुप्रायैरनेकैरनोकहनिवहैः परिवृतायां परिभ्रमन्नभ्रंकष विटपनिबिडित गगनप्रपञ्चां कांचन काञ्चनमयीं शिंशपामारुरोह ।"

पा.टि...

(१०७) म) 'हृदिस्थं' । (१०८) भु 3 भु 4 म) 'वरेण' ।
(१०९) भु 4) 'स्वरूपे' । (११०) म) 'चम्पू' ।

टि. ---

☆ गङ्गा. द्ध.म. VI / 3. ☆☆ तत्रैव. VI./पृ. 164
● द्र. तत्रैव VI / 4. पृ.164. ☆☆☆ भोज. चम्पू V./372.

अथ - वृत्तगन्धि – ★

वृत्तैकदेशसम्बन्धात्[१११] वृत्तगन्धीति[११२] संस्मृतम् ॥५७॥

यथा छन्दोमञ्जर्याम् – ★★

"जय जय जनार्दन ! सुकृतिजनपावनमनस्तडागविकस्वरचरणपद्म ! पद्मनयन ! पद्मावलीविनोदराजहंस ! भास्वरयशःपटलपरिपूरितभुवनकुहर[११३] ! हरकमलासनादिवृन्दारकवृन्दवन्दनीयपादारविन्दद्वन्द्व ! द्वन्द्वनिर्मुक्तयोगीन्द्रहृदयमन्दिराविष्कृतनिरञ्जनज्योतिःस्वरूप ! निरूपम ! विश्वरूप ! अनाथनाथ ! जगन्नाथ ! [११४]मामतिभवदुःखव्याकुलं रक्ष रक्ष ।

इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपतिजगन्नाथनारायणदेव-महाराजविद्वत्सभाराजित-प्रबन्धकविताप्रकाशक[११५]-करणकुलसम्भव-कविभिषगवर-वासुदेवपात्रतनय श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ वृत्तनिरूपणं नाम तृतीयः किरणः ।

पा.टि...

(१११) भु 2.4) 'सम्बन्धा' । (११२) म) 'वृत्तगन्धि समस्मृतम्' ।
(११३) भु 2) 'पूरिततद्भुवन' । (११४) भु4) 'मामतिभवदुःखव्याकुलं' इति नास्ति ।
(११५) भु 1 भु2 भु 4) 'कविताप्रबन्ध' ।

टि.

★ गङ्गा. छ.म. VI/4 पृ. 164 ★★ तत्रैव VI/पृ. 166.

□□□

[चतुर्थः किरणः]

अथ काव्यम् । तद् द्विविधम्– खण्डकाव्यं महाकाव्यं चेति ।

खण्डकाव्यलक्षणमलङ्कारसंग्रहे – यथा ☆

सर्गबन्धविहीनं च शून्यं चन्द्रादिवर्णनैः ।
श्लोकसंख्यात्मकं यत्तत् खण्डकाव्यमिति स्मृतम् ॥१॥

यथा – मेघदूतहंसदूतादयः । [अपि च]

● **ककारादिक्षकारान्तैश्चतुस्त्रिंशद्भिरक्षरैः**
यद्येकचरितं गीतं खण्डकाव्यमिति स्मृतम् ॥२॥
गीतानामपि काव्यत्वं यद्यप्युक्तिविशेषिणाम् ।

स्पष्टमुदाहरणम् । **महाकाव्यलक्षणम्** यथा –

[१] **सर्गबन्धो महाकाव्यं कथितं काव्यकर्तृभिः ॥३॥**

दण्डिनोक्तम् – ☆☆

''सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः[२] ।
सर्वत्र भिन्नसर्गान्तैरुपेतं लोकरञ्जनम् ॥४॥
[३]सर्गान्तः सन् वर्णनीयो वचनैर्मधुरादिभिः'' ।

यथा - रघुवंशादयः ।

प्रबन्धगीतान्युक्तानि महाकाव्यानि कोविदैः ॥५॥

यथा - मम रामचन्द्रविहारादयः ।

पा.टि...

(१) भु 2) 'दण्डिनोक्तम्' इति नोपलभ्यते । (२) भु3 म) 'सुगन्धिभिः' ।
(३) भु 1 भु 2) 'सर्गान्तः सन्' इत्यादि न दृश्यते ।

टि.

☆ उपलभ्यमाने अमृतानन्दयोगिविरचिते अलंकारसंग्रहे नोपलभ्यते ।

☆☆ दण्डी. का.द. I / 18 & 19.

● पृष्ठेऽस्मिन् मातृकास्थवाक्यानां पुनर्विन्यासः कृतः ।

अथ[४] काव्यस्वरूपं निरूप्यते[५] । **साहित्यदर्पणे** – ★

"काव्यस्य शब्दार्थौ शरीरं, रसादिश्चात्मा,[६] गुणाः शौर्यादिवत्, दोषाः काणत्वादिवत्,[७] रीतयश्चावयव[८]संस्थानविशेषवत्,[९] अलङ्काराः कटककुण्डलादिवत् ।"

क्रमल्लिख्यते ।

शब्दा वाचकलक्षकव्यञ्जकाश्चेति त्रिविधाः । अभिधावृत्त्या प्रबोधको[१०] वाचकशब्दः । लक्षणावृत्त्या प्रबोधको लक्षकशब्दः । व्यञ्जनावृत्त्या प्रबोधको व्यञ्जकशब्दः ।

अर्था वाच्यलक्ष्यव्यङ्ग्याश्चेति त्रिविधाः । अभिधावृत्त्या बोध्यो वाच्यार्थः । लक्षणावृत्त्या बोध्यो लक्ष्यार्थः । व्यञ्जनावृत्त्या बोध्यो व्यङ्ग्यार्थः ।

शब्दानामर्थबोधायाभिधालक्षणाव्यञ्जनाश्चेति तिस्रो वृत्तय उच्यन्ते ।

तत्राभिधावृत्तिः –

अस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छाभिधा ।

यथा - मम –

नमामि विष्णुं नवनीरदाभं
नीलोत्पलाक्षं नवनीतचोरम् ।
नन्दात्मजं नूतनभूषणाढ्यं
निर्वाणदातारमतिप्रसन्नम् ॥

पा.टि...

(४) भु 4) 'अथवा' । (५) भु 1 भु 2) 'निगद्यते' ।
(६) म) 'रसादिश्चात्मा' 'गुणा' इत्युभयोः मध्ये कोष्ठके 'वृत्तैकदेशसम्बन्धा वृत्तगंधि समन्वितम्' इत्यधिकं दृश्यते । (७) भु 2 भु 3) 'काणत्ववत्' ।
(८) भु 5) 'रीतयोऽव' । (९) म) 'संस्थानवत्' । (१०) भु 1 भु 2) 'प्रयोगको' ।

टि.

★ विश्व. सा.द. । / पृ. 14.

[११] विष्णुं नमामीत्यादौ व्यापनशीलो विष्णुरेव नान्यो देव इति अभिधावृत्त्या वाच्यार्थ: प्रतीयते ।

लक्षणावृत्ति: –

अमुख्यार्थे च मुख्यार्थसम्बन्धो लक्षणा मता ।
रूढे: प्रयोजनाद् वापि सा द्विधा परिकीर्तिता ॥६॥

तत्र रूढिलक्षणा यथा –

'‘नृपे वीरे क्षिप्रं प्रकुपितमतौ संगरगतौ[१२] ।
कलिङ्ग: क्रुद्धोऽभूत् गजतुरगसेनादिसहित: ॥''

'कलिङ्ग: क्रुद्धोऽभूत्' इत्यादौ कलिङ्गदेशीयजन इति लक्षणावृत्त्या लक्ष्यार्थ: प्रतीयते ।

प्रयोजनवतीलक्षणा यथा –

'गङ्गायां घोषमण्डलम्' इत्यादौ गङ्गासमीपे घोषमण्डलं शीतलत्वपावनत्वादिवशात् प्रयोजनवती भवति ।

तद्भेदानाह साहित्यदर्पणे –☆

''मुख्यार्थस्येतराक्षेपो [१३]वाक्यार्थान्वयसिद्धये ।
स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा'' ॥७॥

रूढावुपादानलक्षणा यथा – श्वेतो धावति ।'

[१४] प्रयोजन उपादानलक्षणा यथा – 'कुन्ता: प्रविशन्ति ।'

अनयोर्हि श्वेतादिभि: कुन्तादिभिश्चाचेतनतया केवलैर्धावनप्रवेशनक्रिययो: कर्तृतयान्वयमलभमानैरेतत्सिद्धये[१५] आत्मसम्बन्धिनोऽश्वादय: पुरुषादयश्चाक्षिप्यन्ते ।

''अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये ।
उपलक्षणहेतुत्वादेषा लक्षणलक्षणा'' ॥८॥

पा.टि...

(११) भु 2 भु 4 भु 5 म) 'अभिधावृत्त्या' इति नोपलभ्यते ।

(१२) भु 2 भु 5 म) संगरगते ।

(१३) भु 4) 'वाक्यार्थेऽन्वय' ।

(१४) भु 2 भु 4 म) 'प्रयोजनमूलोपादान' ।

(१५) भु 5) 'सिद्धि:' ।

टि.

☆ विश्व. सा. द. II / 6 & 7.

☆ वाक्यार्थे परस्यान्वयसिद्धये[१६] स्वस्यार्पणं लक्षणलक्षणा ।

रूढिप्रयोजनयोर्लक्षणलक्षणा यथा – 'कलिङ्गः क्रुद्धः', 'गङ्गायां घोष' इति च ।

अनयोर्हि पुरुषतटयोर्वाक्यार्थेऽन्वयसिद्धये कलिङ्गगङ्गाशब्दावात्मानमर्पयतः ।

यथा वा नैषधे[१७](?)–''उपकृतं बहु यत्र[१८] किमुच्यते
सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे ![१९]
सुखितमास्स्व ततः शरदां शतम् ॥''

अत्रापकारादीनां वाक्यार्थेन्वयसिद्धये उपकृतादयः शब्दाः आत्मानमर्पयन्ति । अपकारिणं प्रत्युपकारादिप्रतिपादनान्मुख्यार्थबाधो वैपरीत्यलक्षणः सम्बन्धः, फलमपकाराद्य[२०]तिशयः ।'' लक्षणलक्षणा[२१] जहल्लक्षणेत्युच्यते ।

यथा - **प्रतापरुद्रयशोभूषणे** – ☆☆

''जेतुः काकतिभूभर्त्तुराकर्ण्य पटहध्वनिम् ।
सामन्तनगराण्युच्चैराक्रोशन्ति समन्ततः ॥''

अत्र नगराण्याक्रोशन्तीति वाच्यस्यानन्वयः । अचेतनानामाक्रोशासम्भवात् [तत्रत्या जना लक्ष्यन्ते ।]

पा.टि...

(१६) भु 5) 'यस्य अन्वय' । (१७) भु 3 भु 4 भु 5 म) 'यथा वा' ।
(१८) भु 1) 'बहि यत्र' । भ 4) 'बहु तत्र' । (१९) भु 5) उपकृतं.....शतम्' इति समग्रस्य पद्यस्य स्थाने 'उपकृतं बहु तत्र किमुच्यते' इत्यादि ।'
(२०) भु 1 भु 1 भु 4) 'फलाप' । (२१) भु 5) 'लक्षितलक्षणा' ।

टि.

☆ विश्व. सा.द. ॥/पृ. 40 & 41. ☆☆ विद्या. प्र. रु. ।/पृ34

उपादानलक्षणा अजहल्लक्षणेत्युच्यते । यथा – ☆

"पत्युः काकतिनाथस्य पादपीठमनारतम् ।
स्फुरद्रत्न[२२]प्रभाजातैरलंकुर्वन्ति मौलयः ।"

अत्रालंकारसिद्ध्यर्थं मौलिभिराश्रयभूता नृपतयो लक्ष्यन्ते ।

अथ व्यञ्जनावृत्तिः –

अभिधादिवृत्तिषु विरतासु निवृत्तासु सतीषु यया वृत्त्यान्योऽर्थः प्रतीयते सा वृत्तिर्व्यञ्जना ॥१॥

यथा – [२३]'सशंखचक्रो हरिः' इत्यादौ शंखचक्रसंयोगेन [२४]हरिशब्दाद् विष्णुरिति व्यञ्जनावृत्त्या [२५]व्यङ्ग्यार्थः प्रतीयते (?) । कुपितो मकरध्वजः' इति [२६]मकरध्वजः कामः, न समुद्रः । 'मधुना मत्तः पिकः' इति मधुर्वसन्तः, न तु मद्यम् ।

[२७] सा व्यञ्जना त्रिविधा । शब्दशक्तिमूला, अर्थशक्तिमूला, शब्दार्थशक्तिमूला इति ।

तत्र शब्दशक्तिमूला यथा – प्रतापरुद्रयशोभूषणे – ☆☆

"वाहिन्यः [२८]काकतीन्द्रस्य सर्वतोमुखसम्भ्रमाः ।
कुर्वन्त्युद्यत्कबन्धाढ्यं प्रतिपक्षबलार्णवम् ॥"

पा.टि.

---

(२२) भु 3 भु 5 म) 'प्रभाजालै' ।

(२३) भु 5) 'शंखचक्रो' ।

(२४) भु 4) 'हरिर्विष्णुरिति' ।

(२५) भु 4) 'व्यञ्जकार्थः ।

(२६) भु 2) 'इति मकारध्वजः' इति नोपलभ्यते ।

(२७) भु 3 भु 4 भु 5 म) 'आदिपदादुभयशक्तिमूला' ।

(२८) भु 2) 'काकातिरिन्द्रस्य' ।

टि.

☆ विद्या. प्र. रु /पृ. 35 .

☆☆ तत्रैव /पृ36

अत्र वाहिनीसर्वतोमुखकबन्धशब्दानामर्थप्रकरणादिना [२९]सैन्यसर्वव्यापित्वलूनमस्तकदेहपराणां [३०]वाचकत्वे [३१]नियन्त्रितेऽपि शब्दशक्तिमूला नदीजलप्रतिपत्तिर्यतो जायते सा व्यञ्जनावृत्तिः ।

अर्थशक्तिमूला यथा – ☆

"श्रुत्वा काकतिभूभर्तुः क्षोणिपाणिग्रहोत्सवम् ।
अङ्गुष्ठेनालिखन् भूपाः पादपीठनताननाः ।"

अत्र भूपा विषण्णा जाता इति अर्थशक्त्या व्यज्यते ।

उभयशक्तिमूला यथा – ☆☆

"विजितारिपुरो मूर्तौ विलसत्सर्वमङ्गलः ।
राजमौलिरसौ भाति रूद्रदेवो जगत्पतिः ॥"

"अत्र 'विजितारिपुर' इति अर्थशक्तिमूलत्वं, 'विलसत्सर्वमङ्गलों राजमौलिरिति शब्दशक्तिमूलत्वम्, इत्युभयशक्तिमूलः प्रतापरुद्रशङ्करयोरुपमालङ्कारध्वनिः ।"

'रसात्मकं वाक्यं काव्यम्'इत्युक्तं साहित्यदर्पणादिषु । तदवाक्यं द्विविधम् । वाक्यं महावाक्यं चेति ।

तत्र वाक्यं कथमित्युच्यते - ● **पदोच्चयो वाक्यमित्युक्तम् ।**

तत् किं पदलक्षणमित्याह – ●●

"वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः ।"

यथा - 'घटः ।' [३२]

वाक्यं यथा - अमरुके – ●●●

पा.टि...

(२९) भु 1 भु 2 भु 5) 'सौन्दर्य' । (३०) भु 5) 'प्रभाणां' ।
(३१) भु 2 भु 4 म) 'वाचकत्वेन' । (३२) भु 1 भु 2 भु 4 भु 5) 'यथामृके' ।

टि. ____

● विश्व. साद. II / पृ. 29
☆ विद्या. प्र.रु./ पृ. 39.
●● विश्व. साद. II / 2.
☆☆ विद्या. प्र.रु./ पृ. 39.
●●● अमरु. अ.श./ 82.

"शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
वस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥"

महावाक्यम् – ☆ **'वाक्योच्चयो महावाक्यम्'** ।

यथा – रामायणमहाभारतरघुवंशादि ।

अथ काव्यभेदमाह –

काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यं चेति द्विविधम् ॥१॥

तत्र ध्वनिः – प्रतापरुद्रयशोभूषणे – ☆☆

"व्यङ्ग्यस्य प्राधान्ये उत्तमं काव्यं ध्वनिरिति गीयते ।

● **"काव्यस्यात्मा ध्वनिरिति"** ध्वनिकारेणोक्तम् ।

साहित्यदर्पणे – ☆☆☆

एकावयवसंस्थेन भूषणेनेव कामिनी ।
पदद्योत्येन सुकवेर्ध्वनिना भाति भारती ॥

यथा – ●●

"स्वामिन् ! गोत्रमहीधरान् किमधुना नीचैर्विधत्से कुतो-
गाधानम्बुनिधीन् करोषि कुरुषे किं दिक्पतीनल्पकान् ।
इत्थं पार्श्वचरानुलापमखिलं न्यक्कृत्य धर्मैषिणा
सृष्टः पद्मभुवा गुणैकवसतिः श्रीवीररुद्रो नृपः ॥"

"अत्र प्रतापरुद्रस्य कुलपर्वतातिशायिसमुन्नतत्वमतिसमुद्रगाम्भीर्यं लोकपालाधिकमैश्वर्यं च प्राधान्याद् व्यज्यते ।" एवमन्यत् ।

टि.

☆ विश्व. सा.द. प. ॥ / 1
☆☆ विद्या. प्र. रु. / पृ 49.
☆☆☆ विश्व. सा.द. IV. / पृ. 262.
● आन. ध्वन्या. । / I.
●● विद्या. प्र. रु / पृ 49

अथ गुणीभूतव्यङ्ग्यम् –

व्यङ्ग्यस्याप्राधान्ये मध्यमं काव्यं गुणीभूतव्यङ्ग्यमित्युच्यते ॥१०॥

यथा – ☆

"प्रत्यग्रप्रसरत्प्रतापविभवव्याप्ताखिलाशान्तरे
विश्वत्रातरि वीररुद्रनृपतौ सिंहासनाध्यासिनि ।
३३
आस्थानीं समुपागतैर्नृपतिभिस्तास्तास्तदा दर्शिता-
श्चेष्टा याभिरमुष्य काकतिविभोर्दृष्टिः कृपार्द्रीकृता ॥"

अत्र प्राप्ताभिषेकमहोत्सवस्य प्रतापरुद्रस्याग्रे शरणार्थिनां पार्थिवानां तथाविधकार्पण्योक्तिः पुनः पुनः प्रणामप्रार्थनादिव्यङ्ग्यं तास्ताश्चेष्टा दर्शिता इति वाच्यादनतिशायीति गुणीभूतव्यङ्ग्यता ।

अथ शय्या – प्रतापरुद्रयशोभूषणे – ☆☆

या पदानां परान्योन्यमैत्री शय्येति कथ्यते ।

यथा – ☆☆☆

"दातुः काकतिवंशमण्डनमणेर्निःसीमविश्राणन-
श्लाघालंघितकल्पपादपगुणप्रौढेरगाधौजसः ।
विभ्रच्छारदकौमुदीपरिमलं सामन्तसीमन्तिनी-
गण्डाभोगनिरूढपाण्डिमधुरां धत्ते यशः प्रायशः ॥"

अत्र पदविनिमयासहिष्णुत्वात् शब्दबन्धस्य पदानुगुण्यरूपा शय्या ।

अथ कवित्वपाकभेदमाह – प्रतापरुद्रयशोभूषणे – ●

अर्थगम्भीरिमा पाकः स द्विधा हृदयङ्गमः ॥२२॥

द्राक्षापाको नारिकेलपाकश्च' इति ।

पा.टि...

(३३) भु 2 भु 4 म) 'मुंदा' ।

टि.

☆ विद्या. प्र. रु. /पृ. 50. ☆☆ विद्या. प्र.रु. II/35. पृ47.

☆☆☆ विद्या. प्र.रु. II / 35. /पृ 47. ● विद्या. प्र.रु. II / 35. पृ 47.

तत्र द्राक्षापाकः – ★

द्राक्षापाकः स कथितो बहिरन्तः स्फुरद्रसः ।

यथा श्रीगीतगोविन्दे – ★★

[३४] मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तंभीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहः केलयः ॥

[३५] नारिकेलपाकः – ●

स नारिकेलपाकः स्यादन्तर्गूढरसोदयः ॥१२॥

यथा – प्रतापरुद्रयशोभूषणे – ●●

"लीलाविभ्रमपूर्वरङ्गमुदितं तारुण्यमेत्य त्रपा
नेपथ्यान्तरबिम्बितस्मरकलालास्यप्रपञ्चश्रियः ।
सख्यः पश्यत काकतीयनृपतौ भावानुबन्धोज्ज्वलः
कोप्यस्यास्तरलभ्रुवो[३६] विजयते शृङ्गारनाट्यक्रमः[३७] ॥"

पा.टि...

(३४) म) मेघैर्मेदुर... केलयः' इत्यस्य पद्यस्य स्थाने 'मेघैर्मेदुरमम्बरमिति' इति ।

(३५) भु 5) 'नारिकेलपाकः' इत्यस्मात् परं 'स नारिकेलपाकः'इत्यस्मात् पूर्वं च-
'बहिः खरो नारिकेलपाकस्त्वन्तर्मृदुर्भवेत्' इति अधिकं दृश्यते ।

(३६) भु 1 भु 2. भु 3 म) 'कोपः स्यात् सरल' । भु 5) 'कोपऽस्यस्तरल' ।

(३७) भु 3 भु 4 भु 5 म.व्र) 'नाट्यक्रमः' इत्यस्मात् परम् इति श्रीमत्' इत्यस्मात् पूर्वं च – कुलकलक्षणम् - काव्यप्रकाशदिषु -

"कुलकं बहुभिः पदैरुक्तिरेकस्य तद्विधा ।
आद्यमादौ क्रियायोगादन्त्यमन्ते क्रियायुतात् ॥"

टि.

★ तत्रैव. II / 37 पृ 48.

★★ जय. गीत. I / 1.

● विद्या. प्र. रु II / पृ. 49.

●● तत्रैव पृ. 50.

३८

इति श्रीमत्खिमुण्डिमहाराज्येश्वर- गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायणदेव-महाराज-विद्वत्सभाराजित-प्रबन्धकविताप्रकाशक-करणकुलसम्भव-कविभिषग्वर-वासुदेवपात्रतनय- **श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ काव्यनिरूपणं नाम चतुर्थः किरणः ।**

पा.टि...

अन्त्यकुलकं यथा रघुवंशे – [VI / 8 - 10]

"अथ स्तुते वन्दिभिरन्वयज्ञैः
सोमार्कवंशे नरदेवलोके
संचारिते चागुरुसारयोनौ
धूपे शिखावासितकेतुमाले ॥
पुरोपकण्ठोपवनाश्रितानां
शिखण्डिनामुन्मदनृत्यहेतौ ॥
प्रध्मातशङ्खे परितो दिगन्तान्
तूर्यस्वने मूर्च्छति मङ्गलार्थे ॥
मनुष्यवाह्यं चतुरङ्ग(रस्र?)यान-
मध्यास्य कन्यापरिचारशोभि
विवेश मञ्चान्तरराजमार्गं
पतिंवरा क्लृप्तविवाहवेशा ॥"

इति अधिकं दृश्यते ।

(4) भु 5) इति श्रिमत्खिमुण्डि..............चतुर्थः किरणः' इति समग्रस्य स्थाने- **श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ काव्यनिरूपणं नाम चतुर्थः किरणः'** इति दृश्यते ।

□□□

[पञ्चमः किरणः]

अथ समस्तप्रबन्धादीनामात्मभूतस्य रसस्य स्वरूपं निरूप्यते- ।

आदिपदात् खण्डकाव्यादीनामपि ।

“विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
व्यक्तीकृतो हि रत्यादि स्थायिभावो रसः स्मृतः ॥१॥

अथ रसविशेषाः –

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्सोऽद्भुत इत्यष्टौ रसा मुख्याः कृतीरिताः ।
शान्तोऽथ वत्सलः प्रेमा केषाञ्चन मते परे[१] ॥२॥

एतेषां रसानां प्रवरत्वात् प्रथमतः शृङ्गाररसो निरूप्यते ।

अथ विभावः – स च द्विविधः । आलम्बनविभाव उद्दीपनविभावश्च ।

तत्रालम्बनविभावः – साहित्यदर्पणे –★

वेश्यां रागविहीनां च विहायान्याश्च नायिकाः ।
नायका दक्षिणाद्याश्च शृङ्गारालम्बनं मतम् ॥३॥

आदिपदाद् भावहावादयः[२] ।

पा.टि.

(१) भु 5) परम्   (२) भु 1. भु 5 म) भावत्वादयः ।

टि.

★ विश्व. सा.द. III./186 उपलभ्यमाने साहित्यदर्पणे अत्रोद्धृता ‘वेश्यां राग....मतम्’’ इति कारिका नोपलभ्यते ।

उपलभ्यते परं –

“परोढां वर्जयित्वा तु वेश्यां चाननुरागिणीम् ।
आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः ॥”

तत्रादौ नायकः –

कुलीनः सुश्रीकः परमचतुरः पण्डितवरः
★
सुरागी तेजस्वी तरुणवपुरूपादिसहितः ।
सदा पात्रे त्यागी चतुरजनसङ्गोक्तिनिरतो
गुणासक्तो नेता सदयहृदयो भूषणरूचिः ॥४॥

तद्भेदानाह - साहित्यदर्पणे – ★★

धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च ।
धीरप्रशान्त इत्ययमुक्तः प्रथमं चतुर्भेदः ॥५॥

तत्र धीरोदात्तो यथा – ३

आत्मप्रशंसाविधुरो गुणज्ञो
गाम्भीर्यसौन्दर्यगुणादियुक्तः ।
दृढव्रतो धैर्यनिगूढमानः
स नायको धीर उदात्तपूर्वः ॥६॥

यथा - रामचन्द्रयुधिष्ठिरपुरूरवप्रभृतयः ।

अथ धीरोद्धतः –

मायापरश्चञ्चलचित्तयुक्तो ४
मानान्वितश्चात्मवचःप्रशंसी ।
प्रचण्डमात्सर्यगुणादिलोलो
धीरोद्धतोऽदैन्यवचोविलासी ॥७॥

यथा – रावणजामदग्न्यभीमसेनादयः ।

पा.टि.

(३) भु 5) 'स्थविरो' । (४) भु 1 भु 2 भु 4) 'प्रशंसकश्च' ।

टि.

★ "वपुरूप-" इत्यस्य पदस्य साधुत्वं चिन्त्यम् 'वपूरूप' इत्यस्य रूपस्य प्रसक्तेः । रो रि (VII/3/14) ढ्रलोपे पूर्वस्य दीर्घोऽणः (VI/3/111.) इति सूत्राभ्यां तथा कृतेऽत्र छन्दो भङ्गो भवति । द्र. पा. VI/3/111.

★★ विश्व. साद्र. III/31 पृ. 97.

अथ धीरललितः –

कलाविलासी मृदुवाग्विदग्धः
कान्तोत्तमप्रेमवशी मनोज्ञः ।
निश्छिन्तचित्तः सहसा रसज्ञः [५]
प्राग्धीरयुक्तो ललितः समन्त्री ॥८॥

यथा – कन्दर्पवत्सराजादयः ।

अथ धीरप्राशान्तः

विनयोपायविज्ञानक्षमासौजन्यसंयुतः ।
मधुरप्रियवक्ता च धीरशान्तो द्विजो वणिक् ॥९॥

यथा – माधवसौगन्धिकादयः । इमानि पद्यानि मम ।

एषां शृङ्गाररूपत्वे भेदानाह –

दक्षिणः शठो धृष्टोऽनुकूलश्चेति चतुर्विधः ।

तत्र दक्षिणनायकः – [६]

अनेकप्रेयसीतुल्यप्रेमा दक्षिण उच्यते ॥१०॥

यथा मम –

वामा केलिविनोदिनी प्रियतमा श्यामा सदा सौख्यदा
वामाक्षी रसभाषणेन चतुरा धीरा मनोहारिणी ।
कान्तालिङ्गनचुम्बनैः प्रमुदिता मत्कण्ठभूषामणिः
कान्तः कामकलानियुक्तहृदयो यास्यामि कस्या गृहम् ॥

अथ शठः – [७]

एकस्यां स्नेहसौख्याढ्यः परस्यां छद्मरागभाक् ।
व्यञ्जयन् भावजं प्रेम शठ इत्युच्यते बुधैः ॥११॥

पा.टि.

---

(५) भु 5) समन्तात् ।
(६) भु 4) 'नायकः' ।
(७) भु 5) 'एकस्याः' ।

८

यथा अमरुककाव्ये –★

९

शठान्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा
१० यदाश्लिष्यन्नेव प्रशिथिलभुजग्रन्थिरभवः ।
तदेतत्क्वाचक्षे घृतमधुमयत्वद्बहुवचो- ११
विषेणाघूर्णन्ती किमपि न सखी मे गणयति ॥

अथ धृष्टः.–

कृतापराधोऽप्यभयस्तर्जितोऽपि च विव्रपः ।
दोषवानपि मिथ्यावाक् धृष्टनेता निगद्यते ॥१२॥

यथा तत्रैव (?) **(साहित्यदर्पणे ?) – ★★** १२

"शोणं वीक्ष्य मुखं विचुम्बितुमहं यातः समीपं ततः
१३ पादेन प्रहृतं तया सपदि तं धृत्वा सहासे मयि ।
किञ्चित्तत्र विधातुमक्षमतया वाष्पं सृजन्त्याः सखे
१४
ध्यातश्चेतसि कौतुकं वितनुते कोपोऽपि वामभ्रुवः ॥"

अथानुकूलः –

एकप्रियारसासक्तचित्तोऽनुकूल उच्यते ।

पा.टि...

(८) भु 1 भु 2 भु 4 भु 5) 'अमृक' । (९) भु 5) 'शठोऽन्यस्याः' ।
(१०) भु 5) "तदेतद् व्याचख्यै' । (११) भु 5) 'गणयतः' ।
(१२) भु 5) 'प्रातः' । (१३) भु 5) 'किञ्चिद्भीतः' ।
(१४) भु 5) 'ध्वान्तश्चेतसि' ।

टि. ———

★ अमरु अ.श. 109.

★★ पद्यमिदं साहित्यदर्पणे लभ्यते, न तु अमरुकशतकेषु । अतः 'तत्रैव' इति प्रयोगः चिन्त्यः । द्र. विश्व. सा.द. III/पृ. 100.

यथा –

अस्माकं सखि ! वाससी न रूचिरे ग्रैवेयकं नोज्ज्वलं,
१५
नो वक्रा गतिरुद्धतं न हसितं नैवास्ति कश्चिन्मद: ।
किन्त्वन्येऽपि जना वदन्ति सुभगोऽप्यस्या: प्रियो नान्यतो
१६
दृष्टिं निक्षिपतीति विश्वमियतो मन्यामहे दु:स्थितम् ॥

अथ प्रतिनायक: – साहित्यदर्पणे –★

धीरोद्धत: पापकारी व्यसनी प्रतिनायक: ॥१३॥

यथा – रामस्य रावण: ।

त्रैविध्यात् सर्वेषामुत्तममध्यमाधमत्वेन ।
उक्ता नायकभेदाश्चत्वारिंशत्तथाष्टौ च ॥१४॥

अथ शृङ्गारिनायकस्य सहाया:–

पीठमर्दविटचेटविदूषकाश्चेति चतुर्विधा: ।

तत्र पीठमर्द: –

नायकात् किंचिदूनस्तु कुपितस्त्रीप्रसादक: ॥१५॥
पीठमर्द इति ख्यात: साहित्यमतदर्शिभि: ।

यथा रसमञ्जर्याम् –★★

"कोऽयं कोपविधि: प्रयच्छ करुणागर्भं वचो जायतां
पीयूषद्रवदीर्घिकापरिमलैरामोदिनी मेदिनी ।
आस्तां वा स्पृहयालुलोचनमिदं व्यावर्तयन्ती मुहु-
र्यस्मै कुप्यसि तस्य सुन्दरि तपोवृन्दानि वन्दामहे ॥"

पा.टि.

(१५) भु 5) 'नैवाति' । (१६) भु 3 भु 4 भु 5 म) 'दु:खितम्' ।

टि.

★ विश्व. सा.द. III./131. ★★ भानु. र.म./117

अथ विटः –

कामतन्त्रकलाज्ञानी वेषनिर्माणपेशलः ॥१६॥
गोष्ठीषु संमतो वाग्मी धूर्तो विट इति स्मृतः ।

यथा – ★

"आयातः कुमुदेश्वरो विजयते सर्वेश्वरो मारुतो
[१७]भृङ्गः स्फूर्जति भैरवो न निकटं प्राणेश्वरो मुञ्चति ।
एते सिद्धरसाः प्रसूनविशिखो वैद्योऽनवद्योत्सवो [१८]
मानव्याधिरसौ कृशोदरि ! कथं त्वच्चेतसि स्थास्यति ॥"

अथ चेटः –

सन्धानचतुरश्चेटो बुद्धिमान् कार्यसाधकः ॥१७॥

यथा - ★★

"सा चन्द्रसुन्दरमुखी स च नन्दसूनु-
र्दैवान्निकुञ्जभवनं समुपाजगाम ।
अत्रान्तरे सहचरस्तरुणः कठोरः
पानीयपानकपटेन सरः प्रतस्थे ॥"

अथ विदूषकः –

अङ्गादिविकृतैः सर्वैर्हास्यकारी विदूषकः ॥१८॥

यथा - ★★★

"आनीय नीरजमुखीं शयनोपकण्ठ-[१९]
मुत्कण्ठितोऽस्मि कुचकञ्चुकमोचनाय ।
अत्रान्तरे मुहुरकारि विदूषकेण
प्रातः स्वनत्तरुणकुक्कुटकण्ठनादः ॥"

पा.टि...

(१७) भु 5) 'भृङ्गी' । (१८) भु 1 भु 4) 'तच्चेतसि ।

(१९) भु 1) 'शयनोपकण्ठे' ।

टि.

★ भानु. र.म./118. ★★ तत्रैव/119 ★★★ तत्रैव/120.

अथार्थचिन्तनसहायमाह –

[२०]नायकस्यार्थचिन्तायां सहायः सचिवः स्मृतः ।

अस्योदाहरणं मृग्यम् । अथान्तःपुरसहायाः –

[२१]नायकस्यावरोधे च षण्डखर्वकिरातकाः ॥१९॥
[२२]म्लेच्छाभीरौ च कुब्जाद्याः [२३]सहायाश्च भवन्त्यपि ।

[२४]आदिपदाद् [२५]दमनकादयः । तत्र षण्डवामनकिरातकुब्जा यथा-रत्नावल्याम् –★

“नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ।
पर्यन्ताश्रयभिर्निजस्य सदृशं नाम्नः किरातैः कृतं
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ॥”

एवमन्येऽपि काव्यादौ ज्ञातव्याः ।

अथ दण्डसहायाः –

सैनिको युवराजस्तु सुहृत्सामन्तसाधवः ॥२०॥
शैलसञ्चारकश्चैव [२६]ख्याता दण्डसहायकाः ।

स्पष्टमुदाहरणम् ।

प.टि...

(२०) भु 5) ‘नायकस्यापि चिन्तायाम्’ । (२१) भु 3 भु 5 म) ‘अवरोधे सहायाःस्युः’ भु 4) ‘नायक....किरातकाः’ इति नोपलभ्यते । (२२) भु 5) ‘म्लेच्छा भीराति कुब्जेद्याः’।
(२३) भु 3 भु 4 भु 5 म) ‘मूर्खा मूकादयः स्मृताः’
(२४) भु 3 भु 4 भु 5 म) ‘एतेषामुदाहरणं मृग्यम् ।’
(२५) भु 3 भु 4 भु 5 म) ‘तत्र षण्ड’... इत्यस्मादारभ्य ‘काव्यादौ ज्ञातव्याः’ इत्यन्तं यावत् न दृश्यते । (२६) भु 1 भु 2) ‘तस्य’ ।

टि.

★ हर्ष रत्ना ॥ / 29.

अथ धर्मसहायाः –

ऋत्विजो ज्ञानविद्योगी धर्मविच्च[२७] पुरोहितः ॥
तस्य[२८] धर्मसहायत्वं प्रयान्त्येते सुहृत्तमाः ॥२१॥

उदाहरणं मृग्यम् ।

अथ दूतानाह – साहित्यदर्पणे – *

"निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः ॥
कार्यप्रेष्यस्त्रिधा दूतो दूत्यश्चापि तथाविधाः ॥२२॥
उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम् ।
सुश्लिष्टं कुरुते कार्यं निसृष्टार्थस्तु संमतः ॥२३॥
मितार्थभाषी कार्यस्य सिद्धिकारी मितार्थकः ।
यावद्भाषितसन्देशहरः सन्देशहारकः" ॥२४॥

एतेषां त्रिविधदूतानामुदाहरणं काव्यादौ ज्ञेयम् ।

अथ सात्त्विकनायकगुणाः साहित्यदर्पणे – **

"शोभा विलासो माधुर्यं धैर्यं गाम्भीर्यतेजसी[२९] ।
ललितौदार्यमित्यष्टौ सहजाः[३०] पौरुषा गुणाः" ॥२५॥

तत्र शोभा – ***

"शूरता दक्षता सत्यं महोत्साहोऽनुरागिता ।
नीचे घृणाऽधिके स्पर्धा यतः[३१] शोभेति तां जगुः[३२]" ॥२६

पा.टि.

(२७) भु 5) 'धार्मिकः सु पुरोहितः' । (२८) भु 3 भु 4) कविः ।
(२९) भु 4) 'तेजसः' । (३०) भु 3.4 म) 'सत्त्वजा' ।
(३१) भु 5) 'यत्र' । (३२) भु 4) 'विदुः' ।

टि.

---

* विश्व. सा. द्र. III / 47- 49. ** तत्रैव. III / 50
*** विश्व. सा.द. III./ 51.

तत्रानुरागिता यथा रघुवंशे – ★

“अहमेव मतो महीपतेरिति
सर्वः प्रकृतिष्वचिन्तयत् ।
उदधेरिव निम्नगाशते-
ष्वभवन्नास्य विमानना क्वचित् ॥”

एवमन्यदपि । अथ विलासः –

३३

यत्र धीरतरा दृष्टिर्गतिः प्राप्नोति चित्रताम् ।
वचनं स्मितसंयुक्तं तं विलासं विदुर्बुधाः ॥२७॥

यथा – ★★

दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम् ।
कौमारकेऽपि गिरिवद्गुरुतां दधानो
वीरो रसः किमयमेत्युत दर्प एव ॥

अथ माधुर्यं साहित्यदर्पणे – ●

“संक्षोभेष्वप्यनुद्वेगो माधुर्यं परिकीर्तितम् ।”

स्पष्टमुदाहरणम् ।

अथ धैर्यम् – ●●

‘व्यवसायादचलनं धैर्यं विघ्ने महत्यपि’ ॥२८॥

पा.टि...

(३३) भु 4) ‘गतं’ ।

टि.

★ कालि. रघु. VIII./ 8

★★ भव. उत्त. V / 19.

● विश्व. सा.द. III / 52.

●● विश्व. सा.द. III / 53.

यथा कुमारसम्भवे – ★

"श्रुताप्सरोगीतिरपि[३४] क्षणेऽस्मिन्[३५] हरः प्रसंख्यानपरो बभूव ।
आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो[३६] भवन्ति ॥"

अथ गाम्भीर्यम् – ★★

'भीशोकक्रोधहर्षाद्यैर्गाम्भीर्यं निर्विकारता[३७] ।'

यथा – ●

"आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोप्याकारविभ्रमः ।"

अथ तेजः –

अरिबाधाऽसहिष्णुत्वमिति तेजः प्रजल्पितम्[३८] ॥२९॥

उदाहरणमूह्यम् ।

अथ ललितम् –

वचनस्य च वेशस्य माधुर्यं सुमनोहरम् ।
तद्वत् शृङ्गारचेष्टाश्च ललितं कथ्यते बुधैः ॥३०॥

उदाहरणं स्पष्टम् ।

अथौदार्यम् – साहित्यदर्पणे – ●●

"दानं सप्रियभाषणमौदार्यं शत्रुमित्रयोः समता ।"

एषामुदाहरणान्यूह्यानि ।

पा.टि...

(३४) भु 1 भु 4) 'श्रुत्वाप्सरो गीतिरपि' । भु 5) 'श्रुत्वास्परोवीतिरपा' ।

(३५) भु 4) 'क्षणेन' । (३६) भु 2 भु 5) 'भेदप्रभवा' । म) 'भेदाः प्रभवे' ।

(३७) भु 4 भु 5) 'न विकारता' । म) 'निर्विकारिता' ।

(३८) भु 2 भु 4 भु 5 म) 'प्रकल्पितम्' ।

टि____

द्र. ★ कालि. कुमा III. 40.

★★ विश्व. सा.द III / 53,

● द्र. हर्ष नागा. III. 24.

●● विश्व. सा.द. III / 55

अथ नायिका त्रिविधा । स्वकीया परकीया सामान्या चेति ।

[३९] साहित्यदर्पणे – ★

"नायिका पुनर्नायकसामान्यगुणैस्त्या[४०]गादिभिर्यथासम्भवैर्युक्ता भवति[४१] ।"

तत्र स्वकीया – [४२]

गृहकर्मयुतात्यन्तं विनयार्जवमण्डना ॥३१॥
पतिव्रतरता स्वीया कथ्यते कविसत्तमैः ।

यथा रसमञ्जर्याम् – ★★

"गतागतकुतूहलं नयनयोरपाङ्गावधि
[४३] स्मितं कुलनतभ्रुवामधर एव विश्राम्यति ।
वचः प्रियतमश्रुतेरतिथिरेव कोपक्रमः
[४४] कदाचिदपि चेत्तदा मनसि केवलं मज्जति ॥"

सापि त्रिधा । 'मुग्धा मध्या प्रगल्भा' इति ।

तत्र मुग्धा – मृदुमानवती मुग्धा लज्जाढ्योत्पन्नयौवना ॥३२॥
[४५] रतौ वामा नवोढा स्यात् नवीनाभरणप्रिया ।

यथामरुके – ★★★

"सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनं वक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठ[४६]ल्लोलालकैरश्रुभिः ॥"

पाटि...

(३९) भु 1 भु 2 भु 4 म) 'साहित्यदर्पणो' इति नोपलभ्यते ।
(४०) भु 5) 'स्तुतादिभि' । (४१) म) 'भवन्ति' । (४२) म) 'बहतकर्म' ।
(४३) म) 'वाद' । (४४) भु 5) 'त्रिविधा' ।
(४५) भु 1 भु 2 भु 4 भु 5) 'यथामृके' । (४६) भु 4 भु 5) 'मुहुर्लोल-' ।

टि.

★ विश्व. सा.द. III / पृ.111.
★★ भानु. र.म. 3 / 1.
★★★ अमरु. अ.श. 29.

लज्जाढ्या यथा प्रभावतीपरिणये – ★

“दत्तेसालसमन्थरं[४७] भुवि पदं निर्याति[४८] नान्तःपुरा-
न्नोद्दामं हसति[४९] क्षणात् कलयते ह्रीयन्त्रणां कामपि ।
किञ्चिद्भावगभीरवक्रिमलवस्पृष्टं[५०] मनाग्भाषते
सभ्रूभङ्गमुदीक्षते प्रियकथामुल्लासयन्तीं सखीम् ॥”

उत्पन्नयौवना यथा – ★★

“मध्यस्य प्रथिमानमेति जघनं वक्षोजयोर्मन्दता
दूरं यात्युदरं च रोमलतिका नेत्रार्जवं धावति ।
कन्दर्पं परिवीक्ष्य नूतनमनोराज्याभिषेकं क्षणा-
दङ्गानीव परस्परं विदधते निर्लुण्ठनं सुभ्रुवः ॥”

रतौ वामा यथा – रसमञ्जर्याम् – ●

“हस्ते धृतापि शयने विनिवेशितापि
क्रोडे[५१] कृतापि यतते बहिरेव गन्तुम् ।
जानीमहे नववधूरथ तस्य वश्या
यः पारदं स्थगयितुं क्षमते करेण ॥”

नवोढा यथा तत्रैव – ●●

“दरमुकुलित-[५२] नेत्रपालि-नीवीनियमित-बाहुकृतोरुयुग्म-बन्धम् ।
करकलितकुचस्थलं नवोढास्वपिति समीपमुपेत्य कस्य यूनः ॥”

पा.टि...

(४७) भु 2) ‘सालसमन्तरं’ । भु 4) ‘सालकमन्थरं’ ।
(४८) भु 1 भु 2 भु 5 म) ‘निर्यातमन्तः’ । (४९) भु 2 भु 4) ‘हरति’ ।
(५०) भु 2 भु 4 भु 5 म) ‘स्फुटं’ । (५२) भु 3) ‘नव मुकुलितं’ ।
(५१) भु 2 भु 4 म) ‘क्रोडीकृतापि’ ।

टि. ___

★ विश्व. सा.द. III / पृ.113 ★★ तत्रैव III /पृ.112
● भानु. र. म./7. ●● तत्रैब / 8.

नवीनाभरणप्रिया यथा-मृग्यम् ।

अथ मध्या नायिका –

प्ररूढयौवना मध्या प्ररूढस्मरसंयुता ॥३३॥
विचित्रसुरता चैव विदग्धा सरसोक्तिभिः ।
५३ किंचित्प्रगल्भवचना मध्यलज्जावती तु सा ॥३४॥

प्ररूढयौवना यथा –★

"नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थि पाणिद्वयं ५४
वक्षोजौ करिकुम्भविभ्रमकरीमभ्युन्नतिं गच्छतः ।
कान्तिः काञ्चनचम्पकप्रतिनिधिर्वाणी सुधास्पर्द्धिनी
स्मेरेन्दीवरदामसोदरवपुस्तस्याः कटाक्षच्छटा ॥"

प्ररूढस्मरसंयुता यथा –

"कान्ते तथा कथमपि[५५] प्रथितं मृगाक्ष्या
चातुर्यमुद्धतमनोभवया रतेषु ।
तत्कूजितान्यनुवदद्भिरनेकवार[५६]
५७ शिष्यायितं गृहकपोतशतैर्यथास्याः ।"

विचित्रसुरता यथा – तत्रैव । एवमन्यत्रापि ।

अथ प्रगल्भा नायिका[५८] –

कामान्धा गाढतारुण्या समस्तरतिपण्डिता ।
भावोन्नताल्पलज्जा स्यात् प्रगल्भाक्रान्तनायका ॥३५॥

पा.टि.

---

(५३) भु 1 भु 2) 'यथामृके' । (५४) भु 1) 'अत्युन्नतिम्' । (५५) भु 1 भु 2 भु 5 म) 'कथा' । (५६) भु 1 भु 2 भु 5 म) 'भवद्भि' । (५७) भु 4) 'तत्रैव' इत्यस्मात् परं 'क्वचित्ताम्बुलाक्त 'इत्यादि' इति अधिकतया दृश्यते । (५८) भु 3) 'नायका' इत्यस्मात् परं 'कामान्धा' इत्यस्मात पूर्वं च आक्रान्तः वशीकृतः नायकः दया सा आक्रान्तनायका । अत्र टापः सुपरत्वात् प्रत्ययः' इति अधिकं दृश्यते ।

टि.

★ विश्व. सा.द. III./ पृ. 115

कामान्धा यथा रसमञ्जर्याम् –★

“नखक्षतमुरःस्थलेऽधरतलेरदस्य व्रणं
च्युता बकुलमालिका विगलिता च मुक्तावली।
रतान्तसमये मया सकलमेतदालोकितं
स्मृतिः क्व च रतिः क्व च क्व च तवालि शिक्षाविधिः ॥

गाढतारुण्या यथा –★★

“अभ्युन्नतः स्तनमुरो नयने सुदीर्घे
५९ वक्रे भ्रुवावतितरां वचनं ततोऽपि।
मध्योऽधिकं तनुरनूनगुरुर्नितम्बा
६० मन्दा गतिः किमपि चाद्भुतयौवनायाः ॥”

समस्तरतिपण्डिता यथामरुककाव्ये –●

“क्वचित्ताम्बूलाक्तः क्वचिदगरुपङ्काङ्कमलिनः
क्वचिच्चूर्णोद्गारी क्वचिदपि च सालक्तकपदः।
वलीभङ्गाभोगैरलकपतितैः शीर्णकुसुमैः
६१ स्त्रियाः सर्वावस्थं प्रथयति रतं प्रच्छदपटः ॥”

भावोन्नता यथा – ६२

“मधुरवचनैः सुभ्रूभङ्गैः कृताङ्गुलितर्जनै
६३ रभसरचितैरङ्गन्यासैर्महोत्सवबन्धुभिः।
असकृदसकृत्स्फारस्फारैरपाङ्गविलोकितै-
स्त्रिभुवनजये सा पञ्चेषोः करोति सहायताम् ॥”

पा.टि...

(५९) भु 1) ‘मध्येऽधिकं’। (६०) भु 2) ‘यथामृके’। भु 1 भु 4 म) ‘यथामृककाव्ये’। भु 5) ‘यथा अमरुशतके’। (६१) भु 5) ‘स्त्रियो नानावस्थं कथयति’। (६२) भु 5 म) ‘कृताञ्जलि’। (६३) भु 3) ‘रभसवलितै’।

टि

★ भानु. र. म. /11.

★★ धन. दश II./पृ.128.

● अमरु अ.श. /107.

अल्पलज्जा[६४] यथा – ★

"धन्यासि या कथयसि प्रियसङ्गमेऽपि ।
विश्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्यः शपामि यदि किंचिदपि स्मरामि ॥"

आक्रन्तनायका यथा –

"स्वामिन् भङ्गुरयालकं सतिलकं भालं[६५] विलासिन् कुरु
प्राणेश त्रुटितं पयोधरतटे हारं पुनर्योजय ।
इत्युक्त्वा सुरतावसानसमये सम्पूर्णचन्द्रानना
स्पृष्टा[६६] तेन तथैव जातपुलका प्राप्ता[६७] पुनर्मोहनम् ॥

मध्याप्रागल्भे मानावस्थायां त्रिविधे[६८] । धीरा अधीरा धीराधीरा चेति ।

तत्र मध्या धीरा –

वाग्भङ्ग्या रमणं कान्ता सन्तापयति या पुरः ।
सा ह्रोषयुता विज्ञैर्मध्या धीरा प्रकल्पिता ॥३६॥

यथा रसमञ्जर्याम् – ★★

"लोलालिपुञ्जे भ्रमतो निकुञ्जे
[६९] [७०] स्फारा बभूवुः श्रमवारिधाराः ।
देहे समीहे भवतो विधातुं
धीरं समीरं नलिनीदलेन ॥"

पा.टि.……………………………………………………………………

(६४) भु 1 भु 4.5) 'यथामुके' । भु 3 म) 'यथामरुके' ।
(६५) भु 5) 'च तिलकं भाले' । (६६) भु 4) 'सृष्ट्वा' । (६७) भु 5). 'प्राप्तः' ।
(६८) भु 5) 'त्रिधा' । (६९) म) 'भवति' । (७०) भु 2) 'न येन' ।

टि.

★ पद्यमिदं विद्यायाः (विज्जिकायाः) द्र. सदुक्ति 1172 पृ 314.

★★ भानु. र. म. /12.

अथ मध्या अधीरा –

अपराधकृतं कान्तं क्लेशयेत्[७१] परुषोक्तिभिः ।
कुपिता[७२] त्यक्तभीतिर्या मध्याधीरेति सा स्मृता ।।३७।।

यथा –

"सार्धं मनोरथशतैस्तव धूर्त ! कान्ता
सैव स्थिता मनसि कृत्रिमहावरम्या ।
अस्माकमस्ति न च कश्चिदिहावकाश[७३]-
स्तस्मात् कृतं चरणपातविडम्बनाभिः ।।"

अथ मध्या-धीराधीरा –

नोक्त्वा किंचित् प्रियस्याग्रे याभिरोदिति विह्वला ।
गदिता पण्डितैर्मध्या धीराधीरेति सत्तमैः ।।३८।।

यथा – ★

"बाले नाथ विमुञ्च मानिनि[७४] रुषं, रोषान्मया किं कृतं,
खेदोऽस्मासु, न मेऽपराध्यति भवान्, सर्वेऽपराधा मयि ।
तत्किं रोदिषि गद्गदेन वचसा, कस्याग्रतो रुद्यते,
नन्वेतन्मम, का तवास्मि, दयिता, नास्मीत्यतो रूद्यते ।।"

अथ प्रगल्भा धीरा –

कोपच्छन्नमतिः कान्ता उदास्ते सुरते तु या ।
भवेत्[७५] प्रगल्भा धीरा सा बाह्यादरप्रकाशिका ।।३९।।

पा.टि..

(७१) भु 3) 'श्लेषयेत्' । (७२) भु 2) 'कुपितात्यन्त' ।
(७३) भु 3) 'दिह' इत्यस्य शिरोभागे 'त्वन्मनसि' इति टिप्पणी दृश्यते ।
(७४) भु 4) 'कामिनि' । (७५) भु 2 भु 4 म) 'स्यात्' ।

टि.____

★ अमरु. अ. श. /52.

यथा – ★

"एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरत-[७६]
स्ताम्बूलानयनच्छलेन रभसाश्लेषोऽपि संविघ्नितः ।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्यान्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥"

प्रगल्भा अधीरा –

कान्तं कृतागसं दृष्ट्वा क्रोधविह्वलमानसा ।
ताडयेत्तर्जयेद्वा सा धृष्टाऽऽधीरा निरूपिता ॥४०॥

धृष्टा प्रगल्भा यथा – ★★

"प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां
हरशिरसि परस्या वासमाशङ्कमाना ।
गिरिशमचलकन्या तर्जयामास कम्प-
प्रचलवलयवल्गत्कान्तिभाजा करेण ॥"

[७७] **ताडनकरी प्रगल्भा अधीरा यथा** - मृग्यम् ।

अथ प्रगल्भा धीराधीरा –

प्रेयासं खेदयेद् या तु वक्रवाक्यै रसान्वितैः ।
धीरैरुक्ता प्रगल्भा सा धीराधीरा परान्विता ॥४१॥

यथा – ★★★

"अनलंकृतोऽपि सुन्दर ! हरसि मनो मे प्रसभम् ।
[७८] किं पुनरलंकृतस्त्वं संप्रति नखरक्षतैस्तस्याः ॥"

एते धीरादिभेदा ज्येष्ठकनिष्ठत्वान्नायकप्रणयं प्रति द्विविधाः । ज्येष्ठा कनिष्ठा च ।

पा.टि...

(७६) भु 5) 'प्रत्युद्गमं दूरत' । (७७) भु 3) 'मृग्यमुदाहरणम्' ।
(७८) भु 3) नायकप्रणयं प्रति ज्येष्ठकनिष्ठत्वात्' ।

टि.

★ अमरु. अ.श. /18. ★★ भानु. र. म. /130 .
★★★ विश्व. सा.द. III/पृ. 121.

७९
प्रियस्याधिकस्नेहाढ्या या सा ज्येष्ठा प्रकीर्तिता ।
प्रियाल्पप्रेमयुक्ता या सा कनिष्ठा कृतीरिता ॥४२॥

यथामरुके – ★

“दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने निमील्य विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्तः परां चुम्बति ॥”

एवं मध्याप्रगल्भयोर्भेदाद् द्वादशविधा, मुग्धा त्वेकविधा इत्थं ८० स्वकीयाभेदास्त्रयोदशप्रकाराः ।

अथ परकीया –

या परे पुरुषे प्रेमाप्रकाशं कुरुते तु सा ।
परकीया बुधैः प्रोक्ता काव्यादिषु रसज्ञकैः ॥४३॥

सा द्विविधा । परोढा कन्यका चेति ।

तत्र परोढा –

यात्रादिनिरतात्यन्तं दत्तचित्ता परे तु या ।
कुलटात्यन्तमन्दाक्षी परोढा सा निगद्यते ॥४४॥

यथा – ★★

“स्वामी निःश्वसितेऽप्यसूयति मनोजिघ्रः सपत्नीजनः ८१
श्वश्रूरिङ्गितदैवतं नयनयोरीहालिहः सेवकाः ।
तद्दूरादयमञ्जलिः किमधुना दृग्भङ्गिभावेन ते
वैदग्धीमधुरप्रबन्धरसिक व्यर्थोऽयमत्र श्रमः ॥”

पा.टि.

(७९) भु 4 म) ‘नायकस्याधिकस्नेहा सा ज्येष्ठा परिकीर्तिता’ ।

(८०) भु 4) ‘तस्याः’ । (८१) भु 3 भु 5) ‘लिहो यातरः’ ।

टि.

★ अमरु. अ.श. /19.

★★ पद्यमिदं भिक्षाटनस्य । द्र. सा.द. श्लोकसूची (दुर्गप्रसाद संपादिता) ।

अत्र हि मम परिणेता अन्नाच्छादनादिदातृतया स्वाम्येव न तु वल्लभः, किं तु वैदग्धीमधुरप्रबन्धरसिकतया मम वल्लभोऽसि ।' इत्यादिव्यङ्ग्यार्थवशादस्याः परनायकविषया रतिः प्रतीयते ।

अथ कन्यका –

अविवाहा कन्यका स्याल्लज्जाढ्या नवयौवना ।
अस्याः पित्राद्यायतत्वात् परकीयात्वमुच्यते ॥४५॥

यथा - मालतीमाधवादौ[८२] मालत्यादिः ।

तथा च **रसमञ्जर्याम्** –★

"किञ्चित्कुञ्चितहारयष्टिसरसं भ्रूवल्लिसाचिस्मितं[८३]
प्रान्तभ्रान्तविलोचनद्युति भुजापर्यस्तकर्णोत्पलम् ।
अङ्गुल्या स्फुरदङ्गुलीयकरुचा कर्णस्य कण्डूयनं
कुर्वाणा नृपकन्यका सुकृतिनं सव्याजमालोकते ॥"

अथ सामान्यनायिका –

वेश्या कामकलाविज्ञा सर्वलोकाभिलाषिणी ।
प्रगल्भवचना धीरा सामान्या कथिता बुधैः ॥४६॥
निर्गुणेष्वेव न द्वेष्टि गुणिष्वपि[८४] न रज्यति ।
द्रव्यमात्रं समालोक्य बाह्ये रागं प्रदर्शयेत् ॥४७॥
रतमङ्गीकृतमपि कामुकं धनवर्जितम् ।
निष्कासयन्ती(ति?)[८५]चेट्यादैः स्वगृहात् क्रोधमानसा ।४८
वेश्यैव मदनायत्ता क्वापि सत्यानुरागिणी ।
रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम् ॥४९॥

पा.टि...

(८२) भु 4) 'माधवे' । (८३) भु 4) 'साति स्मितं' ।
(८४) भु 4) 'गुणेष्वपि' । (८४) भु 4) 'निर्वासयन्ती' ।

टि.

★ भानु. र. म. / 31.

अथ सामान्यवनितानां वल्लभजना उच्यन्ते – [८६]

सुखप्राप्तधनाश्चैव तस्करा द्यूतपाशिकाः ।
मूर्खाः प्रच्छन्नकामाद्या [८७]वेश्यानामतिवल्लभाः ॥५०॥

सामान्यवनिता यथा रसमञ्जर्याम् –★

“दृष्ट्वा प्राङ्गणसन्निधौ बहुधनं दातारमभ्यागतं
वक्षोजौ तनुतः परस्परमिवाश्लेषं कुरङ्गीदृशः ।
आनन्दाश्रुपयांसि मुंचति मुहुर्मालामिषात्कुन्तलो
[८८]दृष्टिः किं च धनागमं कथयितुं कर्णान्तिकं [८९]गच्छति ॥

[९०] पूर्वोक्ताः स्वकीया भेदास्त्रयोदश । परकीयासामान्यास्त्रिविधा । एवं षोडशविधा । एताश्च नायिका अवस्थाभिरष्टौ भवन्ति ।

स्वाधीनभर्तृका चैव खण्डिताथाभिसारिका ।
कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका ॥५१॥
तद्वद्वासकसज्जा स्याद्विरहोत्कण्ठिता तथा ।

तत्र स्वाधीनभर्तृका –

न जहात्यन्तिकं यस्या नायको रतिलम्पटः ॥५२॥
[९१]विभ्रमाभरणासक्ता स्वाधीनपतिका तु सा ।

[९२]अस्याश्चेष्टा वनविहारादिमदनमहोत्सवमदाहंकारादि[९३]मनोरथावाप्तिप्रभृतयः ।

यथा –● ‘अस्माकं सखि वाससीत्युक्तम् ।

पा.टि...

(८६) भु 1 भु 2 भु 3 भु 4 म) वातपण्ड्रकाः । (८७) भु 3) ‘वल्लभाः’ इत्यस्मात् परं ‘सामान्य’ इत्यस्मात् पूर्वं च- ‘पण्ड्रको वातपाण्ड्रादि’ इति अधिकतया वर्तते । (८८) म) ‘दृष्टेः । (८९) भु 5) ‘धावति’ । (९०) भु 2 भु 5 म) ‘षोडशभेदाः’ । (९१) भु 4) ‘वित्तमाभरणासक्ता’ । (९२) भु 1) ‘तस्याश्चेष्ठा’ । (९३) भु 2 म) ‘मनोरथव्याप्ति’ । भु 5) ‘मनोरथप्राप्ति’ ।

टि.

★ भानु. र.म. /32. ● विश्व. सा.द.III/131.

अथ खण्डिता –

[९४]पार्श्वं यस्याः प्रियो याति परसंभोगलक्षितः ॥५३॥
सात्यन्तकुपिता ख्याता खण्डिता कविसत्तमैः ।

अस्याश्चेष्टाः स्फुटवचनचिन्तासन्तापनिःश्वासपाततूष्णी[९५]भावादयः ।

यथा माघे – ★

"तदवितथमवादीर्यन्मम त्वं प्रियेति [९६]
प्रियजनपरिभुक्तं यद् दुकूलं दधानः ।
मदधिवसतिमागाः कामिनां मण्डनश्री-
र्व्रजति हि सफलत्वं वल्लभालोकनेन ॥"

अथाभिसारिका –

कामबाणाग्निसन्तप्ता या कान्तमभिसारयेत् ।
स्वयं वाभिसरत्यन्तं साभिसारवती [९७]स्मृता ॥५४॥

अस्याश्चेष्टाः समयानुरूपभूषणसंपादनप्रज्ञानैपुण्यंकपटसाहसादयः ।

यथा तत्रैव – ★★

"न च मेऽवगच्छति यथा लघुतां
[९८] करुणां यथा च कुरुते स मयि ।
निपुणं तथैवमभिगम्य वदे- [९९]
रभिदूति काचिदिति [१००]सन्दिदिशे ॥"

पा.टि...

(९४) भु 5) 'यस्याः प्रियो यात्यपरासंभोगचिह्न लक्षितम्' ।
(९५) भु 5) 'निःश्वासश्च तूष्णी' । म) 'निःश्वसित तूष्णी' ।(९६) भु 3) 'वसानः' ।
(९७) भु 3) 'स्मृता' इत्यस्मात् परम् 'अस्याः' इत्यस्मात् पूर्वं च - अन्तं कान्तसमीपम् अभिसारवती-अभिसारिका । अभिसारणमभिसरणं वाभिसारः अन्तात् सर्त्तेर्वा केवला... रजियवा घञ् वा यथासंख्यबोध्यम्' इत्यधिका कीटद्रष्टा टिप्पणी दृश्यते । (९८) भु 3) 'मुपगम्य' ।
(९९) भु 5) 'दूतम्' । (१००) भु 5) 'संविविशे' ।

टि. ______________________________________

★ माघ. शिशु. XI / 33. ★★ तत्रैव IX / 56.

कान्तसमीपं गताभिसारिका यथामरुके[१०१] –

“उत्क्षिप्तं करकङ्कणद्वयमिदं बद्धा दृढं मेखला
यत्नेन प्रतिपादिता मुखरयोर्मञ्जीरयोर्मूकता ।
आरब्धे रभसान्मया[१०२] प्रियसखि क्रीडाभिसारोत्सवे
चण्डालस्तिमिरावगुण्ठनपटाक्षेपं विधत्ते विधुः ॥”

कुलजाभिसारिका यथा[१०३] **- साहित्यदर्पणे –**

संलीना स्वेषु गात्रेषु मूकीकृतविभूषणा ।
अवगुण्ठनसंवीता कुलजाभिसरेद्यदि ॥५५॥

परकीयाभिसारिका यथा रसमञ्जर्याम् –★★

“रभसादभिसर्त्तुमुद्यतानां वनितानां सखि वारिदो विवस्वान् ।
रजनी दिवसोऽन्धकारमर्च्चिर्विपिनं वेश्म विमार्ग एव मार्गः ॥”

वेश्याभिसारिका यथा साहित्यदर्पणे –

विचित्रोज्ज्वलवेषा तु[१०४] **रणन्नूपुरकङ्कणा ।**
प्रमोदस्मेरवदना स्याद्वेश्याभिसरेद्यदि[१०५] **॥५६॥**

पा.टि.

(१०१) भु 1 भु 2 भु 4 भु 5 म) ‘यथामृके’ (१०२) भु 5) ‘रभसं मया’ ।
(१०३) भु 5) ‘यथा’ इत्यस्मादारभ्य ‘परकीयाभिसारिका’ इत्यन्तं यावन् नोपलभ्यते ।
(१०४) भु 3) ‘भूषा तु’ । भु 5) ‘वेषाढ्या’ । (१०५) भु 3) ‘भिसरेद्यदि’
इत्यस्मात् परं ‘शुक्लाभि’ इत्यस्मात् पूर्वं च-
यथा दीक्षितगोपीनाथमहापात्रस्य श्लोकः –
ताम्बूलं चर्वयन्ती नयनविलसितैः सस्मितैः कामिचित्ता-
न्याकर्षन्ती वचोभिः श्रुतिममृतरसस्यन्दिभिस्तर्पयन्ती ।

टि.

★ विश्व. सा.द. III / 77 & 78.　　★★ भानु. र.म./78

प्रेष्याभिसारिका यथा तत्रैव ।

मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना ।
आविद्धगति संचारा स्यात्प्रेष्याभिसरेद्यदि ॥५७॥

शुक्लाभिसारिका यथा रसमञ्जर्याम् –★

चन्द्रोदये चन्दनमङ्गकेषु
१०६ विहस्य विन्यस्य विनिर्गतायाः ।
मनो निहन्तुं मदनोऽपि बाणान्
करेण कौन्दान् बिभरांबभूव ॥

कृष्णाभिसारिका यथा तत्रैव –★★

"नाम्बुजैर्न कुमुदै रुपमेयं
स्वैरिणीजनविलोचनयुग्मम् ।
नोदये दिनकरस्य न चेन्दोः । १०७
केवले तमसि तस्य विकासः ॥"

पा.टि...

गुञ्जन्मञ्जीरशिञ्जाततिषु रतिपतीष्वासटङ्कारशङ्का
तन्वाना वारवामा सरस रति यम....जन्म ग्रहेण ॥"

इत्यधिकं कीटदष्टं ग्रन्थभागं दृश्यते ।

(१०६) भु 1 भु 2 भु 4 म) 'विहन्तुम्' । (१०७) भु 3) 'विकासः' इत्यस्मात् परं 'दिवसा (पृ१००) इत्यस्मात् पूर्वं च –

यथा वा कस्यचित् –

"सितं वसनमर्पितं वपुषि नीलचेलभ्रमा-
न्मया.....दाशयाम......वः सेवकः । (कीटदंष्टम्)
करेण स च बोधितः स्वजनशंकया दुर्जनः
परं परमपुण्यतः सखि न लंघिता देहली ॥"

टि. ____

★ भानु:. र. म. /79. ★★ तत्रैव / 8.

पा.टि..

यथा वा **गीतगोविन्दे** – (XI / 4)

“काश्मीरगौरवपुषामभिसारिकाणा-
माबद्धरेखमभितो रुचिमञ्जरीभिः।
एतत्तमालदलनीलतमं तमिस्रं
तत्प्रेमहेमनिकषोपलतां तनोति ॥”

तमालदलेभ्योप्यतिनीलमित्यर्थः ।

यथा वा **तत्रैव** – (V/5)

“आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तजात्
प्रोद्बोधादनु संभ्रमादनु रतारम्भादनु प्रीतयोः ।
अन्यार्थं गतयोर्भ्रमान्मिलितयोः संभाषणैर्जानतो-
र्दम्पत्योर्निशि को न को न तमसि व्रीडाविमिश्रो रसः ॥”

कः को रसः नाभूदिति न, अपि तु सर्वोऽपि रसोऽभवदित्यर्थः ।

यथा वा **कस्यचित्** –

‘‘इह जगति रतीशप्रक्रियाकौतुकिन्यः
कति कति न निशीथे सुभ्रुवः संचरन्ति ।
मम तु विधिहताया जायमानस्मिताया:
सखि पथि परिपन्थि हन्त दन्तांशुरेव ॥”

यथा वा **रूपगोस्वामिनः** –

‘तिमिरमसिभिः संवीतांग्यः कदम्बवनान्तरे
सखि मुररिपु......णात्मानः सरन्त्यभिसारिकाः ।
तव तु परितो विद्युद्वर्णास्तनुद्युतिसूतयोः
हरि हरि घनध्वान्तान्येताः स्ववैरिणि भिन्द्यते ॥”

हे स्ववैरिणि - हे आत्मवैरिणि ।

यथा वा **गोवर्धनाचार्यस्य** –

“पतिपुलकदूनगात्री स्वच्छायाविक्षणेऽपि या सभया
साभिसरति सुभग त्वां दलयन्ती कण्टकं तमसि ॥” इत्यधिकमस्ति ।

दिवसाभिसारिका– यथा- मृग्यम्[१०८]।

प्रसङ्गादभिसारस्थानानि कथ्यन्ते –

भग्नो देवालयश्चोन्नतधरणितलं दूतिकावेश्म मञ्चा
नद्यादीनां निकामं तटमतिरुचिरं पुष्पकुञ्जाभिपूर्णम् ।
क्षेत्रं वाटी श्मशानं कुसुमितविपिनं पुंश्चलीनां सुखाय
स्थानं संकेतसारं कथयति निपुणः कुत्रचिद्धान्तयुक्तम्[१०९]''।५८

अथ कलहान्तरिता –

प्राणेशं चाटु कुर्वन्तं या परित्यज्य कोपतः ।
अनुतापं व्रजेत् सा तु कलहान्तरितोच्यते[११०] ॥५९॥

अस्याश्चेष्टा भ्रान्तिसन्तापनिःश्वाससंमोहज्वरप्रलापादयः ।

यथामरुके (चन्द्रशेखरकवेः?) –★

पा.टि...

(१०८) भु 3) 'मृग्यम्' इत्यस्य स्थाने –

"दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति ।
एकाकिन्यपि यामि सत्वरमसौ स्रोतस्तमाला कुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदानलग्रन्थयः ॥"

(१०९) भु 1 भु 2 भु 4 भु 5 म) 'युक्ते' । भु 3) 'युक्तम्' इत्यस्मात् परम् 'अथ' इत्यस्मात्पूर्वं च "क्षेत्रं केदारम्, वाटी कार्पासादिवाटिका' इत्यधिकमस्ति।

(११०) भु 3) 'नोच्यते' इत्यस्मात् परम् 'अस्या' इत्यस्मात् पूर्वं च 'चाटु इति पदच्छेदः, अनुतापं-पश्चात्तापम्' इत्यधिकं दृश्यते ।

टि.

★ 'नो चाटु श्रवणे' त्यादि पद्यं स्वपितुश्चन्द्रशेखरकवेरिति साहित्यदर्पणकारेणोक्तम् । तस्मादत्र यथामरुके' इत्युक्तिश्चिन्त्या । द्र. सा.द. ।।। /पृ.129

"नो चाटु श्रवणे कृतं न च दृशा हारोऽन्तिके वीक्षितः
कान्तस्य प्रियहेतवे निजसखीवाचोऽपि दूरीकृताः ।
पादान्ते विनिपत्य तत्क्षणमसौ गच्छन्मया ङ्मूढया १११
पाणिभ्यामवरुध्य हन्त ! सहसा कण्ठे कथं नार्पितः ॥"

अथ विप्रलब्धा –

यस्याः संकेतकं कृत्वा नायाति रमणोऽन्तिकम् ।
अवज्ञाता भृशं सा तु विप्रलब्धा प्रकीर्तिता ॥६०॥

अस्याश्चेष्टा निर्वेदनिःश्वाससखीजनोपालम्भचिन्ताश्रुपातमूर्च्छादयः ।

यथा : – ★

"उत्तिष्ठ दूति यामो यामो यातस्तथापि नायातः ।
याऽतः परमपि जीवेज्जीवितनाथो भवेत्तस्याः ॥"

अथ प्रोषितभर्तृका –

११२
बहुधाकार्यसंयोगादन्यदेशं गतः पतिः ।
११३
यस्याः सा कामदुःखार्ता प्रोक्ता प्रोषितभर्तृका ॥६१॥

अस्याश्चेष्टाः काकुवचनकातरप्रेक्षणागमनविघ्नोपदर्शननिर्वेदसन्तापसंमोह-निःश्वासबाष्पादयः ।

SANSTHAN DEEMED UNIVERSITY (UNDER MINISTRY OF H.R.D. GOVT. OF
ACCESSION 26335
DATE 1.12.09

११४
यथा मेघदूते – ★★ ११५

"तां जानीयाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ॥"

पा.टि...

(१११) भु 1 भु 2 भु 5 म) 'नार्पितम्' । (११२) भु 2) 'अल्पदेशं' । भु 4) 'अल्पदेश' (११३) भु 3) 'ख्याता' । (११४) भु 3) 'मेघसंदेशे' । (११५) भु 5) 'जानीथाः' ।

टि.

★ धन. दश. II/पृ. 138. ★★ कालि. मेघ. II / 20.

अथ वासकसज्जा–

चारुवासगृहेष्वस्याः कुरुते मण्डनं तु या ।
सैव वासकसज्जा स्यात् कान्तसंगाभिलाषिणी[११६] ॥६२॥

अस्याश्चेष्टा मनोरथसखीपरिहासदूतीप्रश्नसामग्रीसंपादनमार्गविलोकनादयः ।

यथा रसमञ्जर्याम्–☆ "कृतं वपुषि भूषणं चिकुरधोरणी भूषिता
कृता शयनसंनिधौ क्रमुक[११७]वीटिकासंभृतिः[११८] ।
अकारि हरिणीदृशा भवनमेत्य देहत्विषा
स्फुरत्कनककेतकीकुसुमकान्तिभिर्दुर्दिनम्[११९] ॥

अथ विरहोत्कण्ठिता –

आगन्तुं कृतकामोऽपि कुतश्चित् कारणात् प्रियः ।
नायातो मदनार्ता सा विरहोत्कण्ठितोच्यते ॥६३॥

अस्याश्चेष्टा अरतिसंतापजृम्भाङ्गाकृष्टिकम्परुदितस्वावस्थाकथनादयः ।

यथामरुके[१२०]–"किं रुद्धः प्रियया कयाचिदथवा सख्या ममोद्वेजितः
किं वा कारणगौरवं किमपि यन्नाद्यागतो वल्लभः ।
इत्यालोच्य मृगीदृशा करतले विन्यस्य वक्त्राम्बुजं
दीर्घं निःश्वसितं चिरं च रुदितं क्षिप्ताश्च पुष्पस्रजः ॥"

पा.टि..

(११६) भु 5) 'कांक्षिणी' । भु 3) 'भिलाषिणी' इत्यस्मात्परम् 'अस्या' इत्यस्मात् पूर्वं च- 'स्वस्या इत्यत्र स्वस्येति साधीयान पाठः । स्वशब्दस्यात्मवाचकस्य पुंनपुंसकत्वानुशासनात्" इत्यधिकं दृश्यते । (११७) भु 1 भु 2 भु 4 म) 'कुसुम' । (११८) भु 1 भु 2 भु 3 म) 'संसृतिः' । भु 4) 'संस्मृतिः' । (११९) भु 3) 'दुर्दिनम्' इत्यस्मात् परम् 'अथ' इत्यस्मात् पूर्वं च "चिकुरधोरणी केशपाशः, दुर्दिनशब्दो लक्षणया वृष्टिपरः" इत्यधिकं दृश्यते ।
(१२०) भु 3 भु 5) 'ग्रन्थान्तरे' ।

टि.

☆ भानु. र. म. /66.

☆☆ अमरुशतके पद्यमिदं नोपलभ्यते ।

इति साष्टाविंशतिशतमुत्तममध्याधमस्वरूपमतः ।
चतुरधिकाशीतियुतं शतत्रयं नायिका भेदानां स्यात् ॥६४॥

१२१

क्वचिदासामन्योन्यसाङ्कर्यं लक्ष्येषु दृश्यते ।

यथा माघे – *

न खलु वयममुष्य दानयोग्याः १२२
पिबति च पाति च यासकौ रहस्त्वाम् ।
विट ! विटपममुं ददस्व तस्यै १२३
भवति यतः सदृशोश्चिराय योगः ॥
तव कितव किमाहितैर्वृथा नः
क्षितिरुहपल्लवपुष्पकर्णपूरैः ।
ननु जनविदितैर्भवद्व्यलीकै-
श्चिरपरिपूरितमेव कर्णयुग्मम् ॥
इति गदितवती रुषा जघान
स्फुरितमनोरमपक्ष्मकेसरेण ।
श्रवणनियमितेन कान्तमन्या
सममसिताम्बुरुहेण चक्षुषा च ॥

** १२४

इयं हि वक्रोक्त्या परुषवचनेन कर्णोत्पलताडनेन च धीरमध्या- (ध्यता?) धीरमध्या (ध्यता?) धीरप्रगल्भताभिः संकीर्णा । एवमन्यत्रापि तर्क्यम् । इतरा अप्यसंख्यास्ता नायिका ग्रन्थविस्तरभयान्नोक्ताः ।

पा.टि.

(१२१) भु 5) 'लक्ष्ये' । (१२२) भु 5 म) 'हरस्त्वाम्' ।
(१२३) भु 1 भु 2) 'यागः' । भु 3) 'योगः' इत्यस्मात् परं 'तव' इत्यस्मात् पूर्वं च - असावेव असकौ स्वार्थे टेः पूर्वमकार' इत्यधिकं दृश्यते ।
(१२४) भु 1 भु 2) 'धीरमध्या अधीरप्रगल्भताभिः' ।

टि.

---

* माघ. शिशु. VII / 53, 54 & 56 ** विश्व. सा. द./पृ.135.

[१२५]इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायणदेवमहाराज-विद्वत्सभाराजित-प्रबन्धकविताप्रकाशक-करणकुलसंभव-कविभिषग्वर-वासुदेवपात्रतनय-श्रीमद्गोपीनाथकविभूषणकृतौ **कविचिन्तामणौ आलम्बनविभावे नायकनायिकानिरूपणं नाम पञ्चमः किरणः ।**

पाटि

(१२५) भु 5) इति श्रीमत्.....श्रीमद्गोपीनाथ'' इति अस्य समुदायस्य स्थाने 'इति गोपीनाथ' इति ।

* * *

[षष्ठः किरणः]

अथैतासा[१]मलंकारा यौवने सहजाः स्मृताः ।
कथ्यन्ते कविभिः पूर्वैरष्टाविंशतिसंख्यकाः ॥
तत्र – भावो हावश्च हेलापि कथिताश्च त्रयोऽङ्गजाः ॥१॥

साहित्यदर्पणे –★

“शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता ।
औदार्यं धैर्यमित्येते सप्तैव स्युरयत्नजाः” ॥२॥
लीला कुट्टमितं विलासचकिते मौग्ध्यं मदो विभ्रमो
विच्छित्तिः किलकिंचितं च हसितं मोट्टायितं योषिताम् ।
बिब्बोको विहृतं तथैव ललितं विक्षेपकौतूहले[२]
तारुण्ये तपनं बुधैश्च कथितं केलिस्तदष्टादश ॥३॥
भावादिधैर्यपर्यन्तं पूर्वोक्तं च यथाक्रमम् ।
पुंसामपि दशैते स्युर्नायिकानामलंक्रिया ॥४॥

एते सर्वे अलंकारा नायिकाश्रिता[३] एव विच्छित्तिविशेषतां पुष्णन्ति ।

तत्र भावः –

विकारैर्वर्जिते चित्ते मन्मथोद्दीपकैस्तथा ।
जाता[४] या विक्रिया काचित्[५] स भावः कथितो बुधैः ॥५॥

पा.टि.……………………………………………………………

(१) भु 4 भु 5) ‘अथ तासा’ । (२) भु 3 भु 4) ‘विक्षेपकौतूहलम्’ ।
(३) भु 5) ‘नायिकाश्रया’ । (४) भु 5) ‘जाताथ’ ।
(५) भु 1 भु 2 भु 4 म) किंचित्

टि.

★ विश्व. सा. द. III / 90.

यथा–

"स एव सुरभिकालः स एव मलयानिलः ।
सैवेयमबला किं तु मनोऽन्यदिव दृश्यते ॥"

अथ हावः –

कटाक्षादिविकारैश्च संभोगेच्छाप्रकाशकः ।
भावः स एव हावः स्याल्लक्षितोऽन्येन चाल्पकः ॥६॥

यथा कुमारसंभवे –★

'विवृण्वती शैलसुतापि भाव[६] -
मङ्गैः स्फुरद्[७]बालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ
मुखेन पर्यस्तविलोचनेन ॥"

अथ हेला – [८]

विकारः सैव हेला स्याद् बहुष्वत्यन्तलक्षितः ।

यथा – ★★

"तथा तस्या[९] झटिति प्रवृत्ता[१०] सर्वाङ्गविभ्रमाः सकलाः ।
संशयित[११]मुग्धभावा भवन्ति चिरं यथा सखीनामपि ॥"

पा.टि...

(६) भु 1 भु 2 म) 'हावमंगैः' । (७) भु 4 भु 5 म) 'क्वचिद्बाल-' ।
(८) भु 5) 'सविक्तविक्रियो भावो हेलेति परिकीर्तितः' ।
(९) भु 4) 'तथाऽस्यो भ्रुकुटि' । (१०) भु 5) 'दृढप्रवृत्ता' ।
(११) भु 5) 'संशयितुमुग्ध' ।

टि.

★ कालि. कुमा ॥ / 68 ★★ धन. दश. / पृ. 145.

अथ शोभा – १२

रूपेण यौवनेनैव भोगलालित्यमण्डनैः ॥७॥
सर्वाङ्गभूषणं शोभा कथिता कविसत्तमैः ।

१३

रूपशोभा-- यथा तर्क्यम् ।

यौवनशोभा– यथा कुमारसंभवे–✰

"असंभृतं मण्डनमङ्गयष्टे-
रनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं
बाल्यात् परं साथ वयः प्रपेदे ॥"

एवमन्यदपि ।

पा.टि...

(१२) भु 4) 'मण्डलैः' ।

(१३) भु 3) 'तर्क्यम्' इत्यस्य स्थाने –

"उरोभुवि न तुङ्गिमा नयनयोर्न च द्राघिमा
न वा वचसि वक्रिमा तरलिमा न तादृक् भ्रुवोः ।
परं तु हरिणीदृशोर्वपुषि कापि कान्तिच्छटा
पटावृत-महामणि-द्युतिरिवान्तरालक्ष्यते ॥"

कान्तिच्छटा-रूपसंपत्तिः न तु वक्ष्माणा तस्यास्तारुण्यभूषणादि प्रयोज्यत्वात् अलक्षि.... यथा वा –

"नोदञ्चौ च कुचौ न चारु गमनं रोमावली नोद्गता
न स्पष्टं च वलित्रयं न कुटिला दृष्टिर्न पुष्टं वपुः ।
अस्याः कापि कलैव लोकमखिलं संमोहत्यद्भुता
तारुण्ये सति किं करिष्यति मनो यूनामियं बालिका ॥" इति

टि.

✰ कालि. कुमा. I./ 31.

अथ कान्तिः – १४

तारुण्यभूषणासक्ता मदनोन्मेषणे तु सा ॥८॥
शोभैवाप्यतिविस्तीर्णा कान्तिरित्युच्यते बुधैः ।

यथा रसमञ्जर्याम् – *

"आज्ञाप्तं किल कामदेवधरणीपालेन काले शुभे
वस्तुं वास्तुविधिं विधास्यति तनौ तारुण्यमेणीदृशः ।
दृष्ट्या खञ्जनचातुरी मुखरुचा सौधाधरी माधुरी
वाचा किं च सुधासमुद्रलहरीलावण्यमामन्त्रते ॥"

यथा च – **

'नेत्रे खञ्जनगञ्जने' इत्यादि ।

अथ दीप्तिः – १५

कान्तिरेवोच्यते दीप्तिः शोभितात्यन्तविस्तृता ॥९॥

यथा चन्द्रकलानाटिकायाम् – ***

"तारुण्यस्य विलासः समधिकलावण्यसंपदो हासः । १६
धरणीतलस्याभरणं युवजनमनसो वशीकरणम् ॥"

अथ माधुर्यम् –

अवस्थासु विशेषासु सर्वासु च स्फुरत्कला ।
विशेषं रमणीयत्वं माधुर्यं परिकल्पितम् ॥१०॥

पा.टि..

(१४) भु 3 भु 4) मदनोन्मेषणा । (१५) भु 5) 'कान्तिरेकोद्गता' । (१६) भु 3) 'करणम्' इत्यस्मात् परम् 'अथ' इत्यस्मात् पूर्वं च- 'अत्र विलास इत्यादौ सर्वत्र सारोपा लक्षणीया विलासवतीत्यादिरर्थः" इत्यधिकं दृश्यते ।

टि.

* भानु. र. म. /4. ** विश्व. सा.द. III./ पृ 115.
*** विश्व. चन्द्र. I / 3.

१७
यथा शाकुन्तले – ★

"सरसिजमनुविद्धं शैवलेनापि रन्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥"

अथ प्रगल्भता –

नायका (के?)त्यन्तसंलक्ष्यं प्रगल्भचरितेषु च ।
कथ्यते भव्यकाव्यज्ञैर्निर्भयत्वं प्रगल्भता ॥११॥

यथा मम –

कान्ते कामकलाविलासचतुरे सौधालयाग्रस्थिते
१८
कान्तासद्रतिभावकल्पितमतौ काले वसन्तागमे ।
१९
बाला श्लिष्यति सत्वरं च कुरुते क्रीडीकृतं कामिनी
तस्मिंश्चुम्बति वक्त्रपद्ममनिशं तस्याननं चुम्बति ॥

अथौदार्यम् –

२० **कवयः प्राहुरौदार्यं सर्वदा विनयं किल ।**

यथा –

"न ब्रूते परुषां गिरं वितनुते न भ्रूयुगं भङ्गुरं
नोत्तंसं क्षिपति क्षितौ श्रवणतः सा मे स्फुटेऽप्यागसि ।
कान्ता गर्भगृहे गवाक्षविवरव्यापारिताक्षी बहिः
सख्या वक्त्रमभिप्रयच्छति परं पर्यश्रुणी लोचने ॥

पा.टि..

(१७) भु 1 भु 2 भु 4) 'कुमारसंभवे' । (१८) भु 5) 'कल्पितमना' ।
(१९) भु 1 भु 2) 'कोलाग्रतम्' । भु 4) 'क्रीडाकूतम्' ।
(२०) भु 1 भु 2 भु 4 म) 'यथामृके' ।

टि.

★ कालि. अ.श. I / 18.

अथ धैर्यम् –

अचञ्चला मनोवृत्तिर्मुक्ता[२१]त्मश्लाघना परम् ॥१२॥
धीरै[२२]र्धैर्यमिति प्रोक्तं साहित्यपथदर्शिभि: ।

यथा – ✩

"[२३]ज्वलतु गगने रात्रौ रात्रावखण्डकल: शशी [२४]
[२५] दहतु मदन: किं वा मृत्यो: परेण विधास्यतु ।
मम तु दयित: श्लाघ्यस्तातो जनन्यमलान्वया
कुलममलिनं न त्वेवायं जनो न च जीवितम् ॥"

अथ लीला –

वेषैरङ्गैर्भूषणैश्च वचोभि: प्रेमभिस्तथा ॥१३॥
प्रियानुकारिणी[२६] ख्याता लीला प्रीतिप्रयोजितै: ॥

यथा –

"मृणालव्यालवलया वेणी[२७]बन्धकपर्दिनी ।
[२८] हरानुकारिणी पातु लीलया पार्वती जगत् ॥"

अथ कुट्टमितम् –

पा.टि.

(२१) भु 5) 'र्युक्ता' । (२२) भु 1 भु 2) **'इह धैर्यं प्रवक्षन्ते साहित्यपथदर्शिन:'**
(२३) भु 5) 'तुलयतु' । (२४) भु 1 भु 2) 'विधास्यति' ।
(२५) भु 5) 'मम तु मलिनं' । (२६) भु 1 भु 4) 'प्रियानुकृतिरुच्यन्ते' ।
(२७) भु 'वेणीस्कन्ध' । (२८) भु 5) 'कुट्टमितम्' इत्यस्मात् परं 'कुचकेश' इत्यस्मात् पूर्वं च– **समर्देऽपि सुखाधिक्यं रतौ कुट्टमितं मतम् ।**

यथा–

"हृदि कुट्टनघातसंभवान्नखदन्तक्षतजातवेदना ।
प्रियसंगसुखाब्धिमग्नया बुबुधे नाल्पतरापि बालया ॥"
इत्यधिकं दृश्यते ।

टि.

✩ भव. मा. मा. ॥ / 2.

कुचकेशकपोलानामित्यादीनां ग्रहे बुधाः[२९] ॥१४॥
हर्षेण संभ्रमात् कुट्टमितं हस्तादिकम्पनम् ।

यथा माघे – ★

"पल्लवोपमितिसाम्यसपक्षं
दष्टवत्यधरविम्बमभीष्टे ।
प्रत्यकूजि सरुजेव तरुण्या
तारलोलवलयेन करेण ॥"

अथ विलासः –

स्थानयानासनादौ च मुखनेत्रादिविभ्रमः ॥१५॥
विशेषश्च विलासः स्यात् कान्तसंदर्शनादिभिः ॥

यथा –

"अत्रान्तरे किमपि वाग्विभवातिवृत्त-
वैचित्र्यमुल्लसितविभ्रममायताक्ष्याः ।
तद्भूरिसात्त्विकविकारमपास्तधैर्य-
[३०]
माचार्यकं किमपि मान्मथमाविरासीत् ॥"

अथ चकितम् –

प्राणेश्वरस्य पुरतः कुतोऽपि कारणद्भये[३१] ॥१६॥
चापल्यं चकितं प्रोक्तं काव्यभावज्ञपण्डितैः ।

पा.टि.

(२९) भु 3) 'ग्रहे बुधैः' । (३०) भु 5) 'कम्पादिकम्' ।
(३१) भु 5) 'कुतोऽस्वीकरणाद्भये' ।

टि.

★ माघ. शिशु. X / 53.

यथा माघे – ★

"त्रस्यन्ती चलशफरीविघट्टितोरू-
वामोरूरतिशयमाप विभ्रमस्य ।
क्षुभ्यन्ति प्रसभमहो विनापि हेतो-
र्लीलाभिः किमु सति कारणे रमण्यः ॥"

अथ मौग्ध्यम् –

जिज्ञासा या प्रियाभ्यासे प्रतीतस्यापि वस्तुनः ॥१७॥
अज्ञानादपि तन्मौग्ध्यमुक्तं साहित्यवेदिभिः ।

यथा [३२] मुक्ताचरिते – ★★ [३३]

"के द्रुमास्ते क्व वा ग्रामे सन्ति केन प्ररोपिताः ।
नाथ ! [३४] मत्कङ्कणन्यस्तं येषां मुक्ताफलं फलम् ॥"

अथ मदः –

सौभाग्याद्यौवनादेर्वा विकारो [३५] गर्वजो मदः ॥१८॥

[३६] यथामरुके – ★★★

"मा गर्वमुद्वह कपोलतले चकास्ति
[३७] कान्तस्वहस्तलिखिता मम मञ्जरीति ।

पाटि. ....

(३२) भु 1 भु 2 भु 3 भु 4) साहित्यदर्पणोदाहरणम् । (३३) भु 2) 'के वा' ।
(३४) भु 4) 'मत्कर्णसन्यस्तं' । (३५) भु 2 भु 5) 'गर्जितो' ।
(३६) भु 1 भु 2 भु 4) 'यथामृके' ।भु 5 म) 'यथा उज्ज्वलनीलमणौ' ।
(३७) भु 4) 'कान्तस्य हस्तलिखिता अकमंजरीति' ।
भु 3 भु 5) 'कृष्णस्य हस्तलिखिता नवमंजरीति' ।

टि.

★ माघ. शिशु. VIII / 24. ★★ MISS No 138 (a) कृष्ण. मुक्ता.1/6.
★★★ पद्यमिदमुपलभ्यमाने अमरुशतके नोपलभ्यते । उपलभ्यते परं दशरूपके । द्र. घन. दश. II/ पृ. 136.

अन्यापि किं सखि न भाजनमीदृशीनां
वैरी न चेद्भवति वेपथुरन्तरायः ॥"

अथ विभ्रमः – ३८

प्रहर्षादनुरागादेः कान्तस्यागमनादिषु ।
३९
त्वरयाभरणादीनां विन्यासो विभ्रमः स्मृतः ॥१९॥

यथा – ☆ ४०

"श्रुत्वाऽऽयान्तं बहिः कान्तमसमाप्तविभूषया ।
भालेऽञ्जनं दृशोर्लाक्षा कपोले तिलकः कृतः ॥"

अथ विच्छित्तिः –

आकल्परचना स्वल्पाप्यद्भुतं कान्तिपोषिणी ।
४१
कथिता सैव विच्छित्तिः काव्यालङ्कारवेदिभिः ॥२०॥

यथा माघे – ☆☆ ४२

"स्वच्छाम्भःस्नपनविधौतमङ्गमोष्ठ-
स्ताम्बूलद्युतिविशदो विलासिनीनाम् ।
वासश्च प्रतनु विविक्तमस्त्वितीया-
नाकल्पो यदि कुसुमेषुणा न शून्यः ॥"

अथ किलकिञ्चितम् –

कान्तसङ्गादिजाद्धर्षात्कामोद्रेकरसस्थितात् ।
हर्षभीशोकहासैश्च स्मितकोपश्रमादिभिः ॥२१॥

पा.टि...

(३८) भु 2 भु 4 म) 'कान्तस्य गमनादिषु' । (३९) भु 4) 'रभसादीनां' ।
(४०) भु 5) '-विभूषणा' । (४१) भु 2) विच्छित्तिः सैव प्रोक्ता तु ।
(४२) भु 2) 'स्वच्छाङ्गस्वपन-' ।

टि.

☆ धन. दश. II. पृ 151. ☆☆ माघ. शिशु. VIII / 70.

[४३]साङ्कर्यं कविभिः प्रोक्तं कान्तानां किलकिञ्चितम् ॥

यथा माघे – ★

"पाणिरोधमविरोधितवाञ्छं
[४४]भर्त्सनाश्च मधुरस्मितगर्भाः ।
कामिनः स्म कुरुते करभोरू-
र्हारि शुष्करुदितं च मुखेन(सुखेऽपि?)"॥

यथा च मम –

दूरादागतवल्लभं तरलितं [४५]कामाग्निभिः पीडितं
पश्यन्त्या निकटे क्षणं प्रविचलत्क्रोधं वहन्त्याः पुनः ।
हर्षात्तत्परिरम्भणाद्पुलकाज्जातं स्मितं [४६]चाधरे
चुम्बन्त्याः [४७]प्रियवक्त्रपद्ममलं भावेषु मग्नं मनः ॥

अथ हसितम् –

सुखप्रदो वृथाहासस्तारुण्योद्भेदसम्भवः ॥२२॥
हसितं काव्यभावज्ञैः कथितं वरयोषिताम् ।

यथा साहित्यदर्पणे – ★★

"अकस्मादेव तन्वङ्गी जहास यदियं पुनः ।
नूनं प्रसूनबाणोऽस्यां साम्राज्यमधितिष्ठति ॥"

पाटि..

(४३) भु 3.4.5. म) 'सङ्करत्वं बुधैः' । (४४) भु 1.2.4) 'र्वत्सनाश्च' ।
(४५) भु 1 भु 2) मनसिजप्रोद्यच्छरैः । (४६) भु 5) 'चाधरम्' ।
(४७) भु 1 भु 2) 'प्रियवक्त्रमद्भुतभयं' ।

टि.

★ माघ. शिशु X / 69. ★★ सा.विश्व. साद. III. /पृ. 149.

अथ मोट्टायितम् –

तद्भावयुक्तचित्ताया नायकस्य कथादिषु ॥२३॥
[४८] कर्णकण्डूयनादिस्तु मोट्टायितमिहोच्यते ।

यथा – ☆

"सुभग ! त्वत्कथारम्भे कर्णकण्डूतिलालसा ।
उज्जृम्भवदनाम्भोजा[४९] भिनत्त्यङ्गानि साङ्गना ॥"

अथ बिब्बोकः –

५० बिब्बोकः स्यादभिष्टेऽपि द्रव्ये गर्वैरनादरः ॥२४॥

यथा –

"यासां सत्यपि सद्गुणानुसरणे दोषानुवृत्तिः परा
याः प्राणान् परमर्पयन्ति[५१] न पुनः संपूर्णदृष्टिं प्रिये ।
अत्यन्ताभिमतेऽपि वस्तुनि[५२] विधिर्यासां निषेधात्मक ५३
स्तास्त्रैलोक्यविलक्षणप्रकृतयो वामाः प्रसीदन्तु ते ॥"

अथ विहतम् –

वक्तव्यसमयेऽपि स्यादवचो लज्जया पुनः ।
विहतं कथितं प्राज्ञैरलंकारविचारकैः[५४] ॥२५॥

पा.टि.

(४८) भु 3 भु 5) 'दिस्यान्मोट्टायितमलंकृतिः' । भु 4 भु 5 म) 'दिस्यान्मोट्टायितमलंकृतम्' । (४९) भु 1 भु 2 म) 'उज्जृम्भि' । (५०) भु 1 भु 2) 'यथामृके' । (५१) भु 1 भु 2 भु 3 म) वरमर्पयन्ति ।(५२) भु 5) 'वस्तुनिवहे यत्संनिषेधात्मक- (५३) म) 'मे' । (५४) भु 3) विचारकैः'इत्यस्मात्परं 'यथा' इत्यस्मात्पूर्वं च- 'वक्तव्यसमये - उक्त्यवसरप्राप्तेऽपि' इति अधिकं दृश्यते ।

टि.

☆ विश्व. सा.द. III / पृ.144.

यथा–[५५]

"दूरादागतेन कुशलं पृष्टा नोवाच सा मया किञ्चित्।
पर्यश्रुणी तु नयने तस्याः कथयाम्बभूवतुः सर्वम्॥"

अथ ललितम् –

अङ्गानां सौकुमार्येण स्थापनं ललितं विदुः।

यथा माघे – ☆

"गुरुतरकलनूपुरानुनादं
सललितनर्तितवामपादपद्मा।
इतरदनतिलोलमादधाना
पदमथ मन्मथमन्थरं जगाम॥"

अथ विक्षेपः–

भूषाणामर्धरचना वृथा विष्वग्विलोचनम्॥२६॥
रहस्यवचनं व्याजाद्विक्षेपः प्रियसंनिधौ।

यथा–

"धम्मिल्लमर्धमुक्तं कलयति तिलकं तथासकलम्।
किञ्चिद्वदति रहस्यं चकितं विष्वग्विलोकते तन्वी॥"

अथ कौतूहलम् –

रम्यद्रव्यावलोके तु चञ्चलत्वं कुतूहलम्॥२७॥

यथा रघुवंशे – ☆☆

"प्रसाधिकालम्बितमग्रपाद-
माक्षिप्य काचिद् द्रवरागमेव।
उत्सृष्टलीलागतिरागवाक्षा-
दलक्तकाङ्कां पदवीं ततान॥"

पा.टि.

---

(५५) भु 2 म) 'मे वचसा'।

टि.

☆ माघ. शिशु. VII / 18.

☆☆ कलि. रघु. VII / 7.

अथ तपनम् –

समये प्रियविच्छेदे मदनावेशसंप्लुतन् ।
५६ चेष्टितं वरवामानां कथितं तपनं वुधैः ॥२८॥

यथा – ★

५७
श्वासान्मुञ्चति भूतले विलुठति त्वन्मार्गनालोकते
दीर्घं रोदिति विक्षिपत्यत इतः क्षानां भुजावल्लरीम् ।
५८
किञ्चित्प्राणसमान ! काङ्क्षितवती स्वप्नेऽपि ते संगनं
निद्रां वाञ्छति न प्रयच्छति पूनर्दग्धो विधिस्तामपि ॥

अथ केलिः –

५९
विहारोचितकाले तु सह कान्तेन मोदितम् ।
क्रीडितं केलिरित्युक्ता भव्यकाव्यविचक्षणैः ॥२९॥

यथा भारवौ – ★★

'व्यपोहितुं लोचनतो मुखानिलै-
रपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मना:
६० प्रियं जघानोन्नतपीवरस्तनी ॥"

इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायणदेवमहाराज-विद्वत्सभाराजित-प्रबन्धकविताप्रकाशक-करणकुलसम्भव-कविभिषग्वर-वासुदेवपात्रतनय **श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ भावादिसहजालङ्कारनिरूपणं नाम षष्ठ किरणः ।**

पाटि.

(५६) भु 1 भु 2 भु 4) 'यथामृके' । (५७) भु 4) 'स्वामिन्' ।
(५८) भु 4) 'चेत्संगमम्' । (५९) भु 5) 'प्रोदितम' । (६०) भु) इति श्रीमत्खि
तनय श्रीमद्गोपीनाथ' इत्यस्य स्थाने 'इति गोपीनाथ' इति ।

टि.

★ विश्व. सा.द. III / पृ.147. ★★ भार. किरा. VIII / 19

◆

[सप्तमः किरणः]

अथ मुग्धाकन्ययोरनुरागेंगितानि –

ईक्षिता व्रीडिता नैव[१] संमुखं पश्यति प्रियम् ।
त्यक्तपार्श्वं भ्रमन्तं वा प्रच्छन्नं चैव पश्यति ॥१॥
वारं वारं पृच्छ्यमाना स्वल्पं स्वल्पमधोमुखी ।
सगद्गदं वचो ब्रूते कान्तं प्रायेण[२] सस्मितम्[३] ॥२॥
परैरापादितां शश्वदाकर्णयति तत्कथाम् ।
सावधानान्यदत्ताक्षी[४] बाला कान्तेऽनुरागिणी ॥३॥

अथ सकलानामपि नायिकानामनुरागेंगितानि[५] –

प्रियान्तिके दीर्घकालावस्थितिं बहुमन्यते ।
प्रियनेत्रपथं नैव यात्यलंकारवर्जिता ॥४॥
केशोत्तरीयसंबन्धच्छद्मतः कापि दर्शयेत् ।
कक्षं स्तनौ तथा नाभिकमलं प्रस्फुटं पुनः ॥५॥
सेवकानस्य वागाद्यैराश्वासयति नित्यशः ।
तन्मित्रादिषु विश्वासं बहुमानं करोत्यलम् ॥६॥
सखीषु तद्गुणान् ब्रूते ददाति[६] च निजं धनम् ।
प्रिये निद्रागते सैव[७] स्वपित्येषा[८] प्रियानुगा ॥७॥

पा.टि.

(१) भु 4) 'चैव' । (२) भु 2 भु 4) 'प्रियेण' । (३) भु 2) 'संमतम्' ।
(४) भु 5) 'न्यवद्भाषी' । (५) भु 1 भु 2 भु 4 भु 5) 'संगेंगितानि' ।
(६) भु 5. म) 'दत्ते स्वकीयकं धनम्' । (७) भु 2) 'चैव' ।
(८) भु 1 भु 2 भु 4) 'स्वापमाना' ।

सुखेऽस्य सुखमाप्नोति दुःखे दुःखमुपैति च ।
शश्वन्निरीक्षिता सद्यः [९]प्रियदृष्टिपथे स्थिता ॥८॥
[१०]आलपन्ती परिजनान् संमुखं विकृतस्वरा
समीक्ष्य वस्तु यत्किञ्चित् हसितं कुरुते [११]मुधा ॥९॥
तथा कण्डूयते कर्णं केशमोचन[१२]बन्धने ।
जृम्भाङ्गस्फोटनं तद्वच्चुम्बत्याश्लिष्य बालकम् ॥१०॥
सखीललाटे तिलकं रचयेत्कौतुकात्तथा ।
[१३]पादाङ्गुष्ठाग्रभागेन [१४]कटाक्षैर्लिखतीक्षते ॥११॥
दशति स्वाधरं चापि ब्रूते [१५]कान्तं न संमुखी ।
न जहाति च तं देशं यस्मिन् देशे स्थितः प्रियः ॥१२॥
केनचित् छद्मना तस्य गृहमायाति वीक्षिता ।
[१६]प्रियेण विहितं किञ्चिद्वीक्षतेऽङ्के धृतं पुनः ॥१३॥
तत्सङ्गन्निरतं दृष्ट्वा वियोगान्मलिना कृशा ।

पाटि...

(९) भु 5 म) 'प्रिये दृष्टि' । 'स्थिते' ।
(१०) भु 5) ''आभाषते परिजनं संमुखं स्वरविक्रियम् ।''
(११) भु 1.2 म) 'मुषा' । (१२) भु 4) 'बन्धनम्' ।
(१३) भु 5) त्तथा' इत्यस्मात् परं 'पादाङ्गु' इत्यस्मात् पूर्वं च-
अङ्गुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते । इति अधिके दृश्यते ।
(१४) भु 4) 'लक्षितीते' । भु 5) 'लक्षितोगते' । म) 'लक्षितोक्षते' ।
(१५) भु 5) 'कान्तमधोमुखी' । (१६) भु 3 भु 4) 'निहितं प्रेमोद्' ।
भु 5) 'दत्तं किमपि कान्तेन धृत्वाऽङ्के मुहुरीक्ष्यते' ।

[१७]तस्य प्रियस्य भावं च गृहणति बहुसत्कृतम् ।।१४।।
याचते स्तोकमूल्यानि सुप्ता न परिवर्तते ।
[१८]संमुखी सात्त्विकान् भावान् [१९]विदधात्यस्य चाग्रत: ।।१५।।
सत्यं प्रियं चिक्कणं च भाषतेऽत्यनुरागिणी ।
एतेषु नवकान्तायाश्चेष्टा: [२०]स्युर्बहुलत्रपा: ।।१६।।
[२१]मध्याया मध्यमव्रीडा: स्खलितव्रीडितानि तु ।
अन्यस्त्रिया: प्रगल्भाया [२२]एतावद्वारयोषित: ।।१७।।

दिङ्मात्रं यथा साहित्यदर्पणे –★

"[२३]अन्तिकगतमपि मामियमवलोकयन्तीव हन्त दृष्ट्वापि ।
सरसनखलक्ष्मलक्षितमाविष्कुरुते भुजामूलम् ।।"

अपि च ग्रन्थान्तरे –

"स्निग्धं दृष्टिपथं विभूषिततनु: कर्णस्य कण्डूयनं
केशानाञ्च [२४]मुहुर्मुहुर्विसरणं वार्तापि सख्या सह ।

पा.टि...

(१७) भु 3 भु 4 भु 5 म) 'प्रियभावं रसाभीष्टं' ।
(१८) भु 5) "विकारान् सात्त्विकानस्य संमुखी नाधिगच्छति" ।
(१९) भु 3) विदधाति तदग्रत: । भु 4 म) विदधास्यति चाग्रत: ।
(२०) भु 3) 'स्युर्विपुलत्रपा' । (२१) भु 5) 'मुग्धाया' ।
(२२) भु 1) 'एतर्थद्वार' । भु 2) 'एतद्ववार' । भु 5) 'स्तथा स्यु: वार' ।
म) 'तद्वत्त्व वार' । (२३) भु 2 भु 4 म) 'मामिव' ।
(२४) भु 5) 'निरूपयन्' ।

★ वि. साद. III / पृ. 153.

नाभेर्दर्शनमुत्पथेन गमनं बालस्य चालिङ्गनं[२५]
कुर्युः प्रेमभरालसा युवतयो दृष्ट्वा नरं वाञ्छितम् ॥"

किं च –

लेखसम्प्रेषितैः स्निग्धप्रेक्षणैर्मृदुलोक्तिभिः ।
दूतीप्रस्थापनैः स्त्रीणां भावाभिव्यक्तिरिष्यते ॥१८॥

दूत्यश्च –

सखी धात्री नटी दासी तथा च प्रतिवेशिनी ।
बाला परिव्राजिकापि रजकी चित्रकारिणी ॥१९॥
ताम्बूलिनी गान्धिकस्त्री नापिताद्याः स्वयं तथा ।

तत्र सखी यथा –[२६] ★ 'श्वासान्मुञ्चति' इत्यादि ।

स्वयंदूती यथा –

"इयं सुरतरङ्गिणी न पुनरत्र नौसङ्गमो
भवत्तरणिमज्जनं पथिक नात्र भीतिं भज[२७] ।
निधाय हृदि निर्भरं विपुलचारुकुम्भद्वयं
स्वनद्घनघनागमे घनरसस्य पारं व्रज ॥"

एता दूत्यश्च नायिकाविषये नायकानामपि दूत्यो भवन्ति ।

पा.टि...

(२५) म) 'चालिङ्गितम्' । (२६) म) 'यथा श्वासान्मुंचति इत्यादि' नोपलभ्यते ।
(२७) भु 2) 'त्यज' । भु 3.4) 'व्रज' ।

टि.

★ विश्व. सा.द. III / पृ. 147.

दूतीगुणानाह –★

"कलाकौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः ।
माधुर्यं नर्मविज्ञानं वाग्मिता चेति तद्गुणाः" ॥२०॥

एता दूत्योऽपि यथौचित्यमुत्तमाधममध्यमा इति त्रिविधा भवन्ति ।

२८

इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायणदेवमहाराज-विद्वत्सभाराजित-प्रबन्धकविताप्रकाशक-करणकुलसम्भव-कविभिषग्वर-वासुदेवपात्रतनय-**श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ अनुरागेङ्गितादिनिरूपणं नाम सप्तमः किरणः ।**

पा.टि...

(२८) भु 5) इति श्रीमखिमुण्डि....श्रीमद्गोपीनाथ' इत्यस्य स्थाने 'इति गोपीनाथ' इति ।

टि.

★ तत्रैव III / 129-30 पृ.155.

□□□

[अष्टम: किरण:]

अथालम्बनविभावानन्तरमुद्दीपनविभावा:– ते च-

आलम्बनगता रूपालङ्कारेच्छादयस्तथा ॥१॥

यथा मम –

सुगन्धाढ्यो वात: सजलजलदश्चन्द्रचपले
लसत्सन्ध्याराग: कुसुमवसने भूषणफले ।
शरद्रात्रिर्वीणा मुरजमुरलीवादनरुचि-
र्वसन्तादि: काल: कुसुमितवनं तारककुलम् ॥२॥

किं च –

कर्पूरं गीतगानं मृगमद[१]तटिनीनर्तना[२]न्यङ्गहार: [३]
सौधो देवालयादिर्मुकुरमणिखगारावरवासान्तरम्या: ।
आलाप: कोकिलानां शुककलवचनं भृङ्गझङ्कारनादा
इत्याद्युद्दीपनं स्याद्बुधनसरसी कामिनी चारुरूपा ॥३॥

तत्र चन्द्रोदयो यथा साहित्यदर्पणे –★

“करमुदयमहीधरस्तनाग्रे
गलिततम:पटलांशुके[४] निवेशय ।

पा.टि.

(१) भु 5) ‘मृगमद’ इत्यस्मात् परम् ‘आलाप:’ इत्यस्मात् पूर्वं च ग्रन्थभागो न दृश्यते । (२) भु 1 भु 2 भु 4) ‘नर्तिता’ । (३) भु 1) ‘वासन्त्रतम्य:’ । भु 2) ‘वासन्त्रतम्ब:’ । भु 3) ‘वासन्तढम्य:’ । भु 4) ‘वासन्तचास्त्र’ । (४) भु 1-भु 2 भु 4 म) ‘पिशलांशुके’ ।

टि.

★ विश्व. साद्र. X / पृ. 684.

विकसितकुमुदेक्षणं विचुम्ब-[५]
त्ययममरेशदिशो मुखं सुधांशुः ॥''

एवमन्येषां प्रयोगवशाज्ज्ञेयम् ।

अथानुभावाः-- साहित्यदर्पणे--★

''उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् ।
लोके यः कार्यरूपः[६] सोऽनुभावः काव्यनाट्ययोः''।।४।।

किं च –

भ्रूक्षेपादिः कटाक्षश्च कक्षमूलप्रकाशनम् ।
प्रोक्त[७] एवानुभावस्तु साहित्यग्रन्थकोविदैः[८] ।।५।।

आदिपदात् स्मितवचनेङ्गितकुचाग्रप्रकटनादयः ।

दिङ्मात्रं यथा प्रतापरुद्रयशोभूषणे[९] –★★

पाटि.

(५) भु3) 'सुधांशुः' इत्यस्मात् परम् 'एवमन्येषाम्' इत्यस्मात् पूर्वं-
यथा प्रसन्नराघवे –

अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि
स्थातुं वाञ्छति मान एष धिगिति क्रोधादिवालोहितः
उद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात्
फुल्लत्कैरवकोषनिःसरदलि श्रेणीकृपाणं शशी ॥''

इति अधिकं दृश्यते ।

(६) भु4 भु5 म) 'स्वानुभावः' । (७) भु5 म) 'उक्त' ।
(८) भु3 भु4 भु5 म) 'रसकोविदैः' ।(९) भु2) 'प्रतापरुद्रयशोभूषणे' इति नोपलभ्यते ।

टि.

★ विश्व. सा.द. III / 132 & 133 ★★ विद्या. प्र.रु. I / पृ. 45.

१०
‘‘स्मरस्मेरान् मन्दस्मितमधुरसौरभ्यसुभगान्
मनाग्व्रीडाजाड्यान् प्रणयरसकल्लोलभरितान् ।
कृतानेकस्कन्धान् मनसिजसहस्राणि सृजतः
कटाक्षान् वामाक्षी किरति परितो रुद्रनृपतिन् ॥’’

एवमन्यत् ।

अथ सात्त्विकाः – ★

‘विकाराः सत्त्वसम्भूताः सात्त्विकाः परिकीर्तिताः ।

सत्त्वं यथा प्रतापरुद्रयशोभूषणे – ★★

‘‘परगतसुखदुःखभावनया भावितान्तःकरणत्वं सत्त्वम् । ततो भवाः सात्त्विकाः ।’’

११
तेषां नामधेयलक्षणे– साहित्यदर्पणे- ●

१२
‘‘स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदश्च वेपथुः ॥६॥
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः ।’’

तत्र स्तम्भः – ●●

‘‘स्तम्भश्चेष्टाप्रतीघातो भयहर्षामयादिभिः’’॥७॥

पा.टि..

(१०) भु 2) ‘स्मरस्मेरा....................रुद्रनृपतिम्’ इति समग्रस्य पद्यस्य स्थाने ‘स्मरस्मेरान्मन्दस्मितेत्यादि’ इति ।

(११) भु 1 भु 2 भु 4 म) ‘लक्षणं’ । (१२) भु 3) ‘स्वरभङ्गोथ’ ।

टि.

★ विश्व. साद. III / 134
★★ विद्या. प्र. रु. IV/पृ.158.
● विश्व. सा.दIII/135 & 136
●● विश्व. सा.द.III /136

यथा प्रतापरुद्रयशोभूषणे – ★

"काकतिपुरन्ध्रः पश्यन्त्यो नरेन्द्रकन्दर्पम् ।
मदनशरोत्कीर्णा इव स्थिता निश्चलांग्यः ॥"

अथ स्वेदः – ★★

[१३]"वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः ।"

यथा मम –

प्रेमोत्कर्षं परमसुखदं प्रीतिदातुः प्रियस्य
श्रुत्वोदन्तं सरलहृदया स्विन्नगात्री बभूव ।
मन्ये सेयं स्मरसुखमयी [१४]मन्मथोत्तापहन्त्री
स्वच्छस्नेहोदकपरिमलैः [१५]स्नानशीलेव रम्या ॥

अथ रोमाञ्चः – ★★★

हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया ॥८॥

यथा - प्रतापरुद्रयशोभूषणे – ●

"दयितालिङ्गननिर्भरकम्पा वधूर्वियोगजीर्णाङ्गी ।
[१६]उद्गिरत्यन्तरस्थितमदनशरान् पुलकच्छद्मना ॥"

अथ स्वरभेदः – ●●

मदसम्मदपीडादेर्वैस्वर्यं गद्गदं विदुः ।

यथा मम –

बाला लीलातिलोला [१७]स्मरशरविकला वेपमाना कृशाङ्गी
पौषे तल्पेऽप्यनल्पे समुदितशयना त्यक्तवेषान्नपाना ।

पा.टि.……………………………………………………………………

(१३) भु 3) 'यथा मम' इति न दृश्यते । (१४) भु 1 भु 2) 'मन्मथोत्तापहारी' ।
(१५) भु 4) 'स्नानशीले वरंवा' । (१६) भु 1 भु 2 भु 4) 'उद्गारत्य' ।
(१७) भु 2) 'स्मरण' । भु 5) 'स्मरज्वर' ।

टि.

★ विद्या. प्र.रु. IV / पृ.169.

★★ विश्व. साद. III./137.

★★★ विश्व. साद. III./137. पृ. 158.

● विद्या. प्र.रु. IV /पृ169.

●● विश्व. साद. III./137. पृ. 158.

त्वत्सङ्गाभावदीनाऽप्रकटितवचनं भाषमाणा रुदन्ती
१८ १९ २०
मन्येऽहं कामबाणैः कमलदलदृशः कण्ठदेशो विलग्नः ।

अथ वेपथुः –★

रागद्वेषश्रमादिभ्यः कम्पो गात्रस्य वेपथुः ॥९॥

यथा – 'बाले'त्यादि ।

अथ विवर्णता –★★

"विषादमदरोषादेरन्यवर्णो विवर्णता" ।

यथा - **प्रतापरुद्रयशोभूषणे** –●

"नरनाथ ! चन्द्रधवलान् तव गुणान् साधु संस्मरन्त्याः ।
२१
अङ्गानि पाण्डुराणीदानीं जातानि श्यामायाः ॥"

अथाश्रु –★★★ २२

२३ **अश्रु नेत्रोद्भवं वारि क्रोधदुःखप्रहर्षजम् ॥१०॥**

स्फुटमुदाहरणम् ।

अथ प्रलयः–●●

प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः ।

२४
उदाहरणं मृग्यम् ।

पाटि.

(१८) म) 'नेनेऽहं' । (१९) म) 'कमलमल' । (२०) भु 4) 'कण्ठदेशाविलम्नः'

(२१) म) पाण्डुरागिणी (२२) भु 4) 'प्रहर्षणम्' ।

(२३) भु 3 भु) 'स्पष्टमुदाहरणम्' । (२४) म) 'अस्योदाहरणम्' ।

टि.

☆ विश्व. सा.द. III/ 138. ☆☆ विश्व. सा.द. III/139 ● विद्या.प्र.रु/पृ 170

☆☆☆ विश्व. सा.द. III/139 ●● विश्व. सा.द. III/140

अथ व्यभिचारिणः-- साहित्यदर्पणे -✫

विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ॥
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्भिदाः ॥११॥

के त इत्याह – ✫✫

निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोधः २५
स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्राऽवहित्थाः ।
औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसंत्रासलज्जा
हर्षासूयाविषादाः सधृतिचपलता ग्लानिचिन्तावितर्काः ।२२।

तत्र निर्वेदः –

दुःखेर्ष्यादिभ्य निर्वेदो बोधाच्च स्वावमाननम् ।
२६
श्वासवैवर्ण्यदैन्याश्रुचिन्तोच्छ्वासादिकारकः ॥१३॥

यथा प्रतापरुद्रयशोभूषणे – ✫✫✫

"सखि कर्पूरेण कृतं किं कस्तूर्या मलयजस्तिष्ठतु ।
गुणशिशिरं यशःसुरभिमानय प्रतापरुद्रमेव ॥"

किं च- २७

"मृत्पिण्डवालुकारन्ध्रपिधानरचनार्थिना
दक्षिणावर्त्तशङ्खोऽयं हन्त ! चूर्णीकृतो मया ॥"

पाटि..

(२५) भु 2) वहिस्थाः (२६) भु 2) 'दैन्याश्रीचित्तो' । भु 5) 'दैन्यास्यचित्तो' । (२७) भु 2 भु 4 म) 'मृत्पिण्डा' ।

टि. ____

✫ विश्व. सा.द. III/ 140 ✫✫ विश्व. सा.द. द्र. विश्व.सा.द III/141

✫✫✫ विद्या. प्र. रु. IV/ पृ. 171.

अथावेगः –

चित्तसंभ्रम आवेग उत्पाताद्दहनान्नृपात् ।
२८
गजाश्वशत्रुवात्यादेरिष्टानिष्टागमादपि ॥ १४ ॥

यथा प्रतापरुद्रयशोभूषणे— ✩

“निस्साणध्वनिमाकलय्य सहसा हेलाविहारोद्यतं
२९ द्रष्टुं काकतिवीररुद्रनृपतिं प्रत्यग्रकौतूहलाः ।
अर्धालंकृतमण्डनाः प्रतिपदं व्यत्यस्तभूषा जवा- ३०
दारोहन्ति सुवर्णसौधवलभीशृङ्गाणि पौरस्त्रियः ॥”

अथ दैन्यम् – ३१

अनौजस्यं भवेद्दैन्यं दुर्गतत्वादिसम्भवम् ।

यथा तत्रैव – ✩✩

“आनेतुं नरनाथं गतः खलु सखीजनो विलम्ब्यते ।
मन्मथ ! नमामि चन्द्रं शिक्षय चिरयत्वेष इति ॥”

अथ श्रमः – ३२

खेदोऽध्वगतिरत्यादेः श्वासनिद्रादिकृच्छ्रमः ॥१५॥

यथा- हनुमन्नाटके – ✩✩✩
३३
“सद्यः पुरीपरिसरेऽथ शिरीषमृद्वी
गत्वा ततस्त्रिचतुराणि पदानि सीता ।

पा.टि. ....

(२८) भु 4) ‘गजाश्वशत्रुवात्येभ्य इष्टा’ । भु 5) ‘अजाश्वशत्रुवायुभ्य इष्टा’ । म) ‘गजाश्वशत्रुवात्याभ्यः इष्टा’ । (२९) भु 2 भु 4) ‘अर्थालंकृतमण्डनाः’ (३०) भु 2 भु 4 भु 5) ‘पारस्त्रियः’ । (३१) भु 5) ‘दुःखितत्वादि’ । (३२) भु 1 भु 2 भु 4 भु 5) ‘रत्यादि’ । (३३) भु 3) ‘पुरीपरिसरेषु’ । (म) ‘पुरीपरिसरेऽपि’ ।

टि. ---

✩ विद्या प्र.रु. IV./पृ. 177 ✩✩ विद्या प्र.रु. IV./पृ. 174

✩✩✩ हनु. हनुम. III./12.

गन्तव्यमस्ति कियदित्यसकृद् ब्रुवाणा
रामाश्रुण: कृतवती प्रथमावतारम् ।"

अथ मद: –

मोहानन्दकर: ख्यातो मदो मद्योपयोगज: ।
[३४]शेतेऽमुनोत्तमो मध्यस्तथा हसति गायति ॥१६॥
अधम: परुषं भूयो वक्ति रोदिति नृत्यति ।

यथा माघे - ☆

"प्रातिभं [३५]त्रिसरकेण गतानां वक्रवाक्यरचनारमणीय: ।
गूढसूचितरहस्यसहास: सुभ्रुवां प्रववृते परिहास: ।"

अथ जडता –

जडताऽप्रतिपत्ति: स्यादिष्टानिष्टाद्युपस्थितौ ॥१७॥
तत्रानिमेषता तूष्णींभावादिरभिजायते ।

यथा - प्रतापरुद्रयशोभूषणे – ☆☆

"समायाते नाथे प्रमनसि गृहं रुद्रनृपतौ
वपु:सौन्दर्यश्री[३६]विजितमदनोदारयशसि ।
वधूरन्तस्तापव्यतिकरवशान्नोपचरितुं
पुरस्तादालीनां न चलति तथा नो विरमति ॥"

पा.टि.

(३४) भु 4) 'शेतेमुनत्तमो' ।(३५) भु 2) 'तिसरकेण'। भु 4) 'त्रिसरंकेन' । भु 5) 'भ्रान्तिभ्रंशति' । (३६) भु 2 म) 'विदितमदना-' । भु 5) 'दलितमदनो-

टि.

☆ माघ. शिशु. X/ 12

☆☆ विद्या. प्र. रु./ पृ 177

अथ औग्र्यम् –

अपराधेषु दृष्टेषु चण्डत्वमुग्रता भवेत् ॥१८॥
स्वेदस्तत्र शिरःकम्पस्तर्जनं ताडनादिकम् ।

यथा ग्रन्थान्तरे – ✩

"प्रणयसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥"

अथ मोहः –

मोहः स्यान्मूर्च्छनं दुःखादावेशादनुचिन्तनात् ॥१९॥
भ्रमणादर्शनं तत्र घूर्णना[३७] गात्रपातनम् ।

यथा कुमारसम्भवे - ✩✩

"तीव्राभिषङ्गप्रभवेण[३८] वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥"

अथ विबोधः –

विबोधश्चेतनाप्राप्तो निद्रापचयकारणात् ॥२०॥
तत्र जृम्भांगमालस्यमंगदृष्ट्यक्षिमीलनम् ।

यथा माघे – ●

'चिररतिपरिखेदप्राप्तनिद्रासुखानां
चरममपि शयित्वा पूर्वमेव प्रबुद्धाः ।
अपरिचलितगात्राः कुर्वते न प्रियाणां
प्रशिथिल(अशिथिल?)भुजचक्राश्लेषभेदं तरुण्यः ॥"

पा.टि..

(३७) भु 5) 'घूर्णनाद्' । (३८) भु 5) 'प्रसवेन' ।

टि.

✩ भव. मा.मा. V/ 31 ✩✩ कालि. कुमा. III/ 73. ● माघ. शिशु XI/ 13.

अथ स्वप्नः—

विषयानुभवः स्वप्नः प्रसुप्तस्य शरीरिणः ॥२१॥
३९
सुखदुःखभयग्लानिकोपोद्वेगादिकारकः ।

यथा मेघदूते — ☆ ४०

“मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो- ४१
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनिषु ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ।”

अथापस्मारः —

अपस्मारो मनःक्षेपो ग्रहावेशादितस्तथा ॥२२॥
४२ वेपथुस्वेदभूपातलालाफेनादिकारकः ।

यथा माघे — ☆☆

आश्लिष्टभूमिं रसितारमुच्चै र्लोलद्भुजाकारबृहत्तरङ्गम् ।
फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के ॥”

अथ गर्वः —

विद्यादिसम्भवो गर्व आत्मोत्कर्षश्च कथ्यते ॥२३॥
तत्रैवाविनयावज्ञा सविलासांगदर्शनम् ।

पा.टि.

(३९) भु 1 भु 2 भु 3 भु 4) 'दुःखसुख-' । म) 'दुःखपूर्व-' ।
(४०) भु 4) 'निर्दयाश्लेषहेतुः' । (४१) भु 4 म) 'सन्दर्शनिन' ।
(४२) भु 5) 'यथामाघे' इत्यस्मात् परम् 'अथामर्षः' (पृ 133) इत्यस्मात्पूर्वं च ग्रन्थपातः ।

टि.

☆ कालि. मेघ. II/ 43. ☆☆ माघ. शिशु. III/ 72.

यथा प्रतापरुद्रयशोभूषणे – ☆

"को वा शस्त्रग्रहणसमयो मादृशामीदृशानां
कीदृग्वैरं प्रतिधरणिभृत्खेटकीटेष्वनीषु ।
इत्यावेशप्रतिभयभुजाटोपदुर्वारगर्वाः
संक्रीडन्ते रणभुवि भटाः काकतीन्द्रस्य जेतुः ॥"

अथ मरणम् –

बुधैर्मरणमाख्यातं जीवत्यागः शरादिभिः ॥२४॥

यथा रघुवंशे – ☆☆

"राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥"

अथालस्यम् –

श्रमाद्युद्भवमालस्यं जिह्मताजृम्भणादिकृत् ।

यथा -

"न तथा भूषयत्यङ्गं न तथा भाषते सखीम् ।
जृम्भते मुहुरासीना बाला गर्भभरालसा ॥"

अथामर्षः –

स्यादमर्षोऽपराधेषु चेतःप्रज्वलनं मतम् ॥२५॥
नेत्रारुण्यशिरःकम्पभ्रूक्षेपोत्तर्जनादिकृत् ।

यथा - प्रतापरुद्रयशोभूषणे - ●

"अरे भूपाश्चापान्नमयत शिरांस्युन्नमयत
प्रवृत्ताः स्वस्त्रीणामहमहमिका वीरवरणे ।
त्वरन्ते नः खड्गाः प्रतिदलनकेल्यामिति भटा
रणाग्रे गर्जन्ति प्रकटितरिपो रुद्रनृपतेः ॥"

टि.

☆ विद्या. प्र.रु IV/ पृ. 178. ☆☆ कालि. रघु XI/ 20.

● विद्या. प्र.रु. IV/ पृ. 181.

अथ निद्रा –

चेतः संमीलनं निद्रा श्रमक्लममदोद्भवा ॥२६॥
दृङ्मलाजृम्भणोच्छ्वासगात्रभङ्गादिकारणम् ।

यथा-

"सार्थकानर्थकपदं ब्रुवती मन्थराक्षरम् ।
निद्रार्धमीलिताक्षी[४३] सा[४४] लिखितेवास्ति मे हृदि ॥"

अथावहित्था –

व्रीडाहर्षभयादिभ्य आकारगोपनञ्च यत् ॥२७॥
अवहित्थेति विख्याता कविपण्डितसत्तमैः ।

यथा कुमारसम्भवे – ☆

"एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि[४५] गणयामास पार्वती ॥"

अथौत्सुक्यम् –

यद्विलम्बासहत्वं[४६] तदौत्सुक्यं परिकल्पितम् ॥२८॥
अभीष्टार्थानवाप्तेस्तु चित्ततापत्वरादिकृत् ।

यथा – ☆☆

"यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥"

पा. टि.

---

(४३) म) 'निद्रार्धमीलिताक्षा' । (४४) भु 4) 'स्यात्' ।
(४५) भु 2) 'लीलाकमलनेत्राणि' ।
(४६) भु 5) 'यद्विलम्बासहनत्वं तदौत्सुक्यं प्रकल्पितम्' ।

टि.

☆ कालि. कुमा. VI/ 84. ☆☆ मम्म. का.प्र. I/ पृ. 17.

अथोन्मादः –

भयेन कामशोकाभ्यामुन्मादो मनसो भ्रमः ॥२९॥
हासरोदनगीताद्यस्थानप्रलपनादिकृत् ।

यथा साहित्यदर्पणे – ☆

"भ्रातर्द्विरेफ भवता [४७] भ्रमता समन्तात्
प्राणाधिका प्रियतमा मम वीक्षिता किम् ।
ब्रूषे किमामिति सखे कथयाशु तन्मे
किं किं [४८] व्यवस्यति कुतोऽस्ति च कीदृशीयम् ।"

अथ शङ्का –

[४९] स्वदोषात् परक्रूरत्वादनर्थस्यैव [५०] तर्कणम् ॥३०॥
शङ्केति कथिता प्राज्ञैस्तत्रवैवर्ण्यगद्गदम् ।
[५१] पार्श्वालोकास्यसंशोषकम्पाद्याःसर्वसम्मताः ॥३१॥

यथा – ☆☆

'प्राणेशेन प्रहितनखरेष्वङ्गकेषु क्षपान्ते
जातातङ्का रचयति चिरं चन्दनालेपनानि ।
दत्ते लाक्षामसकृदधरे दत्तदन्तावघाते
क्षामाङ्गीयं चकितमभितश्चक्षुषा विक्षिपन्ती ॥"

पा. टि. ....

(४७) भु 5) 'जगति' । (४८) भु 2) 'व्यवसितोऽस्ति' ।(४९) भु 5) 'स्वहृदोत्' । (५०) भु 5 म) 'तर्कणा' । (५१) भु 4) 'पार्श्वाल्लाकस्य संगोप' । म) 'पार्श्वलोकासंशोष' ।

टि.

☆ विश्व. सा.द. III/ पृ. 171. ☆☆ विश्व. सा.द. III/ पृ. 172.

अथ स्मृतिः –

पूर्वानुभूतविषयज्ञानं स्मरणमुच्यते ।

यथा साहित्यदर्पणे – ✩

"मयि सकपटं किंचित्क्वापि प्रणीतविलोचने
किमपि नयनप्रान्ते तिर्जग्विजृम्भिततारकम् ।
स्मितमुपगतामालीं दृष्ट्वा सलज्जमवाञ्चितं
कुवलयदलदृशः स्मेरं स्मरामि तदाननम् ॥"

अथ मतिः – ५२

नीतिमार्गानुसन्धानादर्थनिर्धारणं मतिः ॥३२॥
सन्तोषधृतिसत्कारस्मेरतादिविधायिका ।

५३

यथा शकुन्तलायाम् (शाकुन्तले? – ✩✩

"असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥"

अथ व्याधिः – ५४

मनस्तापादिसम्भूतो व्याधिर्ज्वरादिरुच्यते ॥३३॥
भूमिपातस्पृहा तत्र कम्पनादिः प्रजायते ।

स्पष्टमुदाहरणम् ।

पाटि.

(५२) भु 1 भु 2) 'नीतिमार्गादसन्धाना' । (५३) भु 1) 'नैषधीये' । भु 3 भु 5 म) 'शकुन्तलायाम्' इति नोपलभ्यते ।

(५४) भु 5) 'रुच्यते' इत्यस्मातपरं 'यथा भारवौ'(पृ137)इत्यस्मात्पूर्वं च ग्रन्थपातः ।

टि.

✩ विश्व. साद. III/ पृ.173.

✩✩ कालि. अ.श. I/ 20.

अथ त्रासः –

कम्पकृद्विद्युदुल्कादेर्निर्घातात् त्रास[५५] उच्यते ॥३४॥

यथा भारवौ – ✩

"परिस्फुरन्मीन[५६]विघट्टितोरवः सुराङ्गना[५७]स्त्रासविलोलदृष्टयः ।
उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोभनीयताम् ॥"

अथ व्रीडा –

चेतः संकोचनं लज्जा वदनानमनादिकृत् ।

यथा प्रतापरुद्रयशोभूषणे – ✩✩

"तथा समालोकनकौतुकानां
मनोरथैरभ्रपुराङ्गनानाम् ।
विलोकिते रुद्रनृपे भवन्ति
पर्यस्तपक्ष्माणि विलोचनानि ॥"

अथ हर्षः –

चित्तप्रसन्नता हर्षश्चाभीष्टा[५८]वाप्तितो मतः ॥३५॥
तत्र चैवाभिजायन्ते स्वेदकम्पाश्रुगद्गदाः ।

यथा रघुवंशे – ●

"समीक्ष्य पुत्रस्य पिता चिरान्मुखं
निधानकुम्भस्य यथैव दुर्गतः ।
मुदा शरीरे प्रबभूव नात्मनः
पयोधिरिन्दूदयमूर्च्छितो यथा ॥"

पा.टि. ....

(५५) भु 4) 'त्ताप' । (५६) भु 3,4) 'पविस्फुरन्मीन' । भु 5) 'पविस्वरन्मान' । (५७) भु 4) 'मुराङ्गनास्ताः स' । (५८) भु 1 भु 2 भु 5) 'हर्ष अभीष्टा' ।

टि.

✩ भार. किरा. VIII/ 45. ✩✩ विद्या. प्र. रु. IV/ 51. ● उपलभ्यमाने रघुवंशे पद्यमिदं नोपलभ्यते । द्र. रेवाप्रसादद्विवेदिसंपादिता कालिदासग्रन्थावली ।

अथासूया –

असूया कथिता प्राज्ञैः परोत्कर्षासहिष्णुता ॥३६॥
[५९]भ्रूभेदामर्षदोषोक्तिरोषावज्ञेंगितादिकृत् ।

यथा-

[६०]"प्रियप्रसाधितां वीक्ष्य परामन्तिकचारिणीम् ।
भ्रुवौ विभिद्य तरुणी रुषा चित्ते हृणीयते ॥"

अथ विषादः–

[६१]मनोभङ्गो विषादः स्यादुपायाभावचिन्तनैः ॥३७॥
सहायान्वेषणोच्छ्वासो निःश्वासोत्तापकारकः ।

यथा-

"हा हतोऽस्मि परित्रस्यच्चमरीचलचक्षुषीम् ।
कैरुपायैरुपेष्यामि दुराप्यां नृपनन्दिनीम् ॥"

अथ धृतिः –

ज्ञानाभीष्टागमाद्यैः स्यात् संपूर्णस्पृहता धृतिः ॥३८॥
वदनोल्लाससौहित्यप्रतिभाहासकारणम् ।

यथा -

[६२]"यदर्थमाप्तः सन्तापः कामं कामायुधैर्मया ।
सोऽपि मद्भागधेयेन प्रयातः [६३]प्रणयी गृहम् ॥"

अथ चपलता –

रागान्मात्सर्यतो [६४]द्वेषाच्चापल्यं चानवस्थितिः ॥३९॥
[६५]निन्दा स्वच्छन्दता तत्र पारुष्यमभिजायते ।

पा.टि.

---

(५९) भु 1 भु 2 भु 4) 'भ्रूभेदामर्षे दोषोक्ति । भु 5) 'भ्रूभेदामर्षहर्षोक्ति' ।
(६०) भु 2) 'प्रसादिताम्' ।
(६१) भु 2 म) 'मनोभुवो' ।
(६२) भु 1 भु 2) 'मदर्थं' ।
(६३) भु 5) 'प्रणयाद्' ।
(६४) भु 1 भु 2 भु 4) 'दोषात्' ।
(६५) भु 5) 'निज' ।

यथा – ☆

"अन्यासु तावदुपमर्दसहासु भृङ्ग
लोलं विनोदय मनः सुमनोलतासु ।
मुग्धामजातरजसां कलिकामकाले
व्यर्थं कदर्थयसि किं नवमालिकायाः ।।"

अथ ग्लानिः – ६६

सुरतश्रान्तिसन्तापक्षुत्तृष्णादिसमुद्भवा ।।४०।।

६७

कम्पनिष्प्राणतोत्साह(हानि?)कार्श्यकृद् ग्लानिरुच्यते ।

यथा- ☆☆ ६८

किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः ।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीपत्रगर्भम् ।।

अथ चिन्ता– प्रतापरुद्रयशोभूषणे -●

६९

इष्टानभिगमाद् ध्यानं चिन्ता शून्यत्वतापकृत् ।।४१।।

यथा मम–

कान्ता वसन्तसमये तव खञ्जनाक्षी ७०
शून्यैव मन्मथशरैः परिखिद्यमाना ।
कृत्वा कराम्बुजतले मुखचन्द्रबिम्बं
त्वां चिन्तिताकुलितचित्तवती बभूव ।।

पा.टि.

---

(६६) भु 2 भु 4) 'शान्त' । (६७) भु 3) 'कार्यकृद्' ।
(६८) भु 5) 'बन्धनादिपसूनम्' । (६९) भु 5) 'इष्टानभिगमादत्रम्' ।
(७०) भु 1 भु 2 भु 3 भु 4) 'परिखेदमाना' ।

टि.

☆ पद्यमिदं विकटनितम्बायाः द्र धन. दश. IV/ 33 ☆☆ भव. उ.रा. III/5

● विद्या.प्र.रु/174

अथ वितर्कः –

भवेत्तर्को विचारस्तु सन्देहाकुलमानसे ।
तत्राभिजायते चैव भ्रूशिरोऽङ्गुलिनर्तनम् ॥४२॥

यथा -“किं रुद्धः प्रियया” इत्यादि ।

एते च त्रयस्त्रिंशद्व्यभिचारिभेदा उक्ताः, तदुपलक्षणमित्याह ।

७१
रत्यादयो व्यभिचरन्त्येव यस्माद्रसान्तरे ।
७२
यो हि भावो रसावस्थः स स्थायीति निगद्यते ॥४३॥
हासो वीरेऽपि शृङ्गारे वीरे क्रोधस्तथा मतः ।
शान्ते रसे जगुप्सा तु कथिता व्यभिचारिणः ॥४४॥
स्वयंविभावनैरन्यदुन्नेयं कृतबुद्धिभिः ।

अथ स्थायिभावः –

विरोधेऽप्यविरोधेऽपि यो भावैर्नाभिभूयते ॥४५॥
स स्थायी स्याद्रसास्वादाङ्कुरकन्द इव स्फुरन् ।

अथ तद्भेदाः साहित्यदर्पणे – ✩

“रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ॥४६॥
७३
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च ।”

तत्र “संभोगविषयेच्छाविशेषो रतिः ।”

पाटि. ....

(७१) भु 4) ‘रसादयो’ । (७२) भु 5) ‘रसाविष्टः’ ।
(७३) भु 5) ‘विस्मिता चेत्थ’ ।

टि.

✩ विश्व. सा.द. III/ पृ. 183.

☆ ७४

‘‘विकृतिदर्शनादिजन्यो मनोविकासो हास:’’ ।।४७।।

●

इष्टनाशादिभिश्चेतो वैक्लव्यं शोकशव्दभाक् ।

☆☆ ७५

शत्रुकृतापकारेण मन:प्रज्वलनं क्रोध: ।।४८।।

●● ७६

कार्यारम्भेषु संरम्भ: स्थेयानुत्साह उच्यते ।

●●● ७७

रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम् ।।४९।।

☆☆☆ ७८

अर्थानां दोषदर्शनादिना गर्हणा जुगुप्सा ।

पा.टि.

(७४) भु 5) ‘मनोविकारो’ । (७५) भु 4) ‘मनसो ज्वलनम्’ ।

(७६) भु 5) ‘स्थेयादुत्साह’ । (७७) भु 5) ‘चित्तवैक्लव्यताम्’ ।

(७८) भु 1.2) ‘ग्रहणात्’ ।

टि.

☆ विद्या. प्र. रु. IV/ पृ.162.

☆☆ विद्या. प्र. रु. IV/ पृ.163.

☆☆☆ विद्या. प्र. रु. IV/ पृ.166.

● विश्‍व. सा.द. III/ पृ.183.

●● विश्व. सा.द. III/ 181 पृ. 183.

●●● विश्व. सा.द. III/ 183.

✫

अपूर्वार्थसन्दर्शनाच्चित्तविस्तारो विस्मयः ॥५०॥

✫✫

शमो वैराग्यादिना निर्विकारचित्तत्वम् ।

७९

एवं रत्यादिस्थायिभावाः प्रतापरुद्रयशोभूषणे साहित्यदर्पणे चोक्ताः ।

८०

एतेषामुदाहरणं काव्यादौ मृग्यम् ।

●

नानाभिनयसम्बन्धान् भावयन्ति रसान् यतः ।
तस्माद्भावा अमी प्रोक्ताः स्थायिसञ्चारिसात्त्विकाः ॥५१॥

८१

इति श्रीमत्खिमुण्डिमहाराज्येश्वर- गङ्गवंशावतंस- वीरश्रीगजपति-जगन्नाथनारायणदेवमहाराज- विद्वत्सभाराजित- कविताप्रबन्धप्रकाशक- करणकुलसंभव-कविभिषग्वर- वासुदेवपात्रतनय- **श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ उद्दीपनविभावानुभावसात्त्विकव्यभिचारिस्थायिभावनिरूपणं नाम अष्टमः किरणः ।**

पा.टि. ....

(७९) भु 1 भु 3 भु 5 म) 'भावम्' । (८०) भु 4. भु 5 म) 'ज्ञेयम्' ।
(८१) भु 5) 'श्रीमत्खिमुण्डि'.......इत्यस्मादारभ्य 'पात्रतनय- इत्यन्तं यावत् ग्रन्थभागो नोपलभ्यते ।

टि.

✫ विद्या. प्र. रु. IV/ पृ.166. ✫✫ विद्या. प्र. रु. IV/ पृ.167.

● विश्व. सा. द.III/ 181. पृ. 184.

* * *

[नवमः किरणः]

अथ शृङ्गाररसस्वरूपं निरूप्यते[१] । साहित्यदर्पणे –☆

“शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः[२] ।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते ॥१॥
स्थायिभावो रतिः श्यामवर्णोऽयं विष्णुदैवतः ॥”

अस्मिन् रसे औग्र्यमरणालस्यजुगुप्साव्यभिचारिभिर्विना सर्वेऽपि[३] सम्भवन्ति ।

यथा- ☆☆

“शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैरि” त्यादि ।

“अत्र उक्तस्वरूपः पतिः उक्तस्वरूपा बाला च आलम्बनविभावौ । शून्यं वासगृहमुद्दीपनविभावः । चुम्बनमनुभावः । लज्जाहासौ व्यभिचारिणौ । एतैरभिव्यक्तः सामाजिकरतिभावः शृङ्गाररसरूपतां भजते ।”

तद्भेदानाह –

विप्रलम्भश्च सम्भोग इत्येवं स द्विधो मतः[४] ॥२॥

तत्र-

यत्र तु प्रकृष्टा रतिरभीष्टं नोपैति स विप्रलम्भशृङ्गारः ॥

अभीष्टपदेन नायकं नायिकां वा । स च विप्रलम्भशृङ्गारः पूर्वराग- मान-प्रवास-करुणात्मकश्चेति चतुर्विधः ।

पा.टि.

(१) भु 1 भु 2) ‘उच्यते’ ।
(२) भु 1 भु 5 म) ‘कारणम्’ ।
(३) भु 5) ‘सत्त्वेऽपि’ ।
(४) भु 2 भु 4) ‘द्विविधोमतः’ ।

टि.

☆ विश्व. सा.द.III/ 183&186 पृ.185&186. ☆☆ अमरु. अ. श./ 82.

तत्र पूर्वरागः—

श्रवणाद् दर्शनाद् यूनोरन्योन्यायत्तचित्तयोः ।
परस्परानुपगमे पूर्वरागोऽभिजायते ॥३॥

साहित्यदर्पणे -- ✩

[५]— श्रवणं तु भवेत्तत्र दूतवन्दिसखीमुखात् ।
इन्द्रजाले च चित्रे च साक्षात्स्वप्नेऽपि[६] दर्शनम् ॥४॥

श्रवणं यथा- स्पष्टम् । तत्र दर्शनेष्विन्द्रजालदर्शनम्-

यथा — ✩✩

"कथमीक्षे कुरङ्गाक्षीं साक्षाल्लक्ष्मीं मनोभुवः ।
इति चिन्ताकुलः कान्तो निद्रां नैति निशिथिनीम् ॥"

अत्र कस्याश्चिन्नायिकाया इन्द्रजालदर्शनेन प्ररूढरागस्य[७] नायकस्य चिन्ता[८] हृदये जाता ।

चित्रदर्शनं यथा रसमञ्जर्याम्—✩✩✩

[९] नीवीं हरेदुरसिजं विलिखेन्नखेन
दन्तच्छदं च दशनेन दशेदकस्मात् ।
इत्थं पटैर्विलिखितं दयितं विलोक्य
बाला पुरेव न जहार विहारशङ्काम् ॥

पा.टि.

---

(५) भु 5) 'श्रवणात्' । (६) भु 5) 'स्वप्ने च' । (७) भु 2) 'प्रगूढरागस्य' (८) भु 1 भु 2 भु 3) 'चिन्ताहृदयो जातः' । भु 4) 'चित्राद् हृदयो जातः' । भु 5) 'चिन्ता हृदये जातः' । (९) भु 5) 'नीविजां हरन्नुरसिजं' ।

टि.

✩ विश्व. सा.द. III/189 पृ.187. ✩✩ विश्व. सा.द. III/पृ.189

✩✩✩ भानु. र. म./ 45.

साक्षाद्दर्शनं यथा तत्रैव -☆

‘‘चेतश्चञ्चलतां त्यज, प्रियसखि व्रीडे न मां पीडय,
भ्रातर्मुञ्च दृशौ निमेष भगवन् काम क्षणं क्षम्यताम्[१०]
बर्हं मूर्धनि कर्णयोः कुवलयं वंशं दधानः करे
सोऽयं लोचनगोचरो भवति मे दामोदरः सुन्दरः ॥’’

स्वप्नदर्शनं यथा– ☆☆

‘‘मुक्ताहारं न च कुचगिरेः कङ्कणं नैव हस्तात्
कर्णात्स्वर्णा[११]भरणमपि वा नीतवान्नैव तावत्[१२]।
अद्य स्वप्ने वकुलमुकुलं भूषणं संदधानः [१३]
कोऽयं चौरो हृदयमहरत् तन्वि तन्न प्रतीमः ॥’’

अथ दशावस्थाः –

पूर्वरागे दशावस्था जायन्तेऽपि क्रमादिमाः ।
अभिलाषश्च चिन्ताथ स्मृतिस्तद्गुणकीर्तनम् ॥५॥
उद्वेगोऽथ प्रलापश्चोन्मादव्याधी जडत्वकम् ।
मृतिरित्यत्र कामोत्थाः प्रकीर्त्यन्ते दशा दश ॥६॥

अथाभिलाषचिन्तालक्षणम्-

[१४]स्पृहाभिलाषश्चिन्ता तत्राप्त्युपायादिचिन्तनम् ।

पा.टि.

(१०) भु 1) ‘क्षणक्षाम्यताम्’। (११) भु 1 भु 2 भु 4 म) ‘कर्णस्वर्णा’। (१२) म) ‘तादृक्’। (१३) भु 5) ‘तन्नैव विदुः’। (१४ भु 4) ‘स्मृत्वाभिलाष’। भु 5) ‘तत्र संगमेच्छाभिलाष’।

टि.

☆ भानु. र. म./ 136 ☆☆ तत्रैव /134

तत्राभिलाषो यथा रसमञ्जर्याम् –☆ [१५]

"तस्यां तु तनुसरस्यां चेतो नयनं च निष्पतितम् ।
चेतो गुरु विनिमग्नं लघु नयनं सर्वतो भ्रमति ॥"

[१६]

चिन्ता – यथा –☆☆ 'कथमीक्षे कुरङ्गाक्षीमि' त्यादि ।

स्मृतिलक्षणम्– स्पष्टम् ।

उदाहरणम् -● "मयि सकपटमि" त्यादि ।

गुणकीर्तनलक्षणम्– स्पष्टम् ।

उदाहरणम् –●● 'नेत्रे खञ्जनगञ्जने' इत्यादि ॥

उद्वेगलक्षणम्– स्पष्टम् ।

उदाहरणम् -✪ 'श्वासान्मुञ्चती' त्यादि ।

अथ प्रलापः –

प्रलापोऽलक्ष्यवचनं चित्तभ्रमणसम्भवम् ॥७॥

यथा कुमारसम्भवे -✪✪

"त्रिभागशेषासु निशासु च क्षणं
निमील्य नेत्रे सहसा व्यबुध्यत ।
क्व नीलकण्ठ व्रजसीत्यलक्ष्यवा-
गसत्यकण्ठार्पितबाहुबन्धना ॥"

अथोन्मादः–

योऽपरिच्छेद उन्मादश्चेतनेऽचेतनेऽपि वा ।

यथा– 'भ्रातर्द्विरेफ' इत्यादि ।

अथ व्याधिः–

पाण्डुता श्वासकार्श्यादिः कविभिर्व्याधिरुच्यते ॥८॥

स्पष्टमुदाहरणम् ।

पा.टि. (१५) भु 4) 'निष्पेषितम्' । (१६) भु 4) 'कमनीयेषु कुरङ्गाक्षी' ।

टि.

☆ भानु. र. म/ 124. ☆☆ विश्व. सा.द. III/ पृ. 189. ● तत्रैव./पृ. 173
●● विश्व. सा.द. III/ पृ. 115. ✪ विश्व. साद. III/ पृ. 147 ✪✪ कालि. कुमा. V/57.

अथ जाड्यम् – १७

विहीनचेष्टता जाड्यमङ्गानां मनसोऽपि च ।

अस्योदाहरणं स्पष्टम् ।

अथ मरणम् – १८

मरणं वर्ण्यते नैव रसभङ्गस्य कारणात् ॥९॥
१९ २०
जातप्रायं तु तद्वाच्यं चित्ताभिवाञ्छितं तथा ।
शीघ्रं प्रत्युज्जीवनं तद्वर्णनीयं कवीश्वरैः ॥१०॥

जातप्रायं यथा साहित्यदर्पणे– ✩

"शेफालिकां विदलितामवलोक्य तन्वी
प्राणान् कथञ्चिदपि धारयितुं प्रभूता ।
आकर्ण्य सम्प्रति रुतं चरणायुधानां
किं वा भविष्यति न वेद्मि तपस्विनी सा ॥"

चित्ताभिवाञ्छितं यथा साहित्यदर्पणे – ✩✩

"रोलम्बाः परिपूरयन्तु हरितो झङ्कारकोलाहलै-
र्मन्दं मन्दमुपैतु चन्दनवनीजातो नभस्वानपि ।
माद्यन्तः कलयन्तु चूतशिखरे केलीपिकाः पञ्चमं
प्राणाः सत्वरमश्मसारकठिना गच्छन्तु गच्छन्त्वमी ॥"

प्रत्युज्जीवनं यथा–

त्वद्वियोगज्वरार्तायाः प्राणा अपगता अपि । २१
त्वां दैवात्प्राप्तमालक्ष्य निवर्तन्ते कथंचन ॥

पा.टि.

(१७) भु 4) 'जाड्यमङ्गनानामनिषोऽपि च' । (१८) भु 5) 'स्वरभंगस्य' ।
(१९) भु 5) 'कान्ताप्रायं' । (२०) भु 2 भु 4) 'चेतसा कांक्षितम्' ।
(२१) भु 4) 'कदाचन' ।

टि.

✩ विश्व. साद. III/ पृ. 191. ✩✩ तत्रैव. III/ 191.

अपि च-

प्रथमे जायते चिन्ता द्वितीये द्रष्टुमिच्छति ।
तृतीये दीर्घनि:श्वासश्चतुर्थे [२२]ज्वरमाविशेत् ।।११।।
पञ्चमे दहते गात्रं षष्ठे भुक्तं न रोचते ।
सप्तमे च [२३]भवेत् कम्प उन्मादश्चाष्टमे भवेत् ।।१२।।
नवमे प्राणसन्देहो दशमे जीवितं त्यजेत् ।
[२४]आदौ रागो नायिकाया: कथित: कविसत्तमै: ।।१३।।
नायकस्यैव तद्राग: पश्चादुक्तस्तदिंगितै: ।
नीली कुसुम्भं मञ्जिष्ठा पूर्वरागो भवेत् त्रिधा ।।१४।।

तत्र नीलीराग:–

मनोगतं तु यत्प्रेम नापैति नातिशोभते ।
[२५]तन्नीलीराग: कथितो यथा श्रीरामसीतयो: ।।१५।।

पा.टि.

(२२) म) 'ज्वरमादिशेत्' । (२३) भु 2) 'लभेत्' ।

(२४) भु 3 भु 4 भु 5 म) 'आद्यौ....स्तदिंगितै:' इत्यस्य समुदायस्य स्थाने "साहित्यदर्पणे– आदौ वाच्य: स्त्रिया: राग: पश्चात्पुंसस्तदिङ्गितै: । आदौ पुरुषानुरागे सम्भवत्यपि । एवमधिकं हृदयंगमता भवति ।।" इति दृश्यते ।

(२५) भु 3 भु 4 भु 5 म) तन्नीलीराग:.... श्रीरामसीतयो:' इत्यस्य स्थाने

"तन्नीलीरागमाख्यान्ती कोविदै: काव्यकारकै: ।
यथा- श्रीरामसीतयो: । यथा च-
त्वयि यत्प्रेम मे धात्रा कामेनापि समर्पितम् ।
नातिरेकि न चाप्येतत् जीविते बत नंक्ष्यति ।"

इति दृश्यते परं तु भु 5) पाठे स नीलीराग: आख्यात, म) पाठे तन्नीलीराग माख्यातम्' इति च दृश्येते ।

अथ कुसुम्भरागः –

कुसुम्भरागः स ख्यातो यन्नापैति च राजते ।

२६

उदाहरणं मृग्यम् ।

२७

अथ मञ्जिष्ठारागः –

हृदयस्थं तु यत् प्रेम नापयात्यतिशोभते ॥१६॥
मञ्जिष्ठाह्वयरागः स्यात् श्रीराधाकृष्णयोर्यथा ।

अथ मानः –

मानः कोपो बुधैरुक्तः स द्विधा रसवेदिभिः ॥१७॥
प्रणयोत्पत्तिरीर्ष्योत्थमानस्तु कथितो मया ।

तत्र प्रणयमानः –

यो मानो नायिकायाश्च नायकस्याप्यहेतुकः ॥१८॥
स तु प्रणयमानः स्यात्प्रमोदे महति स्थिते ।
उभयोरपि मानस्तु प्रणयाख्यो भवेत्ततः ॥१९॥

तत्र नायिकायाः प्रणयमानो यथा - मृग्यम् ।

पा.टि.

(२६) भु 3 भु 4 भु 5 म) 'उदाहरणं मृग्यम्' इत्यस्य स्थाने "यथा-
त्वद्दर्शनभवं प्रेम मामकीनं तनूदरि !
नवं नवमिवोन्मील्य हन्त नैवान्तमेष्यति ।" इति ।

(२७) भु 3 भु 4 भु 5 म) अथ मञ्जिष्ठारागः....र्यथा' इत्यस्य स्थाने
"अथ मंजिष्ठारागः– साहित्यदर्पणे–
मंजिष्ठारागमाहुस्तं यन्नापैत्यतिशोभते ।
यथा - श्रीराधाकृष्णयोः प्रेम यदाशैशवमर्जितम् ।
परिपुष्टं परिपाट्या तदद्भुतमुदञ्चति ॥" इति ।

नायकस्य यथा- २८ ●

अलीकप्रसुप्तक विनिमील्य छदौ मध्यत आसम् (?)
(अलीकप्रसुप्तक निमीलिताक्ष देहि सुभग मह्यमवकाशम्?)
गण्डपरिचुम्बनात्[२९] पुलकिताङ्ग न पुनश्चिरयिष्यामि[३०] ।

उभयोर्यथा-

"प्रणयकुपितयोर्द्वयोरपि अलीकप्रसुप्तयो[३१]र्मानयुक्तयोः[३२] ।
निश्चलनिरुद्धनिःश्वासदीर्णकर्णयोः[३३] को मल्लः ॥"

यदानुनयपर्यन्तमप्ययं नावतिष्ठते ।
तदा न विप्रलम्भस्य भेद इत्यभिगण्यते[३४] ॥२०॥
लभते किं तु संभोग ईर्ष्याख्यव्यभिचारिताम्[३५] ।

[३६] **यथामरुके** – ☆

"भ्रूभेदे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते ।
कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते
दृष्टेर्निर्वहणं भविष्यति कथं मानस्य तस्मिन् जने ॥"

पा.टि.

---

(२८) भु 5) 'अलीकप्रसुप्ता' । (२९) भु 2) 'गण्डपरिचुम्बिताङ्क' ।
(३०) भु 1 भु 3 भु 5 म) 'पुनश्चिरायिष्यसे' । (३१) भु 2) 'अलीक्सुप्तयो' ।
(३२) भु 4) 'स्रयोः' । (३३) भु 2) 'दीर्घकर्णयो' । भु 5) 'निःश्वासयोर्विवर्णयोः कोमलयोः' । (३४) भु 3 भु 4 भु 5) 'गम्यते' । (३५) म) 'चारिणम्' ।
(३६) भु 3 भु 4 भु 5 म) 'अमरुके' इति नास्ति ।

टि.

☆ अमरु. अ.रा. / 28. ● विश्व. सा.द. /पृ

अथ ईर्ष्यामानः-- साहित्यदर्पणे –☆

पत्युरन्यप्रियासङ्गे दृष्टेऽथानुमिते श्रुते ॥२१॥
ईर्ष्यामानो भवेत् स्त्रीणां तत्र त्वनुमितिस्त्रिधा ।
उत्स्वप्नायितभोगाङ्क[३७]गोत्रस्खलनसम्भवा[३८] ॥२२॥

दृष्टे यथा माघे –☆☆

"विनयति सुदृशो दृशः परागं
प्रणयिनि कौसुममाननानिलेन ।
तदहितयुवतेरभीक्ष्णमक्ष्णो-
र्द्वयमपि रोषरजोभिरापुपूरे ॥"

उत्स्वप्नायितानुमानसम्भवमानः-- स्पष्टः[३९] ।

सम्भोगचिह्नेनानुमितो यथा- माघे –☆☆☆

"नवनखपदमङ्गं गोपयस्यंशुकेन
स्थगयसि[४०] मुहुरोष्ठं पाणिना दन्तदष्टम् ।
प्रतिदिशमपरस्त्रीसङ्ग[४१]शंसी विसर्पन्
नवपरिमलगन्धः केन शक्यो वरीतुम् ॥"

एवमन्यत् ।

अथ मानभंगषडुपायाः– साहित्यदर्पणे –●

साम भेदोऽथ दानं च नत्युपेक्षे रसान्तरम् ।
तद्भङ्गाय पतिः कुर्यात् षडुपायानिति क्रमात् ॥२३॥

पा.टि.

(३७) भु 1 भु 4 म) भोगाङ्ग' ।(३८) भु 4 भु 5 म) 'सम्भवा:' ।(३९) म)'स्पष्टम्' (४०) भु 4) 'स्थगयति मुदुरोष्ठं' । (४१) भु 5) 'सङ्गपि' ।

टि.

☆ विश्व. सा.द. III/ पृ 196

☆☆ माघ. शिशु. VII/ 57.

☆☆☆ तत्रैव XI/ 34.

● विश्व. साद. III/ पृ. १९८.

☆ "तत्र प्रियवचः साम भेदस्तत्सख्युपार्जनम् ।
दानं व्याजेन भूषादेः पादयोः पतनं नतिः ॥२४॥
सामादौ तु परिक्षीणे स्यादुपेक्षावधीरणम्[४२] ।
रभसत्रासहर्षादेः कोपभ्रंशो रसान्तरम् "॥२५॥

यथा – ☆☆ 'नो चाटु श्रवणे कृतम्' इत्यादि ।

अत्र सामादयः पञ्च सूचिताः । रसान्तरं तूह्यम्[४३] ।

अथ प्रवासः - साहित्यदर्पणे – ●

"प्रवासो भिन्नदेशित्वं कार्यात् शापाच्च सम्भ्रमात् ।
तत्रांगचेलमालिन्यमेकवेणीधरं शिरः ॥२६॥
निःश्वासोच्छ्वासरुदितभूमिपातादि जायते ।"

किं च- "अंगेष्वसौष्ठवं तापः पाण्डुता कृशतारुचिः ॥२७॥
अधृतिः स्यादनालम्बस्तन्मयोन्मादमूर्च्छनाः[४४] ।"
पूर्वानुभवजा ज्ञेया दशा स्मरदशा इह ॥२८॥

तत्र - "असौष्ठवमनायत्ति[४५](असौष्ठवं मलापत्ति?)स्तापस्तु विरहज्वरः[४६] ।
अरुचिर्वस्तुवैराग्यं सर्वत्रारागिताऽधृतिः ॥२९॥
अनालम्बनता चापि शून्यता मनसः स्मृता ॥"
तन्मयत्वं तत्प्रकाशो बाह्याभ्यन्तरतस्तथा ॥३०॥

शेषं स्पष्टम् ।

पा. टी.

(४२) भु 4 भु 5 म) 'वधारणम्' ।
(४३) म) 'रसान्तरमूह्यम्' ।
(४४) म) 'स्यादनलम्बतनयो' ।
(४५) भु 5) 'मनायत्त' ।
(४६) म) 'स्तापस्तद् विरहो ज्वरः' ।

टि.

☆ विश्व. सा.द. III/ पृ. 198. ☆☆ तत्रैव III/ पृ.129. ● तत्रैव III/ पृ. 199.

एकदेशतो यथा साहित्यदर्पणकारोदाहृति : –✩

"चिन्ताभिः स्तिमितं मनः करतले लीना कपोलस्थली
४८
प्रत्यूषक्षणदेशपाण्डु वदनं श्वासैकखिन्नोऽधरः ।
अम्भःशीतलपद्मिनीकिशलयैर्नोपैति तापः शमं
४९ ५०
कोऽस्याः प्रार्थितदुर्लभोऽस्ति सहते दीनां दशामीदृशीम् "॥

भावी भवन् भूत इति त्रिधा स्यात्तत्र कार्यजः ।

तत्र भावी यथा साहित्यदर्पणे –✩✩

"यामः सुन्दरि याहि पान्थ दयिते शोकं वृथा मा कृथाः
शोकस्ते गमने कुतो मम ततो वाष्पं कथं मुञ्चसि ।
शीघ्रं न व्रजसीति, मां गमयितुं कस्मादियं ते त्वरा
भूयानस्य सह त्वया जिगमिषोर्जीवस्य मे सम्भ्रमः ॥

भवन् यथामरुके –●

"प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चलचेतसि प्रियतमे सर्वैः समं प्रस्थितं
गन्तव्ये सति जीवित प्रियसुहृत्सार्थः किमुत्सृज्यते "॥

भूतो – यथा ✪ "चिन्ताभिः स्तिमितम्" इत्यादि ।

शापाद्यथा –●●– "तां जानीयाः परिमितकथाम्" इत्यादि ।

पा.टि.

(४८) भू 4) 'प्रत्यूषक्षेण' (४९) म) 'सहतेदानीम्' (५०) भू 4) 'मादृशीम्'

टि.

✩ विश्व. सा.द. ।।।/ पृ. 200 ✩✩ विश्व. सा.द. ।।।/ पृ. 200

✪ विश्व. सा.द. ।।।/ पृ. 200 ● अमरु. अ.श./ 35 ●● कालि. मेघ. ।।/ 20

सम्भ्रमः – ५१

सम्भ्रमो दिव्यमानुष्यनिर्घातोत्पातनादिजः ।।३१।।

मृग्यमुदाहरणम् ।

अथ करुणविप्रलम्भः-- साहित्यदर्पणे --▲ ५२

यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये ।
विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भाख्यः ।।३२।।

५३

यथा रसतरङ्गिण्याम् --✩

'प्रिये जीवादभिन्नासीत्येव मिथ्या गिरा मया ।
✩✩
५४ त्वन्नाशे जीवितेदानी (जीवतेदानी?) मनुरागः स्फुटीकृतः ।"

सम्भोगश्च साहित्यदर्पणे –●

दर्शनस्पर्शनादीनि निषेवेते विलासिनौ ।
यत्रानुरक्तावन्योन्यं स सम्भोग उदाहृतः ।।३३।।

५५

आदिपदादन्योन्याधरपानचुम्बनादयः ।

यथा-'शून्यं वासगृहम्' - इत्यादि ।

किञ्च –

चुम्बनादिविभेदेन बहुशो भेदसम्भवात् ।
सामान्यतोऽयं सम्भोगो वर्ण्य एकविधः परम् ।।३४।।

पा.टि. ....

(५१) भु 4) 'सम्भ्रमादिव' । (५२) भु 5) 'पुनर्लभ्येत्' ।
(५३) भु 4) 'रसमञ्जर्याम्' । (५४) म) 'सम्भोगशृङ्गारः' ।
(५५) भु 6 म) 'आदिशब्दाद' ।

टि.

✩ उपलभ्यमानायां रसतरङ्गिण्यां पद्यमिदं नोपलभ्यते । द्र. भानु. रसत ।

✩✩ 'जीवितेदानीम्' इति पाठः 'मया' इत्यनेन न समन्वेति । अप्यत्र 'जीवतेदानीम्' इति स्यात् । ▲ विश्व. सा.द. III/201 पृ 202 ● विश्व. सा.द. III/210 पृ 204

तथा –

वनाम्बुकेलिसूर्यास्तसन्ध्यातिमिरसञ्चयाः ।
अभिसारेन्दुसंमोदमधुपानरतोत्सवाः ॥३५॥
प्रातः सूर्योदयाद्याश्च वर्ण्याः काव्यगुणा अमी ।
विशेषत इदं चात्र शुचिपूतं च शोभनम् ।३६॥
तदुज्ज्वलं वा रागो हि सर्वं शृङ्गार इष्यते ।
न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते ॥३७॥

कषायिते हि वस्त्रादौ[५६] भूयान्[५७] रागोऽनुपद्यते ।
विप्रलम्भानन्तरं तत् सम्भोगः परिवर्ण्यते ॥३८॥
सम्भोगानन्तरं तद्वद् विप्रलम्भोपि वर्ण्यते ॥३९॥

विप्रलम्भानन्तरं सम्भोगो - यथा –

"चिराद्विरहखिन्नेन यूनाश्लिष्टा तनूदरी ।
प्रकाशयामास रतिं चञ्चद्रोमाञ्चसंचयैः ॥"

सम्भोगानन्तरं विप्रलम्भो यथा –

"कुचोपपीडमाश्लिष्य यामीत्युक्तवति प्रिये ।
पेतुः समं त्रुटद्दाममौक्तिकैरश्रुविन्दवः ॥"

एवमन्यत्रापि तर्क्यम् ।

इति[५८] श्रीमखिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायणदेवमहाराज-विद्वत्सभाराजित-प्रबन्धकविताप्रकाशक-करणकुलसम्भव-कविभिषग्वर-वासुदेवपात्रतनय-श्रीमद्गोपीनाथकविभूषणकृतौ **कविचिन्तामणौ स्थायिभावविप्रलम्भसम्भोगशृङ्गारनिरूपणं नाम नवमः किरणः ।**

पा.टि.

(५६) भु 2) 'वस्त्वादौ' । (५७) भु 4 भु 5) 'भूयो' ।
(५८) भु 5) 'श्रीमत्खिमुण्डि' - इत्यस्मादारभ्य 'पात्रतनयश्रीमद्' इत्यन्तं यावन्नास्ति ।

* * *

[दशमः किरणः]

अथास्मिन् किरणे हास्य-करुण-रौद्र-वीर-भयानक-बीभत्साद्भुत-शान्त वत्सलरसानाह ।

तत्र हास्यः –

विकृताकृतिवेषोक्तिचेष्टाकुहकसम्भवः ।
हासस्थायी भवेद्धास्यः शुक्लः प्रमथदैवतः ॥१॥

साहित्यदर्पणे – ●

विकृताकारवाग्वेषं यदालोक्य हसेज्जनः ।
तदत्रालम्बनं प्राहुस्तच्चेष्टोद्दीपनं मतम् ॥२॥

तत्रानुभावः नेत्रसंकोचनवदनस्मेरतादयः । व्यभिचारिणः निद्रालस्यावहित्थाद्याः ।

तद्भेदानाह –

स्मितं च हसितं तद्वदुत्तमानामिति द्वयम् ।
विहासश्चावहासश्च मध्यानां द्वयमुच्यते ॥३॥
अपहासश्चातिहासोऽधमानां चेति षड्विधाः ।
स्मितमीषत्प्रकुल्लाक्षि चलितौष्ठपुटं मतम् ॥४॥
☆
दरदृश्यद्विजं(द्विजो?)हासो विहासो मधुरस्वरः ।
सशिरःकम्पितश्चैवावहास इति कीर्तितः ॥५॥
अपहासस्तु सास्राक्षः क्षिप्तांगश्चातिहासकः ।

टि.

● विश्व. सा. द. III/215 पृ207 ☆ हासो' इति विशेष्येण सह 'दरदृशद्विजम्' इति नपुंसकान्तं विशेषणं न समन्वेति । अप्यत्र 'दरदृश्यद्विजो' इति स्यात् ?

यथा – ☆

"गुरोर्गिरः पञ्च दिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयं[१] च ।
[२]अमी समाघ्राय च तर्कगन्धान् समागताः [३]कुक्कुटमिश्रपादाः ॥"

अथ करुणः– साहित्यदर्पणे – ☆☆

"इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् ॥६॥
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः ।
शोकोऽत्र स्थायिभावः स्यात् [४]शोच्यमालम्बनं मतम् ॥७॥
तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः ।
अनुभावा दैवनिन्दाभूपातक्रन्दितादयः ॥८॥
वैवर्ण्योच्छ्वासनिःश्वासस्तम्भप्रलपनानि च ।
निर्वेदमोहापस्मारव्याधि[५]ग्लानिस्मृतिश्रमाः ॥९॥
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ।"

यथा राघवविलासे – ●

"विपिने क्व जटानिबन्धनं तव चेदं क्व मनोहरं वपुः ।
अनयोर्घटना विधेः स्फुटं ननु खड्गेन शिरीषकृन्तनम् ॥"

अत्र रामवनवासजनितशोकार्तस्य दशरथस्य दैवनिन्दा ।

[७] एवं बन्धुवियोगविभव[६]नाशादावप्यूह्यम् ।

अथ रौद्रः –

कोपस्थायी भवेद्रौद्रो रसोऽयं रुद्रदैवतः ॥१०॥

पाटि.

(१) भु 1 भु 2 भु 3) 'दिनत्रयेण' (२) भु 3) 'अमी...मिश्रपादाः' इति नास्ति ।
(३) भु 5) 'फुक्कुट' (४) भु 5) 'शेकस्यालम्बनं' । (५) म) 'क्लमश्रमाः' ।
(६) भु 5) 'नाशादावप्यूक्तम्' । (७) भु 3) 'अत्र' ।

टि.

☆ शंख. लट.II/ 14. ☆☆ विश. सा.द. III/ 222-225 ● तत्रैव III/ पृ. 209.

[८]शत्रुरत्रालम्बनं स्यात्तच्चेष्टोद्दीपनं मतम् ।
[९]मुष्टिपातायुधक्षेपच्छिदासमरसम्भ्रमाः ॥११॥
भ्रूभेदाधर[१०]निर्दंशभुजास्फोटाभितर्जनाः ।
[११]आत्मावदानकथनायुधविक्षेपणादयः ॥१२॥
अनुभावास्तथाक्षेपः [१२]क्रूरदर्शनमुग्रता ।
कम्पस्वेद[१३]मदावेगरोमप्रोद्गमनादयः ॥१३॥
कोपमोहप्रभृतयो भावाश्च व्यभिचारिणः ।

यथा – 'आहवे निघ्नतः शत्रूनतिविक्रमशालिनः ।
कस्ते वीक्ष्य न सन्त्रस्येद् भ्रूभङ्गीभीममाननम् ॥''

अथ वीरः – साहित्यदर्पणे –★

''उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः ॥१४॥
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः
आलम्बनविभावास्तु विजेतव्यादयो मताः ॥१५॥

पा.टि.

---

(८)भु 5) 'शत्रुस्तत्र' । म) 'शत्रुगात्रा' (९) म) 'मुष्टिघाता'·
(१०) भु 5) 'निर्विर्णभुजा-' । (११) भु 5) 'आत्मावन्दन' ।
(१२) भु 1 भु 2 भु 4) 'क्रुरदर्शनमुग्रजा' । भु 5) 'क्रुरदर्शनमग्रतः' ।
(१३) भु 2) 'मदावेगो' । भु 5) 'मदावेगभ्राम' । म) 'मदावेगोराग' ।

टि.

★ विश्व. सा.द. III/ 232-234. पृ 212 & 213

विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः ।
अनुभावास्तु तत्र स्युर्विपक्षान्वेषणादयः ॥१६॥
सञ्चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः ॥"

स च वीरः - दानवीरो धर्मवीरो दयावीरो युद्धवीरश्चेति चतुर्विधः ।

तत्र दानवीरो यथा –

'न दत्तो यदि हेमाद्रिरर्थिभ्योऽनुदिनं मया ।
[१४]धनाशुविश्राणनेन दातृतेयं विडम्बना ॥"

अत्र तु –

आलम्बनं द्विजन्मादिः सत्त्वाद्यावेशनादिकम् ॥१७॥
उद्दीपनं तदुत्पन्नहर्षाद्या व्यभिचारिणः ।
-एतैर्व्यक्तीकृतः [१५]शत्रूत्साह(दानोत्साह?)स्थायी समुत्कटः ॥१८॥
[१६]सभ्यैरास्वाद्यमानोऽसौ भजते दानवीरताम् ।

धर्मवीरो यथा-

"किं प्राणैः किं मम धनैः सुतभार्यादिभिश्च किम् ।
धर्मद्रव्यार्जनायैव मया सर्वं पणीकृतम् ॥"

युद्धवीरो यथा महानाटके श्रीरामचन्द्रः –●

"भो लङ्केश्वर ! दीयतां जनकजा रामः स्वयं याचते
कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किंचिद्गतम् ।

पा.टि.

(१४) भु 1 भु 2) 'धनाशुविश्राणनतो' । (१५) भु 5) 'शत्रु आह' ।
(१६) भु 1 भु 2) 'सत्त्वै' । भु 4) 'सभ्यो' । म) 'सवै' ।

टि.

☆ शत्रूत्साहः' युद्धवीरस्य स्थायी भवति, न पुनः दानवीरस्य । तस्मादत्र 'शत्रूत्साहस्थायी' इत्यस्य स्थाने 'दानोत्साहस्थायी' स्यात् वा ? ● हनु. महा. IX/ 131.

नैवं चेत् स्वरदूषणत्रिशिरसां कण्ठासृजा पङ्किल:
पत्री नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृत: ॥"

दयावीरो यथा जीमूतवाहन: – ☆

१७

"शिरामुखै: स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
१८
तृप्तिं न पश्यामि तवापि तावत् किं भक्षणात् त्वं विरतो गरुत्मन् ॥"

अथ भयानक: – ☆☆

"भयानको भयस्थायिभाव: कालाधिदैवत: ॥१९॥
१९
स्त्रीनीचप्रकृति: कृष्णो मतस्तत्त्वविशारदै: ।
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं स्मृतम् ॥२०॥
२०
चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुन: ।
अनुभावोऽत्र वैवर्ण्यं गद्गदस्वरभाषणम् ॥२१॥
पुलकस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादय: ।
जुगुप्सावेगसंमोहसंत्रासग्लानिदीनता: ॥२२॥
शङ्कापस्मारसम्भ्रान्तिमृत्य्वाद्या व्यभिचारिण: ।"

यथा -

"दृष्ट्वा शार्दूलमायान्तं वेपमाना: समन्तत: ।
धावन्त: सम्भ्रमादीषदप्यमी यान्ति दीनताम् ॥"

अथ बीभत्स: – साहित्यदर्पणे – ●

"जुगुप्सास्थायिभावस्तु बीभत्स: कथ्यते रस:" ॥२३॥

पा.टि. ....

(१७) म) 'शिरासज:' । (१८) भु 5) 'भक्षणात्' । म) 'त्वं भक्षणात्किम्' । (१९) भु 4) 'प्रोक्तस्त्वद' । म) 'मतस्त्वाहुर्विशारदा:' (२०) भु 4) 'घोरतरा तस्य'

टि.

☆ हर्ष. नागा. V/16. ☆☆ विश्व.सा.द.III /235-238. ● विश्व.सा.द.III/ 239-242.

नीलवर्णो महाकालदैवतोऽयमुदाहृतः ।
दुर्गन्धमांसरुधिरमेदांस्यालम्बनं मतम् ॥२४॥
२१
तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम् ।
निष्ठीवनास्यवलननेत्रसंकोचनादयः ॥२५॥
२२
अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः ।
मोहोऽपस्मार आवेगो व्याधिश्चमरणादयः ॥२६॥

यथा - २३
"पूतिदुर्गन्धमुन्मीलत्कृमि क्रव्यं विभावयन् ।
२४ २५
स्वादमीलितदृक् प्रेतो ग्रसत्येषः शनैः शनैः ॥"

अथाद्भुतः – ✩
"अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः ।
पीतवर्णो वस्तु लोकातिशाय्यालम्बनं मतम् ॥२७॥
२६
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ।
२७
स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसम्भ्रमाः ॥२८॥
तथा नेत्रविकासाद्या अनुभावाः प्रकीर्तिताः ।
वितर्कावेगसम्भ्रान्तिहर्षाद्या व्यभिचारिणः" ॥२९॥

पा.टि.

(२१) भु 3) 'क्रिमिपादा' । म) 'कृमिपूयादय' । (२२) म) 'मतास्तस्य' ।
(२३) म) 'द्रव्यं' । (२४) भु 5) 'नाङ्कित' । (२५) भु 1) । भु 2) 'वक्त्रो' ।
(२६) भु 4) 'च सुमहिमा' । (२७) भु 4) 'विभ्रमाः' ।

टि.

✩ विश्व. सा.द. III/ 242-245.

यथा - २८

"त्वद्वीरचरितं संख्ये पश्यतः परमाद्भुतम् । २९
३० सहस्राक्षस्य सिद्धापि कृत्रिमेवानिमेषता ॥"

अथ शान्तः – ☆

"शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः ।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः" ॥३०॥
जगत्यनित्यता स्वात्मतत्त्वं चालम्बनं मतम् ।
पवित्राश्रमसत्क्षेत्रतीर्थपुण्यवनादयः ॥३१॥
☆☆ "महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ।
३१
रोमाञ्चाद्याश्चानु भावास्तथा स्युर्व्यभिचारिणः ॥३२॥
निर्वेद- हर्षस्मरण- मतिभूत- दयादयः ।"

यथा --

"पुण्येऽरण्ये मम क्वापि शममास्थाय तस्थुषः ।
अयाचितकणादानैः कुक्षिराप्नोतु पूर्णताम् ॥"

अथ वत्सलः – ● ३२

"स्फुटं चमत्कारितया वत्सलं च रसं विदुः ।
स्थायी वत्सलतास्नेहः पुत्राद्यालम्बनं मतम् ॥३३॥
उद्दीपनानि तच्चेष्टा विद्याशौर्यनयादयः ।
आलिंगनांगसंस्पर्शशिरश्चुम्बनमीक्षणम् ॥३४॥

पा.टि...

(२८) भु 2 भु 4 म) 'पश्यन्तः' । (२९) भु 5) 'वृत्तिमेवानिमेषता' ।
(३०) भु 5) 'अथ शान्तः' इत्यस्मादारभ्य 'चालम्बनं मतम्' इत्यन्तं यावत् ग्रन्थपातः ।
(३१) भु 5) 'स्तथेस्य व्य' । (३२) म) 'वत्सलाचरणं' ।

टि. ---

☆ विश्व.सा.द III/245.246 ☆☆ तत्रैव III/248-249 ● तत्रैव III/251-254.

“पुलकानन्दबाष्पाद्या अनुभावाः प्रकीर्तिताः ।
सञ्चारिणोऽनिष्टशङ्काहर्षगर्वादयो मताः ॥३५॥
पद्मगर्भच्छविर्वर्णो दैवतं लोकमातरः’’ ॥३६॥

यथा रघुवंशे – ☆

● “यदाह(उवाच?)धात्र्या प्रथमोदितं वचो
ययौ तदीयामवलम्ब्य चाङ्गुलिम् ॥
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः ॥’’

इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायणदेवमहाराज-विद्वत्सभाराजित-प्रबन्धकविताप्रकाशक-करणकुलसम्भव-कविभिषग्वर-वासुदेवपात्रतनय-श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ हास्यादिवत्सलपर्यन्तरसनिरूपणं नाम दशमः किरणः ।

पा.टि.

(३३) भु 4) ‘पद्मगर्भच्छविवर्णो दैवतं’ इति नास्ति । (३४) भु 4) ‘इति श्रीमत्खिमुण्डि..... दशमः किरणः’ इति ग्रन्थभागो नोपलभ्यते । भु 5) ‘श्रीमत्खिमुण्डि’ इत्यस्मादारभ्य ‘वासुदेवपात्रतनयश्रीमद्’ इत्यन्तं यावत् ग्रन्थभागो नोपलभ्यते ।

टि.

☆ कालि. रघु. III/ 25. ● अत्र ‘यदाह’ इति पाठे प्रथमवाक्ये लट्लकारः । द्वितीयपादे ‘ययौ’ इति पाठे लिट्लकारः । अस्मादत्र प्रक्रमभङ्गो भवति । अप्यत्र ‘यदाह’ इत्यस्य स्थाने ‘उवाच’ इति पाठः स्यात् ?

□□□

[एकादशः किरणः]

[१] अथ रसानां परस्परविरोधमाह- ●

"आद्यः करुणबीभत्सरौद्रवीरभयानकैः ।

आद्यः शृङ्गाररसः ।

भयानकेन करुणेनापि हास्यो विरोधभाक् ॥१॥
करुणो हास्यशृंगारभयानकरसैरपि ।
रौद्रस्तु हास्यशृंगारभयानकरसैरपि ॥२॥
भयानकेन शान्तेन तथा वीररसः स्मृतः ।
शृङ्गारवीररौद्राख्यहास्यशान्तैर्भयानकः ॥ ३॥
शान्तस्तु वीरशृङ्गाररौद्रहास्यभयानकैः ।
शृङ्गारेण तु बीभत्स इत्याख्याता विरोधिता ॥"४॥
उक्ता मुख्यरसा गौणाश्चात्र वाच्या समासतः ।

तथा हि साहित्यदर्पणे-- ●

"रसभावौ तदाभासौ भावस्य प्रशमोदयौ ॥५॥
सन्धिः शबलता चेति सर्वेऽपि रसनाद्रसाः ।"
रसस्वरूपं प्रागुक्तं भावादिरभिधीयते ॥६॥

[२] तत्र प्रथमं भावः

व्यभिचारी प्रधानं चेद्रतिर्देवादिगापि चेत् ।
उद्‌बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ॥७॥

पा.टि.

---

(१) भु 4) 'अथ रसानां' .....इत्यसमादारभ्य 'रसभावयो:' (कारिका-८) इत्यन्तं यावद् ग्रन्थांशो नास्ति । (२) भु 5) 'तत्र प्रथमं' इत्यसमादारभ्य 'इत्यभीधीयते' इत्यन्तं यावद् ग्रन्थांशो नास्ति ।

टि.

● विश्व. सा.द. III/254 & 259.

साहित्यदर्पणे -- ●

न भावहीनोऽस्ति रसो न रसो भाव[३] (भावो▲ रस?) वर्जितः ।
परस्परकृता सिद्धिरनयो रसभावयोः ॥८॥

तत्र व्यभिचारिप्राधान्यं यथा- ✩

‘एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी’ त्यादि । अत्रावहित्था ।

देवादिविषयारतिर्यथा - ✩✩

“दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक ! प्रकामम् ।
अवधीरितशारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयानि[४] ॥”

मुनिविषयारतिर्यथा– माघे ✽

‘विलोकनेनैव[५] तवामुना मुने
कृतः कृतार्थोऽस्मि निबर्हितांहसा ।
तथापि शुश्रूषुरहं गरीयसी-
र्गिरोऽथवा श्रेयसि केन तृप्यते ॥”

पा. टि...

(३) म) ‘भावो रहितोऽस्ति’ । (४) भु 5) ‘मरणे विचिन्तयानि’ ।

(५) भु 5) ‘विलोचननैव’ ।

टि. ____

● सा.द. III/ पृ 226. ▲ ‘न भावहीनोऽस्ति रसो न रसो भाववर्जितः’ इति पाठे रसो भावहीनो न अस्ति’ इत्यस्यार्थस्य पौनरुक्त्यं भवति । अप्यत्र ‘ न भावहीनोऽस्ति रसो न भावो रसवर्जितः’ इति पाठः स्यात् ? द्र तत्रैव III/ पृ. 226.

✩ कालि. कुमा. VI/ 84 . ✩✩ कुल. मुकु./7. ✽ माघे. शिशु. I/ 29

राजविषया रतिर्यथा - साहित्यदर्पणे - ☆

"त्वद्वाजिराजिनिर्धूतधूलीपटलपङ्किलाम् ।
न धत्ते शिरसा गङ्गां भूरिभारभिया हर: ॥", एवमन्यत् ।

उद्‌बुद्धमात्रस्थायी यथा कुमारसम्भवे - ☆☆

"हरस्तु किञ्चित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशि: ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥"

अत्र पार्वतीविषया भगवतो रति: । ▲

ननूक्तं प्रपाणकरसवद्विभावादीनामेकीभावो रस: इति । [तत्र संचारेण: पार्थक्याभावात् कथं प्राधान्येनाभिव्यक्तिरित्युच्यते-

यथा मरिचखण्डादेरेकीभावे प्रपाणके
उद्रेक: कस्यचित् क्वापि तथा संचारिणोरसे ॥]

अथ रसाभासभावाभासौ - साहित्यदर्पणे- ●

अनौचित्यप्रवृत्तत्वे आभासो रसभावयो: ।

तत्र शृङ्गाररसाभास: — ●

उपनायकसंस्थायां मुनिगुरुपत्नीगतायां च ॥९॥
बहुनायकविषयायां रतौ तथानुभयनिष्ठायाम् ।
प्रतिनायकनिष्ठत्वे तद्वदधमपात्रतिर्यगादिगते" ॥१०॥

तत्र उपनायकगतत्वे यथा साहित्यदर्पणे — ●●

"स्वामी मुग्धतरो [६] घनं वनमिदं बालाहमेकाकिनी
क्षोणीमावृणुते तमालमलिनच्छाया तम:सन्तति: ।

पा.टि.

(६) भु 4) 'पुष्यति भो घनं वशमिदं' ।

टि.

☆ विश्व. साद्र. III/ पृ. 228

☆☆ कालि. कुमा. III/ 67.

▲ अत्र पूर्वपक्ष: न परिसमाप्त: । अग्रिमवाक्ये च विषयान्तरं निर्दिश्यते । तस्मात् पूर्ववाक्यस्य अग्रिमवाक्यस्य च संगतिर्न भवति । अप्यत्र ग्रन्थपात: स्यात् ? प्रकरणमिदं साहित्यदर्पणमनुसरति । तस्मादत्र तदीय: पाठ: संयोजितश्चाते । पृ

● विश्व. साद्र. III/262-64

●● विश्व. सा.द. III/ पृ231

तन्मे सुन्दर ! कृष्ण ! मुञ्च सहसा वर्त्मेति[७] गोप्या गिरः
श्रुत्वा तां परिरभ्य मन्मथकलासक्तो हरिः पातु वः ॥”

मुनिपत्नीगतत्वे यथा –

“उटजेभ्यो व्रजन्तीनां सम्भ्रमादुटजान्तरम् ।
प्रेक्षणीयं मुनिस्त्रीणां कुचमूलमवल्कलम् ॥”

गुरुपत्नीगतत्वे यथा –

“को विवेके[८] विमूढानां यन्मन्मथवशंवदाः[९] ।
गुरुदारेषु वन्द्येषु तरलीकुर्वते[१०] मनः ॥”

बहुनायकविषयारतिर्यथा –

“पथि[११] सञ्चरतः पान्थान् नवयौवनशालिनः ।
पश्यन्त्यास्तव लक्ष्यन्ते कपोलपुलकाङ्कुराः ॥”

अनुभयनिष्ठत्वे[१२] यथा-

त्यज[१३] त्यज मनो लौल्यं मा भवः कामकातरः ।
न हि सा त्वद्रसास्वादे कामिनी सुखकामिनी[१४] ॥

प्रतिनायकनिष्ठत्वे -यथा –

“वीर त्वामवलोक्याजौ[१५] वरवैरिनिवारणम् ।
उपभोक्तुं श्रिया सार्धं सेवन्ते शात्रवस्त्रियः[१६] ॥”

पा.टि.

(७) भु 3) ‘नर्मेति गोप्या’ । भु 4) ‘वर्मेति शोच्या’ । (८) भु 4) ‘कोऽविवेको’ ।
(९) म) ‘यो मन्मथवशंवदः’ । (१०) भु 5) ‘तरलीकुरुते’ ।
(११) भु 5 म) ‘अथ’ । (१२) भु 4) ‘अनुभवनिष्ठत्वे’ ।
(१३) भु 4) ‘राज त्यज’ । (१४) भु 5) ‘सुखयामिनी’ ।
(१५)म) ‘त्वामवलोक्यानौ’ । (१६) भु 5) ‘शात्रवः स्थिताः’ ।

अधमपात्रगतत्वे यथा ग्रन्थान्तरे –

“जघनस्थलनद्धपत्रवल्ली
गिरिमल्लीकुसुमानि काऽपि भिल्ली ।
अवचित्य गिरौ पुरो निषण्णा
[१८] स्वकचानुत्कचयाञ्चकार [१७] भर्त्रा ॥”

तिर्यग्गतत्वे यथा–

“मल्लीमतल्लीषु पदं दधाना
वल्यन्तरे वल्लभमाह्वयन्ती ।
चञ्चद्विपञ्चीकलनादभङ्गी
सङ्गीतमङ्गीकुरुते स्म भृङ्गी ॥”

[१९] अथ हास्यरसाभासः –

गुर्वादिविषयो हास्यो हास्याभासः स इष्यते ।

यथा – “गुरुपादाः समायान्ति मायापाटवपण्डिताः ।
कपटोत्कट[२०]कृष्णाख्या भाषिणः पिशुनोत्तमाः ॥”

अथ करुणरसाभासः –

करुणो धीरविप्रादिगतश्चाभास उच्यते ॥११॥

आदिपदान्नृपादयः । यथा रघुवंशे –✫

“विललाप स बाष्पगद्गदं
सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं
भजते कैव कथा शरीरिषु ॥”

पा.टि.

---

(१७) भु 5) ‘स्वकचान् स्वंक’ ।
(१८) भु 1 भु 2 भु 4) ‘भर्त्ता’ ।
(१९) भु 2) ‘हास्यरसाभावः’ ।
(२०) भु) ‘कृष्णाः श्वाभाषिणः’ ।

टि.

✫ कालि. रघु VIII/ 43.

अथ रौद्ररसाभासः–

गुर्वादिगोचरो रौद्रो रौद्राभास इतिरितः ।
यथा - "पश्चादेव विधातव्यं मया गुरुषु गौरवम् ।
२१
प्राक् तत्प्राणापहारेण कर्तव्यं द्रविणार्जनम् ॥"

अथ वीररसाभासः–

ब्राह्मणादिवधोत्साहे वीरे वाऽधमपात्रगे ॥१२॥
२२
वीराभासो बुधैः प्रोक्तः सर्वसाहित्यसंमतः ।
यथा - "कालक्रमातिविषमे पापीयसि कलौ युगे ।
द्रविणार्थं जिघांसन्ति ब्राह्मणानपि वर्वराः ॥"

अथ भयानकरसाभासः– २३

भवेद्भयानकाभासो भयं यदुत्तमोद्भवम् ॥१३॥
यथा - "बन्धं विभिद्य प्रकटं सभामटति मर्कटे ।
सभासदः पलायन्ते समन्तात् कातरातुराः ॥"

अथ बीभत्सरसाभासः –

बींभत्स उत्तमगतो भजत्याभासरूपताम् ।
२४
यथा - "पश्य पश्यन् (पश्य?) मुखभ्रश्यत्कदन्नकणकाङ्क्षिणः ।
प्रत्यङ्गणं विचेष्टन्ते काका इव महाजनाः ॥"

अथाद्भुतरसाभासः –

अविस्मयास्पदेऽकस्माद् यत्तु विस्मयते मनः ॥१४॥
वहेत् स एष काव्येषु विस्मयाभासरूपताम् ।
२५
यथा - "शून्येऽपि गगनाभोगेऽवलम्बविकलीकृतः ।
चित्रं संचित्रसंचारश्चन्द्रमा न स्खलत्यसौ ॥"

पा.टि.

(२१) भु 1) भु 2) 'प्राणापहारेण कदा' । म) 'प्राप्तप्राणापहारेण' ।
(२२) भु 1 म) 'वीराभासमिति' । (२३) भु 5) 'यद्युत्तमो' । म) 'चेदुत्तमो' ।
(२४) भु 1 भु 2 भु 4) 'कृतकांक्षिणः' । (२५) भु 2 भु 4 म) 'वलम्ब्य' ।

अथ शान्तरसाभासः –

शान्तोऽधमगतस्तद्वत् शान्ताभास इतीरितः ॥१५॥

२६

यथा - “सन्ततानन्तनामोक्तिर्वाचालरसनाञ्चलः ।
मनो विनोदयत्येष यवनोऽपि द्विजन्मनाम् ॥”

अथ भावाभासः –

वेश्यादिषु च लज्जादिर्भावाभास इतीष्यते ।

यथा – “नोष्ठं स्मितैर्मण्डयति न सविभ्रममीक्षते । २७
पश्य वेश्याऽप्यवश्येयं कुलस्त्रीव विभाव्यते ॥”

अथ पूर्वसूचितभावशान्त्युदयभावसन्धिभावशबलता निरूप्यन्ते ।

तत्र भावशान्तिः –

भावशान्तिस्तु भावस्योपशमेन प्रतीयते ॥१६॥

यथा – ☆

“सुतनु ! जहिहि कोपं पश्य पादानतं मां
न खलु तव कदाचित् कोप एवंविधोऽभूत् ।
इति निगदति नाथे तिर्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किञ्चित् ॥”

२८ २९
अत्र बाष्पमोचनेन ईर्ष्याख्यसंचारिभावस्य शमः ।

अथ भावोदयः –

भावान्तरसमुल्लासे भवेद्भावोदयस्तथा ।

यथा-“अनुनीय चिरं नाथे प्रस्थिते विषयान्तरे ।
३०
बाला ददर्श सासूयमालीं मानोपदेशिनीम् ॥”

अत्रासूयाख्यभावोदयः ।

पा.टि...

(२६) भु 2) ‘रसनान्तरः’ । (२७) भु 4) ‘विभवावृते’ । (२८) भु 5) ‘तत्र’ ।
(२९) भु 4) ‘ईर्ष्यासंचारी’ । (३०) भु 4) ‘सासूयामालीं’ ।

टि.

☆ अमरु. अ.श./39.

अथ भावसन्धिः –

एकत्र संभवे[३१] तद्द्भावयोः सन्धिरीरितः ॥१७॥

यथा - “आपादसुखदं पूर्वमथ सन्तापदीपनम् ।
त्वदङ्गमपि नैवाहं विस्मरामि स्मरामि च ॥”

अत्र हर्षविषादयोः सन्धिः ।

अथ शबलता–

मिलनेऽनेकभावानां भवेत् शबलतापि च ॥१८॥

यथा-

“क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा
दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं[३२] धास्यति ॥”

अत्र वितर्कौत्सुक्य[३३]मतिस्मरणशङ्कादैन्यधृतिचिन्तानां शबलता ।

-इति[३४]श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायण देवमहाराज-विद्वत्सभाराजित-प्रबन्धकविताप्रकाशक-करणकुलसम्भव-कविभिषग्वर-वासुदेवपात्रतनय-**श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ रसपरस्पर-विरोध[३५]रसाभास- भावा भास-भावशान्त्युदय- सन्धि-शबलता- निरूपणं नाम एकादशः[३६] किरणः ।**

पा.टि.

---

(३१) म) ‘तद्धि भावयोः सन्धिरुच्यते’ । (३२) म) ‘पास्यति’ ।
(३३) भु 4) ‘मभिस्मरण’ । (३४) भु 3 भु 4) ‘श्रीमत्खिमुडि’ ।
भु 5) ‘श्रीमत्खिमुण्डि-’ इत्यस्मादारभ्य ‘श्रीमद्-’ इत्यन्तं यावत् ग्रन्थभागो नोपलभ्यते ।
(३५) भु 4) ‘विरोधाभास’ । (३६) भु 4) ‘दशमः’ ।

* * *

[द्वादशः किरणः]

अथ गुणानाह - साहित्यदर्पणे – ✫

"[1]रसस्यांगित्वमाप्तस्य धर्माः शौर्यादयो यथा ।
गुणा माधुर्यमोजोऽथ प्रसाद इति ते त्रिधा ।।१।।
तत्र – चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते ।
तच्च – सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ।।२।।
मूर्ध्नि वर्गान्त्यवर्णेन युक्ताष्टठडढान्[2] विना ।
[3]रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः ।।"३।।

यथा -

"अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्ग्यः[4] ।
जनयन्ति मुहुर्यूनामन्तःसन्तापसन्ततिम् ।।"

यथा च – ✫✫

"लताकुञ्जं गुञ्जन् मदवदलिपुञ्जं चपलयन्
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं भिन्दन् किरति मकरन्दं दिशि दिशि ।।"

अथ ओजगुणः – ●

"ओजश्चित्तस्य विस्तार‍रूपं दीप्तत्वमुच्यते ।
वीरबीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु ।। ४।।

पा.टि...

(१) म) 'रसस्याङ्गत्व' । (२) भु 4 भु 2) 'षडेतान्' । म) 'ष्टठडढा' ।
(३) म) 'रसौ' । (४) भु 5) 'भृङ्ग्य' ।

टि. ______________________________

✫ विश्व. सा.द. VIII/1-3 पृ. 579-582. ✫✫ विश्व. चन्द्र. I/ 3.
● विश्व. सा.द. VIII/4-7 पृ584.

वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ ।
उपर्यधो द्वयोर्वापि ☆(द्वयोर्वा?) [५]सरेफौ टठडढैः सह ॥५॥
शकारश्च षकारश्च तस्य व्यञ्जकतां गताः ।
तथा समासबहुला घटनौद्धत्यशालिनी'' ॥६॥

यथा साहित्यरत्नाकरे – ◆

''शुम्भच्छुण्डालशैलाविरलपरिगलद्दान धाराझराणि
[६]भ्राम्यत्कूजद्रथाङ्गान्यसुरहरियुतान्युग्रखड्ग्यावृतानि ।
आकर्णकृष्टचापच्युतनिबिडतरोच्चण्डकाण्डप्रकाण्डः
ज्वालामालाकरालो दहति रघुपतेर्वैरिसेनावनानि ॥''

अथ प्रसादगुणः – ●

''चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः
स प्रसादः समस्तेषु रसेषु रचनासु च ॥७॥
शब्दास्तद्व्यंजका अर्थबोधकाः श्रुतिमात्रतः ।

यथा सहृदयानन्दे – ●●

''सूचीमुखेन सकृदेव कृतव्रणस्त्वं
मुक्ताकलाप ! लुठसि स्तनयोः प्रियायाः ।
बाणैः स्मरस्य शतशोऽपि निकृत्तमर्मा
स्वप्नेऽपि तां कथमहं न विलोकयामि ॥''

अथ प्रतापरुद्रयशोभूषणमते **कैशिक्यादिवृत्तिगुणस्वरूपं** निरूप्यते ।

▲ कैशिक्यारभटी चैव भारती सात्त्वती तथा ॥८॥

पा.टि...

(५) म) 'सरो' । (६) भु 1 भु 2 भु 3 भु 4) 'भ्रम्यत्' ।

टि.

☆ 'द्वयोर्वापि सरेफौ' इति पाठे स्वीकृते छन्दोभङ्ग. भवति, तस्मादत्र 'द्वयोर्वा सरेफौ' इति पाठः स्यात् वा.? ◆ धर्म.सा.र.V/2.

● विश्व.सा.द. तत्रैव.VIII/7-8 ●● कृष्णा.सह.III/52 ▲ विद्या.प्र.रु.II/ पृ32.

चतस्रो वृत्तयो ज्ञेया रसावस्थानसूचका: ।

तत्र कैशिकीवृत्ति: –☆

"अत्यन्त[७]सुकुमारार्थसन्दर्भा कैशिकी मता ॥"९॥

"अत्यन्त[८]सुकुमारौ द्वौ शृङ्गारकरुणौ मतौ ।"

यथा- ▲ "[९]जितमदनविलासं काकतीयान्वयेन्दुं
नरपतिमनिमेषं द्रष्टुमाशंसिनीनाम् ।
सपदि विरचिताऽऽसीदंगनानामपांगै-
र्दिवि कुवलयदामश्यामला तोरणश्री: ॥"

अथारभटीवृत्ति: –▲▲

"अत्युद्धतार्थसन्दर्भा वृत्तिरारभटी स्मृता ॥"१०॥

"अत्युद्धतौ[१०] रसौ रौद्रबीभत्सौ परिकीर्तितौ"

यथा – ☆☆

"खड्गाघातनिकृन्तशात्रवशिरो[११]निष्ठ्यूतरक्तच्छटा- [१२]
ज्वालैरुद्भटशस्त्रघट्टनभवत्स्फारस्फुलिङ्गोत्करै: ।
स्त्यानासृक्पिशितास्थिखण्डविकटस्थूलोज्ज्वलाङ्गारकै-
रुच्चण्डश्चल[१३]मर्तिगण्डनृपते: क्रोधाग्निरायोधने ॥"

अथ भारतीवृत्ति: –●

"ईषन्मृद्व्यर्थ[१४]सन्दर्भा भारती वृत्तिरिष्यते ॥"११॥

पा.टि.

(७) म) 'सुकुमारादि' । (८) म) "सुकुमाराद्यौ" । (९) भु 5) 'वतमदन' ।
(१०) म) 'रौद्रवीरवीभत्सौ परिकीर्तितम्' ।
(११) भु 4) 'निष्णूत'।
(१२) भु 5) 'न भस्फार' । म) मवस्फार
(१३) भु 5) 'मूर्ति' ।
(१४) भु 5) 'सन्दर्भा' इति नास्ति ।

टि.

☆ विद्या.प्र.रु II/15 & 17 पृ.41 ☆☆ तत्रेव II/20. पृ.42 ● तत्रैव II/16 पृ.41
▲ विद्य.प्र.रु II/19 पृ.41 ▲▲ तत्रैव. II/15 & 17 पृ.41

''हास्यशान्ताद्भुताः किञ्चित्सुकुमाराः प्रकीर्तिताः ।''

यथा –✿

''औन्नत्यं महदन्यदेव महितः[१५] कोऽप्येष गम्भीरिमा
काप्यन्या[१६] सरणिः[१७] प्रतापयशसोरन्यैव बाह्वोः प्रथा[१८] ।
सर्वं नूतनमेव रुद्रनृपतेर्जाने[१९] न तन्निर्मितौ [२०]
सामग्री चतुराननेन कियती कीदृक् क्व वा कल्पिता ॥''

अथ सात्त्वती वृत्तिः –✿✿

''ईषत्प्रौढार्थसन्दर्भा सात्त्वती वृत्तिरिष्यते ॥''१२॥

''ईषत्प्रौढौ समाख्यातौ रसौ वीरभयानकौ ।''

यथा –●

''दूरादाकर्ण्य विश्वप्रसृमरमहसो वीररुद्रस्य जैत्र-
प्रस्थानारम्भभेरीनिनदमरिनृपाः पूर्णकर्णज्वरार्ताः ।
आरुह्याद्रीन् विशन्तो गहनमतिमहत्कण्टकाकृष्टकेशा
स्त्रायध्वं मुञ्चतेति प्रतिनृपतिधिया पादपान् प्रार्थयन्ते ॥''

मध्यमारभटी त्वन्या तथा मध्यमकैशिकी ॥१३॥

तत्र मध्यमकैशिकी –●●

मृद्धर्थाप्यनतिप्रौढबन्धा मध्यमकैशिकी ।

शृङ्गारकरुणयोरतिसुकुमारयोरल्पप्रौढसन्दर्भा न दुष्यति ।

पा.टि.

(१५) भु 5) 'वहितः' । (१६) भु 1 भु 2 भु 4 म) 'काप्यन्याः' ।
(१७) भु 5) 'सरसि' । (१८) भु 5) 'प्रथीः' । (१९) भु 5) 'न च तनिर्मितौ' ।
(२०) भु 1 भु 2 भु 3 भु 4) 'क्रमा' । म) 'को वा' ।

टि.

✿ विद्या. प्र.रु.II/21 पृ 41
✿✿ तत्रैव II/16-18. पृ 41
● तत्रैव II/ 22. पृ 42
●● तत्रैव II/24. पृ 43

यथा – ✩

"आसन्नेऽपि महोत्सवे कथमितस्त्यक्त्वा प्रवासं व्रजे-
र्धिग्धिक् साहसमावयोर्विघटनं को वा विधिः काङ्क्षति ।
इत्यं स्वप्ननिवारितप्रियतमप्रस्थानबुद्धिस्ततो
२१
बुद्ध्वा मूर्च्छति काकतीयनृपते त्वद्वैरिनारीजनः ॥"

अथ मध्यमारभटी – ✩✩

मध्यमारभटी प्रौढेऽप्यर्थे नातिमृदुक्रमा ॥१४॥

२२

अति प्रौढयोरपि रौद्रबीभत्सयोरीषन्मृदुबन्धा न दुष्यति ।

यथा – ●

"मांसकीकससंकीर्णाः प्रसरद्रुधिरापगाः ।
वसाकर्दमिता युद्धे भुवोऽन्ध्रसुभटैः कृताः ॥"

एवं रसान्तरेष्वपि उदाहरणं द्रष्टव्यम् । वैदर्भ्यादीनां शब्दगुणाश्रितानामर्थविशेषनिरपेक्षतया केवलसन्दर्भसौकुमार्यप्रौढत्वमात्रविषयत्वात् कैशिक्यादिभ्यो भेदः प्रतापरुद्रयशोभूषणे – ●●

"सन्दर्भस्यातिमृदुत्वमसंयुक्तकोमलवर्णबन्धत्वम् ।
अतिप्रौढत्वं परुषवर्णविकटबन्धत्वम् । संयुक्तमृदुवर्णेष्वीषन्मृदुत्वम् ।"
अविकटबन्धपरुषवर्णेष्वीषत्प्रौढत्वम् ।"

पा.टि...

(२१) भु 2 भु 4) 'बुद्ध्या' ।

(२२) भु 5) 'रीष्यत्कबन्ध' ।

टि.

✩ विद्या. प्र.रु. II/25 पृ 43

✩✩ तत्रैव. II/ 24. पृ. 43.

● तत्रैव II/ 26 पृ. 44.

●● तत्रैव/ पृ. 44.

अथ परुषकोमलवर्णा ग्रन्थान्तरे –

वर्गद्वितीयस्तुर्यश्च टवर्गश्च तथा शषौ ।
सहौ च रेफयुक्ताश्च परुषाः कोमलाः परे ॥१५॥

अथ रीतिमाह- प्रतापरुद्रयशोभूषणे – ✩

रीतिर्नाम गुणाश्लिष्टपदसंघटना मता ।
'काव्यस्यात्मा रीतिरिति वामनेन उक्तम् । सा चतुर्विधा ।
✩✩ वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा ॥१६॥

तत्र वैदर्भी –

समासैर्वर्जिता दीर्घैः सौकुमार्यगुणान्विता ।
वैदर्भी रीतिराख्यता सा महाकविसंमता ॥१७॥

यथा – ◉

"वितरणगुणलीलातोषिताशेषलोके
विभवति नरनाथे काकतीयान्वयेन्दौ ।
सुरतरुगणनायां कामधेनुप्रसङ्गे
क्षितिसुरजनतेयं वीतकौतूहलासीत् ॥"

अथ गौडी रीतिः –

बन्धलालित्यसम्पन्ना दीर्घदीर्घसमासभाक् ।
ओजःकान्तिगुणोपेता रीतिर्गौडीति राजते ॥१८॥

यथा – ●●

"प्रचण्डतरदोर्दण्डखण्डितारातिमण्डलः ।
बिभर्त्युर्वीधुरं गुर्वीं प्रभवन्नन्ध्रभूपतिः ॥"

पा.टि.

(२३) भु 5) 'वाच्य' । (२४) भु 3 भु 5) 'उक्ता' । (२५) भ्रु) 'हला स्यात् ।' ।
(२६) भ्रु) 'गौडी रीतीति' । (२७) भ्रु) 'प्रतापरुद्र' ।

टि.

✩ विद्या.प्र.रु. II/पृ. 44.
✩✩ विश्व. सा.द. IX/ 2.
◉ विद्या.प्र.रु. II/29 पृ45.
●● विद्या.प्र.रु. II/30 पृ45.

अथ पाञ्चाली रीतिः –

वैदर्भीमिश्रिता गौडी पाञ्चालीति निगद्यते ।

यथा – ☆

"जेतुः काकतिवीररुद्रनृपतेर्जैत्रप्रयाणोत्थिते
क्षोणीरेणुभरे नभस्यतिभृशं भूविभ्रमं[२८] बिभ्रति ।
जाता मर्त्यनदी विशङ्कटतटी[२९]दीर्घा वियद्दीर्घिका
गाढं गूढतमा च गौतमनदी पातालगङ्गायते ॥"

अथ लाटी रीतिः– ☆☆

गौड्याडम्बरबद्धा स्याद्वैदर्भी ललितक्रमा ॥
पाञ्चाली मिश्रभावेन लाटी तु मृदुभिः पदैः ॥१९॥

यथा ग्रन्थान्तरे –

"अयमुदयति निद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन् ।
कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥"

अथ [रीति] प्राणाः –

अत्र प्राणाः यथा चित्रे नेत्रे दैर्घ्यादयो गुणाः ।
एषामेकेन युक्ताऽपि विराजति सरस्वती ॥२०॥

तेषां लक्षणोदाहरणमलङ्कारकारिकायामुच्यते ।

पा.टि.

(२८) भु 5) 'भूरिभ्रमं' । (२९) भु 4) 'विशङ्कटजटी' ।

टि.

☆ विद्या. प्र.रु.II/33 पृ. 46. ☆☆ विश्व. सा.द. IX/ पृ. 602.

श्लेषाख्यप्राणः –

अल्पप्राणेषु वर्णेषु विन्यासो योऽन्तरान्तरा ।
महाप्राणस्य स श्लेषो 'यथाऽयं भ्रमरध्वनिः ॥''२१॥

प्रसादः –

सुबोधं सुप्रसिद्धार्थं श्लोकमाहुः प्रसादनम्[३०] ।
यथा ग्रीष्मभवं तापं हरन्ति नवनीरदाः ॥२२॥

समता –

यथाप्रारब्धनिर्वाहः समता कथ्यते[३१] बुधैः ।
व्यामोहादपरिज्ञानाल्लोभात् पापेषु याति धीः ॥२३॥

माधुर्यम् –

सानुप्रासत्वमग्राम्यभावश्च मधुरो गुणः ।
यथाऽनङ्ग[३२]स्त्वदीयाङ्गं[३३] हन्ता हन्ति च मामसौ ॥२४॥

सुकुमारता –

कोमलाक्षरबाहुल्यं वदन्ति सुकुमारताम् ।
यथा मधुकरालापैर्मनोहरमिदं वनम् ॥२५॥

अर्थव्यक्तिः – [३४]

यावद्वाचाभिधानं यत्तदर्थव्यक्तिलक्षणम् ।
यथा हरिकराकृष्टकालियो यमुनाह्रदे ॥२६॥

उदारत्वम् –

उदारत्वं गुणः कोऽपि यस्मिन्नुक्ते प्रतीयते ।
यथा तावत् शरीरं मे यावत्त्वं[३५] पिहितानने ॥२७॥

पा.टि.

(३०) भु 1 भु 2) 'प्रसादिनम्' । (३१) भु 4) 'कथिता' । (३२) भु3) 'स्तदीया' ।
(३३) भु 1 भु 2) 'याङ्गं न हन्ता' । भु 3 भु 4) यांगमहन्ता हन्ति ।
(३४) भु 3. 5. म) 'यावद्वाक्या' । भु 4) 'याचज्ञाचा' ।
(३५) भु2 भु3 भु4) 'यावन्त्यपिहिताननः' । म) 'यावन्त्यपिहितानलः' ।

[३६] **ओजः –**

ओजो बहुसमासत्वं श्लोके गद्येऽपि दृश्यते ।[३७]
[३८] यथा वैरिशिरोरक्तधारान्तोयमसिस्त्रवत् ॥२८॥

कान्तिः –

[३९] वर्णनात्युक्तिशून्या या सा कान्तिरभिधीयते ।
[४०] यथा स्तनभराक्रान्तं वक्षस्ते परितः प्रिये ॥२९॥

समाधिः –

अन्यप्रसिद्धमन्यत्र नीतं[४१] तद्धर्मयोगतः ।
[४३] समाधिभाक् पदं [४२] तत्स्याद्वाचा दहति मन्मथः ॥३०॥

इति दश प्राणाः ।

[४४] इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायणदेवमहाराज- विद्वत्सभाराजित- प्रबन्धकविताप्रकाशक-करणकुलसम्भव-कविभिषग्वर-वासुदेवपात्रतनय-श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ गुणवृत्तिरीतिदशप्राणनिरूपणं नाम द्वादशः[४५] किरणः ।

पाटि.

---

(३६) भु 1 भु 2 भु 4) ओजः इति नास्ति । (३७) भु 2 भु 4) 'धारातोयमसिस्तुवं' । म) 'धारातोयमसिस्त्रव' । (३८) भु 1 भु 2) 'कान्तिः' इति नास्ति । (३९) भु 1) 'शून्यार्था' । (४०) भु 1 भु 2 भु 4 म) 'समाधिः' इति नास्ति । (४१) भु 2 भु 4 म) 'नीतिम्' । (४२) भु 5) 'तस्मात् दहति' । (४३) भु 3 भु 4 भु 5) 'इति दश प्राणाः' इति नास्ति ।(४४) भु 5) श्रीमत्खिमुण्डि' इत्यस्मादारभ्य 'श्रीमद्' इत्यन्तं यावत् ग्रन्थभागो नास्ति । (४५) भु 4) 'एकादशः' ।

□□□

[त्रयोदशः किरणः]

अथ दोषाणां लक्षणोदाहरणानि[१] वक्ष्यामः साहित्यदर्पणे ।

[२] कुत्रचिल्लक्षणं मम –

दोषाः पञ्चविधाः प्रोक्ता रसानामपकर्षकाः ।
पदे पदांशे वाक्येऽर्थे[☆] रसे च सम्भवन्ति ते (सम्भवन्ति रसे च ते?) ॥१॥

तत्र पददोषेषु प्रथमतो दुःश्रवत्वमाह –

दुःश्रवत्वं[३] दुःखदं स्यात् श्रुत्योश्च परुषाक्षरात् ।

यथा – ☆☆

"कार्तार्थ्यं[४] यातु तन्वङ्गी कदानङ्गवशंवदा[५] ।"

अथाश्लीलम् –

अश्लीलं तु त्रिधा व्रीडाजुगुप्साऽशुभवाचकम् ॥२॥

पा.टि. ……………………………………………………………………

(१) भु 2 भु 5) 'लक्षणमुदा' । (२) भु 3 भु 4 भु 5) 'कुत्रचित्' । म) 'कचित्' ।
(३) भु 3 भु 4 भु 5 म) दुःश्रवं दुःखदं श्रुत्योः परुषाक्षरतावशात् ।
(४) भु1 भु2) 'कत्तर्व्यं' । भु 4 भु 5) 'कार्त्त्वर्थ्यम्' । म) 'कार्त्यर्थ्यम्' ।
(५) भु 1 भु 2) 'तदानङ्गवशंवदा' ।

टि.

☆ 'रसे च सम्भवन्ति ते' इत्यस्मिन् पाठे छन्दो भङ्गो भवति । अप्यत्र 'सम्भवन्ति रसे च ते ।' इति पाठः स्यात् ?

☆☆ विश्व. सा.द. VII/ 1.

क्रमेणोदाहरणम् –☆ [६]

"दृप्तारिविजये राजन् ! साधनं सुमहत्तव ।"

[७]

"प्रससार शनैर्वायुर्विनाशे तन्वि ! ते तदा ।"

एषु साधन-वायु-विनाश-शब्दा अश्लीलाः ।

[८]

अथानुचितार्थता –

वर्ण्यापकर्षहेतुत्वं भवेदनुचितार्थता ।

यथा – ☆☆

"शूरा अमरतां यान्ति पशुभूता रणाध्वरे ।"

अत्र पशुपदं कातरत्वमभिव्यनक्तीत्यनुचितार्थता ।

अथ अप्रयुक्तम् –

पण्डितैरप्रयुक्तं तु प्रसिद्धावप्यनादृतम् ॥३॥

यथा – "त्वद्वक्त्रसदृशः कान्ते! भाति पद्मः सरोवरे ।"

अत्र पुंलिङ्गः पद्मशब्दोऽप्रयुक्तः ।

अथ ग्राम्यत्वम् – यथा – "कटिस्ते हरते मनः ।"

अत्र कटिशब्दो ग्राम्यः ।

अथाप्रतीतत्वम् –

एकदर्शनसिद्धत्वमप्रतीतत्वमुच्यते ।

यथा – "योगेन दलिताशयः ।"

अत्र योगशास्त्र एव वासनार्थ आशयशब्दः ।

अथ सन्दिग्धत्वम् –

सन्दिग्धत्वं तु सन्देहजनकत्वं निरुच्यते ॥४॥

पा.टि.

(६) भु 5) 'द्विवते' । (७) भु5) 'वेदना' । (८) भु5) 'तथा' ।

टि.

☆ विश्व. सा.द. VII/ पृ. 473, 474 ☆☆ मम्म. का.प्र. VII/ पृ. 282.

यथा – “आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु।”

अत्र वन्द्यामिति बन्दीभूतायामुत[९] वन्द्यां वन्दनीयामिति सन्देहः।

अथ नेयार्थत्वम् –

रूढिप्रयोजनाभावादशक्त्या लक्ष्यबोधकम्[१०]।
नेयार्थमिति विज्ञेयमलङ्कारविचक्षणैः ॥५॥

यथा – “कमले चरणाघातं मुखं सुमुखि[११] ! तेऽकरोत्।”

अत्र चरणाघातेन निर्जितत्वं लक्ष्यम्।

अथ निहतार्थत्वम्[१२] –

उभयार्थस्य शब्दस्याप्रसिद्धे[१३]ऽर्थे प्रयोजनम्[१४]।
निहतार्थत्वमुद्दिष्टं कविभिः शास्त्रदर्शिभिः ॥६॥

यथा – यमुनाशम्बरं देव ! व्यतानीदम्बरं किल।

शम्बरशब्दो दैत्ये प्रसिद्धः, इह तु जलार्थकः।

अथावाचकत्वम् –

अवाचकत्वं विज्ञेयं दुर्बोधत्वं कवीश्वरैः।

यथा – ‘गीतेषु कर्णमादत्ते सङ्गीतरसकोविदः।’

अत्र आङ्पूर्वो[१५] दाञ्धातुर्दानार्थेऽवाचकः।

पा.टि.

(९) भु 5) ‘भूतायां तत्र’। म) ‘भूताया उत’। (१०) भु 4) ‘बोधनम्’। म) ‘बोधकैः’। (११) भु 5) ‘सुमुखी सुखितोऽकरोत्’। (१२) भु 1 भु 3 भु 4 म) ‘निहिता’। (१३) भु 5) ‘शब्द’- इत्यस्मात्परं ‘दैत्ये’-इत्यस्मात्पूर्वं च ग्रन्थपातः। (१४) भु 2 भु 3) ‘प्रयोगकः’। (१५) भु 5) ‘आत्तं पूर्वो दा’। म) ‘अत्रापूर्वो दा’।

अथ क्लिष्टत्वम्[१६] –

क्लिष्टत्व[१७]मर्थबोधस्य मतं[१८] व्यवहितत्वकम् ।।७।।

यथा – 'क्षीरोदजावसतिजन्मभुवः प्रसन्नाः ।'

अत्र क्षीरोदजा लक्ष्मीस्तस्या वसतिः पद्मं तस्य जन्मभुवः जलानि ।

अथ विरुद्धमतिकारित्वम् –

विरुद्धमतिकारित्वमिदमन्वर्थकं विदुः ।

यथा – 'भूतयेऽस्तु भवानीशः ।'

अत्र भवानीशशब्दो भवान्याः पत्यन्तरविरुद्धमतिकारित्वात्[१९] विरुद्धमतिकृत् ।

अथ विधेयाविमर्शः –

यत्प्राधान्येन निर्देश्यं तन्निर्देशोऽन्यथा यदि ।।८।।
स विधेयाविमर्शः स्यादित्युक्तः काव्यकोविदैः[२०] ।

यथा महानाटके – ☆

"न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिग्धिक्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ॥"

पा.टि.
(१६) भु 5) 'शिलष्टत्वम्' । (१७) भु 5) 'शिलष्टत्वम' ।
(१८) भु 2) 'मन्तव्यव' । भु 5) 'सतत्त्वव' । म) 'मतत्वाव' ।
(१९) भु 4 म) 'पत्यन्तरविरुद्धमतिकृत्' । (२०) भु 1 भु 2 भु 5) 'कविकोविदैः' ।

टि.
☆ हनु. हनु XIV/ 6.

अत्र वृथात्वं प्राधान्येन निर्देश्यम् ।

अथ निरर्थकः –

यो वर्ण्यानुपयोगी स्यात् स निरर्थक उच्यते ॥९॥

यथा –"मुञ्च मानं हि मानिनि" ।

२१ अत्र 'हि' शब्दो वृत्तपूरणमात्रप्रयोजनः ।

अथ असमर्थत्वम् – यथा - "कुञ्जं हन्ति कृशोदरी ।"

अत्र हन्तीति गमनार्थे पठितमपि न तत्र समर्थम् ।

अथ च्युतसंस्कारता – यथा –✩

"गाण्डीवी कनकशिलानिभं भुजाभ्या-
२२ माजघ्ने विषमविलोचनस्य वक्षः ।"

अत्र व्याकरणलक्षणहीनत्वात् च्युतसंस्कारत्वम् । **इति पददोषाः** ।

अथ पदांशदोषाः–

उक्तदोषाणां मध्ये केचिद् दोषाः पदांशेऽपि भवन्ति ।

पदांशे श्रुतिकटुर्यथा कुमारसम्भवे – ✩✩

"तद्गच्छ सिद्ध्यै कुरु देवकार्यम् ।" २३

पदांशेऽश्लीलत्वं यथा–'पाणिःपल्लवपेलवः अत्र पेलवशब्दस्याद्याक्षरद्वयमश्लीलम्

पदांशे नेयार्थत्वम् –

यथा –"संग्रामे निहताः शूरा वचोबाणत्वमागताः ।"
२४ ✩

अत्र वचःशब्दस्य गीःशब्दवाचकत्वे निहतार्थत्वम् (नेयार्थत्वम् ?)

पा.टि. ......

(२१) भु 2 भु 5) 'अथ असमर्थत्वम्' इति नास्ति ।

(२२) भु 1 भु 2 भु 4 भु 5) 'वाचक' ।

(२३) भु5) 'मश्लीलत्वम्' । (२४) म) 'बाणाः' ।

टि.

✩ भार. किरा. XVII/ 63. ✩✩ कालि. कुमा III/ 18.

✩ नेयार्थस्य प्राकरिणिकत्वादत्र 'निहतार्थत्वम्' इत्यस्य स्थाने 'नेयार्थत्वम्' इति स्यात् ?

२५

एवमन्येपि ज्ञेयाः । इति पदांशदोषाः ।

अथ वाक्यदोषा – तत्र प्रतिकूलता –

रसानुगुण्यभिन्नत्वं वर्णानां प्रतिकूलता ।

यथा - मृग्यम् ।

अथ लुप्तविसर्गता –

स्वरे परे विसर्गस्य लोपे लुप्तविसर्गता ॥१०॥

यथा - "गता निशा इमा बाले ।"

२६

अत्र विसर्गाः लुप्ताः ।

अथ आहतविसर्गता–

अथाहतविसर्गत्वमोत्वाद्विश्लेदनेकशः ।

आहता ओत्वं प्राप्ता विसर्गाः ।

यथा – 'धीरो वरो नरो याति' ।

अथाधिकपदत्वम्--

यस्मिन् नोक्तेऽपि तत्प्राप्तिस्तत्राधिकपदत्वकम् ॥११॥

यथा – "पल्लवाकृतिरक्तोष्ठी ।"

२७

अत्राकृतिपदमधिकम् ।

अथ न्यूनपदत्वम्– २८

यथा – "यदि मय्यर्पिता दृष्टिः किं ममेन्द्रतया तदा ।"

अत्र प्रथमपादे त्वयेति पदं न्यूनम् ।

पा.टि.

---

(२५) भु 2) 'इति पदांशदोषाः' इति नास्ति । (२६) भु4) 'विसर्गा लुप्ताः' भु 5) 'विसर्गान्ता लुप्ताः' । म) 'विसर्गो लुप्तः' । (२७) भु 2 भु 5) 'तत्राकृति' । (२८) म) 'ममेन्द्रत्वया' ।

अथ **पुनरुक्तत्वम्**[२९]– यथा –

"रतिलीलाश्रमं भिन्ते[३०] सलीलमनिलो वहन् ।"

अत्र लीलाशब्दः पुनरुक्तः ।

अथ **हतवृत्तत्वम्**– यथा–

"अयि ! मयि मानिनि ! मा कुरु मानम् ।"

इदं वृत्तं हास्यरसस्यानुकूलम् ।

अथ **पतत्प्रकर्षत्वम्**[३१]– यथा –

"प्रोज्ज्वलज्ज्वलनज्वाला[३२]विकटोरुसटाच्छटः ।
श्वासक्षिप्तकुलक्ष्माभृत् पातु वो नरकेसरी ॥"

अत्र क्रमेणानुप्रासप्रकर्षः पतितः[३३] ।

अथ **सन्धिविश्लेषः**– यथा –

"दलिते उत्पले एते अक्षिणी अमलाङ्गि ते ।"

एवंविधसन्धिप्रयोगस्य ☆ (विश्लेषस्य ?) असकृत् प्रयोग एव दोषः ।

अथ **सन्ध्यश्लीलत्वम्**[३४]– यथा– "सदामरविराजितः ।"

अत्र सन्धौ तु जुगुप्साव्यञ्जकमश्लीलत्वम् ।

अथ **अर्धान्तरैकपदत्वम्**– यथा–

"इन्दुर्विभाति कर्पूरगौरैर्धवलयन्[३५] करैः ।
जगन्मा कुरु तन्वङ्गि मानं पादानते प्रिये ॥"

अत्र जगदिति पदं प्रथमार्द्धे पठितुमुचितम् ।

पा.टि.……………………………………………………………………

(२९) भु 2 भु 4) 'पुनरुक्तित्वम्' । (३०) भु 2) 'भित्ते' । भु 5) 'भरे' ।

(३१) भु 5) 'गतप्रकर्षत्वम्' । (३२) भु 1 भु 2) 'प्रज्ज्वाल' ।

(३३) भु 2) 'पतति' । (३४) भु 5) 'सन्ध्यश्लीषत्वम्' ।(३५) म) 'गौरैः कवलयन्' ।

टि.

☆ वाक्येऽस्मिन् प्रयोगशब्दस्य पौनरुक्त्यं दृश्यते । 'सन्धिप्रयोगस्य' इत्यस्य स्थाने 'सन्धिविश्लेषस्य' इति पाठः स्याद्वा ?

अथ गर्भितत्वम्[४५]–

वाक्यान्तरानुप्रवेशो मध्ये वाक्यान्तरस्य च ।
गर्भितत्वमिति[४६] प्राहुरालङ्कारिकसत्तमाः ॥१४॥

यथा – ‘रमणे चरणप्रान्ते प्रणति[४७]प्रवणेऽधुना
वदामि सखि तत्त्वं ते कदाचिन्नोचिताः क्रुधः ॥”

इतिवाक्यदोषाः ।

[४८]अथ अर्थदोषानाह – तत्र - अपुष्टत्वं मुख्यानुपकारित्वम्[४९] ।

यथा -

“विलोक्य वितते व्योम्नि विधुं मुञ्च रुषं प्रिये ।”

अत्र विततशब्दो मानत्यागं प्रति न किंचिदुपकुरुते ।

अथ दुष्क्रमता– यथा –

“देहि मे वाजिनं राजन् गजेन्द्रं वा मदालसम् ।”

अत्र गजेन्द्रस्य प्रथमं याचनं युक्तम्[५०] ।

अथ ग्राम्यत्वम्– यथा –

“स्वपिहि त्वं समीपे मे स्वपिम्येषोऽधुना[५१] प्रिये ।”

अत्रार्थो ग्राम्यः ।

अथ व्याहतत्वम्--

व्याहतत्वं कस्यचित् प्रागुत्कर्षं वापकर्षकम् ।
अभिधाय ततः पश्चात्तदन्यप्रतिपादनम् ॥१५॥

पा.टि.

---

(४५) भु 2) ‘गभीरत्वम्’ । (४६) भु 2) ‘गभीरत्वमिति’ । (४७) म) ‘प्रणत’ (४८) म) ‘अथ अर्थदोषानाह’ इति नास्ति । (४९) म) ‘मुख्यानुकारित्वम्’ । (५०) भु 1 भु 2 भु 4) ‘उक्तम्’ ।(५१) भु 1 भु 2 भु 4 भु 5) ‘स्वपिम्येषाधना’

यथा –

“हरन्ति हृदयं यूनां न नवेन्दुकलादयः ।
वीक्ष्यते यैरियं तन्वी लोकलोचनचन्द्रिका ॥”

५२

अत्र येषामिन्दुकला नानन्दहेतुस्तेषामेवानन्दाय तन्व्याश्चन्द्रिकात्वारोपः ।

अथ **अनवीकृतत्वम्**– यथा –

“सदा चरित खे भानुः सदा चरति मारुतः ।
५३
५४ सदा धत्ते भुवं शेषः सदा धीरोऽविकत्थनः ॥”

अत्र सदेत्यनवीकृतम् ।

अथ **प्रकाशितविरुद्धत्वम्**– यथा –

“कुमारस्ते नराधीश श्रियं समधिगच्छतु ।”

अत्र ‘त्वं म्रियस्व इति विरुद्धार्थप्रकाशनात् प्रकाशितविरुद्धत्वम् ।

अथ **प्रसिद्धविरुद्धता** यथा –

“ततश्चचार समरे सितशूलधरो हरिः ।”

अत्र हरेः शूलं लोकेऽप्रसिद्धम् ।

[यथा वा]-“पादाघातादशोकस्ते सञ्जाताङ्कुरकण्टकः ।”

५५

अत्र कविसमयख्यातिविरुद्धता ।

५६ ५७

अथ **शास्त्रविरुद्धता** – यथा – “अधरे करजक्षतं मृगाक्ष्याः ।”

अत्र शृङ्गारशास्त्रविरुद्धत्वात् शास्त्रविरुद्धता ।

पा.टि. ....

(५२) भु 1 भु 2 भु 4) ‘दीनामन्यहेतुम् । म)‘यानि नवेन्दुकलादीनि नन्दहेतु’ ।

(५३) भु 5) ‘धरे’ ।

(५४) म) ‘सदेत्यर्थोनवीकृतम्’ ।

(५६) भु 1 भु 2 भु 3 म 5) ‘शास्त्रविरुद्धता’ इति नास्ति ।

(५७) भु 5) ‘मृगाक्षीः’ ।

(५५) भु 5) ‘विशो कविसमय’ ।

५८
अथ **सहचरभिन्नत्वम्**– यथा –

“सज्जनो दुर्गतौ मग्नः कामिनी गलितस्तनी ।
५९
खलः पूज्यः समज्यायां तापाय मम चेतसः ॥”

६०
अत्र सज्जनः कामिनी च शोभनौ । तत्सहचरः खलोऽशोभन इति सहचरभिन्नत्वम् ।

६१
अथ **अविशेषत्वम्**– यथा – ६२

“हीरकाणां निधेरस्य सिन्धोः किं वर्णयामहे ।”

अत्र ‘रत्नानां निधे’ रित्यविशेष एव वाच्यः ।

६३
अथ **अनियमत्वम्**– यथा –

“आवर्त एव नाभिस्ते नेत्रे नीलसरोरुहे । ६४
भङ्गाश्च वलयस्तेन त्वं लावण्याम्बुवापिका ॥”

अत्र ‘आवर्त एव’ इति नियमो न वाच्यः ।

अथ **अवाचकत्वम्**– यथा –

“यान्ति नीलनिचोलिन्यो रजनीष्वभिसारिकाः ।”

अत्र तमिस्रास्विति रजनीविशेषो वाच्यः ।

६५
अथ **विधेयत्वम्**– यथा –

“आनन्दितस्वपक्षोऽसौ परपक्षान् हनिष्यति ।”
६६
अत्र परपक्षं हत्वा स्वपक्षमानन्दयिष्यतीति विधेयम् ।

पाटि.

(५८) भु 1 भु 2 भु 3 भु 5) ‘सहचरभिन्नत्वम्’ इति नास्ति ।

(५९) भु 2 भु 3 भु 4) ‘समज्ञायाम्’ । (६०) भु 1 भु 2) ‘सज्जनौ’ ।

(६१) भु 1 भु 2 भु 3 म) ‘अविशेषत्वम्’ इति नास्ति ।

(६२) म) ‘निवर्णयामहे’ । (६३) भु 1 भु 2 भु 5 म) ‘अनियमत्वम्’ इति नास्ति ।

(६४) भु 5) ‘लावण्याम्बुदीर्घिका’ । (६६) भु 4) ‘मानयिष्यतीति’ ।

(६५) भु 1 भु 2 भु 5 म) ‘विधेयत्वम्’ इति नास्ति ।

अथ **अनुवादत्वं**[६७] यथा –

"चण्डीशचूडाभरण ! चन्द्र ! लोकतमोपह ॥
विरहिप्राणहरण कदर्थय[६८] न मां वृथा ॥"

अत्र विरहिण उक्तौ तृतीयपादस्यार्थो[६९] नानुवाद्यः । **इति अर्थदोषाः ।**

अथ रसदोषानाह –

रसस्योक्तिः स्वशब्देन स्थायिसंचारिणोरपि ।

रसस्य स्वशब्दो रसशब्दः शृङ्गारादिशब्दश्च ।

तत्र रसशब्देन दोषो यथा –

"तामुद्वीक्ष्य[७०] कुरङ्गाक्षीं रसो नः कोऽप्यजायत ।"

"चन्द्रमण्डलमालोक्य शृङ्गारे मग्नमन्तरम्[७१] ।"

स्थायिभावस्य स्वशब्दवाच्यत्वं यथा –

"अजायत रतिस्तस्यास्त्वयि लोचनगोचरे ।"

व्यभिचारिणः स्वशब्दवाच्यत्वं[७२] यथा –

"जाता लज्जावती मुग्धा प्रियस्य परिचुम्बने ।"

अत्र 'आसीन्मुकुलिताक्षी[७३] सा' इति युक्तः पाठः ।

[७४] **परिपन्थिरसाङ्गस्य विभावादेः परिग्रहः ॥१६॥**

यथा –

"मानं मा कुरु तन्वङ्गि ! ज्ञात्वा यौवनमस्थिरम् ।"

अत्र यौवनास्थित्वनिवेदनं शृङ्गारपरिपन्थिनः शान्तस्याङ्गं शान्तस्यैव च विभाव इति शृङ्गारे तत्परिग्रहो न युक्तः ।

पा.टि.

---

(६७) भु 1 भु 2 भु 3 भु 5 म) 'अनुवादत्वम्' इति नोपलभ्यते ।
(६८) म) 'कदर्थयसि' । (६९) भु 2) 'पादस्याद्यो' । भु 4) 'पादतथा' ।
(७०) भु 1 भु 2) 'अमुं वीक्ष्य' । (७२) भु 1) 'वाच्यम्' । म) 'वाच्यं हि'
(७१) भु 2) 'मग्नमानसम्' ।(७३) भु 5) 'आशा मुकुलितायासेति युक्तम्' ।
(७४) भु ५) 'यथा' इत्यसमादारभ्य 'मस्थिरम्' इत्यन्तं यावद् ग्रन्थपातः ।

☆ [**आक्षेप: कल्पित: कृच्छ्राद्नुभावविभावयो: ।]**
यथा –

"धवलयति शिशिररोचिषि भुवनतलं लोकलोचनानन्दे ।
७५
ईषत्क्षिप्तकटाक्षा स्मेरमुखी सा निरीक्ष्यतां तन्वी ॥"
७६

अत्र शृङ्गारस्योद्दीपनालम्बनविभावावनुभावपर्यवसायिनौ स्थिताविति कष्टकल्पना ।

७७
अकाण्डे प्रथनं यथा –
वेणीसंहारे द्वितीयेऽङ्के प्रवर्तमानानेकवीरसंक्षेपकाले (संक्षयेऽकाले?) दुर्योधनस्य भानुमत्या
७८
सह शृङ्गारप्रथनम् ।

छेदो यथा –
७९
वीरचरिते राघवभार्गवयोर्धाराधिरूढे अन्योन्यसंरम्भे ● "कङ्कणमोचनाय गच्छामि" इति राघवस्योक्तिः ।

पुन: पुनर्दीप्तिर्यथा – कुमारसम्भवे रतिविलापे ।

अनङ्गस्य कीर्तनं यथा –
८०
कर्पूरमञ्जर्यां राज्ञा नायिकया स्वयं कृतं वसन्तस्य वर्णनमनादृत्य वन्दिवर्णितस्य तस्य प्रशंसा ।

पा.टि. ……………………………………………

(७५) म) 'निरीक्षीता' । (७६) म) 'स्मितकटाक्षा' । (७७) भु 1 भु4 म) 'ग्रथनम्' । (७८) भु 2 भु 5 म) 'ग्रथनम्' । (७९) म) 'संरम्भे' इति नास्ति । (८०) भु 4) 'वर्णना' ।

टि.

☆ अयं कारिकाभाग: अग्रीमश्लोकसम्बद्ध: मातृकासु नष्ट इति तर्क्यते । एनं विना 'धवलयति' इत्यादि उदाहरणं न युज्यते । एतत्प्रकरणं साहित्यदर्पणस्य दोषप्रकरणं प्राय: अनुकरोति । तस्मात् साहित्यदर्पणमनुसृत्य अयं कारिकाभागोऽत्र योजितो वर्तते । ☆ विश्व. सा.द. VII/13. पृ536. ● भव. महा. II/ पृ53

अथ प्रकृतिविपर्ययः –

यो यथाभूतस्तस्यान्यथावर्णने प्रकृतिविपर्ययो दोषः ॥

[८१] यथा – धीरोदात्तस्य रामस्य धीरोद्धतवत् छद्मना वालिवधः ।

अथानौचित्यं यथा –

कुमारसम्भवे उत्तमदेवतयोः पार्वतीपरमेश्वरयोः सम्भोगशृङ्गारवर्णनम् । इदं तु पित्रोः सम्भोगवर्णनमिवात्यन्तमनुचितमित्याहुः ।

ग्रन्थविस्तरभयाद् ये ये दोषा नोक्तास्ते काव्यप्रकाशादिषु ज्ञेयाः ।

उक्तदोषाणां क्वचिददोषत्वं क्वचिद्गुणत्वमित्याह[८२] –

वक्तरि क्रोधसंयुक्ते तथा वाच्ये[८३] समुद्धते ॥१७॥
रौद्रादौ तु रसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत् ।
सुरतारम्भगोष्ठ्यादावश्लीलत्वं तथा[८४] गुणः ॥१८॥
स्यातामदोषौ श्लेषादौ निहतार्थाप्रयुक्तते ।
गुणः स्यादप्रतीतत्वं ज्ञत्वं चेद्वक्तृवाच्ययोः[८५] ॥१९॥

एतेषामुदाहरणमूह्यम् ।

स्वयं वापि परामर्शे

अप्रतीतत्वं गुण इति अनुयुज्यते ।

कथितं च पदं पुनः ।

विहितस्यानुवाद्यत्वे विषादे[८६] विस्मये क्रुधि ॥२०॥

पा.टि. ---

(८१) भु 3) 'यथा' इत्यस्मादारभ्य 'मित्याहुः' इत्यन्तं यावत् ग्रन्थपातः ।
(८२) म) 'मित्याहुः' ।
(८३) भु 5) 'वाच्येऽप्यनुद्धते' ।
(८४) भु 2 म) 'यथा' ।
(८५) भु 2 भु 3) 'वाक्ययोः' ।
(८६) भु2) 'विवादे' ।

दैन्येऽथ लाटानुप्रासेऽनुकम्पायां प्रसादने ।
अर्थान्तरसंक्रमितवाच्ये हर्षेऽवधारणे ॥२१॥

गुण इत्येव यथा –

“उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥”

८७

अत्र विहितानुवादः ।

“हन्त हन्त गतः कान्तः वसन्ते सखि नागतः ।”

अत्र विषादः ।

“चित्रं चित्रमनाकाशे कथं सुमुखि ! चन्द्रमाः ।”

अत्र विस्मयः ।

“सुनयने नयने निधेहि ।” अत्र लाटानुप्रासः । एवमन्यत् ।

अधमोक्तिषु ग्राम्यत्वं गुणो भवेत् । ८८
धनुर्ज्यादिषु शब्देषु शब्दाश्च धनुरादयः ।
☆ **[आरूढत्वादिबोधाय]**

८९

यथा – “पूरिते रोदसी ध्वानैर्धनुर्ज्यास्फालनोद्भवैः ।”

एवं कर्णावतंसश्रवणकुण्डलपुष्पमालामुक्ताहारकरकङ्कणादयः ।

[प्रयोक्तव्याः स्थिता अमी] ॥२२॥

पा.टि.

---

(८७) म) ‘पिहितानुवादः’ । (८८) भु 3) ‘धनुरादय’ इत्यस्मात्परं ‘यथा’इत्यस्मात्पूर्वं च गुण इत्यनुषज्यते’ इत्यधिकं दृश्यते । (८९) भु 1 भु 2 भु 4 म) ‘पूरिता’ ।

टि.

☆ अयं कारिका भाग ‘आरूत्वादिबोधाय’ इति तृतीयपादं विना अस्पष्टार्थो भवति । अस्मादत्र आरूढत्वादि बोधाय इत्यादि उत्तरार्धं साहित्यदर्पणानुरोधेन संयोजितम् । द्र विश्व. साद. VI/ 26.

न्यूनपदं क्वचिन्न दोषो नो गुणः ।

समाप्तपुनरात्तत्वं न दोषो न गुणः क्वचित् ।
गर्भितत्वं[९०] गुणः क्वापि पतत्प्रकर्षता तथा ॥२३॥
क्वचिदुक्तौ[९१] स्वशब्देन न दोषो व्यभिचारिणः ।
अनुभावविभावाभ्यां रचना यत्र नोचिता ॥
अनुकारे च सर्वेषां दोषाणां नैव दोषता ॥२४॥

एतेषामुदाहरणमूह्यम् ।

अथार्थनैर्मल्यमुच्यते –

उच्चारणेन वाक्यस्य सम्यगर्थावबोधनम्[९२] ॥
सुखतादोषरसयुगर्थनैर्मल्यमेव[९३] तत् ॥२५॥

ध्वन्युत्पाद-रसोत्कर्षचित्रदोषवारणादीनां कवित्वानां[९४] दोषा न ग्रहणीया गुणाश्च संग्रहीतव्याः[९५] ।

यथा ग्रन्थान्तरे –

"ध्वन्युत्पादे रसोत्कर्षे चित्रे च दोषवारणे ।
विशेषणाद्विशेष्यस्य नास्त्ययुक्तो[९६] गुणग्रहः ॥ "२६॥

पा.टि.

(९०) भु 5) 'गभीरत्वम्' । (९१) भु 1 भु 2) 'क्वचिदुक्तो' । म) 'क्वचिदुक्तिः' ।
(९२) भु 2) 'बोधने' । भु 5) 'बोधनकम्' । (९३) भु 3 भु 4 म) 'मेव च' ।
(९४) म) 'कवित्वानां' इति नास्ति । (९५) म) 'गृहीतव्याः' ।
(९६) भु 1 भु 2 भु 4) 'नास्त्ययुक्त' । भु 3) 'नास्त्ययुक्तौ' ।

अथ गीतदोषानाह सङ्गीतनारायणादिषु –★

गीतेषु दोषाः[९७] स्खलनादि वाण्या-[९८]
स्तालाद्यभावेन निबन्धनं च ।
स्याद्धातुमात्वादिहतिः कटूक्ती
रसादिहानिः श्रवणाप्रियत्वम् ॥२७॥

धातुमात्वादिलक्षणम् –★★

गीतस्यावयवो धातू रागादिर्मातुरुच्यते ।

● [९९] इत्यादयो दोषा बहवः सन्ति । यद्यप्येवं (तथापि) हरिनायकेनोक्तम्[१००] –

''गीते दीर्घो भवेद् ह्रस्वो ह्रस्वो दीर्घः क्वचित्क्वचित् ।
एकत्वे च क्वचिद्धित्वं द्वित्वे चैकत्वमेव च ॥२८॥
[१०१] श्लिष्टे विश्लिष्टता क्वापि क्वचिद्रेफस्य वैकृतम् ।
क्वचित् कोमलता गाढे गाढता कोमले क्वचित् ॥'२९॥

तदुक्तं गीतप्रकाशे –

''पौनरुक्त्यं च(न?)भाषाढ्ये गीते दोषोऽभिजायते ।
[१०२] शीघ्रोच्चारे न वर्णानां तथा चैव प्रसारणे ॥३०॥

पा.टि. ....

(९७) भु3) 'दोषः' । (९८) भु1 भु) 'वाचा' । (९९) भु5) ''इत्यादयो....सन्ति ।
इत्यत्र– ''इत्यादिदोषा गीतेषु बहवो यदि सन्त्यपि ।
नोक्तास्ते चेद् ग्रहस्तेषां ज्ञाने तत्तद्विलोक्यताम् ॥''इति ।
(१००) भु 2) 'हरिनारायणेनोक्तम्' । (१०१) भु 1 भु 2 भु 5 म) 'श्लिष्टो' ।
(१०२) भु 1 भु 2) 'शीघ्रोच्चारेण' । भु 4) 'शीघ्रोच्चारे च' । म) 'शीघ्रोच्चारण' ।

टि.

★ गज. संगी. I/ 522. ★★ गज. संगी. I/ 522.

● गीतेषु दोषा.........श्रवणाप्रियत्वम्' इत्यनेन पद्येन 'इत्यादयो' इत्यस्मान्वयः ।

१०३
लिङ्गान्यत्वे विसन्धौ च संयुक्ताक्षरमोक्षणे ।
असंयुक्तेऽपि संयोगे ह्रस्वदीर्घव्यतिक्रमे ॥३१॥
१०४ १०५ १०६
भवन्त्येते न दोषाय संस्कृते प्राकृतेऽपि च
१०७ १०८
वारद्वयादिकं गीते पौनरुक्त्यं न दोषभाक् ॥''३२॥
१०९

एवं संगीतसारेऽप्युक्तम् । ११०

इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गंगवशांवतंस-वीरश्रीगजपति-जगन्नाथनारायणदेवमहाराज-विद्वत्सभाराजित-प्रबन्धकविताप्रकाशक-
१११
करणकुलसंभव-कविभिषग्वर-वासुदेवपात्रतनय-श्रीमद्गोपीनाथ कविभूषणकृतौ
११२
कविचिन्तामणौ दोषनिरूपणं नाम त्रयोदशः किरणः ।

पा.टि.

(१०३) भु5) 'लिङ्गान्यैक्यैः' । (१०४) भु 1 भु 2 भु 4) 'च दोषाय' ।
(१०५) भु 1 भु 2 भु 4 म) 'संस्कृत' । (१०६) भु 5) "प्राकृते तु न" ।
(१०७) भु 5) 'वारद्वयाधिकम्' । (१०८) भु 5) न ।
(१०९) भु 4) 'प्युक्तम्' इत्यस्मात् परम् 'इति' इत्यस्मात् पूर्वं च-
"संस्कृतप्राकृतयोस्तु तत्तल्लक्षणहीनत्वं दोष एव । दुष्टं पदं श्रुतिकटु इत्यादिदोषाः काव्यप्रकाशादिभ्यो ज्ञातव्याः ।" इत्यधिकमस्ति ।
(११०) भु 5) 'इति श्रीमत्...श्रीमद्गोपीनाथ' इत्यस्य स्थाने 'इति गोपीनाथ' इति ।
(१११) भु 3) 'महापात्र' । (११२) भु 5) 'द्वादशः'

* * *

[चतुर्दशः किरणः]

अथ अलंकारानाह- साहित्यदर्पणे –☆

"शब्दार्थशोभातिशायिनो रसादेरुपकारका[1] अस्थिरा[2] धर्मा अलंकाराः ।"

ते च द्विधा । अनुप्रासादयः शब्दगता[3] अलंकारा उपमादयोऽर्थगता अलंकाराश्चेति ।

तत्र शब्दालंकारा निरूप्यन्ते –

स्वरवैषम्येऽपि शब्दसाम्यमनुप्रासः ॥१॥

स च[4] पञ्चविधः,[5] छेकानुप्रासवृत्त्यनुप्रासश्रुत्यनुप्रासान्त्यानुप्रासलाटानुप्रासभेदात् ।

तत्र छेकानुप्रासः– साहित्यरत्नाकरे लक्षणोदाहरणम्–☆☆

"द्वयोर्द्वयोर्व्यञ्जनयोर्युग्मयोर्या निरन्तरा ।
आवृत्तिः श्रूयते सोऽयं छेकानुप्रास ईरितः ॥'२॥

छेका विदग्धास्तदभिमतोऽनुप्रासः छेकानुप्रास[6] इत्यन्वर्थसंज्ञा[7] । यथा–

"राजराजसमैश्वर्यः शास्त्रभासुरधीरधीः ।
राजराजद्यशो रेजे रामो दाशरथी रथी ॥"

पा.टि. ....

(१) भु 5) 'रसादेरूकालंकारः'। (२) भु 1 भु 2 भु 4 म) 'अस्थिरा धर्मा' इति नास्ति । (३) भु 4) 'शब्दालंकारा' ।(४) भु 2) 'स च पञ्चविधः' इति नास्ति । (५) भु 4 भु 5 म) "छेकानुप्रास...भेदात्" इति ग्रन्थभागो नास्ति । (६) भु 1 भु 2) 'छेकानुप्रास' इति नास्ति । (७) भु 5) 'इत्यर्थसंज्ञा' ।

टि. ___

☆ विश्व. सा.द. / पृ. 606.

☆☆ धर्म. सा.र. VI/ 2.

वृत्त्यनुप्रासः – प्रतापरुद्रयशोभूषणे – ✩

एकद्विप्रभृतीनां तु व्यञ्जनानां यदा भवेत् ।
पुनरुक्तिरसौ नाम वृत्त्यनुप्रास इष्यते ॥३॥

यथा श्रीगीतगोविन्दे – ✩✩

"उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ।
नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥"

श्रुत्यनुप्रासः – साहित्यदर्पणे – ●

"उच्चार्यत्वाद्यदेकत्र स्थाने तालुरदादिके[८] ।
सादृश्यं व्यञ्जनस्यैतत् श्रुत्यनुप्रास उच्यते ॥४॥

यथा –

"दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुमो[९] वामलोचनाः ॥"

अत्र जीवयन्तीति जयिनीरित्यत्र जकारयकारयोरेकत्र स्थाने तालौ उच्चार्यत्वात्सादृश्यम् । एवं दन्त्यकण्ठ्यादीनामप्युदाहार्यम् ।

अन्त्यानुप्रासः – साहित्यदर्पणे – ●●

व्यञ्जनं चेद्यथावस्थं सहाद्येन[१०] स्वरेण तु ।
आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत् ॥५॥

पा.टि. ....

(८) म) 'तादुरवादिते' । (९) भु 1 भु 2) 'स्तुवो' । भु 3) 'स्तुवे' ।
(१०) भु 1 भु 2 भु 4 भु 5 म) 'सहान्त्येन' ।

टि. ____

✩ प्र. विद्या. प्र.रु./ पृ. 247. ✩✩ जय. गीत. I/9.

● विश्व. सा.द. X/5. पृ. 612. ●● तत्रैव X/6. पृ. 613.

यथा वस्थमिति यथासम्भवमनुस्वारविसर्गसंयुताक्षरविशिष्टम् ।

एष च प्रायेण पादस्य पदस्य चान्ते प्रयोज्यः ।

पादान्तगो – यथा[११] साहित्यदर्पणे – ☆

'केशः काशस्तबकविकासः कायः प्रकटितकरभविलासः ।
चक्षुर्दग्धवराटककल्पं त्यजति न चेतः काममनल्पम् ॥''

पदान्तगो यथा - मृग्यम् ।

लाटानुप्रासः – प्रतापरुद्रयशोभूषणे – ☆

शब्दार्थयोः पौनरुक्त्यं यत्र तात्पर्यभेदतः ।
स[१२] काव्यतात्पर्य[१३]विदां लाटानुप्रास इष्यते ॥६॥

यत्र शब्दार्थयोस्तातपर्यभेदमात्रं न स्वरूपभेदः तत्र **लाटानुप्रासः** ।

यथा ग्रन्थान्तरे –

'स्मेरराजीवनयने नयने किं निमीलिते ।
पश्य निर्जितकन्दर्पं कन्दर्पवशगं प्रियम् ॥''

पा.टि. ....

(११) भु3) साहित्यदर्पणे-केशः....मनल्पम्' इत्यस्य स्थाने **रूपगोस्वामिनः –**

'इन्द्रनीलमणिमञ्जुलवर्णः फुल्लनीपकुसुमाञ्चितकर्णः ।
कृष्णलाभिरकृशोरसि हारी चारुतो जयति कुञ्जविहारी ॥''

यथा वा - **तस्यैव मुकुन्दमुक्तावल्याम् –**

'विकसितनलिनास्यं विस्मरन्मन्दहास्यं
कनकरूचिदुकुलं चारुबर्हावचूलम् ।
....
किमपि निखिलसारं नौमि नन्दकुमारम् (?) ॥''इति ।

(१२) म) 'सत्काव्य' । (१३) भु 4) 'विद्या' । म) 'पदो' ।

टि.

☆ विश्व. सा.द./ पृ 614 ☆☆ विद्या. प्र.रु./ 248.

यथा वा ग्रन्थान्तरे –

“यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ।
[१४]यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ॥”

अत्रानेकपदानां पौनरुक्त्यम् । एष च प्रायेण[१५] लाटजनप्रियत्वात्[१६] लाटानुप्रासः[१७] ।

पुनरुक्तवदाभासः – प्रतापरुद्रयशोभूषणे –☆

यत्रार्थः प्रमुखे किञ्चिद्भासते[१८] पुनरुक्तवत् ।
पुनरुक्तवदाभासोऽलङ्कारः स सतां मतः ॥७॥

“यत्रार्थः प्रथमं पुनरुक्तवद् भासते, अन्वयवेलायामन्यथा[१९] भवति स पुनरुक्तवदाभासोऽलंकारः[२०] ।”

यथा तत्रैव–☆☆ ‘जिष्णुरिन्द्रः क्षितिभुजां श्रीपतिः पुरुषोत्तमः ।
भास्वान् सूर्यस्फुरत्तेजाः काकतीन्द्रो विराजते ॥”

अथ यमकलक्षणम् – साहित्यरत्नाकरे –●

“आवर्त्यतेऽर्थभेदेन सस्वरा व्यञ्जनावलिः[२१] ।
यदा तदा स्याद् यमकं बहुधाद्यन्तमध्यगम्[२२] ॥”८॥

पा.टि.

(१४) म) ‘यस्य’ चेत्यादि द्वितीयार्धं न दृश्यते । (१५) भु 5) ‘लाटजनप्रायेण’ । (१६) भु 1 भु 2 भु 4 भु 5) ‘प्रियत्वं’ । (१७) भु 1 भु 2 भु 4 भु 5) ‘लाटानुप्रासिकम्’ । (१८) म) ‘त्रासते’ । (१९) भु 3) ‘वेलायां त्वन्यथा’ ।(२१) म) ‘सस्वरव्यंजनावलिः’ (२०) भु 1 भु 2 भु 4) ‘भासालंकारः’ । (२२) भु 4) ‘बहुधात्यन्त’ ।

टि.

☆ विद्या. प्र.रु./ पृ. 248.

☆☆ विद्या. प्र.रु. /पृ. 248.

● धर्म. सा.र. VI/ पृ. 406.

२३

स्वरव्यञ्जनसमुदायस्य सादृश्येन ग्रन्थने यमकम् ।

ग्रन्थान्तरे पुनर्यमकलक्षणमुच्यते – ☆

२४

'अर्थे सत्यर्थभिन्नानां वर्णानां [सा] पुनः श्रुतिः यमकम् ।'१॥

यथा प्रतापरुद्रयशोभूषणे – ☆☆

"प्रतापः काकतीन्द्रस्य महामहिमतेजसः ।
श्रियं दधाति पद्मेष्टमहामहिमतेजसः ॥"

यथा च माघे – ●

"नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम् । २५
मृदुल-तान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः ॥"

अत्र पदावृत्तिः । यमकस्य भेदा आदिमध्यान्तगतत्वेन बहवः सन्ति, दिङ्मात्रमुदाहरणमुक्तम् । २६

यमकादौ भवेदैक्यं डलोर्बवोर्लरोस्तथा ।

२७

यथा रघुवंशे – ●● २८

"अनुभवन्नवदोलमृतूत्सवं पटुरपि प्रियकण्ठजिघृक्षया ।
२९
अनयदासनरज्जुपरिग्रहे भुजलतां जडतामबलाजनः ॥"

पा.टि. ....

(२३) भु 3) 'ग्रथनम्' । भु4) 'प्रथने' । भु 5) 'ग्रथनेन' ।
(२४) भु 3) अनेर्थकानां अर्थे सति अभिन्नार्थानां स्वरव्यञ्जनरूपाणां वर्णानां तेनैव क्रमेण पुनः श्रुतिर्यमकम् । (२५) भु 1) 'सुमनोहरैः' ।
(२६) भु 5) 'डलौ बवौ लरौ तथा'।(२७) भु1) 'रघुवंशे' इति नास्ति ।
(२८) भु 1 भु 2 भु 5) 'मृदुत्सवं' ।(२९) भु 1 भु 2 भु 4) 'जनयदासन' ।

टि.

☆ मम्म. का. प्र. IX/ 117.
☆☆ विद्या. प्र. रु./ पृ. 247.
● माघ. शिशु VI/ 2.
●● कालि. रघु: IX/ 46.

महायमकलक्षणम्– ग्रन्थान्तरे –

एकाक्षरचतुष्पादं महायमकमुच्यते ॥१०॥

उदाहरणं माघभारव्यादिषु ज्ञेयम् ।

☆ पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ।

आद्रिशब्दात् खड्ग[३०]मुरजगोमूत्रिकादयः ।

तत्र पद्मबन्धः – यथा – ☆☆

"मारमा[३१] सुषमा चारुरुचामारवधूत्तमा ।
मात्तधूर्ततमावासा[३२] सा वामा मेऽस्तु मा रमा ॥"

एषोऽष्टदलपद्मबन्धः ।

● रसस्य परिपन्थित्वान्नालङ्कारः प्रहेलिका ॥११॥

उक्तिवैचित्र्यमात्रं सा[३३] च्युतदत्ताक्षरादिका ॥१२॥

च्युताक्षरा दत्ताक्षरा च्युतदत्ताक्षरा च ।

उदाहरणं यथा – ●●

"कूजन्ति कोकिलाः साले यौवने फुल्लमंजुले ।
किं करोतु कुरङ्गाक्षी वदनेन निपीडिता ॥"

पा.टि.

---

(३०) भु 4) 'खण्ड' ।
(३१) भु 1 भु 2) 'मारुमा' ।
(३२) भु 1 भु 2) 'वासा मा' ।
(३३) भु 3 म) 'स्यात्' ।
(३४) म) 'फुल्लमम्बुजम्' ।
(३५) भु 1 भु 2 भु 4) 'मदनेन' ।

टि.

☆ विश्व. सा. द. X/ पृ. 643.
☆☆ विश्व. सा.द./ पृ644.
● विश्व. सा. द. X/ पृ. 650.
●● विश्व. सा.द./पृ. 650.

अत्र रसाले[३६] इति वक्तव्ये 'साले' इति 'रश्च्युतः[३७] । 'वने' इति वक्तव्ये[३८] यौवने इति 'यौ'[३९] दत्तः । 'मदनेन' इति वक्तव्ये[४०] 'वदनेन' इति 'म' श्च्युतो[४१] 'वो' दत्तः । आदिशब्दात् क्रियाकारकगुप्त्यादयः ।

तत्र क्रियागुप्तिर्यथा –☆

"पाण्डवानां सभामध्ये दुर्योधन उपागतः ।
तस्मै गां च हिरण्यं च सर्वाण्याभरणानि च ॥"

अत्र 'दुर्योधन' इत्यत्र 'अदुः यो अधनः' इति ।[४२] 'अदुः' इति क्रियागुप्तिः[४३] । एवमन्यत्रापि ।

अथ बहिर्लापिका –

कः स्वर्गाधिपतिः सुधाकरतनुः पूर्णा कदा दृश्यते [४४]
कः पातालतले बलिं निजपदात् प्राव्राजयत् कोकयोः ।
प्रातः कः खलु जायते सिततनुः[४५] का सर्वदा लोच्यते[४६]
या[४७] प्रश्नोत्तरमध्यवर्णघटिता भूत्यै सदा नोऽस्तु सा ॥

पा.टि. ....

(३६) भु 2 भु 4 म) 'रसालेति' । (३७) भु 3) 'रेफच्युतः' । (३८) भु 1 भु 2 भु 4) 'इत्यत्र' । (३९) भु 3) 'यौकारो दत्तः' । भु 5) 'यौकारच्युतः' । म) 'यौदत्तम्' । (४०) भु 2 भु 4) 'वक्तव्ये वदनेन' इति नास्ति । भु 5) वदनेन इति वश्च्युतो मो दत्तः ।
(४१) भु 3) 'मकारश्च्युतो वकारो दत्तः' । (४२) भु 3) 'इति पदत्रयच्छेदे' । (४३) भु 3) क्रियागुप्तिः इत्यस्मात् परम् 'एवं इत्यस्मात्पूर्वं च- यः अधनः उपागतः तस्मै गवादिकं अदुरित्यन्वयः' इत्यधिकमस्ति (४४) म) 'काकयोः' । (४५) म) 'शिततनौ काः' । (४६) भु 3) 'रोचते' । (४७) भु 4) 'यो' ।

टि.

☆ विश्व. सा.द. /पृ 651.

अस्यार्थः – स्वर्गाधिपतिः कः[४८] ? **वासवः**[४९] । सुधाकरतनुः कदा पूर्णा दृश्यते[५०] ? **पर्वणि**[५१] । निजपदात् पातालतले बलिं कः प्राव्राजयत्[५२] ? **वामनः**[५३] । प्रातः कोकयोः खलु निश्चितं को जायते[५४] ? **सङ्गमः**[५५] । सिततनुः का सर्वदा लोच्यते[५६] ? **बलाका**[५७] । एवं प्रश्नोत्तरमध्यवर्णघटिता या **सर्वमङ्गला** सा नोऽस्माकं भूत्यै सम्पदे सदाऽस्तु ।

अथान्तर्लापिका –

"को निर्दग्धस्त्रिपुरजयिना कश्च कर्णस्य हन्ता ?
नद्याः कूलं विघटयति कः कः परस्त्रीरतो वा ?
कः संनद्धो भवति समरे भूषणं किं कुचानां ?
किं वा दुःखं भवति महतां **मानपूजापहारः** ?"

मानपूजापहारः' इत्यत्र श्लोकार्थो विज्ञेयः । [५८]एवमेकाक्षरनिरोष्ठ्यनुलोमादयः शब्दालङ्काराः।

पा.टि.
(४८) भु 3) 'क इति प्रश्नः' । (४९) भु 3) 'वासव इत्युत्तरम्' ।
(५०) भु 3) 'दृश्यते इति प्रश्नः' । (५१) भु 3) 'पर्वणीत्युत्तरम्' ।
(५२) भु 3) 'प्राव्राजयत् इति प्रश्नः' । भु 4) 'प्रव्राजयेत्' ।
(५३) भु 3) 'वामन इत्युत्तरम्' । (५४) भु 3) 'जायते इति प्रश्नः' ।
(५५) भु 3) 'सङ्गम इत्युत्तरम्' । (५६) भु 3) 'लोच्यते इति प्रश्नः' ।
(५७) भु 3) 'बलाका इत्युत्तरम्' ।
(५८) भु 3 भु 4 भ 5 म) एवमेकाक्षर....शब्दालंकारः' इत्यस्य स्थाने – **एकाक्षरः भारवौ** - (XV/14)

"ननोननुन्नोनुन्नोनोनानानानानानु
नुन्नोऽनुन्नेननुन्नेनोनानेनानुन्ननुन्ननुत् ।' अस्यार्थः...... (?)

इति [५९] श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायणदेवमहाराज-विद्वसभाराजित-प्रबन्धकविताप्रकाशक-करणकुलसम्भव-कविभिषग्वर-[६०] वासुदेवपात्रतनय-श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ शब्दालङ्कारनिरूपणं नाम [६१] चतुर्दशः किरणः ।

पाटि.

निरोष्ठी – तत्रैव (XV/7)

"अथाग्रे हसता साचिस्थितेन स्थिरकीर्तिना ।
सेनान्या ते जगदिरे किञ्चिदायस्तचेतसा ॥"

द्व्यक्षरी – माघे (XIX/84)

"नीलेनानालनलिननिलीनोल्ललनालिना ।
ललनालालनेनालं लीलालोलेन लालिना ॥" अस्यार्थः........(?)

प्रतिलोमानुलोमकौ – भारवौ (XV/20)

ननु हो मथना राघो घोरा नाथमहो नु न ।

इति अधिकं दृश्यते ।

(५९) भु 5) श्रीमत्खिमुण्ड' इत्यस्मादारभ्य 'श्रीमद्' इत्यन्तं यावत् नोपलभ्यते ।

(६०) भु 3) 'वासुदेवमहापात्र' । (६१) भु 4) 'त्रयोदशः' ।

□ □ □

[पञ्चदशः किरणः]

अथ अर्थालङ्कारानाह –

तत्र प्रथममनेकालङ्कारबीजभूतत्वाद् उपमा निरूप्यते ।

☆

चन्द्रावलोकने (चन्द्रालोके?) – ☆☆

"उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ॥"१॥

कुवलयानन्दे च– ●

"[1]यत्रोपमानोपमेययोः सहृदयहृदया[2]ह्लादित्वेन चारु सादृश्य[3]मुद्भूततयोल्लसति व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते तत्रोपमालङ्कारः ।"२॥

सा उपमा पूर्णा लुप्ता चेति द्विधा ।

तल्लक्षणं प्रतापरुद्रयशोभूषणे – ●●

"उपमानोपमेय[4]साधारणधर्मसादृश्यप्रतिपादकानां प्रयोगे पूर्णा[5] ।

एकस्य द्वयोस्त्रयाणां वा लोपे [6]लुप्ता ।"३॥

पा.टि. ....

(१) भु 5) 'यत्रोपमानौ' । (२) म) 'ह्लादकत्वेन' । (३) भु 2 भु 4) 'मद्भूततयो' ।
(५) भु 3) 'तत्साधारण' । (६) म) 'पूर्णोपमा' । (७) म) 'लुप्तोपमा' ।

टि.

☆ सर्वासु मातृकासु 'चन्द्रालोकः' इति नाम्ना प्रसिद्धः अलंकारग्रन्थः क्वचित् 'चन्द्रावलोकनम्' इति क्वचित् 'चन्द्रावलोकः इति च निर्दिश्यते । वस्तुतस्तत्र चन्द्रालोक इत्यैव पाठः अपेक्षते ।

☆☆ पीयू. चन्द्रा. V/ 11. ● अप्प. कुव./पृ4. ●● विद्या.प्र. रु./पृ256.

तत्र पूर्णा यथा चन्द्रावलोके (चन्द्रालोके ?) – ☆

"हंसीव भूपतेः कीर्तिः[८] स्वर्गङ्गामवगाहते ।"

यथा च मम – [९]

कान्तामुखं सकलचन्द्र इवातिकान्तं नेत्रद्वयं विकचपद्मिवातिरम्यम् ।
बाहू मृणाललतिकेव विराजितौ च सौदामिनीव तरुणी द्युतिपूर्णदेहा[१०] ॥

लुप्तोपमा यथा श्रीगीतगोविन्दे – ☆☆

"आवासो विपिनायते प्रियसखीमालापि जालायते
तापोऽपि श्वसितेन दावदहनज्वालाकरालायते ।
सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयन् शार्दूलविक्रीडितम् ॥"

पा.टि. ....

(८) भु 3) 'स्वर्गङ्गामवगाहते' इत्यस्मात् परं 'यथा च मम' इत्यस्मात् पूर्वं च-

"स्वर्गङ्गामिति पदे स्वर्गङ्गाम् अवगाहते अन्यत्र स्वर्गं गां चावगाहते इति लक्षणसंगतिः । अत्र हि हंसीत्युपमानस्य कीर्तिरित्युपमेयस्य स्वर्गङ्गावगाहनरूपस्य साधारणधर्मस्य इवेति सादृश्यप्रतिपादकस्य प्रयोगोऽस्ति ।" इति अधिकं दृश्यते । (९) म) 'चन्द्रमिव' । (१०) भु 3) 'द्युतिपूर्णदेहा' इत्यस्मात् परं 'लुप्तोपमा' इत्यस्मात् पूर्वं च –

मृणाललतिकेवेति शब्दइवार्थेऽव...........

...........पूरितवत् मृणाललतिके इवेत्यर्थः । इवशब्दप्रयोगे तु बाहोर्द्वित्वान्मृणाललतिकाया उपमानभूताया....मनुचितं मृणाललतिके इव राजमानौ इति पाठे तु सर्वं समञ्जसति ।.......... । इति अधिकः कीटदष्टः ग्रन्थभागो दृश्यते ।

टि.

☆ 'हंसीव.....गाहते' इति एतद्वाक्यं चन्द्रालोके नोपलभ्यते । परं कुवलयानन्दे तु "हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते ।" इति पठ्यते । तस्मादत्र 'चन्द्रालोके' इति प्रयोगश्चिन्त्यः । द्र. अप्प. कुव./ पृ3. ☆☆ जय. गीत. IV/2 पृ53.

११
अत्र 'इव' शब्दलोपः । उपमाभेदाः काव्यप्रकाशादिषु ज्ञेयाः ।
१२

अथ अनन्वयः – साहित्यदर्पणे –☆

उपमानोपमेयत्वमेकस्यैव त्वनन्वयः ॥४॥

कुवलयानन्दे च –☆☆

एकस्यैव वस्तुन उपमानोपमेयत्ववर्णनमनन्वयः ॥५॥

यथा मम –

सुधाकर इव श्रीमान् विराजति सुधाकरः ।
१३ तारका इव राजन्ते सुरवर्त्मनि तारकाः ॥

उपमेयोपमा– चन्द्रालोके–☆☆☆ १४

पर्यायेण द्वयस्तच्चेदुपमेयोपमा मता ॥६॥

यथा कुवलयानन्दे –● १५

"खमिव जलं जलमिव खं हंसश्चन्द्र इव हंस इव चन्द्रः ।
कुमुदाकारास्तारास्ताराकाराणि कुमुदानि ॥"

प्रतीपालङ्कारः– साहित्यदर्पणे –●●

"प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम् ।
१६
निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते ॥"७॥

पा.टि...

(११) भु 3) "अत्र 'इव' शब्दलोपः" इत्यस्य स्थाने-

"अत्र उपमाचतुष्टये आवासादेरुपमेयस्य विपिनादेरूपमानस्य सादृश्यवाचकस्य 'क्यङ्' प्रत्ययस्य चोपादानात् केवलसाधारणधर्मलोपः । पञ्चमोपमायां तु शार्दूलविक्रीडिताचरणरूपस्य साधारणधर्मस्याप्युपादानात् पूर्णा इति विवेकः । इति ।

(१२) भु3) 'अनन्वयालङ्कारः' । (१३) भु 1 भु 2 म) 'उपमेयोपमानतो' ।

(१४) भु 1 भु 2 भु 5 म) 'उपमेयोपमानता' ।(१५) म) 'चन्द्र इव हंसः' ।

(१६) भु 1) 'निष्फलं त्वाभिमानम्' । भु3.) 'निष्फलत्वाभिमानो' ।

टि. ___

☆ विश्व. सा.द. X/ 26. ☆☆ अप्प. कुव/पु. 21.

☆☆☆ पीयू. चन्द्रा. V/13. ● अप्प. कुव/ पृ. 25. ●● विश्व. सा.दX/ 87.

यथा मम –

त्वन्नेत्रसदृशं पद्मं त्वदाननसमो विधुः ।
अमृतं त्वद्वचस्तुल्यं त्वत्कुन्तलसमो घनः ॥

यथा वा – ✩

"यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी ।
१७
येऽपि त्वद्गमनानुकारिगतयस्ते राजहंसा गता- १८
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥"

रूपकम् – वादीन्द्रकवेरलङ्कारकारिकायाम्–

१९ **रूपकं तुल्ययोरेव यथाऽभेदेन कीर्तनम् ॥८॥**

यथा मम –

२०
मच्चित्तामरमार्गदिशचलितस्त्वद्वक्त्रचन्द्रोऽधुना
सत्कान्तिस्मितचन्द्रिकाढ्यरुचिरो दृक्तारकामण्डितः ॥
दन्ताली वरमौक्तिकादिसहितो नेत्राम्बुजाद्यावृतो २१
लावण्यामृतपूरितस्तव तनू रत्नाकरः शोभते ॥

पा.टि.

---

(१७) म) 'त्वद्गमनानुसारि' । (१८) भु 3) 'क्षम्यते' इत्यस्मात्परं 'रूपकम्' इत्यस्मात् पूर्वं च – "गता इत्यत्र मानसमिति शेषः ।" इति अधिकं दृश्यते । (१९) भु 3) 'उदाहरणं यथा मम' । (२०) भु 5) 'मच्चित्ता इत्यादि पद्यं नास्ति । (२१) भु3) 'शोभते' इत्यस्मात्परं 'परिणामः' इत्यस्मात्पूर्वं च –

"स्मितमेव चन्द्रिका तया आढ्यो अत एव रुचिरश्च दृशोस्तारके....केव तारकाः ज्योतिंषि ताभिर्मण्डितः इति श्लिष्टरूपकम् । दन्ताल्येव श्रेष्ठमुक्तावलिस्तया सहितः ।" इति कीटदष्टा टिप्पणी दृश्यते ।

टि.

✩ हनु. हनुम. V/ 64. पृ. 81.

परिणामः– प्रतापरुद्रयशोभूषणे– ✩

[आरोप्यमाणमारोपविषयात्मतया स्थितम्]
प्रकृतस्योपयोगित्वे परिणाम उदाहृतः[२२] ॥९॥

यथा चन्द्रावलोकने (चन्द्रालोके?)–●

"प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा[२३] ।"

यथा च मम –

केतकीगर्भगौराङ्गी भ्रूभङ्गापाङ्गमण्डना ।
प्रसरा[२४]भिर्वाक्सुधाभिर्भाषते भवमोहिनी[२५] ॥

पा.टि. ……………………………………………………

(२२ भु 3) 'उदाहृतः' इत्यस्मात्परं 'यथा' इत्यस्मात्पूर्वं च-
"आरोप्यमाणस्य प्रकृतस्य प्रकृतात्मना प्रस्तुतोपयोगित्वे परिणाम इत्यर्थः ।"
इति अधिकं दृश्यते ।(२३) भु 3)'मदिरेक्षणा' इत्यस्मात्परं'यथा' इत्यस्मात्पूर्वं च-

"अत्र दृश्यारोप्यमाणस्याब्जस्य प्रकृततादृगात्मेत्वेनैव प्रस्तुत वीक्षणोपयोगित्वात् परिणामः । प्रकृतात्मना परिणमनं परिणाम इत्यन्वर्थसंज्ञा ।"
इति अधिकं दृश्यते ।
(२४) भु 3) 'प्रसृता' । भु 5) 'प्रसूता' । (२५) भु 4) 'मोदिनी' ।
भु 3) 'भवमोहिनी' इत्यस्मात् परं 'उल्लेख' इत्यस्मात् पूर्वं च –
"अत्र वाक्सुधा आरोप्यमाणाः सुधाः प्रकृतवाक्तादात्म्येनैव प्रस्तुतभाषणोपयुक्ताः ।
यथा वा **दीक्षितगोपीनाथमहापात्रस्य**–

"स्फुर्जद्धूर्जटिमौलिमध्यविगलद्गङ्गाप्रवाहोच्छल-
द्भङ्गद्भङ्गतरङ्गसङ्गविलसत्कैलासशैलामलः ।
उर्वीपार्वणशर्वरीपरिवृतप्रीतिप्रमेयोल्लस-
द्वानोद्यद्भवदीयकीर्तिरजनीनाथोऽद्य विद्योतते ॥"

टि.

✩ विद्या. प्र.रु/पृ272

● चन्द्रालोके नोपलभ्यते । लभ्यते परं कुवलयानन्दे ।अप्प. कुव./ पृ.43.

उल्लेखः – साहित्यदर्पणे – ✩

एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते[२५] ॥१०॥

यथा प्रतापरुद्रयशोभूषणे – ✩✩

“लक्ष्मीविलास[२६]गृहमित्यखिला नरेन्द्राः शौर्यातिभूमिखनिरित्यरिवीरवर्य्याः[२७] ।
विद्याविलासपदवीति च लब्धवर्णाः श्रीकाकतीन्द्रनगरीमनिशं स्तुवन्ति ॥”

पा. टि. ....

अत्र हि कीर्तावारोप्यमाणस्य चन्द्रस्य कीर्त्यात्मनैव प्रस्तुतराजस्तुतावुपयोगः । न तु चन्द्रात्मना । न चात्र कीर्तौ रजनीनाथ इवेत्युपमितसमासाश्रयेण नारोप्यकाभावात् कथं परिणाम इति वाच्यम् । ‘उपमितं व्याघ्रादिभिः समान्याप्रयोगे’ इति सूत्रेण उपमानोपमेययोः साधारणधर्मस्य प्रयोगाभावे सत्येव तद्विधानात् प्रकृते स्फुर्जद्धूर्जटीत्यादि विशेषणगत्या तादृशसाधारणधर्मस्य प्रतिपादनात् । तस्मात् तादृशकीर्तिरिव रजनीनाथ इति विग्रहे ‘मयूरव्यंसकादयश्चेति कर्मधारय’ एव न तु उपमितं व्याघ्रादिभिरिति कर्मधारय इति परिणाम एवेति सर्वं सुस्थम् ।

स च परिणामः समानाधिकरणासमानाधिकरणभेदेन द्विविधः । समानाधिकरणतो पूर्वोक्तान्येवोदाहरणानि । **व्यधिकरणतो यथा –**

“तारानायकशेखराय च सदाधाराय धाराधर-
छायाधारककन्धराय गिरिजासङ्गैकशृङ्गारिणे ।
नद्या शेखरिणे दृशा तिलकिने नारायणेनास्त्रिणे
नागैः कङ्कणिने नगेन गृहीतो नाथाय सेयं नतिः ॥”

अत्र हि ‘नद्या शेखरिणे’ इत्यादौ नद्यादावारोप्यमाणानां शेखरादीनां आरोप्याधिकरणीभूतनद्यादिषु विभिन्नविभक्तिकनद्यादिपदप्रतिपादितेषु अभेदः प्रतिपाद्यते ।

समानाधिकरणत्वं नामार्थयोः अभेदबोधप्रयोजकं नाम्नोः समानविभक्तिकत्वम् । तदभावोऽसमनाधिकरणत्वमिति ।” इति अधिकं दृश्यते ।

(२५)भु 1 भु 4 भु 5 म) ‘इष्यते’ । (२६)म) ‘विकास’ (२७)भु 1 भु 3) ‘वीरवर्गाः’
टि. ____

✩ विश्व. सा.द. X/ 37. ✩✩ विद्या.प्र.रु. VIII/ 73. पृ 376

स्मरणालङ्कारः – २८ २९

सदृशान्यपदार्थस्य स्मृतिः स्मरणमुच्यते ॥११॥

यथा मम–

अवलोकयतः पद्मं पद्माकरतटे मुदा । ३०
मम चित्तं स्मरायत्तं गाहते रमणीमुखम् ॥

भ्रान्तिमानलङ्कारः – प्रतापरुद्रयशोभूषणे –☆ ३१

[कविसंमतसादृश्याद् विषये पिहितात्मनि ।]
आरोप्यमाणानुभयोः(भवो?)यत्र स भ्रान्तिमान्मतः ॥१२॥

यथा ग्रन्थान्तरे– ३२

"मुग्धा दुग्धधिया गवां विदधते कुम्भानधोबल्लभाः
कर्णे कैरवशङ्कया कुवलयं कुर्वन्ति कान्ता अपि ।

पा.टि. ....

(२८) भु 1 भु 2 भु 3 म) 'सदृशानुपदार्थस्य' । (२९) भु 3) 'स्मरणमुच्यते' इत्यस्मात् परं 'यथा' इत्यस्मात् पूर्वं च –

'सादृश्यं च कविसंप्रदायसिद्धमेव सर्वत्र ज्ञेयं, न तु लौकिक्कम् । अन्यथा रङ्गदर्शनिन रजतस्मरणे अस्यापि स्मरणालङ्कारापत्तिः । उदाहरणम्' इति अधिकं दृश्यते ।

(३०) भु 3) 'रमणीमुखम्' इत्यस्मात्परं भ्रान्तिमानलङ्कारः' इत्यस्मात्पूर्वं च-

अत्र हि मुखपद्मयोः सादृश्यं कविसमयसिद्धम् ।

यथा वा रघुवंशे– (X/67)

'अपि तुरगसमीपादुत्पतन्तं मयूरं न स रुचिरकलापं बाणलक्ष्यीचकार ।
सपदि गतमनस्कश्छिन्नमाल्यानुकीर्णे रतिविगलितबन्धे केशपाशे प्रियायाः ॥'

(३१) म) 'भ्रान्तिमान् स्मृतः' । (३२) भु 5) 'मुग्धधिया' ।

टि. ______________________________

☆ विद्या. प्र.रु. VIII/ 67.

कर्कन्धूफलमुच्चिनोति[३३] शबरी मुक्ताफलाकाङ्क्षया
सान्द्रा[३४] चन्द्रमसो न कस्य कुरुते चित्तभ्रमं चन्द्रिका[३५] ॥''

सन्देहः – साहित्यदर्पणे – ✩

३६ **सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः ॥१३॥**

यथा -

''किमिन्दुः किं पद्मं किमु मुकुरबिम्बं किमु मुखं
किमब्जे किं मीनौ किमु मदनबाणौ किमु दृशौ ।
खगौ वा गुच्छौ वा कनककलशौ वा किमु कुचौ ३७
तडिद्वा तारा वा कनकलतिका वा किमबला ॥''

पा.टि.

(३३) म) 'मुच्छिनोति' ।

(३४) भु 5) 'सान्द्राश्चन्द्र' ।

(३५) भु 5) 'चन्द्रिकाः' । भु 3) 'चान्द्रिका' इत्यस्मात् परं 'सन्देहः' इत्यस्मात् परं च -'यथा वा-

''नीलोत्पलाक्ष्याः स्फुटविद्रुमोष्ठ्याः संकेतमासाद्य वनेचरन्त्याः ।
चौराः समस्ताभरणानि जहुर्नासामणिं नोपहरन्ति चित्रम् ॥''

पूर्वोदाहरणेषु भ्रान्तेर्वाच्यत्वं इह तु नेत्राधरकान्तिसम्बलनाधीनतद्गुणालङ्कारोऽभिव्यक्तः । तेन च नासामौक्तिकेषु भ्रमो व्यज्यत इति विशेषः ।'' इति अधिकं दृश्यते ।

(३६) भु 5) 'यथा चौरपञ्चासिके' ।

(३७) भु 3) 'किमबला' इत्यस्मात्परम् 'अपह्नुत्यलङ्कारः' इत्यस्मात् पूर्वं च - -''खगौ चक्रवाकौ इत्यर्थः । प्रतिभोत्थित इत्युक्ते स्थाणुर्वा पुरुषो वा इत्यादौ नायमलङ्कारः । स च द्विविधः । निश्चयान्तः शुद्धश्च । शुद्धे पूर्वोक्तमेवोदाहरणम् । निश्चयगर्भे यथा श्रीगीतगोविन्दे –

''विशलताहारो नायं भुजङ्गमनायकः । कुवलयदलश्रेणीकण्ठे न सा गरलद्युतिः ।''

निश्चयान्ते यथा- किं तावत्सरसिसरोजमेतदारादाहोस्विन्मुखमवभासते रु............. संशयक्षणमिति निश्चकाय कश्चिद् व्योकैक कसत् वासनां परोक्षैः (?)।'' इति अधिकः कीटदष्टांश दृश्यते ।

टि.

✩ विश्व. साद. X/ पृ. 691.

अपह्नुत्यलङ्कारः – साहित्यरत्नाकरे –☆

३८

"निषिध्य प्रकृतं यत्राप्रकृतारोपणं भवेत् तत्रापह्नुत्यलङ्कारः ।'१४॥

तत्रैव यथा – ☆☆ ३९ ४०

"श्यामक्षौमपटा स्मृता रघुपतेः कीर्त्यङ्गनाया महा-
शय्या नाम्बरमत्र जातिकलिकाः क्षिप्ता न तारागणाः ।
४१
पेटी राजति राजती हिमरजःपूर्णा न राकाशशी
तन्मध्ये मृगनाभिक्लृप्तवटकस्तोमो न चायं मृगः ॥"

यथा च मम –
४२
त्वत्तेजोनलजातधूमनिवहो नेदं नभोमण्डलं
त्वत्तारुण्ययशःपयोब्धिविकसत्पद्मं न राकाशशी ।
वीर त्वत्प्रवरप्रतापरसिकाश्लेषैश्च कीर्त्यङ्गना- ४३
हारावर्तुलमौक्तिकानि पतितान्येते न तारागणाः ॥'

उत्प्रेक्षालङ्कारः – अलङ्कारकारिकायाम्–

उत्प्रेक्षा सा मता लोके यदन्यदुच्यतेऽन्यथा ॥१५॥

पा.टि.

(३८) भु 1 भु 2) 'निषिद्ध' । भु 5) 'निदिधत्' । म) 'निषिद्धम्' ।
(३९) भु 1 भु 2 म) 'स्तृता' । भु 3) 'स्तृते' । भु 4) 'श्रुता' । (४०) भु 3) 'रघुपते' ।
(४१) भु 1 भु 2) 'हिमकरजः' । भु 5) 'हिमकरः' । (४२) भु 3) 'यत्तेजो' ।
(४३) भु 3) 'तारागणाः' इत्यस्मात्परम् 'उत्प्रेक्षालङ्कारः' इत्यस्मात् पूर्वं च - "अत्र हि यशः क्षीरसमुद्रप्रभवत्वात् पद्मं शुक्लमेव लभ्यते । हारा वर्तुलमौक्तिकामि इत्यत्र हारस्य आसर्वतो वर्तुलतेत्यर्थः । हारशब्दस्य हारो मुक्तावलीत्यमरेण पुंसाधिनात् ।" इति अधिकं दृश्यते ।

टि.

☆ धर्म. सा.र. VII/ पृ. 545. ☆☆ तत्रैव. VII/ 43. पृ 545

यथा चन्द्रावलोकने (चन्द्रालोके ?)– ☆ [४४]

"धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम् ।
लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ॥"

[४५] यथा च कुमारसम्भवे – ☆☆

[४६] "बालेन्दुवक्राण्यविकासभावाद् बभुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां नखक्षतानीव [४७] वनस्थलीनाम् ॥"

अतिशयोक्तिः – साहित्यदर्पणे –●

[४८] "भेदेऽप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्ययौ ।"
कथितातिशयोक्तिस्तु कविप्रौढोक्तिजीविता ॥१६॥

अत्र द्वितीयपादद्वयं मम । तद्विपर्ययावित्यत्र अभेदे भेदः, असम्बन्धे सम्बन्धः ।

पा.टि. ....

(४४) भु 1 भु 4) 'शुष्मणा' । भु 2) 'शुष्मण' । भु 5) 'शुष्मणः' ।
(४५) भु 1 भु 2) 'यथा च कुमारसम्भवे' इति नोपलभ्यते ।
(४६) भु 1 भु 2) 'बालेन्दु' इत्यादिपद्यस्य स्थाने "बालेन्दु वक्राणीत्यादि ।"
(४७) भु 3) "वनस्स्थलीनाम्' इत्यस्मात्परम्' अतिशयोक्तिः' इत्यस्मात्पूर्वं च - "न च उपमानोपमेयसाधारणधर्मोपमावाचकानां तेषामुपादानात् पूर्णोपमेति शङ्क्यम् । उपमायां हि उपमानप्रसिद्धिरपेक्षिता । नहि वसन्तनायकसमागतवनस्थलीनायिकानां नखक्षतानि प्रसिद्धानि इति । उत्प्रेक्षायायां तु तत्प्रसिद्धांनापेक्ष्यते.......इव शब्दस्य उत्प्रेक्षावाचकत्वं तु दण्डिनोक्तम्-

"मन्ये शंके ध्रुवं प्राये नूनमित्येवमादयः ।
उत्प्रेक्षावाचका शब्दा इव शव्दोऽपि तादृशः ॥ इति ।"

इति अधिकः कीटदष्टांशः दृश्यते । (४८) म) 'सम्बन्धे असम्बन्धेऽसम्बध' ।

टि.

☆ पद्यमिदं चन्द्रालोके न लभ्यते, लभ्यते परं कुवलयानन्दे (पृ. 64)
☆☆ कालि. कुमा. III/ 29.
● विश्व. सा.द. X/ 46.

तत्र भेदे अभेदो यथा – ☆

“कथमुपरि कलापिनः कलापो विलसति तस्य तलेऽर्धमिन्दुखण्डम् ।
४९
कुवलययुगलं ततो विलोलं तिलकुसुमं तदधः प्रवालमस्मात् ॥”

अभेदे भेदो यथा –

५०
“अन्यदेवाङ्गलावण्यमन्याः सौरभसम्पदः ।
५१
तस्याः पद्मपलाशाक्ष्याः सरसत्वमलौकिकम् ॥”

सम्बन्धेऽसम्बन्धो यथा शाकुन्तले (विक्रमोर्वशीये ?) – ☆☆

“अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥”
५२

अत्र पुराणप्रजापतिनिर्माणसम्बन्धेऽप्यसम्बन्धः ।

पा.टि. ....

(४९) भु 3) ‘प्रवालमस्मात्’ इत्यस्मात् परम् ‘अभेदे’ इत्यस्मात् पूर्वं च – “अत्र केशपाशभालनेत्रद्वयनासारदच्छदे रूपे विषये कलापिकलाप- चन्द्रखण्ड-नीलोत्पलयुगल-तिलकुसुम-विद्रुमरूपविषयिणोऽभेदो वर्णितः ।” इति अधिकं दृश्यते ।

(५०) भु 4) ‘अन्यदेवास्यलावण्यं’ । (५१) भु 4) ‘सत्यसत्यमलौकिकम्’ ।

भु 3) ‘सरसत्वमलौकिकम्’ इत्यस्मात् परं ‘सम्बन्धे’ इत्यस्मात् पूर्वं च- अत्राङ्गलावण्यादीनामभेदे अपि भेदो वर्णितः ।” इति अधिकम्

(५२) भु 3) ‘-प्यसमन्धः’ इत्यस्य स्थाने ‘प्यसम्बन्धो दर्शितः’ अत्रापि चन्द्रिकादीनामसम्बन्धेऽपि सम्बन्धश्चास्ति । तथापि बालव्युत्पत्तये असम्बन्धे सम्बन्धस्य उदाहरणान्तरम्” इति ।

टि.

☆ विश्व. सा.द./ पृ. 726. ☆☆ कालि. विक्र. I/ 10.

असम्बन्धे सम्बन्धो यथा–

"यदि स्यान्मण्डले सक्तमिन्दोरिन्दीवरद्वयम् । [५३]
तदोपमीयते तस्या वदनं चारुलोचनम् ॥"

तुल्ययोगिता – अलङ्कारकारिकायाम् –

समानैः सममेकस्य[५४] कथनं तुल्ययोगिता[५५] ॥१७॥

यथा मम –

"कुञ्जाभिपूरिततमः प्रबलं सुनेत्रे
कामान्धकार[५६]मतिघोरमलंघितं[५७] मे ।
त्वद्वक्त्रचन्द्रकिरणैरतिनिर्मलैश्च[५८] [५९]
दूरं गतं मयि सरोजमुखि प्रसीद ॥"

यथा च चन्द्रावलोकने (चन्द्रालोके ?) –☆

"सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च ॥"

अपरं च –

हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता ॥१८॥

पा.टि. ....

(५३) भु 3) 'चारुलोचनम्' इत्यस्मात् परं 'तुल्ययोगिता' इत्यस्मात् पूर्वं च "अत्र चन्द्रमण्डले नीलोत्पलासम्बन्धेऽपि सम्भावनायां तत्सम्बन्धोक्तेरतिशयोक्तिः । ईदृशविषये अद्भूतोपमेति दण्डिप्रभृतयः । अस्याश्चातिशयोक्तेः कार्यात् कारणोत्पत्तिरकारणात् कार्योत्पत्तिराकस्मिककार्योत्पत्तिः । कार्यकारणयौगपद्यं चेति प्रभेदाः कुवलयानन्दादौ द्रष्टव्याः ।" इति अधिकं दृश्यते (५४) भु 1 भु 2 भु 5 म) 'सममेकत्र' । (५५) भु3) 'तुल्ययोगिता' इत्यस्मात् परं 'यथा मम' इत्यस्मात् पूर्वं च- "समानैः व्यङ्ग्यसाम्यैः समम् एकस्य गुणक्रियादिरूपधर्मस्य ।" इति अधिकं दृश्यते ।
(५६) भु 3) गाढ़ान्धकारमसमेषुशरैःकृतं' । (५७)भु 1 भु 2) 'मलक्षितं'
(५८) भु 3) 'र्विमलैरजस्रं' । भु 4 भु 5 म) 'रतिनिर्मलाढैः' ।
(५९) भु 3) 'प्रसीद' इत्यस्मात् परम् अनेकार्थशब्द' इत्यस्मात् पूर्वं च ग्रन्थपातः ।

टि.

☆ पीयू. चन्द्रा V./ 52.

यथा मम –

भूतिप्रदो भूपगणावतंसो बभूव मित्रारिजनेषु दक्षः ।
अनुक्षणं हृष्टमनाः स एव हिताहिते सत्कलधौतदानी ॥

उक्तं हि – ☆

"गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता ॥"१९॥

यथा मम –

शूली दण्डधरो भवानपि भुवि श्रीदो विवस्वान् हरिः
शक्रः पञ्चशरः कविर्जलधरो विद्याधरो भूधरः ।
पाशी पाण्डुसुतः सुधांशुरनिलः कल्पद्रुमः सागरो
लोकानां परिपालकस्त्वमनिशं स्वर्णाचलो राजसे ॥

दीपकम्– साहित्यदर्पणे– ☆☆

अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते ॥२०॥

कुवलयानन्दे – ●

प्रस्तुताप्रस्तुतानामेकधर्मान्वयो दीपकम् ॥२१॥

यथा चन्द्रावलोकने (चन्द्रालोके ?) – ●●

"मदेन भाति कलभः प्रतापेन महीपतिः ।"

अत्र कलभनरपालयोः प्रस्तुताप्रस्तुतयोर्भानक्रियान्वयः ।

यथा च माघे – ▲

"बलावलेपादधुनापि पूर्ववत् प्रबाध्यते तेन जगज्जिगीषुणा ।
[६०] सतीव योषित्प्रकृतिश्च निश्चला पुमांसमभ्येति भवान्तरेष्वपि ॥"

पा.टि. ....

(६०) भु 4) 'सती च' ।

टि. ---

☆ अप्य. कुव./ पृ. 95. ☆☆ विश्व. सा.द. X/48 ● अप्य. कुव./ पृ97. ●● चन्द्रालोके न विद्यते, विद्यते परं कुवलयानन्दे (पृ97) ▲ माघ. शिशु I/72.

कारकदीपकम् –

यत्रैकं कारकमनेकक्रियासम्बन्धं स कारकदीपकालङ्कारः ॥२२॥

यथा मम –

[६०]शृणोत्यस्या वाचं मधुररसयुक्तां शशिमुखी
प्र[६१]पश्यत्यध्वानं पुनरपि तनुं भूषयति सा ।
प्रियालीभिः सार्धं चलति वनमध्यं कुसुमितं
भ्रमत्यन्तं(न्तः?)क्षिप्रं बहुविरहबाधां कथयति ॥

यथा च साहित्यदर्पणे – ☆

"दूरं समागतवति त्वयि [६२]जीवनाथे
भिन्ना मनोभवशरेण तपस्विनी सा ।
उत्तिष्ठति स्वपिति वासगृहं त्वदीय-
मायाति याति हसति श्वसिति क्षणेन ॥"

आवृत्तिदीपकम्– चन्द्रावलोकने (चन्द्रालोके ?)– ●

त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकम् ॥२३॥

उदाहरणं तत्रैव – ●

"वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्वरी ।
उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः ॥"
माद्यन्ते (न्ति ?) चातकास्तृप्ता माद्यन्ति च शिखावलाः ।

पा.टि. ....

(६१) भु 4) 'शृणोत्यम्बा' । (६२) भु 4) 'पुनः पश्यत्यध्वं' ।
(६३) भु 2 भु 4 भु 2) 'जीवनाथ' ।

टि.

☆ विश्व. साद. X/ पृ. 736 ● आवृत्तिदीकपस्य लक्षणवाक्यं उदाहरणं च चन्द्रालोके नोपलभ्यते । उपलभ्यते परं कुवलयानन्दे । द्र. अप्प. कुव. /पृ.100.

प्रतिवस्तूपमा– कुवलयानन्दे– ✩

यत्र उपमानोपमेययो(उपमानोपमेयपरवाक्ययो?) रेकः साधारणो धर्मः पृथङ्निर्दिश्यते सा प्रतिवस्तूपमा ॥२४॥

यथा चन्द्रावलोकने - (चन्द्रालोके ?) – ✩✩

"तापेन भ्राजते सूर्यः शूरश्चापेन राजते ।"

यथा च मम –

मधुभिर्मधुपः प्रमत्तकः स्मरयुक्तै रसिको रसोत्तमैः ।
कुसुमैश्च लता विराजिता नवकान्ताभरणैर्मनोहरैः ॥

दृष्टान्तः– कुवलयानन्दे – ●

यत्रोपमानोपमेयवाक्ययोर्भिन्नावेव धर्मौ विम्बप्रतिबिम्बभावेन निर्दिष्टौ तत्र दृष्टान्तः ॥२५॥

यथा चन्द्रावलोकने (चन्द्रालोके ?) – ●●

"त्वमेव कीर्तिमान् राजन् विधुरेव हि कान्तिमान् ।"

त्वमेव कीर्तिमानित्यत्र कीर्तिकान्त्योर्बिम्बप्रतिबिम्बभावः ।

निदर्शना --

यत्र सदृशयोर्वाक्यार्थयोरैक्यारोपः तत्र निदर्शनालङ्कारः ॥२६॥

यथा चन्द्रावलोकने (चन्द्रालोके ?) – ▲

"या दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता ।"

पदार्थवृत्तिमप्यन्ये वदन्त्यन्यां निदर्शनाम् ॥२७॥

यथा ग्रन्थान्तरे –

"कलयति कुवलयमालाललितं कुटिलकटाक्षविक्षेपणम् ।
अधरः किसलयलीलामाननमस्याः कलानिधेर्विलासम् ॥"

टि.

✩ अप्प. कुव./ पु. 52. ✩✩ पीयु. चन्द्रा. V/ 55. ● अप्प. कुव/पृ106.

●● पद्यमिदं चन्द्रालोके न विद्यते विद्यते परं कुवलयानन्दे (पृ106)

▲ पीयू. चन्द्रा. V./58.

☆ ''अपरां बोधनं प्राहुः क्रियायाऽसत्सदर्थयोः ॥''२८॥

यथा – ☆

" नश्येद्राजविरोधीति[६३] क्षीणं चन्द्रोदये तमः ।"

यथा वा – ●

"उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ध्रुवम् ।
शैलशेखरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः ॥"

इत्यत्रासदर्थनिदर्शना ।

व्यतिरेकः – चन्द्रावलोकने (चन्द्रालोके ?) – ●●

व्यतिरेको विशेषश्चेदुपमानोपमेययोः ॥२९॥

यथा –

शैला इवोन्नताः सन्तः किं तु प्रकृतिकोमलाः ।

यथा च मम –

कलाकरो वक्त्रमिव प्रियायाः
किन्त्वेष[६४] कृष्णाङ्कधरोऽतिजाड्यः ।
सदाम्बुजं[६५] नेत्रसमं सुरम्यं[६६]
निशामुखे[६७] मुद्रितमाप्तमाशु ॥

पाटि.

(६३) भु 2) 'विरोधात्' । भु 4) 'विरोधाति' ।

(६४) भु 1 भु 2 भु 3 म) 'किन्त्वेव' । (६५) भु 4) 'तथाम्बुजम्' ।

(६६) भु 4) 'मृगाक्ष्याः' । (६७) भु 4 भु 5 म) 'लोके निशा' ।

टि.

☆ अप्प. कुव. / पृ111. ● मम्म. का. प्र.X /438 पृ617.

●● पीयू. चन्द्रा. V/ 59.

विनोक्तिः – प्रतापरुद्रयशोभूषणे –☆

विना सम्बन्धि यत्किंचित् यत्रान्यान्यपरापतेत् (यात्रान्यस्य पराभवेत्?)
अरम्यता रम्यता वा सा विनोक्तिरनुस्मृता ॥३०॥

६८

यत्र कस्यचिदसंनिधानाद्वस्तु रम्यमरम्यं वा भवेत् सा विनोक्तिः ।

६९

यथा प्रतापरुद्रयशोभूषणे –☆☆

"प्रतापरुद्रदेवस्य गुणवर्णनया विना ।
कीदृशी काव्यरचना संशृणुध्वं कवीश्वराः ॥

समासोक्तिः– कुवलयानन्दे –●

"यत्र प्रस्तुतवृत्तान्ते वर्ण्यमाने विशेषणसाम्यबलादप्रस्तुतस्यापि

७०

परिस्फूर्त्तिस्तत्र समासोक्तिरलंकारः ॥"३१॥

यथा नैषधीये –●●

"नवा लता गन्धवहेन चुम्बिता
करम्बिताङ्गी मकरन्दशीकरैः ।

७१

दृशा नृपेण स्मितशोभिकुड्मला
दरादराभ्यां दरकम्पिनी पपे ॥"

पा.टि.

(६८) भु 2 भु 4 म) 'कस्यचिद् संनि' ।

(६९) म) 'प्रतापरुद्रयशोभूषणे' इति न दृश्यते । (७०) भु 5 म) 'समासोक्तिः'

(७१) भु 5 म) 'कुट्मला' ।

टि.

☆ विद्या. प्र.रु. VIII/ 114. पृ 289 ☆☆ विद्या. प्र.रु. VIII/ 115. पृ289

● अप्प. कु.व./ पृ. 128 & 129 ●● श्रीहर्ष. नैष. I./ 85.

परिकरः – चन्द्रावलोकने (चन्द्रालोके?) – ✩

अलङ्कारः परिकरः साभिप्राये[७२] विशेषणे[७३] ॥३२॥

यथा मम –

पीयूषसारवचने शशिचारुवक्त्रे
मालावति स्फुटसरोजसुगन्धदेहे ।
अद्यैव बाहुसुमनोलतिकां भजन्तं
कान्तं स्मराग्निपरितापभरं भजस्व ॥

परिकराङ्कुरः[७४] – ✩✩

साभिप्राये[७५] विशेष्ये[७६] तु भवेत् परिकराङ्कुरः ॥३३॥

यथा –

"चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः ।" [७७]

अत्र चतुर्भुज इति विशेष्यं पुरुषार्थचतुष्टयदानसामर्थ्याभिप्रायगर्भम् ।

श्लेषालङ्कारः –

यत्र एकस्मिन् वाक्येऽनेकार्थो भवेत्तत्र श्लेषालङ्कारः ।

कुवलयानन्दे – ●

अनेकार्थशब्दविन्यासः श्लेषः । स च त्रिविधः सभङ्गश्चाभङ्गो भङ्गाभङ्गश्चेति ॥३५॥

पा.टि.

(७२) भु 2 म) 'साभिप्राय' । (७३) भु 4 भु 5 म) 'विशेषतः' ।

(७४) भु 2) 'परिकराङ्कुरः' इति न विद्यते । (७५) भु 2 म) 'साभिप्राय' । भु 5) 'साभिप्राये' इत्यादि लक्षणवाक्यं नास्ति ।

(७६) भु 1 भु 2 म) 'विशेषण' । (७७) भु 4 म) 'समर्थाभिप्रायगर्भम्' ।

टि.

✩ पीयू. चन्द्रा. V/ 39. ✩✩ तत्रैव. V/ 40. ● अप्प. कुव./ 149.

क्रमेणोदाहरणानि चन्द्रावलोकने (चन्द्रालोके?) - ✿

७८

"सर्वदो माधवः पायात् स यो गङ्गामधीधरत् ।"
"अब्जेन त्वन्मुखं तुल्यं हरिणाहितशक्तिना ।"

७९

▲ "उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः ।"

अप्रस्तुतप्रशंसा – प्रतापरुद्रयशोभूषणे -- ✿✿

"अप्रस्तुतस्य कथनात् प्रस्तुतं यत्र गम्यते ।

८०

अप्रस्तुतप्रशंसेयं सारूप्यादिनियन्त्रिता ॥"३६॥

यथा मम –

स धन्यः खगवर्गेषु यो रवेरुदयं विना ।
अन्यदेवोदयं स्वान्ते न काङ्क्षति कदाचन ॥

प्रस्तुताङ्कुरालंकारः कुवलयानन्दे –●

"यत्र प्रस्तुतेन वर्ण्यमानेनाभिमतमन्यत् प्रस्तुतं द्योत्यते तत्र प्रस्तुताङ्कुरालंकारः ।"३७॥

यथा चन्द्रावलोकने (चन्द्रालोके ?) – ●●

"किं भृङ्ग ! मल्लीमालायां केतक्या कण्टकस्थया ।"

पा.टि. ....

(७८) भु 3) 'मदीधरत्' । भु 5) 'मधारयत्' । भु 3) 'मधीधरत्' इत्यस्मात्परमब्जेन इत्यस्मात् पूर्वं च - "सर्वं ददातीति सर्वदः माधवो विष्णुः । सर्वदा उमाधवश्च । अगं पर्वतं, गां भुवं च ।" इति अधिकं दृश्यते । (७९) भु 4) 'तच्चरभुरि' । (८०) भु 4) 'सारुप्या दिनियुक्तता' । भु 5) "सारुप्यानि नियन्त्रिता" ।

टि. ____

✿ चद्रालोके न विद्यते पद्यमिदं, विद्यते परं कुवलयानन्दे (पृ.149)

▲ पीयू. चन्द्रा V/ 63.

✿✿ विद्या. प्र.रु. VIII/ 206. पृ 319

● अप्य. कुव. पृ.176&177.

●● पीयू. चन्द्रा V/ 63.

यथा च मम –

सभायां तव राजेन्द्र पण्डिते बुद्धिमण्डिते[८१] ।
स्थिते कविवरे[८२] पूज्ये दुर्जनै: किं प्रयोजनम् ? ॥

पर्यायोक्तम् – प्रतापरुद्रयशोभूषणे –☆

यत्र प्रस्तुतस्यैव कार्यस्य वर्णनात् प्रस्तुतमेव कारणं गम्यते, तत् पर्यायोक्तम् ॥३८॥

यथा चन्द्रावलोकने (चन्द्रालोके ?)-- ☆☆

"नमस्तस्मै कृतौ येन मुधा राहुवधूकुचौ ।"
पर्यायोक्तं तदप्याहुर्यद् व्याजेनेष्टसाधनम् ॥३९॥

यथा ग्रन्थान्तरे – ●

'देहि मत्कन्दुकं राधे ! परिधाननिगूहितम् ।
इति विस्रंसयन् नीवीं तस्या: कृष्णो मुदेऽस्तु व: ॥"

व्याजस्तुति: – कुवलयानन्दे – ●●

निन्दया स्तुते: स्तुत्या निन्दाया वावगमनं व्याजस्तुति: ॥४०॥

निन्दया स्तुत्यभिव्यक्तिर्यथा चन्द्रावलोकने (चन्द्रालोके ?) –▲

"क: स्वर्धुनि! विवेकस्ते पापिनो नयसे दिवम् ? ।"

स्तुत्या निन्दाभिव्यक्तिर्यथा तत्रैव -- ▲▲

'साधु दूति पुन: साधु कर्तव्यं किमत: परम् ।
यन्मदर्थे विलूनासि दन्तैरपि नखैरपि ॥"

पा.टि.

(८१) म) 'बुद्धिपण्डिते' । (८२) भु 2) 'कविरवौ' ।

टि.

☆ विद्या. प्र.रु/ पृ321. ▲ पीयू. चन्द्रा. V / 71.
☆☆ चन्द्रालोके न विद्यते परं कुवलयानन्दे द्र. अप्प. कुव. / पृ.184.
● तत्रैव / पृ.187. ●● तत्रैव. / पृ.190. ▲▲ तत्रैव/ पृ. 190.

व्याजनिन्दा – चन्द्रावलोकने (चन्द्रालोके?) –☆

निन्दाया निन्दया व्यक्तिर्व्याजनिन्देति कथ्यते ।।४१।।

यथा मम –

विरहजनितरोगोत्कृष्टबाधातिखिन्ना
मृदुलकमलपत्रैस्तल्पमाकल्पयन्ती ।
मलयगिरिजवातैः पीडिता चन्द्रपादैः [८३] [८४]
सपदि कुलिशराहुं निन्दयामास तन्वी ।।

त्रिविधाक्षेप उच्यते-- चन्द्रावलोकने (चन्द्रालोके?) –☆☆

आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात् ।।४२।।

यथा – ☆☆

"चन्द्र ! सन्दर्शयात्मानमथवास्ति प्रियामुखम् ।"

अत्र प्रार्थितस्य चन्द्रस्य प्रियामुखसत्त्वेन कैमर्थ्यं विचार्य 'अथवे'-त्यादिसूचितः प्रतिषेधः आक्षेपः । [८५]

● निषेधाभासमाक्षेपं बुधाः केचन मन्वते ।।४३।।

यथा –

"नाहं दूती तनोस्तापस्तस्याः कालानलोपमः ।"

●● आक्षेपोऽन्यो विधौ व्यक्ते निषेधे च तिरोहिते ।।४४।।

पा.टि...

(८३) म) 'नन्दयामास' । (८४) भु 3) 'तन्वी' इत्यस्मात् परं' त्रिविधाक्षेप' इत्यस्मात् पूर्वं च– निन्दां चकारेत्यर्थे तत्करोति इति निन्दाशब्दात् णिच् । प्रकृतिप्रत्यापत्तिः प्रकृतिवच्चकार । किमिति वार्त्तिके.....कुलिशराहो......त्वाद्वीतीया..... धमा......संघात.....तावत् ।" इति कीटदष्टांशोऽधिकतया दृश्यते । परं तु भु 4) पाठे निन्दाशब्दात् तत्करोतीति णिजन्तात् लिट्' इति अधिकतया दृश्यते । (८५) म) 'बुधः कश्चन मन्यते' ।

टि. ---

☆ 'चन्द्रालोके' नोपलभ्यते, उपलभ्यते परं कुवलयानन्दे द्र. अप्प. कुव. पृ. 195

☆☆ पीयू. चन्द्रा. V/ 72. ● अप्प. कुव. / पृ200. ●● तत्रैव. पृ. 201.

यथा –✩

"गच्छ गच्छसि चेत्कान्त ! तत्रैव स्याज्जनिर्मम ।"

विरोधाभासः –✩✩

आभासत्वे विरोधस्य विरोधाभास इष्यते ॥४५॥

यथा मम –

काप्यङ्गना कृष्णरसैर्विहीना विवर्जिताप्यत्र तमालपत्रैः ।
वृन्दावने वारिजपुष्पनेत्री विराजिता चारुतमालपत्रैः ।

यथा च माघे –● ८६

"बृहत्तुलैरप्यतुलैर्वितानमालावनद्धैरपि चावितानैः ।
८७
रेजे विचित्रैरपि या सचित्रैर्गृहैर्विशालैरपि भूरिशालैः ॥"

विभावनालङ्कारः – प्रतापरुद्रयशोभूषणे--●●

८८ **कारणेन विना कार्यस्योत्पत्तिः स्याद्विभावना ॥४६॥**

यथा मम – ८९ ९० ९१

कान्तोऽलक्तकवर्जितावपि महद्रक्तौ च पादौ तव
९२
नेत्रे कज्जलवर्जितेऽपि रुचिरे नीलाब्जसाम्ये प्रिये ।

पा.टि.

(८६) भु 3) 'र्विमानमाला-' । (८७) भु 5 म) 'भेजे' ।
(८८) भु 5) 'यथा मम' इति नास्ति । (८९) भु 1 भु 3) 'वर्जितेपि' ।
(९०) भु 3) 'महद्रक्ते' । (९१) भु 4 भु 5) 'पादाम्बुजौ' ।
(९२) भु 3 म) 'वर्जनेपि' । भु 4) 'वर्जितेन' ।

टि.

✩ अप्प. कुव./ पृ. 201. ✩✩ तत्रैव 206.

● माघ. शिशु. III/ 50. ●● विद्या. प्र. रु./ पृ. 304.

मुक्ताहारसमूहवर्जितकुचौ मच्चित्तमोहप्रदौ
९३ ९४
वामाङ्गि ! द्रुतमेव संहर रुषं चुम्बं ददस्वाधुना ॥

विशेषोक्तिः – ☆

''सति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधा ॥''४७॥
तथाप्रयोगादुक्तनिमित्तानुक्तनिमित्ता ज्ञेया ।

तत्रोक्तनिमित्ता यथा –

''धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः ।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः ॥''
९५

अनुक्तनिमित्ता यथा - मृगयम् ।

असम्भवः– चन्द्रावलोकने (चन्द्रालोके ?)– ☆☆
९६
असम्भवोऽर्थनिष्पत्तेरसम्भाव्यत्ववर्णनम् ॥४८॥

यथा मम –

''कः समर्थो भवेद्धर्तुं गोत्रां गोत्रावृतां फणी ।
९७
पिवेत् सागरमुत्कृष्टं शुष्काङ्गः कोऽपि तापसः ॥''

असङ्गतिः प्रतापरुद्रयशोभूषणे –● ९८
कार्यकारणयोर्भिन्नदेशत्वे सत्यसङ्गतिः ॥४९॥

पा. टि. ....

(९३) भु3 भु4) 'दृतमीव संहर रुषं' । (९४) भु3) 'ददस्व' इत्यस्य 'दद दाने' इति टिप्पणी वर्तते ।अपि च 'ददस्वाधुना' इत्यस्मात् परं 'विशेषोक्तिः' इत्यस्मात् पूर्वं च- महदत्र क्रियाविशेषणम् । पद्मशब्दवदम्बुपङ्कजादीनामपि पुंनपुंसकलिङ्गत्वं बोध्यम् ।'' इति अधिकं दृश्यते ।

(९५) भु3) 'उदाहरणं मृगयम्' । (९६) भु3) 'असम्भवोऽपि' ।

(९७) भु3 भु4) 'को वा जगति' । (९८) भु3) 'स्यादसङ्गतिः' ।

टि. ___

☆ विश्व. सा.द. X/67. ☆☆ पीयू. चन्द्रा. V/76. ● विद्या. प्र.रु. VIII/159.

यथा मम –

भृङ्गैः प्रियायुक्तरसैर्वनान्ते
९९ मधुद्रवं पीतमवाप्य मोदम् ।
भ्रमोक्तिमत्यो विकला बभूवु-
र्वैदेशिकानां रसदास्तरुण्यः ॥

त्रिविधो विषमालङ्कारः तल्लक्षणं चन्द्रावलोकने (चन्द्रालोके ?) – ✩

विषमं वर्ण्यते यत्र घटनाऽननुरूपयोः ॥५०॥

यथा मम –

केयं शिरीषसुमदाममनोहराङ्गी १००
क्वायं महानलसमो विरहज्वरश्च ।
क्वेदं सुधाभरितसत्कुचकुम्भयुग्मं
१०१
क्वासौ महाकठिनभूमिधराधिराजः ॥

✩ विरूपकार्यस्योत्पत्तिरपरं विषमं मतम् ॥५१॥

यथा –

"सद्यः करस्पर्शमवाप्य चित्रं
१०२
रणे रणे यस्य कृपाणलेखा ।
तमालनीला शरदिन्दुपाण्डु
यशस्त्रिलोकाभरणं प्रसूते ॥"

यथा च मम –

पाटि.

(९९) भु 1 म) 'भ्रमोक्तवन्त्यो' । भु 2) 'भ्रमोक्तवत्त्वो' । भु 4) 'भमक्तोवन्यो' ।
(१००) भु 3) 'विषमज्वरश्च' । (१०१) भु 3 भु 5) 'महामहिमभूधरराजशैलः' ।
(१०२) भु 4) 'पश्य' ।

टि.

✩ चन्द्रालोके न वर्तते वर्तते परं कुवलयानन्दे । द्र. अपा. कुव. / पृ.105.

तवारुणाधरः कान्ते प्रसूते धवलं [१०३]स्मितम् ।
[१०४]तत् स्मितं सर्वदा बालेऽनुरागं गुञ्जसंनिभम् ॥

[१०५]अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात् ॥५२॥

यथा – ✩

[१०६]"आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम् ।
[१०७]विरहस्त्वयैव जनितस्तापायातितरां शरीरं मे ॥"

यथा च मम –

कुसुमावचयार्थेन कान्ता काननमध्यगा ।
कान्तालिङ्गनचुम्बाढ्या कामासक्तमतिर्बभौ ॥

समालङ्कारः – प्रतापरुद्रयशोभूषणे – ✩✩

यत्रान्योन्यानुरूपपदार्थस्य संघटना क्रियते स समालङ्कारः ॥५३॥

यथा मम –

[१०८]तारुण्यं मदनादृतं सुरुचिरं वध्वा नु रूपं सदा
वक्त्रं सस्मितशोभया मृदुतया वाणी सुधावर्षिणी ।
नेत्रे कज्जलकान्तिभिः स्तनयुगं हारेण [१०९]चक्रोपमं
ग्रीवा सन्मणिकण्ठभूषणगणैर्हस्तद्वयं कङ्कणैः ॥

पाटि.

---

(१०३) भु3) 'सुखम्' । (१०४) भु3) 'त्वत्' । (१०५) भु4 म) 'स्याप्यवाप्तिश्चेत्' । भु5) 'स्यादवाप्तिश्चेत्' । (१०६) भु5) 'सन्दतिमम' । (१०७) भु4) 'स्त्वयिव' । भु5) 'विरहस्वयम्' । (१०८) भु3) 'कामिन्याः कुसुमेषुणोत्तरलितं' । (१०९) भु5) 'चन्द्रोपमम्' । भु3) 'चक्रवाकोपमम्' इति टिप्पणी वर्तते ।

टि.

✩ रुद्र. काव्या. IX. / 47.

✩✩ विद्या. प्र.रु. VIII/ पृ307.

विचित्रम् – प्रतापरुद्रयशोभूषणे–✩

यत्र विरुद्धफलप्राप्त्यर्थमुद्योगः क्रियते स विचित्रालङ्कारः[११०] **॥५४॥**

यथा –

"प्रणमत्युन्नतिहेतोर्जीवितहेतोर्विमुञ्चति प्राणान् ।
दुःखीयति सुखहेतोः को मूढः सेवकादन्यः ॥"

यथा च मम –

त्रैलोक्यादपि वीरत्वं प्राप्तुमुद्योगकारिणः ।
विनयन्त्यादरेणैव साधवो मृदुवादिनः ॥

अधिकालंकारः– साहित्यदर्पणे– ✩✩

आश्रयाश्रयिणोरेकस्याधिक्येऽधिकमुच्यते ॥५५॥

आश्रयाधिक्ये यथा –

'किमधिकमस्य ब्रूमो महिमानं वारिधेर्हरिर्यत्र ।
[१११]अज्ञात एव शेते कुक्षौ निक्षिप्य भुवनानि ॥"

आश्रिताधिक्ये यथा माघे –●

"[११२]युगान्तकालप्रतिसंहृतात्मनो
जगन्ति यस्यां सविकासमासत ।
तनौ ममुस्तत्र न कैटभद्विष-
[११३]स्तपोधनाभ्यागमसंभवा मुदः ॥"

पा.टि.

(११०) भु 2 भु 4 म) 'चित्रालङ्कार' । (१११) भु 2) 'आक्रान्त' ।
(११२) भु 5) 'युगान्तकाले' । (११३) भु 3) 'गमसम्भृता' ।

टि.

✩ विद्या. प्र. रु. VIII/ पृ305. ✩✩ विश्व. सा.द. X/ 72.
● माघ. शिशु. I/ 23.

अन्योन्यालङ्कारः – चन्द्रावलोकने (चन्द्रालोके ?)–☆

अन्योन्यं नाम यत्र स्यादुपकारः परस्परम् ॥५६॥

यथा मम –

कान्ते कज्जलरेखया सुरुचिरं नेत्रद्वयं राजते
राजत्येव सुलोचनेन ललिता रेखाञ्जनेनार्पिता ।
हारैरेव विराजतस्तव[११४] कुचौ हारा कुचाभ्यां सदा
ग्रीवा कण्ठविभूषणेन सुमुखि ग्रैवेयकं ग्रीवया ॥

यथा च –

'कविना च विभुर्विभुना च कवि' रित्यादि ।

[११५]त्रिविधो विशेषालङ्कारः – चन्द्रावलोकने (चन्द्रालोके ?)–●

विशेषं[११६] ख्यान्ति चाधारं विनाप्याधेयवर्णनम् ॥५७॥

यथा - 'दिवमप्युपयातानाम्' इत्यादि ।

विशेषः सोऽपि यद्येकं वस्त्वनेकत्र वर्ण्यते[११७] ॥५८॥

यथा मम - [११८]

अन्तर्गते मन्मथबाणयुक्ते
बाला लतासद्मनि तीरदेशे[११९] ।
सौधस्य मध्ये[१२०] तु बहिः प्रकामं
दृष्टा मया दूति च सर्वदिक्षु[१२१] ॥"

पा.टि.

(११४) भु 4) 'विराजते तव' । (११५) भु 1 भु 2) 'त्रिविधविशेषम्' ।
(११६) भु 5) 'विशेषं ख्याति प्याधारं' । म) 'विशेषः ख्यातमाधारं' ।
(११७) भु 4) वर्णितम्' । (११८) भु 3) 'सान्ते मनोजन्मपृषत्कणन्ते' ।
(११९) भु 3) 'चापगान्ते' । 'चापगान्ते' इत्यस्य 'नदीतटे'इति 'टीप्पणी' विद्यते ।
(१२०) भु 3) 'मध्ये च' । (१२१) भु 3) 'समस्तदिक्षु' ।

टि.

☆ पीयु. चन्द्रा. V/ 85. ● अप्प. कुव./पृ 115. (1917 Ed.)

१२२

☆ किञ्चिदारम्भतोऽशक्यवस्त्वन्तरकृतिश्च स: ॥५९॥

यथा मम – १२३

मयाभिलाषयुक्तेन त्वां दृष्ट्वा धरणीपते !

१२४ सौभाग्यं सुखसम्पन्नं प्राप्तं दिक्पालदर्शनम् ॥

अल्पालङ्कार:–चन्द्रावलोकने (चन्द्रालोके ?) –●

१२५

अल्पं तु सूक्ष्मादाधेयाद् यदाधारस्य सूक्ष्मता ॥६०॥

यथा – १२६

१२७ मणिमालोर्मिका तेऽद्य करे जपपटीयते ।

व्याघात: – साहित्यदर्पणे–☆☆

व्याघात: स तु केनापि वस्तु येन यथाकृतम् ॥
तेनैव तदुपायेन कुरुतेऽन्यस्तदन्यथा ॥६१॥

यथा – 'दृशा दग्धं मनसिजम्' इत्यादि ।

कारणमाला – तत्रैव–▲ १२८

परं परं प्रति यदा पूर्वपूर्वस्य हेतुता ।
तदा कारणमाला स्यात् ॥६२॥

पा.टि...

(१२२) भु 4 भु 5 म) 'क्वचिदार' । (१२३) भु 4) त्वदृष्टा' ।
(१२४) भु 2 भु 3 भु 4) 'सूक्ष्मालङ्कलार:' । (१२५) भु 3) 'यथाधारस्य' ।
(१२६) भु 5) 'यशपटीयते' । म) 'जपपटायते' । (१२७) म) 'व्याघातालङ्कार:' ।
(१२८) भु 3) 'यदि तदा' ।

टि.

☆ अप्प. कुव/ पृ. 116. ☆☆ विश्व. साद. X/ 74&75 पृ 805
● चन्द्रालोके नोपलभ्यते, उपलभ्यते परं कुवल्यानन्दे । द्र. आप्प. कुव पृ225.
▲ विश्व. सा.द. X/ 76. पृ 806

यथा ग्रन्थान्तरे–

"विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
१२९ १३०
पात्रात्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥"

एकावली – साहित्यदर्पणे–☆

पूर्वं पूर्वं प्रति विशेषणत्वेन परं परम् ।
स्थाप्यतेऽपोह्यते वा चेत् स्यात्तदैकावली द्विधा ॥६३॥

क्रमेणोदाहरणम् – १३१

"सरो विकसिताम्भोजमम्भोजं भृङ्गसङ्गतम्
भृङ्गा यत्र ससङ्गीताः सङ्गीतं सस्मरोदयम् ।"

[**यथा भट्टिकाव्ये**]–●

"न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम् ।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः ॥"

मालादीपकम् – चन्द्रावलोकने (चन्द्रालके ?)–▲

दीपकैकावलीयोगान्मालादीपकमुच्यते ॥६४॥

यथा –

"स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः ।"

यथा च मम –

व्याकोषपुष्पमकरन्दरसातिलुब्ध- १३२
भृङ्गावलीनिनदपूर्णदिगन्तराले ।
अस्मिन् ऋतौ गृहमकारि मयि स्मरेण
तत्तापयुक्तहृदये च मम प्रियायाः ॥

पा.टि. ....

(१२९) भु 1 भु 3) 'पात्राद्धनमवाप्नोति' । (१३०) भु 2 भु 4 म) 'सुखी' ।
(१३१) भु 4) 'भृंगसंगीतम्' । (१३२) भु 1 भु 5 म) 'पूरणादिक्प्रसन्ने' ।

टि.

☆ विश्व.सा.द. X/ 77-78. ● भट्टि. भट्टिका. II/ 19. ▲ पीयू. चन्द्रा. V/ 89.

सारालङ्कारः – साहित्यदर्पणे–☆

उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते ॥६५॥

यथा ग्रन्थान्तरे – ☆☆

१३३

"राज्ये सारं वसुधा वसुन्धरायां पुरं पुरे सौधम् ।

१३४

१३५ सौधे तल्पं तल्पे वराङ्गनानङ्गसर्वस्वम् ॥"

यथासंख्यम् – प्रतापरुद्रयशोभूषणे–●

उद्दिष्टानां पदार्थानां पूर्वं पश्चाद्यथाक्रमम् ।
अनूद्देशो भवेद्यत्र तद्यथासंख्यमुच्यते ॥६६॥

यथा मम -

चन्द्रे मृगे च सखि चक्रयुगे च कुन्दे
१३६
सिंहे मृणालगजवारिरुहेषु पश्य ।
१३७
त्वद्वक्त्र-नेत्र-कुच-दन्त-कटी-भुजानां
गत्यास्तथा चरणयोर्द्युतिरस्ति वन्ध्या ॥

द्विविधः पर्यायः– चन्द्रावलोकने (चन्द्रालोके ?) –●●

पर्यायो यदि पर्यायेणैकस्यानेकसंश्रयः ।
एकस्मिन् यद्यनेकं वा पर्यायः सोऽपि संमतः ॥६७॥

पा.टि.

(१३३) भु 1) 'पुरे पुरं' । (१३४) भु 4) 'वराङ्गनाङ्गसर्वस्वम्' । (१३५) भु 5) 'यथासंख्यम्' इति नास्ति । (१३६) भु 1 भु 2 भु 4 म) 'सत्कमलेषु' । (१३७) भु 3) 'दन्त' इत्यस्मादारभ्य 'त्वत्कान्तिपुञ्जे'(पृ242) इत्यन्तं यावद् ग्रन्थपातः

टि.

☆ विश्व. सा.द. X/ 78. ☆☆ रुद्र. काव्या. VII/ 97. ● विद्या. प्र.रु. VIII/ 226.
▲ चन्द्रालोके नोपलभ्यते, लभ्यते परं कुवलयानन्दे । द्र. अप्प. कुव/पृ. 238-9.

प्रथमोदाहरणं कुमारसम्भवे– ☆

"स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रदेदिरे
१३८
क्रमेण नाभिं प्रथमोदबिन्दवः ॥"

द्वितीयोदाहरणं तत्रैव – ☆☆

"विसृष्टरागादधरान्निवर्तितः
स्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः १३९
कृतोऽक्षसूत्रप्रणयी तया करः ॥"

परिवृत्तिः– साहित्यदर्पणे – ●

परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत् ॥६८॥

क्रमेणोदाहरणम् –

"दत्त्वा कटाक्षमेणाक्षी जग्राह हृदयं मम ।
मया तु हुदयं दत्त्वा गृहीतो मदनज्वरः ॥"

अत्र प्रथमार्धे समेन, द्वितीयार्धे न्यूनेन ।

अधिकेन यथा –

"तस्य च प्रवयसो जटायुषः १४०
१४१स्वर्गिणः किमिव वानुशोच्यते ।
येन जर्जरकलेवरव्ययात्
क्रीतमिन्दुकिरणोज्ज्वलं यशः ॥"

पा.टि.

---

(१३८) 'चिरेण' इति पाठान्तरम् (कुमा. V/24) (१३९) म) 'प्रणयो' ।
(१४०) भु 1 भु 5) 'वा नशोच्यते' । (१४१) भु 'निर्जरकले' ।

टि.

☆ कालि. कुमा. V/ 24. ☆☆ तत्रैव V/ 11. ● विश्व. साद्र. X/ 80.

परिसंख्या – प्रतापरुद्रयशोभूषणे– ✩

एकस्य वस्तुनः प्राप्तावनेकत्रैकदा यदा ।
एकत्र नियमः सा हि परिसंख्या निगद्यते ॥६९॥

यथा –

"किं भूषणं सुदृढमत्र यशो न रत्नं
किं कार्यमार्यचरितं सुकृतं न कामाः ।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम् ॥"

विकल्पः – प्रतापरुद्रयशोभूषणे– ✩✩

विरोधे तुल्यबलयोर्विकल्पालंकृतिर्मता ॥७०॥

यत्र तुल्यप्रमाणानुशिष्टयोर्युगपत्प्राप्तौ [एकस्यासम्भवस्तत्र] विकल्पः ।

यथा चन्द्रावलोकने (चन्द्रालोके ?) – ●

'सद्यः शिरांसि चापान् वा नमयन्तु महीभुजः ।"

समुच्चयः – प्रतापरुद्रयशोभूषणे– ●●

यत्र गुणानां वैमल्यादीनां क्रियाणां(दर्शनादीनां)
च युगपदवस्थानं तत्र समुच्चयालंकारः ॥७१॥

यथा –

"प्रतापरुद्रनृपतौ भद्रासनमुपेयुषि ।
सतां प्रसन्नं हृदयमसतां कलुषं मनः ॥"

यथा च **साहित्यदर्पणे**– ▲

हंहो धीरसमीर हन्त जननं ते चन्दनक्ष्माभृतो
दाक्षिण्यं जगदुत्तरं परिचयो गोदावरीवारिभिः ।
प्रत्यङ्गं दहसीह मे त्वमपि चेदुद्दामदावाग्निव-
न्मत्तोऽयं मलिनात्मको वनचरः किं वक्ष्यते कोकिलः ॥

टि.

✩ विद्या. प्र.रु. VIII/ 231. ✩✩ तत्रैव VIII/ 240.

● चन्द्रालोके न दृश्यते, दृश्यते परं कुवलयानन्दे । द्र. पृ./242.

●● विद्या. प्र.रु VIII/ पृ. 328. ▲ विश्व. सा.द. X. ·/पृ819.

१४२
समाध्यलंकारः – साहित्यदर्पणे– ✩

समाधिः सुकरे कार्ये दैवाद्वस्त्वन्तरागमात् ॥७२॥

यथा ग्रन्थान्तरे– ✩✩

"मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय द्विष्ट्येदमुदीर्णं घनगर्जितम् ॥"

प्रत्यनीकम् – चन्द्रावलोकने (चन्द्रालोके ?)– ●

प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः ॥७३॥

यथा– ●●

"मध्येन तनुमध्या मे मध्यं जितवतीत्ययम् ।
इभकुम्भौ भिनत्त्यस्याः कुचकुम्भनिभौ हरिः ॥"

काव्यार्थापत्तिः – चन्द्रावलोकने (चन्द्रालोके ?)– ▲

कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते ॥७४॥

यथा ग्रन्थान्तरे–
१४३
"स्वकीयं हृदयं भित्त्वा निर्गतौ यौ पयोधरौ ।
हृदयस्यान्यदीयस्य भेदने का कृपा तयोः ॥"

यथा च मम– १४४ १४५

कान्ते त्वत्कान्तिपुञ्जैर्वरतनुजनितैर्हेम दग्धं जितं स्यात् ।
का वार्ता केतकीनां करिवरगमने चम्पकानां च लोके ।
पीयूषं नैव साम्यं सखि तव वचसा का कथा कोकिलानां
दृग्भङ्ग्या नैव तुल्यः स्मरशरनिचयः का गतिः खञ्जनस्य ॥

पा.टि.……………………………………………………

(१४२) भु4) 'लक्षणान्तरं इति साहित्यदर्पणे' । (१४३) भु1 भु2) 'स्वकीयौ हृदयौ' । (१४४) भु2) 'जडितै' । भु3) 'विमलै' । (१४५) भु1 भु4 म) 'दंग्धहेमं' ।

टि.

✩ विश्व. सा.द. X/85. ✩✩ दण्डी. का.द. II/299. ● पीयू. चन्द्रा. V/99.
●● विश्व. सा.द. X/ पृ.824. ▲ चन्द्रालोके लक्षणमिदं न दृश्यते, दृश्यते परं कुवलयानन्दे । द्र. अप्प पृ./247.

काव्यलिङ्गम् – प्रतापरुद्रयशोभूषणे–☆

यत्र हेतुर्वाक्यगतत्वेन वा पदगतत्वेन वा प्रतिपाद्यते तत्र काव्यलिङ्गम् ॥७५॥

यथा मम–

अभवत् प्रियभावमोदिता[१४६]
भवसेवादिषु तत्परा दृढम्[१४७]।
मम बाणविघातमोचना[१४८]-
सम[१४९]बाणाभिहतः[१५०] क्व याम्यहम् ।

यथा च **चन्द्रावलोकने** (चन्द्रालोके?)–☆☆

"जितोऽसि मन्द कन्दर्प मच्चितेऽस्ति त्रिलोचनः ।"

द्विविधोऽर्थान्तरन्यासः – तत्रैव–●

उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः ॥७६॥

यथा मम–

आहरन्त्यो[१५१] हरस्वान्तं कान्तानेत्रान्तकान्तयः[१५२]।
मत[१५३]सर्वसुखहेतूनां किं चित्रं वदनश्रियाम्[१५४]।

पा.टि.

(१४६) भु 5)'प्रियभावमोहिता' । (१४७) भ 5) 'भृशम्' । म) 'दृतम्' ।
(१४८) म) 'मोचनः' । (१४९) भु 4 म) 'सुम' ।
(१५०) भु 1 भु 2 भु 4 भु 5 म) 'भिरतः' । (१५१) भु 3) 'आहरन्ति' ।
(१५२) भु 1 भु 2 भु 4 भु 5) 'कान्तनेत्रान्तकान्तयः' ।
(१५३) भु 1 भु 2 भु 5 म) 'मदन' । (१५४) भु 4) 'वदनश्रियम्' ।

टि.

☆ विद्या. प्र. रु. VIII/ पृ322. ☆☆ पीयू. चन्द्रा. V./38.

● चन्द्रालोके न विद्यते, विद्यते परं कुवलयानन्दे । द्र. अप्प. कुव. /पृ131.

यथा- चन्द्रावलोकने (चन्द्रालके?)–✿

"हनूमानब्धिमतरद् दुष्करं किं महात्मनाम् ।
✿✿ गुणवद्वस्तुसंसर्गाद् याति स्वल्पोऽपि गौरवम् ॥"

यथा वा ग्रन्थान्तरे– ●

"कीटोऽपि सुमनःसंगादारोहति सतां शिरः ।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥"

विकस्वरः – चन्द्रावलोकने (चन्द्रालोके ?)– ●●

यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः ॥७७॥

यथा -
"स न जिग्ये[१५५] महान्तो हि दुर्धर्षाः सागरा इव ।"
[१५६]

अस्य विकस्वरालङ्कारस्य लक्षणं पुनः कुवलयानन्दे कथितम्– ▲

यत्र कस्यचिद्विशेषस्य समर्थनार्थं सामान्यं विन्यस्य तत्प्रसिद्धावपरितुष्यता कविना तत्समर्थनाय पुनर्विशेषान्तरमुपमानीकृत्य अर्थान्तरं न्यस्यते (अर्थान्तरन्यासविधया वा विन्यस्तते?), **तत्र विकस्वरालङ्कारः ॥७८॥**

विशेषान्तरन्यसने उदाहरणम् कुमारसम्भवे – ▲▲

"अनन्तरत्नप्रभवस्य यस्य
हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः ॥"

पा.टि. ....

(१५५) भु1 भु2 भु4 भु5) 'जेइ' । (१५६) भु 3) 'विकस्वरालंकारस्य' इति नास्ति ।

टि. ---

✿ पीयू. चन्द्रा. V/ 68.

✿✿ अप्प. कुव/ पृ254.

● नारा. हितो. प्रस्ताविका/45.

●● पीयू. चन्द्रा. V/ 69.

▲ अप्प. कुव./ पृ. 260.

▲▲ कालि. कुमा. I/ 3.

अर्थान्तरन्यसनविषये यथा ग्रन्थान्तरे –

१५७
"मालिन्यमब्जशशिनोर्मधुलिट्कलङ्कौ
दत्तो मुखे नु तव दूति न काञ्चनाभम्।
दोषावत: क्वचन मेलकतो गुणत्वं
वक्तुर्गुणो हि वचसि भ्रमविप्रलम्भौ ॥"

प्रौढोक्ति: – चन्द्रावलोकने (चन्द्रालोके ?)– ✿

१५८
प्रौढोक्तिरुत्कर्षहेतौ तद्धेतुत्वप्रकल्पनम् ॥७९॥

यथा मम–

१५९
तस्या हेमगिरिस्थचम्पकसुमव्यूहातिगौर्या द्युति:।
१६०
सच्चूताङ्कुरभोगिकोकिलवचोमाधुर्यवाण्या वच:।
१६१
गङ्गातीरसमीपपुष्पलतिकाशौक्ल्यस्मिताया मुखं
१६२
माणिक्याचलपल्लवात्यरुणित: कान्ताधरो राजते ॥

यथा च चन्द्रावलोकने (चन्द्रालोके ?)– ✿

"कचा: कलिन्दजातीरतमालस्तोममेचका:।"

सम्भावनम् – चन्द्रावलोकने (चन्द्रालोके ?)– ●

सम्भावनं यदीदं (यदीत्थं?) स्यादित्यूहोऽन्यस्य सिद्धये ॥८०॥

यथा – ●●

"यदि शेषो भवेद् वक्ता कथिता: स्युर्गुणास्तव।"

पा.टि...

(१५७) भु 5 म) 'मालिन्यपद्म'। (१५८) भु 2 भु 3) 'रुत्कर्षहितौ'।
(१५९) भु 5 म) 'चौर्यद्युति:'। (१६०) भु 3) 'सच्चुताङ्कुरभोजि'।
(१६१) भु 3) 'शुक्लस्मिताया'। (१६२) भु 1 भु 2 म) 'वातिरुणित:'।

टि.

✿ चन्द्रालोके न विद्यते,विद्यते परं कुवलयानन्दे। द्र. अप्प. कुव. पृ 261.

● पीयू. चन्द्रा. V/ 48.

●● पूर्वत्रैव./ पृ 262.

मिथ्याध्यवसितिः – तत्रैव–☆

किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनम् ।
मिथ्याध्यवसितिर्[१६३]वेश्यां वशयेत् खस्रजं वहन् ॥८१॥

अत्र वेश्यावशीकरणस्यात्यन्तासंभावितत्वसिद्धये गगनकुसुममालिकाया[१६४] धारणरूपा मिथ्यार्थान्तरकल्पना[१६५] विच्छित्तिविशेषताभेदः (?)

☆☆ (अत्र वेश्यावशीकरणस्यात्यन्तासंभावितत्वसिद्धये गगनकुसुममालिका धारणरूपार्थान्तरकल्पनं मिथ्याध्यवसितिः?) इति कुवलयानन्दकारः ।

ललितम् – चन्द्रावलोकने (चन्द्रालोके?)–●

प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णनम् ।
ललितं निर्गते नीरे सेतुमेषा चिकीर्षति[१६६] ॥८२॥

प्रहर्षणम् – तत्रैव–●●

उत्कण्ठितार्थसंसिद्धिर्विना यत्नं प्रहर्षणम् ॥८३॥

यथा –

"तमेव ध्यायते तस्मै विसृष्टा सैव दूतिका ।"

पा.टि. ....

(१६३) भु 5) 'मिथ्याध्यवस्थितिः' । (१६४) भु 5) 'गगनसुसम' ।

(१६५) भु 2 भु 3) 'धारणरुपान्तरकल्पनं' ।

(१६६) भु 1 भु 2) 'चिकीर्षति' इत्यस्मात् परं 'प्रहर्षणम्' इत्यस्मात् पूर्वं च 'यथा मम' इति अधिकं दृश्यते । किं तु उदाहरणं न दृश्यते ।

टि. ---

☆ चन्द्रालोके नोपलभ्यते, लभ्यते परं कुवलयानन्दे । द्र. अप्प. कुव./पृ 263.

☆☆ तत्रैव / पृ 263 ● चन्दालोके न लभ्यते, लभ्यते परं कुवलयानन्दे द्र. अप्प. कुव. / पृ 264. ●● तत्रैव / पृ 270.

अस्यालंकारस्य लक्षणं कुवलयानन्दे च वक्ष्यते – ✩

“[१६७]उत्कण्ठा इच्छाविशेष: ।”

सर्वेन्द्रियसुखास्वादो यत्रास्तीत्यनु[१६८]मन्यते

तत्राप्तीच्छां ससंकल्पा[१६९]मुत्कण्ठां कवयो विदु: ॥”८४॥

इत्युक्तलक्षण: ।

तद्विषयार्थस्य तदुपायसंपादनयत्नं विना सिद्धि: प्रहर्षणम् ।

उदाहरणं स्पष्टम् ।”

(यथा वा-)– ✩✩

[१७०]“मेघैर्मेदुरमम्बरं वनभुव: श्यामस्तमालद्रुमै-
र्नक्तंभीरूरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयो: प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रह: केलय: ॥”

अत्र हि राधामाधवयो: परस्परमुत्कण्ठितत्वं प्रसिद्धतरम् ।

वाञ्छितादधिकार्थस्य संसिद्धिश्च प्रहर्षणम् ॥५८॥

यथा–

“दीपमुद्दीपयेद् यावत् तावदभ्युदितो रवि: ।”

पा.टि.
---

(१६७) भु 1 भु 2 भु 4 भु 5) ‘उत्कण्ठिता’ । (१६८) भु 4 भु 5) ‘नन्द्यते’ । (१६९) भु 1 भु 3 भु 4) ‘मुत्कण्ठां तां कवय’ । भु 2) ‘मुत्कव्ण्ठां तां कवयति’ । भु 5) ‘मुत्कण्ठितां कवयति’ । (१७०) भु 3 भु 4 भु 5) ‘मेघैर्मेदुरमम्बरमित्यादि ।’

टि.

✩ अप्प. कुव/ पृ. 140. ✩✩ जय. गीत. I/ 1. ● पूर्वत्रैव/ पृ. 140.

यथा वा –

"चातकस्त्रिचतुरान् पयःकणान् १७१
याचते जलधरं पिपासितः ।
सोऽपि पूरयति विश्वमम्भसा
हन्त हन्त महतामुदारता ॥"

यत्नादुपायसिद्ध्यर्थात् साक्षाल्लाभः फलस्य च ॥८६॥

कुवलयानन्दे च– ☆☆

फलोपायसिद्ध्यर्थात् यत्नान्मध्ये उपायात् सिद्धि (उपायसिद्धि?)-
१७७
मनपेक्ष्य साक्षात् फलस्यैव लाभोऽपि प्रहर्षणम् ।"८७॥

यथा चन्द्रावलोकने (चन्द्रालोके?) – १७३

'निध्यञ्जनौषधीमूलं खनताऽसादितो निधिः ।"

यथा च माघे – ☆

"उच्चित्यं प्रथममवस्थिता मृगाक्षी
१७४
पुष्पौघश्रितविटपं ग्रहीतुकामा ।
१७५
आरोढुं पदमदधादशोकयष्टा-
वामूलं पुनरपि तेन पुष्पिताऽभूत् ।"

पा.टि.

(१७१) म) 'पिपासया' । (१७२) भु 2 भु 4) 'लाभोऽप्रहर्षणम्' ।
(१७३) म) 'खनता साधितो' । (१७४) भु 2 भु 4) 'पुष्पौपश्रितविटपं' ।
(१७५) भु 2) 'यष्टीवामूलं' । म) 'यष्टिर्वमूलं' ।

टि.

☆ अप्प. कुव./ पृ. 271. ☆☆ तत्रैव./ पृ271

● चन्द्रालोके न दृश्यते । दृश्यते परं कुवलयानन्दे । द्र. अप्प. कुव/ पृ271.

●● उपलभ्यमाने माघकाव्ये पद्यमिदं नोपलभ्यते । द्र. माघ. शिशु.

यथा च मम– १७६
कान्तायाः प्राप्त्युपायं सविनयवचनं कुर्वता कामुकेन
कन्दर्पासक्तखेदव्रणयुतवपुषा पुष्पतल्पस्थितेन ।
१७७ १७८
तन्वङ्गीवेपमाना स्मरशरनिवहैर्दूतिहस्तं दधाना १७९
प्राप्ता सत्फुल्लकुञ्जभ्रमरकुलरवे कानने साधुवेषा ॥

विषादनम् – चन्द्रावलोकने (चन्द्रालोके ?)–✩

इष्यमाणविरुद्धार्थसंप्राप्तिस्तु विषादनम् ॥८८॥

यथा – १८०
"दीपमुद्द्योतयेद्यावत्तावन्निर्वाण एव सः ।"

यथा च – १८१
"रात्रिर्गमिष्यति भविष्यति सुप्रभातं १८२
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ।
१८३
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥"

उल्लासः – चन्द्रावलोकने (चन्द्रालोके ?)–●

एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि ॥८९॥

पा.टि.

(१७६) भु 3 म) 'प्रेमकर्त्री' । भु 4) 'प्रेमकत्री' । भु 5) 'प्रेमकृता' ।
(१७७) भु 1 भु2) 'तद्वाला' । (१७८) भु 5) 'दूतिकांसावलम्बा' ।
(१७९) भु 5) 'भिन्नवेषा' । 'साधुंवेषा' 'इत्यस्मात्परं 'विषादनमि' इत्यस्मात्पूर्वं च 'दूतिकाया अंसोऽवलम्बो यस्याः सा' इति अधिकं दृश्यते ।
(१८०) म) दीपमुद्द्योजयेद्यावन्निर्वाणस्तावद् एव सः । (१८१) म) 'च प्रभातम् ।
(१८२) भु 2) 'पद्मजालम्' । भु 5) 'चारविन्दम्' । (१८३) भु 1) 'विचिन्तयसि' ।

टि.

✩ पीयू. चन्द्रा. V/50-51. ● चन्द्रालोके न दृश्यते, दृश्यते परं कुवलयानन्दे । द्र. अप्प कुव./ पृ. 273.

१८४

कुवलयानन्दे च–✩

१८५

"[यत्र] कस्यचिद् गुणेन अन्यस्य गुणो, दोषेण दोषो, गुणेन दोषो, दोषेण गुणो वा यद्वर्ण्यते स उल्लासः ॥"१०॥

उदाहरणानि चन्द्रावलोकने (चन्द्रालोके ?) –▲ १८६

"अपि मां पावयेत् साध्वी स्नात्वेतीच्छति जाह्नवी ।"

"अत्र पतिव्रतामहिमगुणेन तत्स्नानतो गङ्गायाः पावनत्वगुणो वर्णितः ।"

१८७

▲ "काठिन्यं कुचयोः सृष्टं वाञ्छन्त्यः पादपद्मयोः ।
निन्दन्ति विश्वधातारं त्वद्धाटीष्वरियोषितः ॥"

१८८

"अत्र राज्ञो धाटीषु पलायमानानामरियोषितां पादयोधार्वनपरिपन्थिमार्दवदोषेण

१८९

तयोः काठिन्यमसृष्ट्वा व्यर्थं कुचयोः (तत्) सृष्टवतो धातुर्निन्द्यत्वदोषो वर्णितः ।"

▲ "तदभाग्यं धनस्यैव यन्नाश्रयति सज्जनम् ।
लाभोऽयमेव भूपाल सेवकानां न चेद्वधः ॥"

"अत्र सज्जनमहिमगुणेन धनस्य तदनाश्रयत्वं दोषः । राज्ञः क्रौर्यदोषेण तत्सेवकानां वधं विना निर्गमनं गुणत्वेन वर्णितम् ॥"

पा.टि.

(१८४) भु 5) 'कुवलयानन्दे च' इत्यस्मादारभ्य 'स उल्लासः' इत्यन्तं यावन्नास्ति । (१८५) भु 1 भु 5 म) गुणेन दोषो, दोषेण गुणो' इत्यस्य स्थाने 'गुणे दोषो दोषे गुणो' इति । (१८६) भु 2 भु 4) 'जाह्नवीम्' । (१८७) भु 3 भु 4 भु 5) 'स्रष्टुम्' । (१८८) भु 1 भु 2 भु 4 म) 'तत्र' । (१८९) भु 2 भु 4) 'सृष्ट्याद्यर्थम्' ।

टि.

✩ अप्प/ पृ 273. ▲ उदाहरणानि चन्द्रालोके न दृश्यन्ते, दृश्यन्ते परं कुवलयानन्दे/ पृ. 273, 274.

''अनेनैव क्रमेण पुनरुदाहरणान्तराणि ग्रन्थान्तरे –☆

''यदयं रथसंक्षोभादंसेनांसो निपीडितः ।
१९०
एकः कृती मदङ्गेषु शेषमङ्गं भुवो भरः ॥''

अत्र नायिकासौन्दर्यगुणेन तदंसनिपीडितस्य स्वांसस्य कृतित्वगुणो वर्णितः ।

''लोकानन्दन चन्दनद्रुम सखे नास्मिन् वने स्थीयतां
दुर्वंशैः कठिनैरसारहृदयैराक्रान्तमेतद् वनम् ।
१९१ १९२
ते ह्यन्योन्यनिघर्षजातदहनज्वालावलीसंकुला
१९३ १९४
न स्वान्येव कुलानि केवलममी सर्वं दहेयुर्वनम् ॥''
● १९५

अत्र वेणूनां परस्परसंघर्षजातदहनसंकुलत्वदोषेण वननाशरूपदोषो वर्णितः ।''

पाटि.

---

(१९०) भु 1 भु 2 भु 3 भु 4) 'शतमङ्गभुवोत्तरः' । भु 5) 'स्यतमङ्गभुवोत्तरः' ।
(१९१) म) 'त्वन्योन्य' । (१९२) भु 2 भु 4) विघर्ष' । म) 'निकर्ष' ।
(१९३) भु 2 भु 4) 'स्वामिन्येव' । (१९४) म) 'केवलमिदम्' ।
(१९५) भु 4) 'रूपो दोषो' । भु 5) 'वननाशरूप'- इत्यनेन परसिमाप्तिमेति ।

टि.

☆ कालि विक्र I/ 13 ☆☆ अप्प. कुव./ पृ. 274.
● 'वननाशरू' इत्यत्रैव भु 5) मातृका परिसमाप्तिं भजते ।

☆ “दानार्थिनो[१९६] मधुकरा यदि कर्णघातै[१९७]-
दूरीकृताः करिवरेण मदान्धबुद्ध्या ।
तस्यैव गण्डयुगमण्डनहानिरेषा
भृङ्गाः पुनर्विकचपद्मवने चरन्ति ॥”

अत्र भ्रमराणामलंकरणगुणत्वेन गजस्य तत्प्रतिक्षेपो दोषत्वेन वर्णितः ।

☆

“आघ्रातं परिचुम्बितं परिमुहुर्लीढं पुनश्चर्वितं[१९८]
त्यक्तं वा भुवि नीरसेन मनसा तत्र व्यथां मा कृथाः ।
हे सद्रत्न तवैव भाग्यमतुलं यद्वानरेणादरा-[१९९]
दन्तःसारविचारिणा व्यसनिना तूर्णीकृतं नाश्मना ॥”

[अत्र वानरस्य चापलदोषेण रत्नस्य चूर्णनाभावो गुणत्वेन वर्णितः ।]

अवज्ञालंकारः – चन्द्रावलोकने (चन्द्रालोके ?)–

ताभ्यां तौ यदि न स्यातामवज्ञालंकृतिस्तु सा ॥९१॥

ताभ्यां गुणदोषाभ्यां तौ गुणदोषौ । यथा –

“स्वल्पमेवाम्बु लभते प्रस्थं प्राप्यापि सागरम्[२००] ।”

“मीलन्ति यदि पद्मानि का हानिरमृतद्युतेः[२०१] ।”☆

पा.टि.

(१९६) भु 2 म ‘पानार्थिनो’ । (१९७) भु 4 म) ‘कर्णतालै’ ।

(१९८) भु 1 भु 2 भु 4) ‘वृथा’ । (१९९) भु 3 भु 4) ‘नामुना’ ।

(२००) भु 2) ‘सागरम्’ इत्यस्मात् परं मीलन्ति’ इत्यस्मात् पूर्वं च-
दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात्’ इति अधिकं दृश्यते ।

(२०१) भु 3 भु 4) ‘हानिरमृतद्युतेः’ इत्यस्मात्परं ‘यथा च मम’ इत्यस्मात्पूर्वं च-“ताभ्यां गुणदोषाभ्यां, तौ गुणदोषौ ।” इति दृश्यते ।

टि.

☆ दानार्थिनो इत्यस्मादारभ्य ‘रमृतद्युतेः’ इत्यन्तं यावत्सर्वं कुवलयानन्दे दृश्यते ।
द्र. अप्प कुव./ पृ. 275.

यथा च मम– २०२

कान्तामणिर्यदि भवेद् विरहातुरा च
किं दुःखमस्ति सकलस्य कलाकरस्य ।
२०३
नश्यन्ति यद्यपि तमांसि घनानि लोके
२०४
२०५ का हानिरस्ति विरसस्य दिवाकरस्य ॥'

अनुज्ञालंकारः–☆
२०६
दोषस्याभ्यर्थनाऽनुज्ञा तत्रैव गुणदर्शनात् ॥९२॥

यथा – २०७ २०८ २०९
विपदः सन्तु नः शश्वद् यासु संकीर्त्यते हरिः ।
२१०
मय्येव जीर्णतां यातु यत्त्वयोपगतं हरेः ।
नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति ।

लेशालंकारः – कुवलयानन्दे–☆

दोषस्य गुणत्वकल्पनं गुणस्य दोषत्वकल्पनं लेशः ॥९३॥

यथा चन्द्रावलोकने (चन्द्रालोके ?)–●

"अखिलेषु विहंगेषु हन्त स्वच्छन्दचारिषु ।
शुक पञ्जरबद्धस्ते मधुराणां गिरां फलम् ॥"

पा.टि.

---

(२०२) भु 3 भु 4 म) 'विरहातुराऽसौ' । (२०३) म) 'घनानि तमांसि' । (२०४) भु 1 भु 2 भु 3) विरसश्च' । (२०५) भु 1 भु 2) 'अनुज्ञालङ्कारः' इति नास्ति । (२०६) भु 1 भु 2) 'दोषेत्यादिवाक्यं' 'प्रस्थं प्राप्यापि सागरम्' (पृ251) इत्यस्मात् परं दृश्यते । (२०७) भु 1 भु 2) 'विपदः' इत्यस्मादारभ्य 'काङ्क्षति' इत्यन्तं यावत् न लभ्यते ।(२०८) भु 4) 'स तु' । (२०९) भु 3 भु 4) 'शश्वदप्सु' । (२१०) भु 3) 'सत्यपोपकृतम्' ।

टि.

☆ अप्प. कुव./ पृ. 278. ● पद्यमिदं चन्द्रालोके नास्ति, अस्ति परं कुवलयानन्दे । द्र. अप्प. कुव./ पृ. 278.

मुद्रालंकारः– ✩

सूच्यार्थसूचनं मुद्रा प्रकृतार्थपदैरपि (परैः पदैः?) ॥९४॥

यथा –

२११ "नितम्बगुर्वी तरुणी दृग्युग्मविपुला च सा।"

रत्नावल्यलंकारः – चन्द्रावलोकने (चन्द्रालोके ?)– ✩✩

क्रमिकं प्रकृतार्थानां न्यासं रत्नावलीं विदुः ॥९५॥

यथा – २१२ २१३

"चतुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते।"

तद्गुणालंकारः – प्रतापरुद्रयशोभूषणे– ●

यत्र न्यूनं स्वगुणं विहाय संनिहितवस्तुनः सकाशाद्
उत्कृष्टगुणः स्वीक्रियते स तद्गुणालंकारः ॥९६॥

२१४

यथा मम– २१५

कान्ते ! त्वत्तनुभूषितं सुविमलं नीलांशुकं कान्तिभिः
सत्पीताम्बररम्यतामनुपमां धत्ते हिरण्यप्रभे।
त्वन्नासावरमौक्तिकं सुरुचिरं कान्त्याधरस्याधुना
धत्ते निर्मलपद्मरागसुषमां हे राजकन्ये सखि ॥

पा.टि. ....

(२११) भु 1 भु 2) रत्नावल्यलंकारः' इति न दृश्यते। म) 'रत्नावली'।
(२१२) भु 2 भु 4) 'सर्वज्ञत्वं'। (२१३) भु 1 भु 2 भु 3) 'महीयते'।
(२१४) भु 3 म) 'यथा मम' इति नास्ति। (२१५) भु 3) 'सुविपुलं'।

टि.

✩ अप्प.कुव./ पृ. 281: ✩✩ चन्द्रालोके नोपलभ्यते, लभ्यते परं कुवलयानन्दे। द्र. तत्रैव पृ. 281.

● विद्या. प्र.रु. VIII/ पृ. 297.

अतद्गुणालंकारः – तत्रैव–✩ २१६
यत्र संनिधानरूपहेतौ सत्यप्यन्यगुणस्वीकारो
२१७
नास्ति असावतद्गुणालंकारः ॥९७॥

यथा चन्द्रावलोकने (चन्द्रालोके ?)–✩✩
"चिरं रागिणि मच्चित्ते निहिताऽपि न रज्यसि ॥"

यथा वा –
"गाङ्गमम्बु सितमम्बु यामुनं
कज्जलाभमुभयत्र मज्जतः ।
राजहंस ! तव सैव शुभ्रता
२१८
चीयते न च न चापचीयते ॥"

अनुगुणालंकारः – चन्द्रावलोकने (चन्द्रालोके ?)–●
प्राक्सिद्धस्वगुणोत्कर्षोऽनुगुणः परसंनिधेः ॥९८॥

यथा मम –
सत्कान्ति यावकरसैरतिशोणभावं
२१९
धत्तेऽधरस्तव सरोजमुखि प्रवीणे ।
२२०
नीलोत्पलं सुरुचिरं श्रवणावतंसी-
भूतं दधाति भृशमेचकतां कटाक्षैः ॥

पा.टि. ....

(२१६) भु 4) 'सत्यप्यनु' । (२१७) भु 1) 'तसावतद' । भु 2) 'तदसावत' भु 3) 'सोऽत' । (२१८) भु 2) न च च चाप' । म) 'न च नचोप' ।
(२१९) भु 3) 'सरोरुहकान्तिवक्त्रे' ।
(२२०) भु 1 भु 2) वतंसमत्यन्तश्यामलरुचिं लभते । म) 'वतसं तेऽत्यन्त' ।

टि.

✩ विद्या. प्र.रु./ पृ. 290. ✩✩ चन्द्रालोके न दृश्यते,दृश्यते परं कुवलयानन्दे । द्र. अप्प. कुव./ पृ. 287. ● पीयू. चन्द्रा. V/ 106.

मीलितम् – तत्रैव–☆

मीलितं यदि सादृश्यात् भेद एव न दृश्यते ॥९९॥

यथा मम –२२१

स्वाभाविके गौरगुणाभियुक्ते
तनौ त्वदीये तरलायताक्षि ।
मया हरिद्राद्रवसद्रसोऽयं २२२
न लिप्यते संप्रति कोमलाङ्गि ॥

यथा ग्रन्थान्तरे–

"मल्लिकामालभारिण्यः सर्वाङ्गद्रवचन्दनाः ।
२२३ क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः ॥"

सामान्यम्–प्रतापरुद्रयशोभूषणे – ☆☆

यत्र एकस्य वस्तुनो गुणसाम्येन वस्त्वन्तरैकता (वस्त्वन्तरैकात्म्यं?) भवति, स सामान्यालंकारः ॥१००॥

यथा गन्थान्तरे–

"मल्लिकाचितधम्मिल्लाश्चारुचन्दनचर्चिताः
अविभाव्याः सुखं यान्ति चन्द्रिकास्वभिसारिकाः ॥"

उन्मीलितनिमीलितालंकारौ–चन्द्रावलोकने (चन्द्रालोके ?) –●

एतयोर्द्वयोर्लक्षणोदाहरणम्–

भेदवैशिष्ट्ययोः स्फूर्तावुन्मीलितनिमीलितौ ॥१०१॥

२२४
"हिमाद्रिं त्वद्यशोमग्नं सुराः शीतेन जानते ।
लक्षितान्युदिते चन्द्रे पद्मानि च मुखानि च ॥"

पा.टि.

(२२१) भु 3) 'निसर्गतो गौरिमसारयोगिन्यङ्गे त्वदीये तरलायताक्षि' । (२२२) भु 3) 'संप्रतीह' । (२२३) भु 3 भु 4 म) 'सामान्यम्' इत्यस्मादारभ्य 'चन्द्रिकास्वभिसारिकाः' इत्यन्तं यावद् ग्रन्थपातः । (२२४) भु 3) 'हिमाद्रिं' इत्यतः भाविकालंकारस्य लक्षणवाक्यान्ते (पृ.260) यावद् ग्रन्थपातः ।

टि.

☆ पीयू. चन्द्रा. V/33 ☆☆ विद्या. प्र.रु. VIII/पृ. 297. ● अप्प. कुध. पृ. 292

उत्तरालंकारः–

यत्र प्रश्नोत्तरान्तराभिन्नं चित्रमुत्तरं स उत्तरालंकारः ॥१०२॥

यथा ग्रन्थान्तरे–

"का काली का मधुरा का शीतलवाहिनी गङ्गा ।
के दारपोषणरताः कं बलवन्तं न बाधते शीतम् ॥"

सूक्ष्मालंकारः – साहित्यदर्पणे–✩

संलक्षितस्तु सूक्ष्मोऽर्थ आकारेणेंगितेन वा ।
कयापि सूच्यते भंग्या यत्र सूक्ष्मं तदुच्यते ॥१०३॥

अत्राकारेण यथा मम–

कस्तूरिका चर्चितचारुदेहा
संचारिका नीलदुकूलवेषा ।
मुदा सुनीलोत्पलदामरम्या २२५
संप्रेषिता कान्त रहः(कान्तगृहं ?)तरुण्या ॥

यथा च ग्रन्थान्तरे–✩✩ २२६

"वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धै-
र्दृष्ट्वा भिन्नं कुंकुमं चापि कण्ठे ।
पुंस्त्वं तस्या व्यञ्जयन्ती वयस्या
स्मित्वा पाणौ खड्गलेखां लिलेख ॥"

अत्र कयाचित् कुंकुमभेदैः संलक्षितं कस्याश्चित् पुरुषायितं पाणौ पुरुषचिह्नखड्गलेखाभिलेखेन सूचितम् ।

पा.टि...

(२२५) भु 2) 'तरुण्याः' । म) 'तरुण्यः' । (२२६) भु 2) 'विप्रबन्धैर्दृश्या' ।

टि.

✩ विश्व. सा.द. X/ 92.

✩✩ मम्म. का. प्र. X/ पृ. 712.

इंगितेन यथा– ☆

“संकेतकालमनसं विटं ज्ञात्वा विदग्धया
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥”

अत्र विटस्य भ्रूक्षेपादिना लक्षितः संकेतकालाभिप्रायो रजनीकालभाविना
२२७
पद्मनिमीलनेन प्रकाशितः।

पिहितालंकारः – चन्द्रावलोकने (चन्द्रालोके?)– ☆☆

पिहितं परवृत्तान्तज्ञातुः साकूतचेष्टितम् ॥१०४॥

यथा मम –

प्रवासादागते कान्ते स्मरसायकवेपिते।
अनल्पाकल्पमुत्कृष्टं तल्पमाकल्पयद्वधूः ॥

व्याजोक्तिः – तत्रैव– ● २२८

व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनम् ॥१०५॥

यथा –

“सखि ! पश्य गृहारामपरागैरस्मि धूसरा।”

यथा च ग्रन्थान्तरे–

“किं त्वं दूति श्वससि विषमं सत्वरावर्तनेन २२९
भ्रष्टो रागस्त्वदधरपुटे प्रार्थनाभिस्त्वदर्थम्।
२३०
नष्टा जाता किमलकलता तत्पदालोटनेन
वासस्तस्य त्वयि भण कथं प्रत्ययार्थं तवैव ॥”

पा.टि. ....

(२२७) भु 1 भु 2 म) ‘मीलनेन’। (२२८) भु 2) ‘हेतूक्त्वा’।
(२२९) म) ‘त्वत्कथाजल्पनेन’। (२३०) म) ‘लुण्ठनेन’।

टि.

☆ आन. ध्वन्या. II./ पृ. 180. ☆☆ पीयू. चन्द्रा. V./ 109.

● चन्द्रालोके न दृश्यते, दृश्यते परं कुवलयानन्दे। द्र. पृ. 298.

गूढोक्तिः – ☆ २३१

गूढोक्तिरन्योद्देश्यं चेत्तदन्यं प्रति कथ्यते ॥१०६।

यथा–

"वृषापेहि परक्षेत्रादायाति क्षेत्ररक्षकः ।"

यथा च मम–

गन्धवाहाः पलायध्वं वनात् कुसुमरञ्जितात् ।
तृष्णासक्तमनाः श्रेष्ठः शीघ्रमायाति कुण्डली ॥

विवृतोक्तिः–चन्द्रावलोकने (चन्द्रालोके ?) – ☆☆

विवृतोक्तिः श्लेष(श्लिष्ट?)गुप्तं कविनाविष्कृतं यदि ॥१०७॥

यथा–

"वृषापेहि परक्षेत्रादिति स्यात् कविसूचनम् ।"

युक्त्यलंकारः– ●

युक्तिः परानुसन्धानं क्रियया मर्मगुप्तये ॥१०८।

यथा – २३२

"त्वामालिखन्ती दृष्ट्वाऽन्यं धनुः पौष्पं करेऽलिखत् ।"

लोकोक्तिः– ●●

लोकप्रवादानुकृतिर्लोकोक्तिरिति कथ्यते ॥१०९॥

यथा–

"सहस्व कतिचिन्मासान् मीलयित्वा विलोचने ।"

पा.टि.

(२३१) भु) 'गूढोक्तिरगूढोक्ति' । (२३२) म) 'करैर्लिखत्' ।

टि.

☆ अप्प. कुव./ पृ. 301. ☆☆ चन्द्रालोके नास्ति, अस्ति परं कुवलयानन्दे । द्र. तत्रैव/ पृ.303. ● तत्रैव/ पृ. 306. ●● अप्प. कुव./ पृ. 307

छेकोक्तिः[२३३]– ✩

छेकोक्तिर्यत्र[२३४] लोकोक्तिः[२३५] स्यादर्थान्तरगर्भिता ॥११०॥

यथा –

"भुजङ्ग एव जानीते भुजङ्गाचरणं[२३६] सखे !"

वक्रोक्ति :– चन्द्रावलोकने (चन्द्रालोके ?)– ✩✩

वक्रोक्तिः श्लेषकाकुभ्यामपरार्थप्रकल्पनम् ॥१११॥

साहित्यदर्पणे च– ●

अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद् यदि ।
अन्यः श्लेषेण[२३७] काक्वा वा सा वक्रोक्तिस्तथा द्विधा॥११२।

क्रमेणोदाहरणम् –

'के यूयं ? स्थल एव संप्रति वयं, प्रश्नो विशेषाश्रयः,
कि भूतो(ब्रूते? विहगः? स वा फणिपतिर्यत्रास्ति सुप्तो हरिः ।
वामा यूयमहो ! विडम्बरसिकः कीदृक् स्मरो वर्तते ?
येनास्मासु विवेकशून्यमनसः पुंस्येव योषिद् भ्रमः ॥"

प.टि...

(२३३) भु 2) 'छेकोक्तिः' इति नास्ति । (२३४) भु 2) 'छेदोक्तिर्यत्र' ।
(२३५) भु 2) 'लोकोक्तः' । भु 4) 'लोकोक्तेः' ।
(२३६) भु 4) 'भुजङ्गिचरण' । (२३७) भु 2) 'अर्थश्लेषेण' ।

टि.

✩ अप्प. कुव./ पृ. 307. ✩✩ चन्द्रालोके नास्ति. अस्तिपरं कुवलयानन्दे, द्र. तत्रैव./ पृ. 309. ● विश्व. सा. द. X./ 9.

☆ [“काले कोकिलवाचाले सहकारमनोहरे ।
कृतागस: परित्यागात्तस्याश्चेतो न दूयते ॥]

स्वभावोक्ति: – चन्द्रावलोकने (चन्द्रालोके?)– ☆☆

स्वभावोक्ति: स्वभावस्य जात्यादिस्थस्य वर्णनम् ॥११३॥

यथा– ●

“कुरङ्गैरुत्तरङ्गाक्षै: स्तब्धकर्णै: समीक्ष्यते ।”

यथा मम–

अमृतोपमितां वाचमुक्त्वालीभिर्मदालसा ।
लोलत्कटाक्षदृष्टिभिर्लीलागत्या मनोऽहरत् ॥

भाविकालंकार: – साहित्यदर्पणे– ●●

**अभूतस्य पदार्थस्य भूतस्याथ भविष्यत: ।
यत्प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम् ॥११४॥**

चन्द्रावलोकने (चन्द्रालोके?) च– ▲

भाविकं भूतभाव्यर्थ साक्षात्कारस्य वर्णनम् ॥११५॥

यथा ग्रन्थान्तरे– ▲▲

“मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भव: ।
येनैकचुलुके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ ।”

टि.

☆ अत्र वक्रोक्ते: साहित्यदर्पणोक्तं लक्षणं स्वीकृत्य तद्ग्रन्थाधारेण अस्या: द्वैविध्यमपि अङ्गीकृतमास्ते । ‘क्रमेणोदाहरणम्’ इत्युक्त्वा श्लेषवक्रोक्तेरुदाहरणं प्रदर्शितम् । परं तु काकुवक्रोक्तेरुदाहरणं मातृकासु नोपलभ्यते । तस्मादत्र साहित्यदर्पणस्य काकुवक्रोक्तेरुदाहरणं संयोज्यते । द्र. विश्व. सा. X/ पृ. 621.

☆☆ पीयू. चन्द्रा. V. /112

● अप्प. कुव./ पृ. 311.

●● विश्व. सा.द. X./ 93

▲ पीयू. चन्द्रा. V./ 113.

▲▲ आन. ध्वन्या. IV./ पृ. 624.

यथा वा – ✩ २३८

"अद्यापि तिष्ठति दृशोरिदमुत्तरीयं
धर्तुं पुनः स्तनतटात् पतितं प्रवृत्ते (प्रवृत्ता ?)।
वाचं निशम्य नयनं नयनं ममेति
२३९
किंचित्तदा यदकरोत् स्मितमायताक्षी ॥"

उदात्तालंकारः– साहित्यदर्पणे– ✩✩

लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते ।
२४०
यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत् ॥११६॥

क्रमेणोदाहरणम्– ●

"अधःकृताम्भोधरमण्डलानां
२४१ यस्यां शशाङ्कोपलकुट्टिमानाम् ।
ज्योत्स्नासु नित्यं रमतां(क्षरतां?)पयोभिः
केलीवनं वृद्धिमुरीकरोति ॥"
२४२ २४३

"नाभिप्ररूढाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ।
२४४ २४५
अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान् पुरुषोऽधिशेते ॥"

पा.टि. ---

(२३८) भु 1 भु 2 भु 4) 'तिष्ठतु'। (२३९) भु 1 भु 2) 'यदि करोस्मित'। (२४०) भु 4) 'यद्यपि'। (२४१) म) 'देशे च'। (२४२) भु म) 'प्रथमे च'। (२४३) भु 1 भु 2 म) 'धाता'। (२४४) भु 1 भु 2 म) 'निद्रा'। भु 3) 'निद्रां'। (२४५) भु 3) 'पुरुषोऽधिशेते' इत्यस्मात् परम् 'अत्युक्ति' इत्यस्मात् पूर्वं च अमुं समुद्रं योगनिद्रामधिशेते इति पाठे उष्ट्रशायिकाः शय्यन्ति इतिवत्। यद्वा युगान्तोचिते योगनिद्र इति पाठः पुरुषविशेषणम्' इति अधिकं दृश्यते ।

टि. ---

✩ अप्प.कुव/पृ312 ✩✩ विश्व.सा.द.X/94. ● तत्रैव/पृ.835. ▲ कालि. रघु.XIII/6.

अत्युक्तिनामालंकारः – चन्द्रावलोकने (चन्द्रालेके?)– ☆

अत्युक्तिरद्भुतातथ्यशौर्यौदार्यादिवर्णनम् ।।११७।।

यथा –

"त्वयि दातरि राजेन्द्र ! याचकाः कल्पशाखिनः ।।"

यथा च ग्रन्थान्तरे –

"राजन् सप्ताप्यकूपारास्त्वत्प्रतापाग्निशोषिताः ।।"
२४६
त्वद्वैरिराजवनिताबाष्पपूरेण पूरिताः ।।"

निरुक्त्यलंकारः – चन्द्रावलोकने (चन्द्रालोके ?)– ☆☆

निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनम् ।।११८।।

यथा– ●

"ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान् ।।"

यथा वा – २४७

"पुरा कवीनां गणनाप्रसङ्गे २४८
कनिष्ठिकाधिष्ठितकालिदासा ।
अद्यापि तत्तुल्यकवेरभावा-
दनामिका सार्थवती बभूव ।।"

प्रतिषेधालंकारः– ●●

प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्तनम् ।।११९।।

यथा -

"न द्यूतमेतत् कितव क्रीडनं निशितैः शरैः ।।"

पा.टि. ....

(२४६) भु 4 म) 'वाष्परूपेण' । (२४७) भु 4) 'गणनाप्रशंसे' ।
(२४८) भु 2) 'कालिदासः' ।

टि.

☆ पीयू. चन्द्रा. V./136. ☆☆ चन्द्रालोके न विद्यते, विद्यते परं कुवलयानन्दे द्र./ पृ. 314. ● पीयू. चन्द्रा. III/ 6 ●● अप्प. कुव./ पृ. 314 .

विध्यलंकारः–☆ २४९

सिद्धस्यैव विधानं यत्तमाहुर्विध्यलंकृतिम् ॥१२०॥

यथा–

"पञ्चमोदञ्चने काले कोकिलः कोकिलोऽभवत् ।"

हेत्वलंकारः–☆☆

हेतोर्हेतुमता सार्धं वर्णनं हेतुरुच्यते ॥१२१॥

यथा–

"असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवाम् ॥"

यथा च मम–

समदमधुपसङ्गाः काकलीनादरङ्गाः
मदनरसतरङ्गाः स्वप्रियासङ्गतुङ्गाः ।
विरहिरसिकयूनां कामतापं विधातुं
दिशि दिशि विहरन्तः कोकिला रेजिरेऽस्मिन् ॥

[अपि च]– ●

हेतुहेतुमतोरैक्यवर्णनं हेतुरुच्यते ॥१२२॥

यथा– २५०

"लक्ष्मीविलासा विदुषां कटाक्षा वेंकटप्रभोः ।"

कुवलयानन्दे– २५१

अत्र च कार्यावश्यंभावतः शैघ्र्यादिप्रत्ययनार्थं कार्यकारणाभेदव्यपदेशः ।

पा.टि. ....

(२४९) भु 2 भु 4 म) 'लंकृतिः' । (२५०) भु 1 भु 2) 'प्रभोः' इत्यस्मात् परं 'यस्यालंकारस्य'(पृ 264) इत्यस्मात्पूर्वं च ग्रन्थपातः । (२५१) म) 'कारणव्यपदेशः' ।

टि. ——

☆ अप्प. कुव./ पृ315. ☆☆ तत्रैव./ पृ316 ● तत्रैव./ पृ317.

यस्यालंकारस्य ये भेदास्ते[२५२] ग्रन्थविस्तरभयान्नोक्ताः । काव्यप्रकाशादिषु ते ज्ञेयाः ।

अथ रसवदाद्यलंकाराः – साहित्यदर्पणे–☆

"रसभावौ तदाभासौ भावस्य प्रशमस्तथा ।
गुणीभूतत्वमायान्ति यदालंकृतयस्तदा[२५३] ॥
रसवत् प्रेय[२५४] ऊर्जस्वि समाहितमिति क्रमात् ॥"१२३॥

तत्र रसयोगाद्रसवदलंकारः । यथा–●

"अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः[२५५] करः ॥"

अत्र शृङ्गारः करुणस्याङ्गम् ।

प्रकृष्टप्रियत्वात् प्रेयः । यथा साहित्यदर्पणे –☆☆

"आमीलितालस[२५६]विवर्तिततारकाक्षीं
मत्कण्ठबन्धनदरश्लथबाहुवल्लीम् ।
प्रस्वेदवारिकणिका[२५७]चितगण्डबिम्बां
संस्मृत्य तामनिशमेति न शान्तिमन्तः[२५८] ॥"

पाटि.

(२५२) भु 1 भु 2) 'यद्भेदास्ते' । (२५३) भु 3) 'यदालंकृतयस्तथा' ।
(२५४) भु 1 भु 2 भु 4) 'प्रेम' । (२५५) भ 2) 'नीतिविस्रंसनः' ।
(२५६) भु 1 भु 2 भु 4) 'आमीलितारस-' । भु 3) 'आमीलतां रस' ।
(२५७) भु 2) 'कणिकार्च्चित' । (२५८) भु 4) 'शान्तमन्तः' ।

टि.

☆ विश्व. सा.द X/95&96. ● व्यास.म.भा. स्त्री. XXIV/19 ☆☆ तत्रैव X/ पृ. 836.

अत्र सम्भोगशृङ्गारः स्मरणाख्यभावस्याङ्गम् । स च विप्रलम्भस्य । ऊर्जो बलम् । **ऊर्जस्व्यलंकारः – साहित्यरत्नाकरे–**✩

रसाभासोऽथ वा भावाभासो यत्र रसस्य वा ।
२५९
भावस्याङ्गं भवेत् तत्र प्राहुरूर्जस्व्यलंक्रियाम्(स्व्यलंकृतिम् ?)॥१२४॥

यथा ग्रन्थान्तरे–

"वनेऽखिलकलासक्ताः परिहृत्य निजस्त्रियः ।
त्वद्वैरिवनितावृन्दे पुलिन्दाः कुर्वते रतिम् ॥"
२६०

अत्र शृङ्गाराभासो राजविषयकरतिभावस्याङ्गम् । एवं भावाभासोऽपि ॥

समाहितम् – साहित्यरत्नाकरे– ✩✩ २६१

समाहितालंकृतिः स्याद् भावाङ्गे भावसंक्षये ॥१२५॥

यथा ग्रन्थान्तरे–

"अनिशं करवालकम्पनै- २६२
भ्रुकुटीतर्जनगर्जनैर्मुहुः ।
२६३
ददृशे तव वैरिणां मदः
स गतः क्वापि तवेक्षणे क्षणात् ॥"

अत्र मदाख्यस्य भावस्य प्रशमो राजविषयरतिभावस्याङ्गम् ।

पा.टि. ....

(२५९) भु 2 म) 'रसेत्' । (२६०) भु 2. म) 'भावस्य कारणम्' ।
(२६१) भु 3) 'भावसङ्गमे' । (२६२) भु 1 भु 2) 'गर्जनं मुहुः' ।
(२६३) भु 4) 'वैरिणा' ।

टि.

✩ धर्म. सा. र. VII./ 153. ✩✩ तत्रैव/ पृ. 724.

☆ "यद्येत एवालंकारा: परस्परविमिश्रिता: ।
[२६४]तदा पृथगलंकारौ संसृष्टि: संकरस्तथा ॥"१२६॥

☆☆

"यथा लौकिकालंकाराणामपि [२६५]परस्परमिश्रत्वे चारुत्वेन पृथगलंकारत्वं तथोक्तरूपाणां काव्यालंकाराणामपि परस्परमिश्रत्वे संसृष्टिसंकराख्यौ पृथगलंकारौ ।"

तत्र **संसृष्टि: – साहित्यरत्नाकरे**--○

"तिलतण्डुलसंश्लेषभङ्ग्या या स्यात् परस्परम् ।
[२६६]अलंकृतीनां घटना सा संसृष्टिर्निगद्यते ॥"१२७॥

यथा ग्रन्थान्तरे–

"देव: पायादपायाद् व: स्मेरेन्दीवरलोचन: ।
संसारध्वान्तविध्वंसहंस: कंसनिषूदन: ॥"

○○

"अत्र पायादपायादिति यमकम्, संसारेत्यादौ चानुप्रासश्चेति शब्दालंकारयो: संसृष्टि: । द्वितीयपादे उपमा, [२६७]द्वितीयार्धे रूपकमित्यर्थालंकारयो: संसृष्टि: । एवम् उभयो: स्थितत्वात् शब्दार्थालंकारसंसृष्टि: ।"

पा.टि. ....

(२६४) भु 2 म) 'तथा' । (२६५) भु 1 भु 2 भु 4 म) 'परस्परमिश्रत्वेन' ।
(२६६) भु 1 भु 2) 'अलंकृतिना' । म) अलंकृतीय' ।
(२६७) भु 1 भु 2 भु 4) 'तृतीयार्धे' । म) 'तृतीयादो' ।

पा.टि.

☆ विश्व. सा.द. X./ 97.
☆☆ विश्व.सा.द./ पृ842.
○ धर्म. सा.र. VII/ पृ. 732.
○○ विश्व. सा.द. X/ पृ843.

यथा च माघे– ☆

'कुसुम(वदन ?)सौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया ।

२६८ २६९

चलितया विदधे कलमेखला कलकलोऽलकलोलदृशान्यया ॥''

२७०

अत्र शब्दालंकारानुप्रासयमकयोरनुप्रासोपमयोः संसृष्टिः ॥

संकरालंकारः – कुवलयानन्दे– ☆☆

''नीरक्षीरन्यायेनास्फुटभेदालंकारमेलने संकरः ॥''१२८॥

यथा ग्रन्थान्तरे– ●

''अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः ।

२७१ अहो ! दैवगतिश्चित्रा तथापि न समागमः ॥''

अत्र समासोक्तिः विशेषोक्तेरङ्गम् । एवमन्यत्रापि । संसृष्टिसंकरयोर्भेदाः

२७२

काव्यप्रकाशादिषु ज्ञेयाः ।

पा.टि...

(२६८) भु 4) 'चलितयोः' । (२६९) भु 2 भु 4) 'दृशान्वया' ।

(२७०) भु 1) 'रनुप्रासोपमेययो' । (२७१) भु 4) 'समासोक्तेः' ।

(२७२) भु 3) 'ज्ञेयाः' इत्यस्मात् परं 'सरसमपि' इत्यस्मात् पूर्वं च-

साहित्यदर्पणे तु - संकरो यथा –

अङ्गाङ्गित्वेऽलंकृतीनां तद्वदेकाश्रयस्थितौ ।

सन्दिग्धत्वे च भवति संकरस्त्रिविधः पुनः ॥(सा. द. X./98)

अलंकृतीनामुपजीव्योपजीवभावे एकत्रावस्थितौ सन्देहे च सति त्रिविधः संकरालंकारो भवतीत्यर्थः । **संसृष्टिस्त्रत्रैव–**

''मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते ॥''

अनयोरुदाहरणान्यपि तत्रैव द्रष्टव्यानि ।'' इति अधिकं दृश्यते ।

टि.

☆ माघ. शिशु. VI/14. ☆☆ अप्प. कुव/पृ.340. ● आन. ध्वन्या.I/ पृ.194.

सरसमपि सुकाव्यं साधुवाणीगुणाढ्यं
२७३
प्रमुदजनितसर्वालंकृतैर्वर्जितं चेत्।
भुवि च कविसभायां सादरं नैव रम्यं
गलितकुचनितम्बा सुन्दरीव प्रियाग्रे ॥१२९॥

२७४
कविकल्पलतायाम्—✩

अनुप्रासः स तेनैव सनाथा काव्यपद्धतिः
शतालंकारसंयोगी काव्यबन्धो विराजते ॥१३०॥

इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायणदेवमहाराज-विद्वत्सभाराजित-प्रबन्धकविताप्रकाशक-करणकुलसंभव-कविभिषग्वर-वासुदेवपात्रतनय-श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ
२७५
अर्थालंकारनिरूपणं नाम पंचदशः किरणः।

पा.टि. ....

(२७३) भु 3 भु 4 म) 'जनितसकलहर्षालंकृतित्याजितं चेत्'।
(२७४) भु 1 भु 2) 'अनुप्रासः इत्यादिपूर्वार्द्धः नास्ति'।
(२७५) भु 4) 'चतुर्दशः'।

टि. ---

✩ देवे. कवि./ पृ. 17.

❑ ❑ ❑

[षोडशः किरणः]

अथेवार्थकशब्दानाह-कविकल्पलतायाम्–☆

बन्धुश्चौरः सुहृद् वादी कल्पः प्रख्यः प्रभः समः ।
देशीयः [1]देश्यरिप्वाभसोदराद्या इवार्थकाः ॥१॥

एतेषामुदाहरणानि क्रमेणाह–

●“यथेन्दुबन्धुर्मुक्ताश्रीश्चौरः [2]शम्भुद्युतेः सुहृत् ।
कुन्दवादी ●हंसकल्पःक्षीरप्रख्यो हिमप्रभः ॥
गङ्गासमोऽम्बुदेशीयः शेषदेश्यः सुधारिपुः ।
[6] [3]विसाभ[4]स्ते यशोराशिः कैलासोदर[5]सोदरः ॥”

अथ पुंलिङ्गिशब्दाः--

श्रीकृष्णो [7]रामकामौ च श्रीशवैकुण्ठकेशवाः ।
पीताम्बरश्च [8]गोविन्दः पद्मनाभो गदाधरः ॥
[9]स्तम्भकुम्भक्रमा दम्भो नटखेटघटादयः ॥२॥

पा.टि.

(१) म) ‘देशरुप्याभ’ (२) भु 3) ‘शम्भुयुत:सहृद्’ म) शंखसुहृत्तमः’
(३) भु 1.भु 2) ‘विषाभ-’ म) ‘विषारि-’ (४) भु 1.भु 2 भु 3) -‘स्तेजसोराशिः’
(५) भु 3) ‘सोदरः’ इत्यस्मात् परम् ‘अथ’ इत्यस्मात् पूर्वं च -
‘अत्र ‘तेजसोराशिः’ इति विशेष्यं शेषाणि विशेषणानि ॥” इत्यधिकमस्ति ।
(६) भु 2) ‘‘शब्दानाह’ (७) भु 2) ‘रामसमौ च’ म) ‘रामगोविन्द’
(८) म) ‘राधेशः (९) भु 3) स्तम्भः कुम्भः कुचो

टि.

☆ देवे. कवि./ पृ. 2. ● अत्र छन्दोभंग इव लक्ष्यते ।

तथा च कविकल्पलतायाम्—✩

हाराहारविहारसारसमराः संभोगभोगस्वराः[१०]
संहारामरवारवा- रणगणालंकार- भाराकराः ।
लोकोल्लोल[११]विलासवायसहरा हंसालिहीराङ्कुराः[१२] [१३]
नीहारोरगरागतालतरला गोविन्दकन्दोदराः ॥३॥

अथ स्त्रीलिङ्गाः—[१४]

राधा-मेधा-रमा-रामा-कमला-कोमलाधराः ।
अम्बाम्बिकेन्दिराऽपर्णा[१५] शिवा च सर्वमंगला ॥
महिला-कोपना-कान्ता-वनिता-नवमालिकाः । [१६]
चपला-चञ्चला-श्यामा-वामाद्यास्ता समाः स्मृताः ॥४॥

पा.टि.

---

(१०) म) 'भोगाम्बराः'

(११) भु1 भु2) 'लोलोल्लोल-' भु4) लोलोल्लल-'

(१२) भु2) 'हंसो निहारांकुराः' ।

(१३) भु3) 'कन्दरोदराः' इत्यस्मात् परम् 'अथ स्त्रीलिङ्गाः इत्यस्मात् पूर्वं च- 'तरलो हारमध्यमणिः । चञ्चलवाची तु विशेषनिघ्नात् ।' इति अधिकं दृश्यते ।

(१४) म) 'रसा'

(१५) भु2. भु4.) 'पूर्णा'

(१६) भु3) 'समाः स्मृताः' इत्यस्मात् परं 'यथा च' इत्यस्मात् पूर्वं च अत्र कोमला धरेत्येकं पदं स्त्रीनाम । कोपना पदमपि कोपवत्याः स्त्रिया नाम । सामान्येन कोप युक्तपरत्वे तु विशेष्यनिघ्नमेव । चपला-चञ्चले विद्युत्पर्यायौ । एवं श्यामा यौवनमध्यस्था स्त्री । श्यामगुणवाचित्वे पुमान् । तद्द्वद् वाचित्वे तु विशेष्यलिङ्गमेव इति विवेकः ।'' इति अधिकं दृश्यते ।

टि.

✩ देवे.कवि / पृ.9 .

तथा च कविकल्पलतायाम् – ☆ १७

“हेला-खेला-कला-माला-रसाला-काहलाचला: ।
कालानीलाबला- बाला- लीला- दोला- लसामसा:[१८] ॥”५॥

अथ नपुंसकलिङ्गाः –

पुष्पं किसलयं मूलं प्रसूनं कुसुमं फलम्[१९] ।
कृत्रिमं काननं कुन्दं कमलं[२०] भवनालयम्[२१] (?) ॥६॥

तथा च कविकल्पलतायाम् – ☆

“जलपदफलमूलं वारिकीलालदूरं
वनपललदुकूलं लिङ्गगम्भीरकूलम् ।
सलिलकमलनीरं तुच्छ(त्थ?)राजिवचीरं २२
हलरजतकुटीरं दारु माल्यं पटीरम् ॥”७॥

एवमन्यज्ज्ञेयम् ।

पा.टि.

(१७) भु 1) ‘माला’ इत्यस्मात् परः ‘चला:’ इत्यस्मात् पूर्वञ्च ग्रन्थभागः कीटदष्टः । (१८) भु 3) ‘मसा:’ इत्यस्मात्परम् ‘अथ’ इत्यस्मात्पूर्वं च-“रसाला दधिविकारविशेषः, काला कालगुणे औषधौ प्राणिनि च ।नीला अन्यस्तु वाच्यलिङ्गः ।बलाप्योषधिविशेषः बाला स्त्रीपर्यायः ।बाल्यवत् परत्वे तु भेद्यलिङ्गाः ।लसामसे अन्वेषणीयार्थके ।’ अधिकं दृश्यते ।(१९ म) ‘पलम्’ ।(२०) भु 2 म) ‘कामलं’ ।(२१) भु 3) ‘भवनालयम्’ इत्यस्मात्परं ‘तथा च’ इत्यस्मात्पूर्वं च– कृत्रिममित्यत्र क....तामिति प्रतिभाति । तच्च..ता जाति विशेषः ।आलयशब्दस्य पुंस्त्वादत्र पाठश्चिन्त्यः ।” अधिक दृश्यते । (२२) भु 3) ‘पटीरम्’ इत्यस्मात् परम् ‘एवमन्यज् ज्ञेयम्’ इत्यस्मात् पूर्वं च अत्र दूरपदं गुणपरं, गुणिपरत्वे तु विशेष्यलिङ्गम् ।गम्भीरपदस्यात्र पाठश्चिन्त्यः, तस्य विशेष्यनिघ्नत्वात् । गाम्भीर्यपरं वा गम्भीरपदम् । तुच्छमित्यत्र तुत्थमिति पाठः प्रतिभाति । तुच्छपदस्य शून्यवाचिनः सर्वलिङ्गत्वात् ।तुत्थमिति पाठे तु तुत्थं रसाञ्जनम् ।इति अधिकं दृश्यते ।

टि.

☆ देवे.कवि./ पृ. 10

अथ निरोष्ठ्यशब्दाः – तत्र पुलिङ्गाः–

२३
नगरनखरसाला नागरो नन्दनश्च
सरसकलशहासाः शालकः शालकाण्डौ ।
करककरुणरुद्रा नायकः कंसकान्तौ २४
२५ जलदघनकराला नूतनश्चन्द्रहासः ॥८॥

तथा च कविकल्पलतायाम्–✫

नीहारहारहरिणांकहरार्यहास-
२६ कैलासकाशरदनारदसिंहसंख्याः (संघाः ?) ।
शेषाहिहंसघनसारहलीन्द्रनागा- २७
हिण्डीरनिर्झरशरद्घनचन्द्रकाख्याः (कान्ताः ?) ॥९"

अथ स्त्रीलिङ्गाः–

कालिका- करका-केका-राधिका-ललनांगनाः
गणिका-यूथिकालङ्काः शङ्कातङ्कासुदक्षिणाः ॥१०॥

पा.टि.

---

(२३) भु3) नागरोलम्बवाजाः म4) नागरो नन्दनाजी म) 'नागरो नन्दनादि'

(२४) भु 3) 'चन्द्रहासः' इत्यस्मात् परं 'तथा च 'इत्यस्मात् पूर्वं च-अत्र रसाल श्चूततरुः, वाजः पक्षः,......न्नं च...... सरसकलशहास शालका इत्यत्र रसशब्दसहिताश्च ते कलशहासशालकाश्चेति कर्मधारयः । शालकः पत्नीभ्राता । करुणो वृक्षविशेषो रसविशोषश्च । नायको हारमध्यमणिः । कंसस्तुलादण्डाग्रलम्बी पात्रविशेषः दैत्यश्च .। कान्तो लोह विशेषः । करालो वज्रलेप इति प्रतिभाति । करालो दन्तुरे तुङ्गेत्याद्यमरोक्तस्तु, भीषणे विशेषनिघ्नः । नूतन इति पाठोऽन्वर्थकः ।'' इति अधिकं दृश्यते ।

(२५) भु3) 'तथा च' इत्यतः परं 'प्रातःकाल'(पृ276) इत्येतत् यावत् ग्रन्थपातः ।

(२६) म) 'शेषाहिओघ'

(२७) भु2 भु4) 'चन्द्रिकाख्याः' ।

टि.

✫ देवे. कवि. /पृ. ११

तथा च कविकल्पलतायाम्—☆

गङ्गा-गीता-सती-सीता-सिद्धि-सिद्धा-गदा-गया: ।
आशी:काशी-निशा- नासाकान्तिशान्तिरजस्वला: ॥११॥
कन्दरा-धारणा-धारा[२८]-कारा-तारा-जरा-धरा[२९]: ।
नारी-झरी-दरी[३०]-दासी-खटका-जटिला[३१]-जटा: ॥१२॥

अथ नपुंसकलिङ्गाः—

केयूरं कङ्कणं रत्नं कुण्डलं रजतं रज: ।
गहनं काननं गात्रं नयनं सुन्दरं दलम् ॥१३॥

तथा च कविकल्पलतायाम्—☆☆

"करणचरणचक्रं क्षेत्रनक्षत्रतक्रं
रजतशतशरीरं क्षीरनीराक्षितीरम् ।
धनकनकनिदानं[३२] ध्यान[३३]सन्धानदानं
नलिनगरलपात्रं[३४] शिक्य[३५]नेत्रास्थिगात्रम् ॥१४॥

एवमन्यज्ज्ञेयम् ।

अथानुलोमप्रतिलोमशब्दा:—

नयनं नर्तनं चैव कनकं कटकंतथा[३६] ।
कारिका कालिका चाथ कण्टकं कतकस्तथा[३७] ॥१५॥

पा.टि.

(२८) भु2 भु2) 'धीरा'
(२९) भु2 भु4) 'ध्वरा'
(३०) भु4) 'हरी'
(३१) म) 'जटिका'
(३२) म) '-निधानं'
(३३) म) 'ध्वान-'
(३४) भु4 म) '-गात्रम्'
(३५) भु2 भु4) 'शिल्य'
(३६) भु3 भु4) 'कटुकस्तथा'
(३७) भु4 'केतकं'

टि.

☆ देवे.कवि./ पृ.11

☆ देवे. कवि./ पृ.12

काञ्चिका करकश्चैव सरसः सहसोऽपि च ।
महिमो मध्यमश्चैव कटको नलिनादयः ॥१६॥

अथ निरोष्ठ्यक्रिया:–

३८
यात्यत्ति हन्ति जागर्ति करोत्यस्ति शृणोति च ।
तथा निन्दन्ति गच्छन्ति खण्डयन्ति हसन्त्यपि ॥१७॥

तथा च कविकल्पलतायाम्–☆ ३९

''आस्ते शास्ति चकास्ति निन्दति सृजत्याशंकते क्रीडति
४०
ध्यायत्यर्चति याचतेऽटति हरत्याराध्यति त्रस्यति ।
शेते ग्रथति यच्छतीच्छति नयत्यायाति हन्ती हते-
४१
ऽश्नाति स्नाति ददाति याति जयतीत्याद्याः क्रियाश्चिन्तयेत् ॥''१८॥

अथ पादपूरणोपयोगिनः सामान्यशब्दानाह-कविकल्पलतायाम्–

४२ ४३ ४४
● ''श्रीर्भो हे हि तु सन् नि प्र वि द्राग् आ सु नु सं वत् वा ॥''१९॥

पाटि.

(३८) भु2 भू2) 'जात्यन्ति'
(३९) भु4 . म) 'नन्दति'
(४०) भु1 . भु2) 'याचतेऽचिति'
(४१) भु.2 . भु4) 'स्नान्ति'
(४२) भु1) 'नि सन् नि' भु2 म) 'तु नु सन् नि'
(४३) म) तिं प्रागासु' भु1 भु2) (४४) भु1 भु2 म) 'सम्यक प्रविद्रागाद्यु यथा ।

टि.

☆ देवे. कवि./ पृ १२.

● तत्रैव पृ.4 .

उदाहरणं तत्रैव—✫

"श्रीकृष्ण भो केशव हे हरे तु
निष्पातितारे सुमतिं प्रयच्छ ।
निकाममासेव्य विभासि नु त्वं
सद्योगिनां चेतसि संगतो हि ॥"

इति श्रीमत्खिमुण्डिमहाराज्येश्वर- गङ्गवंशादतंस- वीरश्रीगजपति- जगन्नाथनारायणदेवमहाराज- विद्वत्सभाराजित-प्रबन्धकविताप्रकाशक-करणकुलसम्भव- कविभिषग्वर- वासुदेवपात्रतनय-**श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ**[४५] **इवार्थादिशब्दनिरूपणं नाम षोडशः किरणः ।**

पा.टि.

(४५) भु4 'पञ्चदश;'

टि.

✫ तत्रैव / पृ.4 .

❑ ❑ ❑

[सप्तदश: किरण:]

महाकाव्यादिप्रबन्धेषु यानि वर्ण्यान्युचितानि तान्येव पद्यद्वये उक्तानि ।

[१]पुरं राजा देवी सगुणयुवराजश्च सचिवः
पुरोधाः सद्गर्भोदय उदय पुत्रादिजननम्[२] ।
सभोद्यानं सिन्धुर्गिरिवननदीदूतसरसी-
प्रायाणाः सेना[३]श्वाश्रमपतगनागाश्च वनिता ॥१॥
प्रातः कालरवीन्दुरात्रिवदनं कीलालखेला रतं
पुष्पस्यावचयः स्वयंवरसुरापानं विवाहोत्सवः ।
ग्रामाखेटकदेशयुद्धविरहा मन्त्रो रथः[४] षड्ऋतुः
पुत्रादेश्च शिशुत्वयौवनकला वर्ण्या इमाः[५] कोविदैः[६]॥२॥

पा.टि.

(१) भु4 म) 'पुरी' (२) म) 'पुत्रादिजनक:' (३) भु4 'सेनान्याश्रम'
(४) भु3) 'रथश्चर्त्तव:'
(५) भु1 भु2 भु4 म 'इमे'
(६) भु3) 'कोविदै:' इत्यस्मात् परं 'वर्ण्यानाम् (पृ 277) इत्यस्मात् पूर्वं च –

"'प्रात:कालरवीन्दु सहितं रात्रिवदनमिति शाकपार्थिवादिसमासः । पूर्वत्र समाहारद्वन्द्वो वा । रात्रिवदनं रजनीमुखं प्रदोषकाल इत्यर्थ: । एवमन्यत्रापि । ईदृशस्थले समासद्वैविध्यं द्रष्टव्यम् । कीलालखेला जलकेलिः । पुष्पस्यावचय: यथा कथंचिदादानं, न तु हस्तादानम् । तथा सति हस्तादाने चेरस्तेये इति घञि चाय इति स्यात् । आखेटको मृगया । मन्त्रो विचार: । कला विलास: । इमा इत्यस्य यद्यपि पुंस्त्रीनपंसकानां विशेषणत्वान्नपुंसक मनपुंसकेनेत्यादिना नपुंसकत्वं प्राप्नोति तथापि त्यदादीनां संनिहित परामर्शित्वनियमात् कला सन्निधानप्रयुक्तं स्त्रीत्वमेव साधु इति ।" इति अधिकं दृश्यते ।'

[८]वर्ण्यानां तत्पुरादीनां न्यूनतायामपि क्वचित् ।
न महाकाव्यताभङ्ग [९]इति प्रोक्तं कवीश्वरैः ।।३।।

यथा - कुमारसम्भवादि ।

तत्र पुरे वर्ण्यानि–

सौधो निर्मलचित्ररत्नरचितप्रोद्यद्गृहाणां ततिः
[१०]प्रासादो ध्वजतोरणाश्रमगणाः क्षौमं प्रतोली प्रपा ।
हट्टः पण्यविलासिनी च परिखाप्राकारसाध्वीत्वरी-
वाप्यारामसरोवरादिवनिता [११]वर्ण्याः पुरे [१२]गोपुरम् ।।४।।

अथ राज्ञि वर्ण्यानि –

वर्ण्याः कीर्तियशः[१३]प्रतापकरुणागम्भीरतावीरता
उद्योगः खलहिंस्रताचतुरताधर्मक्षमाचारुताः ।
शास्त्राभ्यासरणप्रयाण[१४]महिमौदार्यप्रजारागिता
[१५]आर्यैश्वर्यविवेकधैर्यसुनयाः शस्त्रादिविद्या [१६]नृपे ।।५।।

पा.टि.

---

(८) भु4 म) 'वर्ण्यानाम्' इत्यादिकारिकायाः स्थाने' 'वर्ण्यानामेतेषां पुरादीनां न्यूनतायामपि चेत् तन्महाकाव्यस्य भङ्गत्वं न स्यात्' (९) भु1 भु2) 'इत्युच्यन्ते

(१०) भु4) 'प्रासाद्ये' (११) भु3 'वर्ण्यानि पुर्द्वाः पुरि' भु4) 'वर्ण्यानि पुर्द्वा पुरि'

(१२) भु3) 'गोपुरम्' इत्यस्मात् परम् 'अथ' इत्यस्मात् पूर्वं च–

'तोरणं पुरबहिर्द्वारम् । प्रतोली रथ्या राजमार्ग इति यावत् । प्रपा पानीयशाला । पण्यविलासिनी वेश्या । पुर्द्वाः पुरद्वारम् । पुरि पुर्य्याम् । वर्णितानीति स्त्रीपुंनपुंसकानाम् एकविशेषेण विशेषणं । 'नपुंसकमनपुंसकेनेत्यादिनै'कशेषः ।(पा.अष्टा१/२/६९)'' इति ।

(१३) भु1 भु2 भु4) 'प्रतापसुदया' (१४) भु1 भु2 भु4 म) 'महदौदार्य-'

(१५) म) 'आजौ' (१६) भु3) 'नृपे' इत्यस्यात् परं 'ग्रन्थान्तरे' इत्यस्मात् पूर्वं च-
आर्यपदं भावप्रधानमार्यत्वमित्यर्थः । तच्च सकललोकपूज्यत्वम्' इति अधिकं दृश्यते ।

ग्रन्थान्तरे–

"पात्रे त्यागी गुणे रागी भोगी परिजनैः सह।
भावे बोद्धा रणे योद्धा प्रभोः पञ्चगुणाः स्मृताः ॥"६॥

कविकल्पलतायाम्–✩

"रिपुभिर्विरहो नित्यं शैलावासोऽपि वर्ण्यते।
१७ ऐश्वर्यं रिपुशैलादिवासोऽरिपुरशून्यता ॥"७॥

अथ राजमहिष्यां वर्णनीयानि–

देव्यां वर्ण्याः[१८] शीलमानव्रताद्याः[१९]
प्रेमव्रीडाकामसौभाग्यभावाः।
सच्छृङ्गारो बुद्धि[२०]लावण्यविद्या
२३ गाम्भीर्याढ्यौदार्य[२१]चातुर्यकाणि[२२] ॥८॥

अथ तस्याः प्रत्यंगवर्णने क्रमः -- कविकल्पलतायाम्–

"वेणी-धम्मिल्ल- सीमन्त-भाल-श्रवण-नासिकम्।
कपोलाधर- नेत्र- भ्रू- कटाक्ष- रद- भाषणम् ॥९॥

पाटि.

(१७) भु2 भु4 म) 'अथ राजमहिष्यां वर्णनीयानि' इति नास्ति। (१८) भु3). 'वर्ण्यं' (१९) भु1 भु2 'व्रतादि' (२०) भु4) 'वृद्धि' (२१) भु2 भु4) 'र्याश्चौदार्य' म) 'र्यौदार्य (२२) भु1 भु2) 'चातुर्यकं च' भु3) 'चातुर्यके च' भु3) 'चातुर्यकाणि' इत्यस्मात् परम् 'अथ' इत्यस्मात् पूर्वं च-"वर्ण्यमिति नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति स्त्रीपुंनपुंसकानां विशेषणस्य वैकल्पिकएकीभावो नपुंसकत्वं च ज्ञेयम्। मानः प्रेयसीर्ष्याकृतः कोपः। औदार्यं दातृता महत्त्वैववा।" इति अधिकं दृश्यते

(२३) भु1 भु2 भु4 म) 'अथ तस्याः प्रत्यङ्गवर्णने क्रमः' इति नास्ति।

टि.

✩ कविकल्पलतायां नोपलभ्यते। द्र.: देवे. कवि./ पृ.१३.

☆ ''रोमालि- श्रोणि- जङ्घोरु- नाभिपद्म- वलित्रयम् ।
२४
गण्ड- बाहु- करोरोज- गतिक्रम- नखं क्रमात् ॥''१०॥

२५

अथ राजपुत्रे वर्ण्यानि–

राज्ञः पुत्रे शस्त्रशास्त्रादिविद्याः
सत्सौन्दर्यं स्त्रीकलाश्रीगुणाढ्यं ।
२६
धैर्यौदार्यं वर्णनीयं बलानि २७
सत्सङ्गित्वं राजभक्तिर्विशेषा ॥११॥

पा.टि...

(२४) भु3) 'क्रमात्' इत्यस्मात् परम् 'अथ' इत्यस्मात् पूर्वं च – कपोलादि रदान्तप्राण्यङ्गाद्यर्थैकवद्भावः क्लीवत्वं च । तत्सहितं भाषणमिति शाकपार्थिवादिः । तथा रोमालिश्रोणिजङ्घोर्वित्येकपदम्, आलेः प्राण्यङ्गत्वं रोमाभिन्नत्वात् । नाभिपद्ममिति च्छेदः । तथा गण्डाद्युरोजान्तानां पूर्ववद् द्वन्द्वः । गतिक्रमश्च नखाश्चेति विग्रहे गतिक्रमनखाः, पूर्वपरयोर्द्वन्द्वयोः पुनर्द्वन्द्वः । सर्वो द्वन्द्वो विभाषैक.....इति इत्येकविभावे नपुंसकत्वम् गण्डबाहुकरोरोजगतिक्रमनखमिति विवेकः । गतिक्रमो गतिप्रकारः । वर्ण्यमिति शेषः । इति अधिकं दृश्यते

(२५) भु1 भु2 भु4 म) 'अथ राजपुत्रे वर्ण्यानि' इति नास्ति ।

(२६) भु3) 'धैर्यौदार्ये' भु3) र्विशेषा' इत्यस्मात् परम् 'अथ' इत्यस्मात् पूर्वं च- ''स्त्रीशब्दस्य स्त्रीणामनुरागीत्यर्थः । कला भरतशास्त्रप्रसिद्धाश्चतुषष्टिः कलाः, कवित्वसंगीतसाहित्यचित्रलेखनप्रभृतयः । श्रीः सम्पत्तिः । स्पृहणीयधर्माः सौभाग्यादयः । बलानीति पराक्रमोत्साहदेहबलानि विवक्षितानि । विशेषे'ति राजभक्तिविशेषाणां विशिष्यत इति विशेषा, 'कर्मणि घञ्' । अत्रैव विशेषलिङ्गता ।'' इति अधिकं दृश्यते ।

टि. ___

☆ देवे कवि./ पृ.13 .

अथ मन्त्रिषु गुणाः–

मन्त्री शूरो नृपतिविषये भक्तिचित्तः क्षमाढ्योः [२८]
राजाज्ञादिप्रचुरचतुरोऽनुद्धतो भक्तियुक्तः ।
वाग्मी ज्ञानी धृतिबलयुतो नीतिमार्गानुसारी
कार्यासक्तः सुगणमतिमान्[२९] वर्णनीयः सुधीभिः[३०]॥१२॥

किं च –

मन्त्राङ्गोचितभाविकार्यनिपुणो लोकानुरागी महान्
राजान्तःकरणानुरागसुदयाभावाभिलाषी मुहुः ।
पात्रापात्रविचारगूढहृदयः कार्येषु दृष्टिप्रदः [३१]
सभ्यानां प्रचुरेंगितोक्तिकुतुकी मन्त्री सदा राजते ॥१३॥

कविकल्पलतायाम् –☆

[मन्त्री भक्तः शुचिः शूरोऽनुद्धतो बुद्धिमान् क्षमी ।]
व्यवहारादिकुशलः परिच्छेदी स्वदेशजः ॥१४॥

पा.टि. ....

(२८) भु3 भु4) 'वुद्धि युक्तः' (२९) म) 'त्रिगुणमतिमान्'

(३०) भु3) 'सुधीभिः' इत्यस्मात् परं 'किं च' इत्यस्मात् पूर्वं च ''भक्तियुक्तो देवेषु भक्तिमान् । ज्ञानी शास्त्रेषु ज्ञानवान् । धृतिर्विपत्सु धैर्यम् । बलमङ्गबलम् । सुगणश्चासौ मतिमांश्चेति कर्मधारयः । मतिमान् कार्याकार्यनिश्चयवान् ।'' इति अधिकं दृश्यते ।

(३१) भु3) 'राजते' इत्यस्मात् परं 'कविकल्पलतायाम्' इत्यस्मात् पूर्वं च–

''राज्ञोऽन्तःकरणं चानुरागश्च सुदया च भाव आशयश्च तानभिलषितुं शीलमस्येति । तथा अन्तःकरणशब्देनान्तःकरणविश्वासो लक्ष्यते । सभ्यानां प्रचुराः प्रभूता या इङ्गितव्यञ्जका उक्तयस्तासु कुतुकी । 'इङ्गितं हृद्गतो भावो बहिराकार आकृति' रिति कोषः । तत्र च बहिर्गतो भाव इत्यन्वयः ।'' इत्यधिकं दृश्यते ।

टि.

☆ तत्रैव/ पृ.13 मातृकासु पूर्वार्धं न दृश्यते । कविकल्पतानुरोधेन पूर्वार्धमत्र संयोजितमास्ते ।

हितोपदेशे –☆

''स्वदेशजं कुलाचारं विशुद्धमुपधाशुचिम् ।
शास्त्रज्ञमव्यसनिनं व्यभिचारविवर्जितम् ॥१५॥
नीतिशास्त्रेषु कुशलं मौनं ख्यातं[३२] विपश्चितम् ।
अर्थस्योत्पादकं सम्यग्[३३]विदध्यान्मन्त्रिणं[३४] नृपः'' ॥१६॥

अथ पुरोहितगुणाः –

धार्मिकः प्रियवादी च वर्णनीयः पुरोहितः ।
स्मृतिज्ञो वेदशास्त्रज्ञो नृपतेश्चित्तरञ्जकः ॥१७॥
सत्यवाङ् निर्मलाचारो ब्राह्मण्यः सर्वदा शुचिः ।
दयापरो देवहितः[३५] सुशीलः सद्गुणाढ्यकः[३६] ॥१८॥

ग्रन्थान्तरे –

''वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः ।
आशीर्वादपरो नित्यमेष राज्ञः पुरोहितः ॥''१९॥

पा.टि.……………………………………………………………………

(३२) भु4) 'ख्याति' (३३) म) 'सौम्यं विदध्यान्मंत्रिणं'

(३४) भु 3) 'नृपः' इत्यस्मात् परम् अथ' इत्यस्मात् पूर्वं च– ''कुलाचारं स्वकुलानुष्ठानतत्परम् । विशुद्धं धार्मिकम् । उपधायां धर्मशास्त्रोक्तवह्निदिव्यादिना परीक्षायां शुचिं शुचित्वेन निश्चितम् । शास्त्रज्ञम् आन्विक्षिक्यादिशास्त्रेषु विज्ञानवन्तम् । नीतिशास्त्रेषु कामन्दकीयादिषु कुशलम् । मौनं मौनव्रतम् । परवृत्तान्तकालेऽपि वाग्यमनवन्तमित्यर्थः मौलमिति पाठे मूलदुर्गस्थितं नित्यसन्निहितमित्यर्थः । अर्थस्य राजवित्तस्योत्पादकं सम्यग् धर्मेणेत्यर्थः ।'' इति अधिकं दृश्यते ।

(३५) म) 'विज्ञहितः । (३६) भु2) सद्गुणात्मकः

भु3) 'सद्गुणाढ्यकः' इत्यस्मात् परं 'ग्रन्थातरे' इत्यस्मात् पूर्वं च ब्राह्मण्यो ब्राह्मणेभ्यो हितः । ईदृशः पुरोहितः काव्येषु वर्णनीय इत्यन्वयः ।'' इति अधिकं दृश्यते ।

टि.

☆ नारा. हितो.III/16-17

३७

अथ गर्भिणीधर्माः– ३८

गर्भोदये पाण्डुमुखं च वर्ण्यं नाभेः पृथुत्वं मृदुभाषणं च ।
सुनीलता पीनकुचोर्ध्वभागे पुष्टा कटी भूषणशून्यता च ॥१०॥

३९

क्षामा तनू लीनवलित्रयं च
रतौ विरागो मलिनाङ्गयष्टिः ।
४०
असह्यमत्यन्तवचो विलासेऽ- ४१ ☆
प्यरोचकत्वादि च वर्णनीयम् ॥२१॥

[अथ पुत्रादिजनने वर्णनीयानि–] ४२

पुत्रादीनां जननसमये चञ्चलत्वं पुरस्य
पित्रादीनां प्रमुदितमनो वर्णनीया रसोक्तिः ।
४३
नानोद्धर्षो बहुवितरणं सूतकर्मादियुक्तो
४४
भेर्यादीनां तरलितरवो वारवामासु नाट्यम् ॥२२॥

पा.टि.

(३७) भु1 भु2 भु4 म) 'अथ गर्भिणीधर्माः' इति नास्ति ।(३८) भु1 भु2) 'नाभिपृथुत्वं' (३९) भु3) ''क्षामाङ्गयष्टिस्त्रिवलिर्विलीना'' (४०) भु1 भु2 म) 'विलासैररौच' (४१) भु3) 'वर्णनीयम्' इत्यस्मात् परम् 'अस्य किरणास्यान्तं यावद्' ग्रन्थपातः ।
(४२) भु4 .म) 'पुराणां' (४३) भु4 म) 'लोकोद्धर्षो'
(४४) भु4 .म) 'वारवामादि'

टि.

☆ भु3) मातृकायाः 80 तमः पत्रमत्र समाप्तिं भजते । ततः परं 81,82,83,84 इति पत्रचतुष्टयं परिभ्रष्टम् ।

४५
दिशां प्रसन्नः(प्रसादं?)सुरपूजनं च
४६
जन्मादिकर्माण्यपि वर्णयेच्च ।
प्रसूतिकामण्डितबालशय्यां
४७
सत्सूतिकामन्दिरमावृतं च ॥२३॥

[अथ सभायां वर्णनीयानि—]

४८
वर्ण्या सभायां नृपतेः स्थितिश्च
४९
नानामणिव्याप्तविचित्रभित्तिः ।
अष्टावधानी गणिकादिलास्यं
गुणैर्नियुक्ताः सचिवादयश्च ॥२४॥
नीतिर्विदग्धाः कवयश्च वर्ण्या
५०
विदूषको गायकपण्डितौ च ।
५१ ५२
शास्त्रादिपाठश्च कवित्वगीति-
र्विदग्धवाक्यानि गुणाढ्यलेखा ॥२५॥

पा.टि.

(४५) म) 'दिशः प्रसन्नम्' (४६) भु4 .म) 'कर्माण्यपि च वर्णितव्यम्'
(४७) भु2) 'प्रसूतिका' (४८) भु2 . म) 'नृपतेःस्थितिः स्यान्' भु3) नृपतिस्थितिश्च
(४९) भु1 भु2) 'नानामणिमण्डितचित्रभित्तिः' (५०) भु4) 'गायकपण्डिताश्च'
(५१) भु1 भु2) 'व्याख्यान' म) '-पाठैक' (५२) भु1 भु2) 'कवित्वगान'-

पुराणश्रवणं[५३] चैव पुरावृत्तं सुखोदयम् ।
सभायां वर्णनीयं च वीणादेर्वादनं परम् ॥२६॥

कविकल्पलतायाम्–

''वादी च प्रतिवादी च प्राश्निकोऽथ सभापतिः ।
चत्वार्यङ्गानि तुङ्गानि सभायां संप्रचक्षते ॥''२७॥

ग्रन्थान्तरे–

सत्याचारसभा गुणोज्ज्वलसभा सद्धर्मकीर्तिः सभा
राजद्राजकुमारशोभितसभा राजप्रकान्तिः सभा ।
वेदालंकृतविप्रमण्डितसभा[५४] वेदान्तवेद्या[५५] सभा
सङ्गीतार्यसभा कवीश्वरसभा सामन्तमन्त्रा सभा ॥२८॥

[अथ उद्याने वर्णनीयानि–]

उद्याने कुसुमावृताः[५६] सुलतिकाः पान्थस्थितिः पादपाः
गुच्छाः पल्लवपुष्परेणुमुकुला वृष्टिर्मधूनां स्मृतिः[५७] ।
वर्ण्या गन्धनियुक्तपुष्परजसामुद्धूतता कोकिला
भृङ्गाणां मधुपायिता[५८] ध्वनियुजां[५९] हंसादयः पत्रिणः ॥२९॥

तत्रैव वर्ण्यः पवनः सुगन्धिः
क्रीडाचलः सत्सरसी सपुष्पा ।
यूनां गतिर्भाषणता विशेषा
देवालयः काञ्चनवेदिका च ॥३०॥

पा.टि.

---

(५३) भु1 भु2 म) 'श्रवणत्वञ्च'
(५४) भु3 म) '-पण्डितसभा'
(५५) भु1 भु2) 'वेदान्तविद्या सभा'
(५६) म) 'कुसुमादृता'
(५७) म) 'वरम्'
(५८) भु2 भु4 म) 'मधुपानता'
(५९) म) 'ध्वनियुता'

[अथ सिन्धौ वर्णनीयानि–]

यादोगणो द्वीपमहीध्रपोताः
सांयात्रिका नाव्यजलप्लवाश्च ।
वृद्धिर्नदीसङ्गमता च सिन्धौ
विष्णुः सुधामौक्तिकचन्द्ररत्नम् ॥३१॥

अथ शैले वर्णनीयानि –

शैले घनो धातुशिला च वंशा
उपत्यका कन्दरनिर्झराश्च ।
कूटौषधी कीचकरत्नपादा
विद्या धराणां सरसो विहारः ॥३२॥

अन्धकारविनाशश्च[६०] रत्नादेः प्रभया पुनः[६१]
सिंहादेर्गर्जनं[६२] चैव मृगादीनां च संस्थितिः ॥३३॥

संकीर्णाः फलपुष्पशोभितलता वृक्षाश्च वर्ण्या वने
मत्ता झंकृतियुक्तलोलमधुपा भृंगांगनाभिः सह ।
काकः कीरकपोतकोकिलगणा सारीमयूरादयः
सिंहो हस्तिवराहपन्नगमृगाः शार्दूलखड्गादयः[६३] ॥३४॥

[अथ नद्यां वर्णनीयानि –]

नद्यां सागरसङ्गमश्च सलिलोत्पत्तिर्गजादिस्तथा
वीचिस्रोतसुसैकतानि कमलादीनि प्रसूनानि च ।
भृङ्गाः पुष्परसैः प्रमोदहृदया गम्भीरता स्वच्छता
हंसाश्चक्रकुलादिपक्षिनिचयस्तीरद्रुमाः पुष्पिताः ॥३५॥

पा.टि...

(६०) भु2) 'विनाशं च' भु4 म) विनाशत्वं (६१) भु4 म) 'गिरौ'
(६२) भु4 म) संहादीनां ध्वनिर्वण्यो' (६३) भु1 भु4) 'खड्गादिनः'

[अथ दूते वर्णनीयानि–]

दूतो विदग्धो बलवान् प्रगल्भ-[६४]
स्तेजो[६५]विवक्ता सततं प्रभूणाम्[६६] ।
असाध्वसो[६७] धैर्यगुणानुरक्त-
श्रेष्ठो[६८] रिपुक्षोभंकरः[६९] प्रसिद्धः[७०] ।।३६।।

[अथ सरस्यां वर्णनीयानि –]

गम्भीरतो[७१]र्मी च बकाश्च हंसा-
श्चक्रादयः पक्षिगणाः सरस्याम् ।
इन्दीवरं कैरवपङ्कजानि
तीरे वनेभश्च[७२] सुपान्थकेलिः ।।३७।।

सोपानकं[७३] निर्मलता जलस्य
क्रीडा मणिभ्राजितमण्डपश्च ।
पुष्पानिलो[७४] मत्तमधुव्रताश्च
वर्ण्या इमे काव्यकरप्रधानैः ।।३८।।

पा.टि.

---

(६४) भु4) 'प्रगल्भी तेजो' (६५) भु1 भु2) 'ते भो विवक्ता' म) 'ते चेद् विविक्ताः'
(६६) भु1 मु2 प्रभोश्च म) 'प्रभूगाः' (६७) म) 'असाध्यसत्'
(६८) भु1 भु2) 'धैर्यगुणानुरक्तश्रेष्टा' (६९) भु1 भु2) 'रिपुक्षोभकरी'
(७०) भु1 भु2) 'च तत्र' (७१) म) 'गभीरतानी'
(७२) भु4 म) 'जलेभश्च' (७३) भु4 म) 'सोपानको'
(७४) भु4) 'पुष्पानिलो' इत्यस्मादारभ्य 'प्रधानैः' इत्यन्तं यावन्नोपलभ्यते ।

[अथ प्रयाणे वर्णनीयानि–] [७५]

भेरीतुर्यादिवाद्यप्रबलतररवा वर्णितव्याः प्रयाणे
[७६]छत्रोष्ट्रौ सैन्यसिन्धुर्गजतुरगचमूवन्दिनामुच्चरावाः ।
उष्ट्राणां पृष्ठदेशे [७७]प्रसरितपटहध्वान उत्तुंगवीरा
आशीर्वादो द्विजानां सुललितकुतुकं मंगलारोपणं च ॥३९॥
महीकम्पनं वाजिपादप्रचारै-
र्गजानां मदैः पंकयुक्ता धरित्री ।
वणिग्युक्तहट्टो बलीवर्दवृन्दा
रजोभिस्तमः सैन्यपादोत्थितैश्च ॥४०॥

[अथ सेनादौ वर्णनीयानि–]

सेनादौ स्वामिभक्तत्वं निर्भयत्वं सुचित्तता ।
शस्त्राभ्यासित्वमायासवर्जितत्वमुदारता ॥४१॥
[७८]विजयित्वं च संग्रामे शक्तत्वं वाहनेषु च ।
पालनत्वं च सैन्यानां धीरत्वं समरादिषु ॥४२॥

[अथ अश्वे वर्णनीया गुणाः –]

अश्वे तेजो बलित्वं च वेगित्वं जातिदर्शनम् ।
खुरोत्खातरजः कान्तिरौद्धत्यं धीरता स्थितिः ॥४३॥
विचित्रितानि चिह्नानि [७९]चोद्गतिः पञ्चधा गतिः ।
[८०]कविकादिमण्डनत्वं निर्भयत्वमचापलम् ॥४४॥

पा.टि.

---

(७५) भु1 भु2 भु4) 'प्रबलवररवा' (७६) भु1) 'छत्राढ्यौ' भु4) 'छात्राख्यै' म) 'छत्राट्टौ' (७७) भु2) 'पटहध्यान' (७८) म) 'वर्णनीयम्' (७९) भु1 भु2 भु4) 'चोन्नतिः' (८०) भु2) 'मण्डनं च'

८१
अथ घोटकानां जातिभेदादिनिरूप्यते——शालिहोत्रे –

श्वेतः शोणो हरित्कृष्णो मूलं वर्णचतुष्टयम् ।
शेषास्तु सङ्करा वर्णाः सर्वे ज्ञेयास्त्वनेकधा ॥४५॥
श्वेतः सत्ययुगे वाजी त्रेतायां शोणवर्णकः ।
८२
द्वापरे तु हरिद्वर्णः कलौ कृष्णः प्रशस्यते ॥४६॥
श्वेतवर्णो द्विजो वाजी शोणः क्षात्रः प्रकीर्तितः ।
८३
हरिद्वैश्यस्तथा ज्ञेयः कृष्णः शूद्रस्तु तादृशः ॥४७॥

८४
अन्यच्च –

श्रीमान् लाजाज्यगन्धी कचघनरूचिरः स्निग्धवर्णः सुशीलः
प्रज्ञावान् देवसत्त्वः प्रबलशफयुतो धावकः सद्गुणाढ्यः
८५ ८६
धीरो गंभीरभोगी सततसुरभितः पायसाहारलोलः
कान्तः कल्याणदेहः स भवति तुरगो ब्राह्मणस्त्यक्तरोषः॥४८॥
शूरस्तीक्ष्णो विनिहतभयः स्निग्धगम्भीरदेहः
शिश्नादीर्घोऽवयवसुभगः शक्रसत्त्वोऽभिमानी ।
शुद्धाचारः परिलघुगतिर्भद्रलक्ष्मीः सुगन्धि-
र्लध्वाहारो भवति तुरगः क्षत्रियो राजवाहः ॥४९॥

पाटि

(८१) भु4) वाजिहोत्रे'
(८२) भु1 म) 'द्वापरेहरिद्वर्णस्तु'
(८३) म) ज्ञेया: कृष्णा: शूद्रास्तु
(८४) भु2) 'आद्यं च'
(८५) भु4) 'गंभीरयोगी'
(८६) भु1 भु2) 'सततसुरतधी:'

क्षत्रप्रियः पिंगलनेत्रकान्ति-
वेंगी क्षुधायुक् च सदाभिमानी ।
धीरः शुचिर्मानविवर्धिताङ्गः[८७]
सौगन्धिरश्वः खलु वैश्यजातिः ॥५०॥
क्रूरेक्षणः क्रूरमना लघीयान्
क्षुद्रप्रहारः खलु मूत्रगन्धी ।
क्रोधी दुराराधनचित्तवृत्ति[८८]-
र्विमूढबुद्धिः खलु शूद्रजातिः[८९] ॥५१॥

अथ घोटकवयःक्रमः –

द्विवार्षिकः शिशुश्चाश्वः कुमारश्चतुराब्दिकः ।
ततो युवाष्टवर्षाणि वृद्धो वृद्धतरस्ततः ॥५२॥

अथाष्टमंगलहयः –

श्वेता अष्टौ तुरङ्गस्य यस्य पुच्छमुरः[९०] शिरः ।
मुखं पादाश्च विज्ञेयो राज्यलाभकरो हयः ॥५३॥

अथ पञ्चमंगलहयः –

मेढ्रमुष्कखुरपुच्छमूर्धसु
श्वेतको भवति पूजितो हयः ।
पाण्डुवर्णसहितं शुभावहं
चान्यवर्णमपि वाजिनं विदुः ॥५४॥

पा.टि.

(८७) म) विवर्जिताङ्गः' (८८) भु2) '-चिरवृत्ति'

(८९) म) 'शूद्रनाथः' (९०) म) -'पुच्छखुरः'

हयस्य यस्य ☆श्वेतानि (श्वेतत्वं?) समस्तचरणे मुखे ।
सोऽश्वो नन्दीमुखः ख्यातो धन्यः सर्वार्थसिद्धिदः ॥५५॥

[९१]शेषा जातिभेदा दोषादोषाश्च शालिहोत्रादिषु विज्ञेयाः ।

अथ घोटकानां सहजगुणानाह –

[९२]तेजो निसर्गजं सत्त्वं वाजिनां स्फुरणं रजः ।
क्रोधस्तम इति ज्ञेयास्त्रयोऽपि सहजा गुणाः ॥५६॥

तत्तेजः सन्ततोत्थितं भयोत्थितं चेति द्विविधम् ।

यथा भोजराजेनोक्तम् –

धारासु योजितानां यन्निसर्गात् प्रेरणं विना ।
अविच्छिन्नमिवाभाति तत्तेजो सन्ततोत्थितम् ॥५७॥
[९३]कशापार्ष्ण्यादिघातैर्यत् साध्वसस्फुरितं हि तत् ।

अत्र तेजःशव्देन तत्कार्यं वेगो लक्ष्यते ।

अथ घोटकानां दण्डप्रयोगकालः –

यथा भोजराजेनोक्तम् –

मृदुनैकेन घातेन [९४]दण्डकालेषु ताडयेत् ॥५८॥
[९५]तीक्ष्णं मध्ये पुनर्द्वाभ्यां [९६]जघन्यं निष्ठुरैस्त्रिभिः ।
उपवेशेऽथ निद्रायां स्खलिते मृदुचेष्टिते ॥५९॥
वडवालोकनौत्सुक्ये मुहुर्विततह्रेषिते ।
संत्रासे च तदुत्थाने विमार्गगमने भये ॥६०॥

पा.टि.

(९१) भु2) 'दोषादोषा जातिभेदाश्च'
(९२) म) तेजोऽतिसर्पजम्'
(९३) भु2 भु4) 'शिलापार्ष्ण्या-'
(९४) म) 'दण्डः कालेषु'
(९५) भु1 भु2 भु4) 'तीक्ष्ममध्यं'
(९६) म) 'जघने'

टि.

☆ 'श्वेतानि' इत्येतत्पदमग्रिमेण पदेन दूरन्वयं वर्तते ।अप्यत्र 'श्वेतानि' इत्यस्य स्थाने 'श्वेतत्वम्' इति स्यात् ?

शिक्षात्यागेऽप्यसमये संजाते विभ्रमे तथा ।
दण्डः प्रयोज्यो वाहानां कालेषु द्वादशस्वपि ॥६१॥
९७
ग्रीवायां भीतमाहन्यात् त्रस्तं चैव तु वाहनम् ।
९८
विभ्रान्तचित्तमधरे त्यक्तशिक्षं च ताडयेत् ॥६२॥
प्रह्रेषिते स्कन्धबाह्वोर्वडवालोकने तथा ।
उपवेशे च निद्रायां कटिदेशे च ताडयेत् ॥६३॥
९९
दुश्चेष्टितं मुखे हन्यादुन्मार्गप्रस्थितं तथा ।
जघने स्खलितं हन्यात् नेत्रमध्ये दुरुत्थितम् ॥६४॥
यः कुण्ठप्रकृतिर्वाजी तं सर्वत्रैव ताडयेत् ।

[अथ आश्रमे वर्णनीयाः —] १००

आश्रमे पर्णशालाश्च सौख्यं चातिथिपूजनम् ॥६५॥
तद्वेदाध्ययनं वर्ण्यं मुनीनां मोक्षदा सभा ।
समिधादिप्रयुक्तश्च यज्ञधूमः सुखप्रदः ॥६६॥
अश्वत्थः तुलसी धात्री प्रियको वटपादपः ।
खदिरश्च पलाशश्च दर्भकोदुम्बरौ तथा ॥६७॥
निर्भयत्वं च विश्वासो मृगाणां हिंस्रजन्तुषु ।
सद्धेनुः पुण्यनद्यादिर्देवानामर्चनादयः ॥६८॥

पा.टि.

(९७) भु4) 'त्रासं'

(९८) भु1 भु2 भु4) 'त्यक्तशिक्षां'

(९९) भु4) 'हन्यादु......स्खलितं' इति ग्रन्थभागो नोपलभ्यते ।

(१००) म) 'पर्णशालासु'

[अथ पदातौ वर्णनीया गुणाः –]

पदातौ शीघ्रगामित्वं वर्णनीयं बुधोत्तमैः ।
पुरो भागे च पार्श्वे च पश्चाद्रक्षणमुत्तमम्[१०१] ।।६९।।
सम्यक् शस्त्रप्रहारैश्च कुशलत्वं पराक्रमः ।
शत्रुपक्षाकर्षणं[१०२] च सहिष्णुत्वं श्रमादिभिः ।।७०।।
सन्धनादानमन्त्राणि शस्त्रवारणमौषधम् ।
फलकादिः शिरस्त्राणं गर्जनं कञ्चुकादयः ।।७१।।

अथ हस्ती[१०३] -

वारणे[१०४] गतिसाधुत्वं रणमन्थनत्रासनम्[१०५] ।।
मत्तता[१०६] गर्जनं वर्ण्यं गण्डस्थलगतिस्तथा[१०७] ।।७२।।
शुण्डशोभा तथा कर्णचापलत्वं च पद्मकम् ।।
अक्षिकूटं ललाटं च दन्तयोः तीक्ष्णता शुचिः ।।७३।।
कर्णमूलमपांगश्च योधित्वं निर्भयं पुनः ।।
अङ्कुशाधोरणायत्तं सच्चित्रकम्बलादयः ।।७४।।

पाटि

---

(१०१) भु4 म) 'पश्चाद्रक्षकमुत्तमम्' (१०२) भु1 भु2 भु4) 'शत्रुपक्षाकर्षणश्च'
(१०३) भु4 म) 'अथ हस्ती' इति नास्ति । (१०४) भु4) 'वारणेष्वतिसाधुत्वं'
(१०५) भु2) 'रणमन्थानतासनम्' म) 'रणमण्डलनीषणम्'
(१०६) भु4) 'मत्तता गर्जनं' इति नास्ति । (१०७) भु4) 'गती तथा'

कविकल्पलतायाम्—☆

गजे सहस्रयोधित्वमुच्चत्वं कर्णचापलम्
अरिव्यूहविभेदित्वं कुम्भमुक्तामदादयः ॥७५॥

१०८
अथ युवतिः—

नार्यां च यौवनावस्था लावण्यं वक्रदृष्टयः ।
१०९ ११०
प्रेमकामकलावर्ण्या मृदुत्वं हर्षचित्तता ॥७६॥
विद्यादिसहिता बुद्धिश्चातुरी रसभाषणम् ।
स्मितमन्दाक्षसौख्यानि कुलशीलगुणादयः ॥७७॥

इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायणदेवमहाराज- विद्वत्सभाराजित-प्रबन्धकविताप्रकाशक-करणकुलसम्भव-कविभिषग्वर- वासुदेवपात्रतनय- श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ
१११
काव्योचित (पुरादि) वर्णननिरूपणं नाम सप्तदशः किरणः ।

पा.टि.

(१०८) भु3 म) 'अथ युवतिः' इति नास्ति । (१०९) भु1 भु2) 'मृदुता'
(११०) भु1) 'मृदुचित्तता' (१११) भु4) 'षोडशः'

टि.

☆ देवे. कवि पृ.१५

* * *

[अष्टादशः किरणः]

अथ प्रातःकालादिश्लोके यदुक्तं तन्निरूप्यते –

[अथ प्रातःकालः –]

प्रभाते दीपपाण्डुत्वं[१] चन्द्रादीनां च तद्विधम्[२] ।
प्राच्याः कुङ्कुमवर्णत्वं कुक्कुटादेर्ध्वनिस्तथा ॥१॥

पवनस्य गतिः सूक्ष्मा निद्राभङ्गस्तथैव[३] च ।
ताम्बूलस्यैव तिक्तत्वं[४] हाराणामुष्णभावता[५] ॥२॥
उत्तुङ्गः शङ्खशब्दाद्या जनसंचारणादयः ।

अथ सूर्योदयः –

सूर्योदये वर्णनीयमन्धकारं[६] गुहास्थितम् ॥३॥

अरुणस्य प्रकाशश्च दिक्प्रभा[७] जनकर्म च ।

सन्तुष्टिश्चक्रयुग्मस्य[८] पद्मिनीनां विकासिता ॥४॥

पा.टि.

(१) भु3) 'पाण्डुत्वं प्राच्याः' म) 'दीपः पाण्डुत्वं' (२) भु3) 'तद्विधा'
(३) भु2) 'निद्राभंगत्वमेवच' (४) भु1 भु2) चाम्लत्वं' (५) भु3) '-मुष्णता तथा'
(६) भु4) 'गुहाटवीगतं तमः' (म) 'गुहामन्तर्गतं तमः'
(७) भु1 भु2) 'वक्त्राभा' (८) भु2 भु4) 'मिथुनं चक्रवाकस्य'

सूर्यकान्तस्य दीप्तत्वं पेचकानां [९]च गोपनम् ।
[१०]पान्थानां लोचनप्रीतिः किरणस्यैव चोष्णता ।।५।।
ताराचन्द्रप्रदीपानामौषधीनामकान्तयः ।
कुमुदानां कुड्मलत्वं कुलटा गति[११]वर्जिता ।।६।।

अथ चन्द्रोदयः –

चन्द्रोदये [१२]दिशो [१३]रम्यास्तमसां च विनाशिता ।
चकोराणां च [१४]हृष्टत्वं चन्द्रिकापानमेव च ।।७।।
द्रवत्वं चन्द्रकान्तस्य कैरवाणां [१५]विकासिता ।।८।।

कविकल्पलतायाम्–☆

चन्द्रे कुलटाचक्राम्बुजमानविरहितमोभिरौज्ज्वल्यम् ।
जलधिजलनेत्रकैरवचकोरचन्द्राश्मदम्पतीप्रीतिः ।।९।।

पा.टि.

---

(९) भु4 म) 'गुहास्थितिः' (१०) म) 'प्रजानाम्' (११) भु4 म) 'हीनता' भु3) 'वर्जिताः' इत्यस्मात्परम् 'अथ' इत्यस्मात्पूर्वं च- ''अन्धकारं गुहास्थितं वर्ण्यम् । पद्मिनीनां विकासिता पद्मविकासः । ओषधीनां नक्तं ज्वलन्तीनाम् । कुलटा संचारवर्जिता वर्ण्या ।'' इत्यधिकं दृश्यते ।

(१२) भु1) 'दिशां रम्यम्' (१३) भु4 म) 'रम्यास्तिमिराणां विनाशिता'

(१४) भु1 भु4 म) 'हर्षत्वम्' (१५) भु1 भु2 भु4 म) 'प्रकाशिता' भु3) 'विकासिता' इत्यस्मात् परं 'कवि-' इत्यस्मात् पूर्वं च- तमसां विनाशिता विनाशशीलत्वम्' इत्यधिकं दृश्यते ।

टि.

☆ देवे.कवि. पृ33

अथ सन्ध्या –

सन्ध्यायामतिरागित्वं दिङ्नभोमण्डलस्य च ।
श्यामत्वं[१६] च वनादीनां द्विजानामप्रचारता[१७] ॥१०॥
तमसामतिगाढत्वं ऋक्षाणां स्वच्छता तथा ।
वराहगजऋक्षाणामेकत्रस्थितिरेव च ॥११॥
कुलटानां गतिश्चैव तस्कराणां प्रचारता ।

अथ जलक्रीडा[१८]–

अपां केलौ[१९] वर्णितव्यं[२०] सखीसंदोहमेलनम्[२१] ॥१२॥
रसिको यौवनाढ्यश्च सुन्दरी रसिकांगना ।
चातुर्यवचनं शोणवर्णत्वं[२२] मुखनेत्रयो: ॥१३॥
अलकश्लथता तद्वदधरस्यैव[२३] पाण्डुता ।
पत्रलेखाङ्गरागाणामप्रकाशत्वमेव च ॥१४॥
स्तनादेर्दर्शनं चैव सूक्ष्मवस्त्रान्तरेऽद्भुतम् ।
सात्त्विकोद्गमहर्षे[२४] च प्लवनं च घटादिना ॥१५॥

पाटि.....

(१६) भु4 म) 'श्यामता वनशैलानाम्' ।

(१७) भु3) 'प्रचारता' इत्यस्मात् परम् 'अथ' इत्यस्मात्पूर्वं च –
"द्विजानां पक्षिणाम् । ऋक्षाणां नक्षत्राणाम् । वराहादीनामेकत्रावस्थिति:,तत्र च ऋक्षा: भल्लुका: ।" इत्यधिकं दृश्यते ।

(१८) भु4 म) अथ जलक्रीडा' इति नास्ति । (१९) भु1 भु2) 'आसां केलौ' भु4 म) अपां केलौ.......रसिकाङ्गना ।' इति कारिकाया: स्थाने

'वारिकेलौ वर्णितव्या सख्यो यौवनभूषणा: ।
रसज्ञानवती बाला रसिको गुणभूषण: ॥'

(२०) भु3 म) 'वर्णनीयम्' (२१) भु3) 'मेलता' (२२) भु4 म) 'शोणभावत्वम्' (२३) भु3) 'तद्वदधरस्यापि' (२४) भु1 भु2 भु4) 'हर्षत्वं संप्लवत्वं' ।

मत्स्यादिभयकम्पेन कान्तालिंगनमाशु च ॥
२५
विभूषणं सुखोत्कर्षं मृणालैः पद्मकेसरैः ॥१६॥

कविकल्पलतायाम्—✩

जलकेलौ सरः पक्षी(क्षोभः?) चक्रहंसापसर्पणम् ।
पद्मम्लानिपयोबिन्दू भूषणच्युतिरुच्यते ॥१७॥

अथ रतं कविकल्पलतायाम्—✩

सुरते सात्त्विका भावाः सीत्कारः कुड्मलाक्षिता ।
कांचीकंकणमंजीररवो रदनखक्षतम् ॥१८॥

अपरं च मम— २६ २७
चाटूक्तिश्चुम्बनाश्लेषौ चन्द्रस्थस्थान चालनम् ।

अथ पुष्पावचयः— २८
कुसुमावचये पुष्पं भृंगरावो मधुद्रवः ॥१९॥
२९
आलापः स्खलनं वाक्ये वक्रोक्तिः श्लेषभाषणम् ।

पा.टि.

---

(२५) भु 3) पद्मकेसरैः इत्यस्मात् परं 'कविकल्पलतायाम्' इत्यस्मात् पूर्वं च "वर्णितव्यमिति चौरादिकस्य णिचो वैभाषिकत्वात् णिचि तु वर्णयितव्यमिति स्यात् । एकवचन.......वत्वे पूर्व.....सात्त्विका....हर्षादय...घटादिनेत्यादिपदादुडुपाःसंग्राह्याः । कान्तस्यालिंगनं कान्तकर्तृकम् । मृणालैः पद्मकेसरैश्च विभूषणमित्यन्वयः ।" इति अधिकः कीटदष्टांशः दृश्यते ।

(२६) भु1)'श्लेषाः' भु4) श्लेषं । (२७) भु1 भु2 भु4 म) 'स्थानाच्चन्द्रस्य'
(२८) भु1 भु2 भु3) 'भृंग रागो' (२९) भु1 भु2 भु4 म) वाक्यं

टि.

✩ देवे.कवि./ पृ16

पुष्पाद्यवचयो हर्षैः संभ्रमेर्ष्यादयः पुनः[३०] ॥२०॥

अथ स्वयंवरः–

स्वयंवरे राजपुत्रीनृपागमनवर्णनम् ।
मंचमण्डपशय्याश्च[३१] प्रियालीभाषणं मुदा ॥२१॥
राजपुत्री[३२]नृपाकारा[३३]न्वयचेष्टादिवर्णनम् ।

अथ मधुपानम्–

विकलत्वं सुरापाने स्खलनं वचने गतौ ॥२२॥
लज्जामानच्युतिः प्रेमाधिक्यं रक्ताक्षता भ्रमः ।
पात्राद्युज्ज्वलतालापरसोक्तिश्चुम्बनादयः[३४] ॥२३॥

अथ विवाहः–

विवाहे जनसंमर्दः[३५] संभारो हर्षदायकः ।
रसैः कुंकुमखेलादिर्भोजनैर्जनहर्षिता ॥२४॥
परिहासवचः श्रेष्ठं पुरमण्डनवर्णनम्[३६] ।

पा.टि.

---

(३०) भु3) 'पुनः' इत्यस्मात् परम् 'अथ स्वयंवरः' इत्यस्मात् पूर्वं च- ''कुसुमावचये पुष्पलवनक्रीडायां सामान्यतः पुष्पादानं वर्ण्यमिति शेषः । हस्तेनादाने तु कुसमावचाय इति स्यात् । हस्तादाने 'चेरस्तेये' इति घञ्विधानात् ।'' इत्यधिकमस्ति ।

(३१) भु4 म) 'मंचमंडपशय्ये च'

(३२) म) 'राजपुत्र'

(३३) भु3) 'वर्णनम्' इत्यस्मात् परम् 'अथ मधुपानम्' इत्यस्मात् पूर्वं च- राजपुत्र्याः नृपाणां चागमनवर्णनम् । प्रियसख्याः भाषणम् । राजपुत्र्याः नृपाणां चाकारान्वयचेष्टादीनां वर्णनं, यद्वा राजपुत्र्यां नृपादीनामाकारादिवर्णनमित्यर्थः ।'' इत्यधिकमस्ति ।

(३४) भु3) 'श्चुम्बनादयः' इत्यस्मात् परम् 'अथ विवाहः' इत्यस्मात् पूर्वं च- 'विकलत्वं विह्वलत्वं मद इति यावत् । वचने गतौ च स्खलनम् ।'' इत्यधिकमस्ति ।

(३५) भु1 भु2 भु4 म) 'जनसलंग्नः' (३६) भु1 भु2 भु4) पुरमण्डनतादयः

कविकल्पलतायाम्–✿ ३७

विवाहे स्नानभूषादि विनीतेक्षणमङ्गलम् ॥२५॥
३८
वेदी संगीतभावेच्छा लाजा मङ्गलवर्तनम्।

अथ ग्रामः –

प्रजानां वसतिर्ग्रामे ग्राम्यस्त्री मुग्धविभ्रमा ॥२६॥
ग्रामाधिपश्च केदारहट्टधान्यलताद्रुमाः।
जलाशयाद्युपवनं पशवस्तुष्टमानसाः ॥२७॥

अथ मृगया –

३९
आखेटे घोटकादीनां संचारः शुनकादयः।
शशादनोच्चयानं च जालपाशादिवागुराः ॥२८॥
सिंहादेर्गतियुद्धं च नीलकंचुकधारणम्।
४०
निर्घोषः सैन्यढक्कानां मृगादीनां पलायनम् ॥२९॥
तेषां संत्रासनाशित्वं(नाशौ च?)व्याघ्रसिंहादिगर्जनम्।
४१
वनान्तेषु गतेर्दार्ढ्यं मृगान्वेषणता पुनः ॥३०॥

पा.टि.

---

(३७) भु4) 'विनीतेक्षणसंगता' (३८) भु2) 'देवी'
(३९) भु2) 'शुनकादयः' इत्यस्मात् परं 'मौनित्वम्' (पृ.301) इत्यस्मात् पूर्वं च- ग्रन्थपातः
(४०) म) 'सैन्यचक्राणाम्' (४१) भु4) 'गतिर्दार्ढ्यं'

टि.

✿ देवे कवि/ पृ.15 .

वनायननिरुद्धत्वं मृगाणां पदचिह्नवत्[४२] ।

अथ देशः –

देशे चोत्तमवित्तानि[४३] स्वर्णरत्नादिकं[४४] खनिः ॥३१
धान्यादिसंकुलो दुर्गो ग्रामाः स्वच्छोपशल्यकम्[४५] ।
पण्यद्रव्यादयो धान्यं नद्यादिर्गहनं गिरिः ॥३२॥
अम्बूनां[४६] सुखदा वृष्टिः नदीमातृकतादयः[४७] ।

अथ युद्धम् –

समरेषु बलाधिक्यं गजाश्वरथपत्तयः ॥३३॥
वीरतुर्यादिशब्दाश्च सैन्यकोलाहलस्वनः ।
वाहानां रजसासक्तं समरस्थलमावृतम्[४८] ॥३४॥
विकृतं मुखनेत्रादेः श्मश्रूत्फुल्लत्वमाशु च ।
परस्परज्ञता[४९] शत्रोः[५०] सैन्यसंवेष्टनं परम् ॥३५॥

पा.टि.

---

(४२) भु4 म) 'पादचिह्नता' । भु3) 'पादचिह्नवत्' इत्यस्मात् परम् 'अथ देशः' इत्यस्मात् पूर्वं च "शशादनः श्येनः, तस्य उच्चदेशपलायनम् । जालं स्वल्पजालं, वागुरा महाजालम् । सिंहादेर्गतियुद्धं गतौ गमने युद्धम् । मृगादीनां कालनाय सैन्यानां ढक्कानां च निर्घोषः । मृगान्वेषणता मृगान्वेषकत्वं कर्तरि ल्युटप्रत्ययान्तात्तल् । वनायननिरुद्धत्वं वने पशूनां ये मार्गास्तेषां निरोधः । पादचिह्नवदिति मार्गनिरूद्धत्वस्य विशेषणं, मृगपादचिह्नसहितं तन्मार्गनिरोधनं च वर्ण्यमित्यर्थः ।" इति अधिकं दृश्यते ।

(४३) भु1 भु4 म) 'चोत्तमद्रव्याणि' (४४) भु1 भु4 म) 'स्वर्णरत्नादिका'

(४५) भु1 भु4 म) 'स्वच्छोपशल्यकाः' (४६) भु1 भु3 भु4) सस्यानां

(४७) भु3) 'मातृकतादयः' इत्यस्मात्परम् 'अथ युद्धम्' इत्यस्मात् पूर्वं च 'उपशल्य' ग्रामान्तः' इति अधिकं दृश्यते । (४८) म) 'समरस्थानमावृतम्' ।

(४९) म) 'परस्पराङ्गिता' (५०) भु1 भु3 'शत्रुसैन्यसंवेष्टनं'

शूराणां नामधामानि[५१] परस्परवचांसि[५२] च ।
शस्त्रास्त्रैः संप्रहारश्च विपक्षध्वंसनं च तत् ॥३६॥

रेरेकारादयः शब्दा बाहुस्फोटनमद्भुतम्[५३] ।
विच्छिन्नाः केतवःखड्गाः स्यन्दनछत्रचामराः[५४] ॥३७॥

रक्तपंकिलतात्यन्तं[५५] भूतगृध्रादिखेलनम् ।
स्रवद्रक्तनदीघोरा विख्यातः शरमण्डपः ॥३८॥
रणयागसमुत्पत्तिर्देवानां[५६] पुष्पवर्षणम्[५७] ।

अथ विरहः[५८] –

विरहे वर्णनीयं स्यादेकवेणीधरं शिरः ॥३९॥
कृशता पाण्डुता चिन्ता जागरो मदनज्वरः ।
मौनित्वं दीर्घनिःश्वासः सन्तापः शिशिरोष्णता ॥४०॥
कविभिर्वर्णनीयाश्च स्मरस्यैव[५९] दशादयः ।
मरुच्चन्द्रपिकादीनामुपालम्भनवागपि[६०] ॥४१॥

पा.टि.

---

(५१) भु1 भु3) 'नामधेयानि' (५२) भु4 म) 'परस्परोक्तयस्तथा'
(५३) भु4) 'तर्जने' । म) 'सन्तसम्' (५४) भु4 म) 'रथातपत्रचामराः'
(५५) भु4 म) 'रक्तकर्दमता' (५६) भु4 म) 'रणयागः समुत्पन्नोऽत्यन्तं'
(५७) भु3) 'स्वतपुष्पवर्षणम्' इत्यस्मात् परम् 'अथ विरहः' इत्यस्मात् पूर्वं च- विकृतं -विकारः ।रक्तपङ्किलता रणभूमेरिति शेषः ।'' इति अधिकं दृश्यते ।
(५८) भु4 म) 'अथ विरहः' इति नास्ति । (५९) भु3) 'दश स्मरदशा अपि'
(६०) भु1 भु2 भु4 म) 'मुपालंभनतापि च'

सम्यक् शीतोपचारश्च चन्दनालेपनादिकः[६१] ॥

अथ मन्त्रः[६२] –

मन्त्रे च नृपतिर्मन्त्री सुहृत्कोषश्च[६३] दुर्गमः ॥४२॥
बलं राष्ट्रं सामाख्यातं यानमासनमाश्रयः ।
भेदो दण्डः साम दानमित्युपायचतुष्टयम्[६४] ॥४३॥

हितोपदेशे –☆

'मित्रलाभः सुहृदभेदो विग्रहः सन्धिरेव च[६५] ।'
प्रभावोत्साहजाशक्तिर्मन्त्रजा स्थिरचित्तता ॥४४॥

पा.टि.

(६१) भु3) 'चन्दनलेपनादिकः' इत्यस्मात् परम्' अथ मन्त्रः' इत्यस्मात् पूर्वं च- "'शिशिरोष्णता- शिशिराणां शीतलानां चन्द्रचन्दनमलयानिलादीनामुष्णता । दशस्मरदशाः नयनप्रीतिः प्रथमा । चिन्ता सङ्गस्ततोऽथ संकल्पः निद्राच्छेदस्तनुताविषयनिवृ- त्तिस्त्रपानाशः उन्मादो मूर्च्छा मृतिरिति मदनदशा दशैव स्यु'रिति दशरूपकोक्ताः । कृशताजागरयोर्दशान्तर्गतत्वेऽपि पृथगुक्तिर्गोवृषन्यायेन प्राशस्त्या वाच्या'। इति अधिकं दृश्यते ।

(६२) भु2 भु4 म) 'अथ मन्त्रः' इति नास्ति । (६३) भु3) सुहृत्कोषौ च' ।

(६४) भु3) '-चतुष्टयम्' इत्यस्मात्परं 'हितोपदेशे' इत्यस्मात्पूर्वं च— 'कोषोऽर्थागमः अर्थरक्षणं च । दुर्गमः दुर्गं तच्चानैकविधं जलदुर्ग-गिरिदुर्ग-वनदुर्ग-प्राचीरदुर्गादिभेदात् । बलं सैन्यम् । यानं जेतव्यं प्रति ज्ञिगीषो सेनयाभियानम् । आश्रयो बलं बलाभियुक्तस्य साहाय्यार्थं बलबत्समाश्रयः । आसनं अरिणाभियुज्यमानस्यापि औदासीन्येऽवस्थानं ।' इति अधिकं दृश्यते ।

(६५) भु1 भु2 भु4) 'सन्धिश्च विग्रहस्तथा' ।

टि.

☆ नारा. हितो. प्रस्तावनायां/9 .पृ2 .

[६६]उन्नतेः कारणत्वं च शत्रुलोकेषु गोपनम् ।
[६७]गुणज्ञानं विचारश्च [६८]स्वसिद्ध्युदयहेतुता ॥४५॥

ग्रन्थान्तरे–

उद्योगः साहसं धैर्यं बलं बुद्धिः पराक्रमः ।

कविकल्पलतायाम्–☆

सहायाः साधनोपायाः देशकालौ बलाबलम् ॥४६॥

मन्त्रस्थानानि–

निस्तम्भे निर्गवाक्षे च निर्भित्त्यन्तरसंश्रये ।
अरण्ये निःशलाके वा [६९]मन्त्रयेताविभावितः[७०] ॥४७॥

पा.टि.

(६६) म) 'उन्नतेश्च कारणत्वं' । (६७) भु2) 'गुणज्ञानां' ।

(६८) भु 3) '-हेतुता' इत्यस्मात् परं 'ग्रन्थान्तरे' इत्यस्मात् पूर्वं च – सुहृद्भेदःभेदेनारेर्मित्राणां स्वाधीनीकरणम् ।सन्धिः दुर्बलस्य बलवता वैरिणा प्रीतिः । विग्रहो बलवतो बलिना दुर्बलेन वा विरोधः । प्रभावः कोषदण्डजं तेजः । उत्साहःकर्त्तव्यार्थे स्थिरतर उद्योगः ।आभ्याम् उत्पन्नशक्तिः सामर्थ्यं चित्तस्य स्थैर्यं च, एतानि मन्त्रफलानि इत्यर्थः ।मन्त्रस्य अभ्युदयहेतुत्वं शत्रुसम्बन्धिषु जनेषु गुप्तिः ।मन्त्रे ये गुणाः स्वोदयपरहान्यादयः, तेषां ज्ञानं स्वस्य कार्यसिद्धिः उदयाःक्षयसाम्यवृद्धयश्च तस्यास्तासां च हेतुता ज्ञानस्य धनत्वम् । एतानि यथायथं मन्त्रे वर्णनीयानीत्यर्थः । गुणज्ञानां विचारश्चेति पाठे ये गुणज्ञास्तेषां विचारः विवेकः इत्यर्थः ।इति अधिकं दृश्यते ।

(६९) भु1) 'मन्त्रयेताविभावितम्' भु2) 'मन्त्रयेत्तत् विभावितम्'
भु4) 'मन्त्रस्थानं विभावितम्' म) 'मन्त्रयेदविभावितम्'

(७०) भु3) 'विभवितः' इत्यस्मात्परम् 'अथ रथः' इत्यस्मात् पूर्वं च- निःशलाके इत्यरण्यविशेषणं, शलाका शुष्कस्थाण्वादि, रहिते इति तदर्थः ।अविभावितः केनापि अलक्षितः ।' इति अधिकं दृश्यते ।

टि.

☆ कविकल्पलतायां पद्यमिदं नोपलभ्यते ।

अथ रथः –

स्यन्दने समता केतुर्वितानं सरला गतिः ।
रत्नादिनिर्मितत्वं च चित्रचामरदर्पणाः[७१] ॥४८॥
चक्रघण्टादिभि[७२]र्घोषः सारथिर्वाजियन्त्रणम्[७३] ।
रथी शस्त्राढ्यकश्चैव शस्त्रास्त्रविक्रमास्थितिः[७४] ॥४९॥

एतेषामुदाहरणानि काव्यादौ ज्ञेयानि ।

इति श्रीमखिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायणदेवमहाराज- विद्वत्सभाराजित[७६]-प्रबन्धकविताप्रकाशक-करणकुलसम्भव[७७]-कविभिषग्वर- वासुदेवपात्रतनय-श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ काव्योचित (प्रातःकालादि) वर्णननिरूपणं नाम अष्टादशः[७८] किरणः ।

पा.टि.

---

(७१) म) 'दर्पणम्' (७२) भु1 भु २) 'चन्द्रघण्टा'
(७३) भु१ भु२ 'यन्त्रिणः' भु4) 'पत्रिणम्' (७४) भु3) 'विक्रमःस्थिति'
(७५) म) 'स्थितः' भु3) 'स्थितिः' इत्यस्मात् परम् 'एतेषा'- इत्यस्मात् पूर्वं च- "वाजियन्त्रणं वाजिनां बन्धनम् । वितान उलोचः । विक्रमास्थिती रथिनः, स्थितिर्मर्यादा, सापि रथिनः, रथिनामाचारपदवीपरिपालनम् ।" इत्यधिकमस्ति ।
(७६) भु3) '-सभासभाजित' । (७७) भु2) 'करणान्वयसम्भव' ।
(७८) भु4) 'सप्तदशः'

□ □ □

[एकोनविंश: किरण:]

अथ ऋतव:[१] —

मध्ये ऋतूनां श्रेष्ठत्वात्[२] वसन्तो वर्ण्यते[३] पुर:[४] ।

यथा माघे —☆

'नवपलाशपलाशवनं पुर' इत्यादि ।

अप्येवं ग्रन्थकाव्यादावृतुरन्यो न दोषभाक् ॥१॥

यथा — रघुवंशभारव्यो: शरदृत्वादि ।

प्रथमतो वसन्ते समये मलयपवनो वर्णनीय: ।

मन्दशीतलगन्धाढ्य: संचारी[५] मलयानिल: ।

यथा मम —

कान्ताकलापसुरतश्रमघर्महन्ता
कासारसारसकुलोदरगन्धचौर: ।
उत्तुङ्गचन्दन[६]महीरूहरुद्धवेगो[७]
मन्दानिलो वहति मन्मथरङ्गसङ्गी[८] ॥

पा.टि.

(१) भु2 भु4 म) 'ऋतु:'

(२) भु1 भु2) 'प्राधान्यात्'

(३) भु4) 'वर्णिते' म) 'वर्णितो'

(४) भु1 भु3) ध्रुवस्

(५) भु4 'सच्चारुमलयानिल:'

(६) भु4) 'उत्तुङ्गबन्धन'

(७) भु4) 'रुद्धवेशो'

(८) भु1 भु3 म) 'मन्मथसङ्गरङ्गी'

टि.

☆ माघ. शिशु VI/2 .

वर्णयेत् पादपान् युक्तान्[९] पुष्पपल्लवकुड्मलैः[१०] ॥२॥
सुरम्या दिवसाश्चैव प्रदोषाः सुखदायकाः ।
औत्सुक्यं ललनादीनां सततं कामवर्धनम्[११] ॥३॥

एतेषामुदाहरणम् ऋतुसंहारे—✫

"द्रुमाः सपुष्पाः सलिलं सपद्मं[१२]
स्त्रियः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषा दिवसाश्च रम्याः
सर्वं प्रिये चारुतरं वसन्ते[१३] ।"

उत्तरायणमर्कस्य वर्णनीयं कवीश्वरैः ।

यथा कुमारसम्भवे –◉

कुबेरगुप्तां दिशमुष्णरश्मौ
गन्तुं प्रवृत्ते समयं विलंघ्य ।
दिग् दक्षिणा गन्धवहं मुखेन
व्यलीकनिःश्वासमिवोत्ससर्ज ॥

वर्णयेन्मालयं वातं मदाढ्यं वारणादिकम्[१४] ॥४॥

पा.टि.

(९) भु2 भु4 म) 'सर्वान्' (१०) म) 'कुब्जलैः'

(११) भु3) 'कामवर्धनम्' इत्यस्मात् परम् 'एतेषा'- इत्यस्मात् पूर्वं च- सुरम्या दिवसा वर्ण्या इति शेषः । एवमुत्तरत्रापि सततं कामवृद्धिर्वर्णनीया ।" इति अधिकं ॥ दृश्यते ।

(१२) भु3) 'सदद्मा;' (१३) भु2) 'चारुतरे' ।

(१४) भु3) 'वारणादिकम्' इत्यस्मात् परं 'यथा' इत्यस्मात् पूर्वं च- मालयं मलयसम्बधिनं वातं मत्तमतङ्गजादिकत्वेन वर्णयेत् ।" इति अधिकं दृश्यते ।

टि.

✫ कालि. ऋतु. VI/2 .

◉ कालि कुमा III/25 .

यथा भोजराजचंप्वाम्–●

"मलयगिरिचरोऽयं मन्मथाधोरणाज्ञा
१५ १६
मथितपथिकवर्गो मारुतव्याजदन्ती ।
विरचयति मदीये शैत्यसौरभ्यमान्द्य-
त्रिविधमदसमृद्धो मानसे वप्रलीलाम् ॥"

आदिपदान्मलयमारुतस्य तुरङ्गमत्वं वर्णनीयम् ।

१७ १८
वृक्षादीनां दलोद्भेदस्तथैव कुसुमोद्गमः ।
स्रवन्मधुविशेषत्वमुद्धूतं कौसुमं रजः ॥५॥

उदाहरणं तु स्पष्टम् ।

रसालो बकुलश्चैव कर्णिकारश्च किंशुकः ।
कुरुण्टकश्चम्पकश्च तिलकाशोककेसराः ॥६॥
ह्रीवेरः पाटली पद्मं माधवी नवमालिका ।
पुंनागस्तगरो द्राक्षा करको मधुकद्रुमः ॥७॥
१९
केतकीदेवपुंनागौ करवीरः सुवर्णकः ।
२०
तमालैलालवङ्गश्च रम्भाकुरुवकौ तथा ॥८॥

पा.टि.

(१५) भु4) 'मुदित' (१६) भु2) -व्याजहन्ती भु4 म)'-व्याजहस्तीं'
(१७) भु3) 'फलोद्भेद-' (१८) भु4) 'स्तत्रैव'
(१९) भु4) करवीरं सुवर्णकम् (२०) भु1 भु4 म) 'लवङ्गानि'

टि.

● भोज. चम्पू IV/5

इत्यादयो[२१] वृक्षभेदः वर्णनीया[२२] लता अपि[२३] ।
जातीतराणि पुष्पाणि वर्णनीयानि तत्र च ॥९॥
वर्णयेत् सहकारेषु स्तबकं पल्लवाङ्कुरौ ।

यथा ऋतुसंहारे —☆

“प्रवालताम्रा स्तबकावनम्राश्चूतद्रुमाः पुष्पितचारुशाखाः ।
कुर्वन्ति कान्ते पवनावधूताः पर्युत्सुकं मानसमङ्गनानाम् ॥”

मधुयुक्तानि पुष्पाणि बहूनि बकुलद्रुमे ॥१०॥

यथा माघे —☆☆

“रतिपतिप्रहितेव कृतक्रुधः[२४] प्रियतमेषु वधूरनुनायिकाः ।
बकुलपुष्परसासवपेशलध्वनिरगान्निरगान्मधुपावली ॥”

पलाशपादपे वर्ण्यं[२५] पुष्पमत्यन्तलोहितम्[२६] ।

यथा कुमारसम्भवे —●

“बालेन्दुवक्राण्यविकासभावाद्
बभुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां
नखक्षतानीव वनस्थलीनाम् ॥”

पाटि. ....

(२१) भु4) ‘इत्यादि ये’ (२२) भु4 म) ‘वर्णितव्या’
(२३) भु3) ‘लता अपि’ इत्यस्मात्परं ‘यथा’ इत्यस्मात पूर्वं च- ‘रसालादयः केचित्प्रसिद्धाः;’ केचिदमरकोशादेः परिचेतव्याः’ । इति अधिकं दृश्यते ।
(२४) म) ‘कृतः क्रुधः’ (२५) भु2 भु4 म) रम्यम्’ (२६) भु2 भु4 म) शोणकम्

टि.

☆ कालि ऋतु VI /17 . ☆☆ माघ. शिशु VI/7 ● कालि कुमा.III/29

अशोके वर्णनीयानि कुसुमानि च पल्लवाः ।।११।।

यथा तत्रैव–☆

"असूत सद्यः कुसुमान्यशोकः
स्कन्धात् प्रभृत्येव सपल्लवानि ।
पादेन नापैक्षत सुन्दरीणां
२७
सम्पर्कमाशिञ्जितनूपुरेण ।।"

माधवीषु च पुष्पाणि पल्लवा मधुपूर्णताः (मधुपूरिताः ?) ।

यथा ऋतुसंहारे–☆☆

"मत्तद्विरेफपरिचुम्बितचारुपुष्पा
मन्दानिलाकुलितचारुनवप्रवालाः ।
कुर्वन्ति कामिमनसां सहसोत्सुकत्वं
२८
बालातिमुक्तलतिकाः समवेक्ष्यमाणाः ।।"

करके च फलं प्रोक्तं द्राक्षायां च तथाविधम् ।।१२।।

करके च फलं यथा नैषधीये–●

"वियोगिनीमैक्षत दाडिमीमसौ
प्रियस्मृतेः स्पष्टमुदीतकण्टकाम् ।
फलस्तनस्थानविदीर्णरागिहृ-
द्विशच्छुकास्यस्मरकिंशुकाशुगाम् ।।"

द्राक्षायां फलोदाहरणं – मृग्यम् ।

पा.टि...

(२७) भु4) 'संपर्कनासिञ्जित' (२८) भु4) 'बालातिसक्तलतिकाम्'

टि. ____

☆ तत्रैवIII/26 ☆☆ कालि. ऋतु.VI/19 ● श्रीहर्ष नैषI/83

लवङ्गे कलिका ख्याता वल्कलं भूर्जपादपे ।

लवङ्गे कलिका यथा ग्रन्थान्तरे –

२९

"लवङ्गकलिकाभङ्गदयालुर्मलयानिल: ।
कथमुन्मूलयत्येष मानिनीमानपादपम् ॥"

३०

भूर्जवृक्षे वल्कलं यथा कुमारसम्भवे–✩

"न्यस्ताक्षरा धातुरसेन यत्र
भूर्जत्वच: कुञ्जरबिन्दुशोणा: ।
व्रजन्ति विद्याधरसुन्दरीणा-
मनङ्गलेखक्रिययोपयोगम् ॥"

अवशिष्टानां तरुलतादीनां यद्यद्वर्णनीयं तदेव ग्रन्थविस्तरभयान्नलिखितमेतान्यधिकानि चास्मिन् ग्रन्थे अन्येषु ग्रन्थेषु विज्ञेयानि ।

अथ पुष्पविशेषवर्णना –

वर्णयेन्मदनस्यैव केतकीं केतकं महत् ॥१३॥
छुरिकाकरवालौ च कर्तरीकुन्तसायकान् ।
३१
कोरक:स्यात्तयोरेव मुद्गरश्चित्तजन्मन: ॥१४॥

पा.टि.

(२९) भु2 भु4) 'लवङ्गे' (३०) भु3) 'भुर्जपत्रे' (३१) भु2) 'मुद्ंगरस्तस्य वर्णित: ।

भु3) 'श्चित्तजन्मन:' इत्यस्मात् परं 'छुरिका' (पृ310) इत्यस्मात्पूर्वं च- केतकी महत् केतकं च मदनस्य छूरिकादित्वेन वर्णयेत् । तत्र च कर्तरीशब्देन करीतमभिधीयते (?) इत्याशय: । तयो: केतक्या: केतकस्य च कोरक: कन्दर्पस्य मुद्गरत्वेन वर्णनीय: स्यादित्यर्थ: ।" इति अधिकं दृश्यते ।

टि.

✩ कालि. कुमा.I/7.

छुरिका यथा मम –

मानं मुञ्च सरोजचारुनयने हेमप्रभे [३२]मानिनि
[३३]मद्वाचो हृदि संनियोज्य चपलं गच्छाशु कान्तान्तिकम् ।
कामो दिग्विजयी [३४]प्रसूनविशिखः कान्तोरुधैर्यान्तक-
स्तीक्ष्णां केतकरूपिणीं [३५]गुरुतरां धृत्वासिपुत्रीं [३६]बभौ ॥

करवालोदाहरणं मृग्यम् ।

कर्तरी यथा नैषधीये –☆

“तवाग्रसूचीसचिवः स कामिनोर्मनोभवः सीव्यति दुर्यशः पटौ ।
स्फुटं च पत्रैः करपत्रमूर्तिभिर्वियोगिहृद्दारुणि दारुणायते ॥”

कुन्तसायकयोरुदाहरणं विमृग्यम् ।

केतक्यादिमुकुलमुद्गरोदाहरणं मम –

[३७]काले पिकालिमधुरध्वनिसद्रसाले
मानं जहीहि करभोरु पतिं [३८]लभस्व ।
[३९]यत्केतकीमुकुलमुद्गरमादधानः
[४०]आयाति कामनृपतिर्मधुमित्रसङ्गी ॥

पा.टि...

(३२) भु4 म) ‘कोपने’ ।
(३३) भु3) ‘व्याहारं हृदये निधेहि सुहितं’
(३४) भु3) वसन्तसमये विच्छेदिमृत्युपमः’
(३५) भु3) ‘विजयते’
(३६) भु3) ‘जगत्’
(३७) भु2) ‘बाले पिकालि
(३८) भु3) ‘प्रयाहि’
(३९) भु4) ‘ये केतकी’
(४०) भु3) ‘प्रयाति कामनृपतिर्मधुनाधुनैव ।भु4 म) ‘सन्तापदो मधुसखः समुपागतोऽत्र ।’

टि.

☆ श्रीहर्ष. नैष.1/80

किंशुकं चार्धचन्द्राख्यसायकाङ्कुशवह्वय: ।[४१]
नखक्षतानि कामस्य कुठारस्तस्य कुड्मल: ॥१५॥

अर्धचन्द्राख्यसायको यथा नैषधीये—☆

"स्मरार्धचन्द्रेषुनिभे क्रशीयसां
स्फुटं पलाशेऽध्वजुषां पलाशनात् ।[४२]
स वृन्तमालोकत खण्डमण्डितं [४३]
वियोगिहृत्खण्डिनि कालखण्डजम् ॥"

किंशुकाङ्कुशो यथा मम—

पुष्पानिलद्विरदराजमतिप्रचण्डं
सत्केतकीरदनकोटिविराजमानम् ।
आरुह्य कौतुकवशाद्रतिकान्तस्रज: [४४]
सत्किंशुकाङ्कुशधर: शुशुभे जगत्याम् ॥

वह्निर्यथा-ऋतुसंहारे—●

"आदीप्तवह्निसदृशै: पवनावधूतै:
सर्वत्र किंशुकवनै: कुसुमावनम्रै: ।
सद्यो वसन्तसमयेन समागतेन
रक्तांशुका नववधूरिव भाति भूमि: ॥"

पा.टि.

(४१) भु 3) 'कुड्मल:' इत्यस्मात्परम् 'अर्ध-' इत्यस्मात्पूर्वं च- किंशुकम् अर्धचन्द्रसायकादित्वेन वर्णनीयम् इत्यर्थ: । तत्कुड्मलस्तु कामस्य नखक्षतं कामपरशुत्वेन च वर्णनीय: ।" इति अधिकं दृश्यते ।

(४२) भु2 भु4) 'खण्डमन्वितम्'

(४३) भु4) 'वियोगिहृत्खण्डित'

(४४) भु3) 'प्रियते धरायाम्'

टि.

☆ श्रहर्ष. नैष.I/84

● कालि. ऋतु. VI/21

नखक्षतं यथा –☆ 'बालेन्दुवक्राणि' इत्यादि ।

४५

पलाशकुड्मलकुठारो यथा मम –

कन्दर्पराजो विजयी धनुष्मान् ४६

वियोगिनां धैर्यमहीरुहांश्च ।

छेत्तुं द्रुतं कोरकितं पलाशं

४७ ४८

कुठारकास्त्रं कुपितो दधौ किम् ॥

४९ ५०

छत्रं शाणादयश्चैव वर्णनीयं च केसरम् ।

यथा मम –

मलयपवनसङ्गी पुष्पबाणातिरङ्गी

पिकनिनदतरङ्गी संलसद्भावभङ्गी (?)

५१

मधुरसुरसयुक्तं केसराख्यातपत्रं

सपदि स रचयित्वा राजते मारराजः ॥

पा.टि.……………………………………

(४५) भु4) 'मम च'' (४६) भु3) 'महामहीजान्' भु4) 'महीरुहश्च' (४७) भु3) 'कुठारशस्त्रम्' भु4) 'कुठारकाण्डम्' (४८) भु3) 'दधाति' 'दधौ किम्' इत्यस्मात्परं 'छत्रम्' इत्यस्मात्पूर्वं च- 'महीरूहजान् वृक्षान् इत्यर्थः' इति अधिकं दृश्यते । (४९) भु 3) 'शाणादिरुपेण' भु4) सामादयश्चैव' (५०) भु3) केसरम्' इ्यस्मात् परं 'यथा मम' इत्यस्मात् पूर्वं च- ''केसरं नागकेसरकुसुमम्'' इति अधिकं दुश्यते । (५१) भु4) 'केसराण्यातपत्रं'

टि.

☆ कालि कुमा.III/29.

शाणो यथा नैषधीये –☆

‘‘गलत्परागं भ्रमिभङ्गिभिः पतत्
प्रसक्तभृङ्गावलि नागकेसरस् ।
स मारनाराचनिघर्षणस्खल-
ज्ज्वलत्कणं शाणमिव व्यलोकयत् ॥’’

कोरकादौ चम्पकस्य वर्ण्याः[५२] स्युर्दीपिकादयः ॥१६॥

दीपिका च यथा तत्रैव –☆☆

‘‘विचिन्वतीः[५३] पान्थपतङ्गहिंसनै-
रपुण्यकर्माण्यलिकज्जलछलात्[५४] ।
व्यंलोकयच्चम्पककोरकावलीः
स शम्बरारेर्बलिदीपिका इव ॥’’

आदिपदात् स्फुटचम्पकस्य बृहद्दीपिकात्वं वर्णनीयम् ।

कुसुमानि सुदीर्घाणि नालीकान्येव[५५] वर्णयेत् ।
सर्वाश्च[५६] कलिकाभेदाः[५७] गुलिकाश्चित्तजन्मनः ॥१७॥
ज्वालकश्च परागोऽपि दाहहेतुर्वियोगिनाम् ।

ऊह्यमुदाहरणम् ।

मल्लिकामुकुलं चैव शंखतारकमौक्तिकम् ॥१८॥

यथा केनचिदुक्तम् –

‘‘मल्लिकामुकुले चण्डि भाति गुञ्जन्मधुव्रतः ।
प्रयाणे पञ्चबाणस्य शंखमापूरयन्निव ॥’’

पा.टि.

(५२) भु4) ‘वर्ण्याम्बु दी-’ म) ‘वर्ण्याश्च दी-’ (५३) म) ‘विचिन्वताम्’
(५४) भु4) ‘रपुण्यकर्मा अलि’
(५५) भु4) ‘कालिकान्येव’
(५६) भु3) ‘सर्वांश्च’
(५७) भु1 भु3) ‘कलिकाभेदान्’

टि.

☆ श्रीहर्ष. नैष.I/92

☆☆ तत्रैव.I/ 86

तारकमौक्तिकयोरुदाहरणं सप्टम् ।

चक्राकृतीनि पुष्पाणि कर्णिकारादिकानि च ॥
ताटङ्कभूषणान्येव वर्णनीयानि सूरिभिः ॥१९॥

तेषु कर्णिकारताटङ्कभूषणं लक्षणया ऋतुसंहारे–✫

‘‘कर्णेषु योज्यं[५८] नवकर्णिकारं
स्तनेषु हारस्त्वलकेष्वशोकः ।
शिखासु पुष्पं विविधप्रकारं
प्रयान्ति[५९] सङ्गं प्रमदाजनस्य ॥’’

किं च यस्य पुष्पस्य यद्वदाकृतिर्भवति तत्पुष्पं तदेव वस्तु वर्णनीयम् । उदाहरणमूह्यम् ।

परागैर्धूसरत्वं च मधुपानां कलेवरम् ॥

यथा मम – [६०]

सुललितमधुमत्ता घोरझङ्कारनादा
विकचकुसुमगन्धैर्धूसराङ्गाः परागैः ।
सुरभिपवनलोलाः कमिनीभिर्भ्रमन्तो [६२]
दिशि दिशि च बभूवुः शोभमाना द्विरेफाः ॥

मधुभिः कुसुमोत्पन्नैर्मत्तत्वं झंकृतस्वनः ॥२०॥

यथा - ‘सुललिते’त्यादि ।

पा.टि.

(५८) भु1 भु3 भु4) ‘योग्यं’ (५९) म) ‘प्रयाति’

(६०) भु 3) ‘उदाहरण मूह्यम्’ इत्यस्मात्परं ‘‘परागैः’’ -इत्यस्मात् पूर्वं च- ‘अथभ्रमरवर्णनम्’ इति अधिकं दृश्यते ।

(६१) भु4) ‘मधुमत्तां श्रव्यझङ्कारनादा’ (६२) भु3) ‘विलसन्ति स्वैरवृत्ताः द्विरेफाः’

टि.

✫ कालि. ऋतु. VI/6 .

चूताङ्कुररसास्वादै: पिकानां मधुरस्वर: ।

यथा कुमारसम्भवे –✩

"चूताङ्कुरास्वादकषायकण्ठ: पुंस्कोकिलो यन्मधुरं चुकूज ।
मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य ॥"

सन्तोषैर्मधुपानं च रसिकप्रिययोरपि ॥२१॥

यथा माघे –✩✩

'दत्तमात्तमदनं दयितेन व्याप्तमातिशयिकेन रसेन । ६२
सस्वदे मुखसुरं प्रमदानां नाम रूढमपि च व्युदपादि ॥'
६३

वस्त्रं कौसुम्भरागाढ्यं कौसुमं भूषणं तथा ॥

कौसुम्भवस्त्रं यथा ऋतुसंहारे –●

"कुसुम्भरागारुणितैर्दुकूलैर्नितम्बबिम्बानि विलासिनीनाम् । ६४
तन्वंशुकै: कुङ्कुमरागगौरैरलंक्रियन्ते स्तनमण्डलानि ॥"

कुसुम भूषणं यथा- 'कर्णेषु योज्यमि' त्यादि ।

सुगन्धान्वेषणो भृंग: पक्षिणां कलनि:स्वन: ॥२२॥

पा.टि.

---

(६२) भु 3) 'व्युदपादि' इत्यस्मात् परं 'वस्त्रम्' इत्यस्मात् पूर्वं च- प्रमदानां सम्बन्धि मुखसुरं । सेनासुरा छायाशाला-निशानामि' ति वैकल्पिकं नपुंसकत्वम् । दयितेन सस्वदे- सस्वदे स्वदितं ऋतं प्रागव्युत्पन्नमपि दयितेति नाम च व्युदपादि व्युत्पादितम् । प्रकृष्टो मदो यासां ता: प्रमदा इत्येव योऽर्थसंभवात्तासां तन्नाम्नि योगरूढत्वं संपादितमित्यर्थः । दयितै: आसवं पायियित्वा स्वयं तन्मुखासवपानात्प्रेयसीनां मत्ततासीदित्याशय: । इति अधिकं दृश्यते ।

(६३) भु 1) 'तथा' इत्यस्मात् परं 'कौसुम्भ-' इत्यस्मात् पूर्वं च- "कुसुम्भस्यायं कौसुम्भ:, स चासौ रागश्चेति कौसुम्भराग: ।" इति अधिकं दृश्यते ।

(६४) भु3) 'माण्डलानि' इत्यस्मात्परं 'कुसुम'- इत्यस्मात्पूर्वं च" तन्वंशुकै: सूक्ष्मैरूत्तरीयवस्त्रै:" इति अधिकं दृश्यते ।

टि.

✩ कालि.कुमा।।।./32 ✩✩ माघ. शिशु.X/23. ● कालि. ऋतु.VI /5.

सुगन्धान्वेषणो भृङ्गो यथा माघे—☆

"इदमपास्य विरागि परागिणीरलिकदम्बकमम्बुरुहां ततीः ।
स्तनभरेण जितस्तबकानमन्नवलते वलतेऽभिमुखं तव ॥"

पक्षिकलस्वनो यथा रघुवंशे—☆☆

"उषसि च गजयूथकर्णतालैः पटुपटहध्वनिभिर्विनीतनिद्रः ।
अरमत मधुराणि तत्र शृण्वन् विहगविकूजितवन्दिमङ्गलानि ॥"

दोलाखेला वर्णनीया परागैः कुङ्कुमादिभिः ॥

आदिशब्दात् फल्गु गृह्यते ।

६५
कौसुमं कञ्चुकं चैव पौष्पं छत्रं च वर्णयेत् ॥२३॥

कुसुमकञ्चुको यथा मम—

कापि कामशरभीरुरङ्गना कञ्चुकं कुसुमनिर्मितं परम् ।
६६ ६७
सन्दधात्यलमनूनविभ्रमाकानने सहचरीगणैर्बभौ ॥

पुष्पछत्रं यथा मम—

६८
राधाग्रस्था कुसुमनिवहोत्पन्नभूषातिरम्या
धृत्वा काचिद् व्रजपुरवधूः पुष्पक्लृप्तातपत्रम् ।

पा.टि.

(६५) भु2 भु4 म) 'कौसुमः कञ्चकश्चैव' (६६) भु3) 'सन्दधीत्यल-'

(६७) भु4) 'सहतरुगणैर्बभौ'

(६८) भु4 म) 'राधाग्रस्था........चचार ।' इत्यस्य पद्यस्य स्थाने-

"राधापुरो गच्छति पुष्पवेशा पुष्पातपत्रं रुचिरं दधाना ।
कचिद्वधूः कुञ्जलतावनान्ते पिकालिभृङ्गध्वनिभिर्निकुञ्जे ॥" इति दृश्यते ।

टि.

☆ भाघ. शिशु.VI/11 ☆☆ कालि. रघु.IX/71

पुष्पामोदे मधुपनिनदे कोकिलालापयुक्ते
भावासक्ता सुललितवने[६९] हृष्टचित्ता चचार[७०] ॥

[७१]प्रेमभूः कलहोत्पत्तिर्दम्पत्योर्मानभञ्जनम् ॥

प्रेमकलहोत्पत्तिर्यथा - माघे –☆

"तव कितव किमाहितैर्वृथा नः क्षितिरुहपल्लवपुष्पकर्णपूरैः ।
ननु जनविदितैर्भवद्व्यलीकैश्चिरपरिपूरितमेव कर्णयुग्मम् ॥"

मानभङ्गो यथा तत्रैव –☆☆

"प्रियसखीसदृशं प्रतिबोधिताः किमपि काम्यगिरा परपुष्टया । [७२]
प्रियतमाय वपुर्गुरुमत्सरच्छिदुरयादुरयाचितमङ्गनाः ॥"

[७३]कुसुमानामवचायः सद्वनभ्रमणं[७४] तथा[७५] ॥२४॥

कुसुमावचायो यथा माघे –●

"मुदितमधुभुजो भुजेन शाखाश्चलितविशृङ्खलशङ्खकं धुवत्याः ।
तरुरतिशयितापराङ्गनायाः शिरसि मुदेव मुमोच पुष्पवृष्टिम् ॥"

पा.टि.……………………………………………………………

(६९) भु3) 'विहृतिविपिने' (७०) भु2) 'व्रजन्ति'
भु3) चचार' इत्यस्मात् परं 'प्रेमभूः' इत्यस्मात् पूर्वं च- पुष्पामोदे इति पुष्पाणामामोदो यत्र । मधुपानां निनदो यस्मिन् इति विहृतिविपिनविशेषणद्वयम् । इति अधिकं दृश्यते
(७१) भु1 भु2) 'प्रेमेभ्यः म) 'प्रेमान्तः'
(७२) भु1 भु3)- 'मङ्गनाः' इत्यस्मात्परं 'कुसुमानामित्यस्मात्पूर्वं च-
'अदुः अयाचितमिति छेदः' । इति' अधिकं दृश्यते ।
(७३) भु1 भु2) 'अवचायः सुमनसां' । (७४) भु1 भु3 'वनविभ्रमणं'
(७५) भु3) 'तथा' इत्यस्मात्परं 'कुसुमा'- इत्यस्मात्पूर्वं च-
"अवचायः प्राग् व्याख्यातः ।" इति अधिकं दृश्यते ।

टि. ---

☆ माघ. शिशु VII/ 54 ☆☆ तत्रैव VI/8 ● तत्रैव VII/ 30

वनभ्रमणं यथा मम –

कान्ता वसन्तसमये नितरां सखीभिः
सार्धं मुदा कुसुमिते विपिने भ्रमन्ती ।
७६
हासप्रसूनकरपल्लवशोभमाना
संचारिणीव लतिका शुशुभे मृगाक्षी ॥
७७

कविभिः सहिता गोष्ठी वर्ण्या चेन्दुमरीचयः ।

यथा भर्तृहरिणोक्तम् –☆

"आभासः किलकिञ्चितस्य दयिता पार्श्वे विलासालसा
कर्णे कोकिलकाकलीकलरवः स्मेरो लतामण्डपः ।
गोष्ठी सत्कविभिः समं कतिपयैर्मुग्धाः सितांशोः कराः ।
केषांचित् सुखयन्ति चात्र हृदयं चैत्रे विचित्राः स्रजः ॥"

सुमनोमण्डपो रम्यो विकसत्कुञ्जमन्दिरम् ॥२५॥

सुमनोमण्डपो यथा- मम –

कामाधिराजो विजयाय यूनां
साकं वसन्तेन समुज्ज्वलेन ।
स्फुटत्प्रसूनैः सचिवेन गाढं
पुष्पावलीमण्डपगश्चकास्ति ॥

पा.टि.

(७६) भु2 भु4 म) गुञ्जन्मधु व्रतमनोहरमण्डलिभिरावेष्टितेव' ।

(७७) भु2 भु4 म) 'वर्णनीयेन्दुदीधितिः' ।

भु 1 भु 3) 'मरीचयः' इत्तस्मात्परं' यथा'इत्यस्मात्पूर्वं च- इन्दुमरीचयश्च वर्ण्या इतिबहुवचनविपरिणामः ।'' इति अधिकं दृश्यते ।

टि.

☆ भर्तृ. शृङ्गा./83 .

विकसत्कुञ्जमन्दिरं यथा- श्रीगीतगोविन्दे स्पष्टम् ।

प्रतीरेषु[७८] तटिन्यादेरत्युत्सवादिवर्णनम् ।

यथा रसमञ्जर्याम् –☆

"अयं रेवाकुञ्जः कुसुमशरसेवा समुचितः
समीरोऽयं वेलादरविदलदेलापरिमलः[७९] ।
इयं प्रावृड्[८०] धन्या नवजलदविन्यासचतुरा[८१]
पराधीनं चेतः सखि किमपि कर्तुं मृगयते ॥"

अत्र रेवानदीकूले रत्युत्सवादिवर्णनं 'किमपि मृगयते' इत्यनेन सूच्यते । आदिशब्दात्[८२] सरस्तीरं मृग्यम् ।

अथ दोहदानि —

तरुणां वल्लरीणां च कुसुमोद्गमहेतवे ॥२६॥
स्त्रीभिर्यौवनयुक्ताभिर्वर्ण्यते[८३] दोहदक्रिया ।

तथा च ग्रन्थान्तरे –

तरुगुल्मलतादीनामकाले कुशलैः कृतम् ॥२७॥
पुष्पाद्युत्पादकं द्रव्यं दोहदं परिकीर्त्तितम् ।

पा.टि.

(७८) भु2 भु4) 'प्रतीरसत्तटिन्यादे' (७९) म) 'दलविदुलदोला'
(८०) भु4) 'प्रवृट् धन्याम्' (८१) भु4 म) 'किन्तु'
(८२) भु4) 'शब्दात्तत्तीरं' (८४) भु2) - 'वक्ष्यते'

टि.

☆ भानु. र. म./21 .

८४
तत्र च वृक्षविशेषे दोहदविशेषो यथा--

प्रियङ्गुः शीतलालापैः केतकी रदनक्षतैः ॥२८॥

प्रियङ्गुर्यथा भारवौ --✩

"फलिनीः कुसुमावलीचिता अतिशीतैर्मधुरैर्वचोभरैः ।
विदधद्रमणीकुलं मुदा कलयामास कचालिभूषणम् ॥"

केतकी यथा माघे --✩✩ ८५

"अतिखरनिजकण्टकातिदोषाद्रदविहतिं स्फुटकेतकीं विहाय ।
८६ ८७
पदमुपदधिरे कुलान्यलीनां युवतिषु कोमलमालभारिणीषु ॥"

अशोकः पादघातेन स्फुटत्वं याति तत्क्षणात् ।
८८

यथा --● 'असूत सद्यः कुसुमान्यशोक' इत्यादि ।

पा.टि.

(८४) भु2 भु4 म) 'तत्रच....यथा' इति ग्रन्थभागो नोपलभ्यते ।

(८५) भु2 भु3) '-द्रदविहति' । भु4) द्ददहित । (८६) भु4) '-पदमुपमधिरे'

(८७) भु1 भु3) -'भारिणीषु' इत्यस्मात् परम् 'अशोकः' इत्यस्मात् पूर्वं च- अत्र यद्यपि प्रथमार्धं बहुषु पुस्तकेषु न दृश्यते तथापि क्वचित्स्यादिति तदेवोदाहरणम् । कोमलमाल भारिणीष्वित्यत्र कोमलाः मालाः भर्तुं शीलं यासां तासु इति विग्रहे 'इष्टकेषीकामालानां चिततूलभारिषु' इत्यत्र इष्टकादीनां तदत्र ग्रहणात् कोमलमालाशब्दस्य ह्रस्वो द्रष्टव्यः ।" इति अधिकं दृश्यते ।

(८८) भु 1) 'इत्यादि' इत्यस्मात् परं 'मधुना' इत्यस्मात्पूर्वं च-'मघदूतेऽपि रक्तताशोकश्चलकिसलयः केसरस्तत्र कान्त' इत्यादि ।' इत्यधिकमस्ति । तत्रैव भु3) पाठे 'मेघसंदेशेपि- 'केसरस्तत्र कान्तः' इत्यादि ।' इत्यधिकमस्ति ।

टि.

✩ उपलभ्यमाने भारविकाव्ये किरातार्जुनीये पद्यमिदं नोपलभ्यते ।

✩✩ माघ.शिशु.VII/61 ● कालि. कुमा.IV/26

८९ ९० ९१
मधुना मुखमुक्तेन बकुलः पुष्पितो भवेत् ॥२९॥

यथा मेघदूते –✫

"रक्ताशोकश्चलकिसलयः केसरस्तत्र कान्तः
प्रत्यासन्नौ कुरुबककवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
कांक्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः ॥"

९२
करद्वयस्पर्शनेन रसालो मुकुलीभवेत् ।

रसालादिकदम्बपर्यन्तं ममैवोदाहरणम् ।

९३
काचित् कान्ता कुसुमसमये काननान्ते सखीभिः
९४
पुष्पादानप्रणयकुतुकैर्मन्दमन्दं भ्रमन्ती ।
९५
दृष्ट्वाग्रस्थं कुसुमरहितं दैवयोगेन चूतं
९६
हस्तामर्षैरतिशयसुखैः पुष्पवन्तं चकार ॥

पा.टि.

---

(८९) भु2 भु4 म) 'मुख युक्तेन' (९०) भु3) 'केसरः'
(९१) भु2 भु4 म) 'महान्' भु3) 'भवेत्' इत्यस्मात्परं 'यथा' इत्यस्मात्पूर्वं च-'केसरो बकुलः' इत्यधिकमस्ति । (९२) भु2 भु4 म) 'मुकुलीकृतः' । भु3) 'भवेत्' इत्यस्मात्परं 'रसाला'-इत्यस्मात्पूर्वं च-अमुकुलं मुकुलं भवेन्मुकुली भवेत् ।" इत्यधिकमस्ति । (९३) भु2 भु4 म) 'कमलनयना' (९४) भु2 भु8 म) 'सार्धं पुष्पावचय' (९५) भु2 भु4 म) 'चूतवृक्षं सहर्षा' (९६) भु2 भु4 म) 'हस्तस्पर्शैरधिकसुखदैः' ।

टि.

✫ कालि. मेघ॥/15.

९७ ९८ ९९
स्तनसंपीडनेनैव पुष्पितः स्यात्कुरुण्टकः ।।३०।।

यथा –

काचिद्वधूः काननमध्यदेशे
दृष्ट्वा कुरुण्टं कुसुमातिशून्यम् ।
स्तनद्वयापीडनकौतुकेन १०० १०१
चक्रे मुदा पुष्पितमम्बुजाक्षी ।।

१०२
विकासः स्यात् कर्णिकारे सहर्षैर्मत्तभाषणैः ।।

यथा –

पश्य त्वमेव पुरतः सखि कर्णिकारं १०३
पुष्पोद्गमभ्रमरभूषणवर्जितोऽयम् ।
१०४
आकर्ण्य सादरमथालिगिरं सुनेत्री
१०५ १०६
सन्मत्तभाषणबलैर्विकचीचकार ।।

पा.टि.

(९७) भु4 म) 'स्तनाभ्यां पीडितः सद्यः' (९८) भु4 म) 'पुष्पितश्च'
(९९) भु 3) 'कुरण्टक' इत्यस्मात् परं 'यथा' इत्यस्मात् पूर्वं च- 'कुरुण्टकः पितम्लानतरु':इति अधिकं दृश्यते । (१००)भु3) 'क्षणात्'
(१०१) भु1) 'पुष्पभरावनं तत्' भु3) 'पुष्पभरावनम्रं'
(१०२) भु3) 'सहासैर्मत्त-' भु4) 'सरसैर्यत्र' म) 'सरसैर्मत्त-'
(१०३) भु4 म) '-वर्जितं च' (१०४) भु2 भु4 म) 'श्रुत्वा सखीवचनकोमलताम्'
(१०५) भु1 भु3) 'तं मत्त'
(१०६) भु1 भु3) 'चकार' इत्यस्मात् परं 'सीत्कार' इत्यस्मात् पूर्वं च ''अयं पुष्पोद्गमभ्रमरभूषणवर्जित एवेत्यन्वयः अभूदिति शेषः ।'' इति अधिकं दृश्यते ।

सीत्कारानिलदानेन [१०७]फुल्लः स्यात् सिन्धुवारकः ॥३१॥

यथा —

[१०८]आलीभिः सह कौतुकातिरसिका फुल्लारविन्दानना
दृष्ट्वा सद्विपिने प्रसूनरहितं तं सिन्धुवारद्रुमम् ।
सख्याः [१०९]भाषणमाकलय्य सहसा कर्णावतंसाय [११०]सा
सीत्कारानिल[१११]दानदोहदभरैश्चक्रे प्रसूनान्वितम् ॥

केशस्पर्शविधानेन [११२]कुसुम्भः स्फुटति ध्रुवम् ॥

यथा —

[११३]पुष्पप्रमोदे वनजाक्षि बाले
कौसुम्भरागार्पित[११४]चित्तवृत्ते ।
त्वत्कुन्तलस्पर्शवशात् कुसुम्भः
[११५]स्फुटत्यकाले वनमध्यवर्ती ॥

श्यामा सङ्गीतगानेन पुष्पिता भवति ध्रुवम् ॥३२॥

पा.टि.

---

(१०७) भु2 भु4 म) 'प्रफुल्ल:सिन्धुवारकः'
(१०८) भु2 भु4 म) 'कौतुकातिमृदुला बाला सरोजानना'
(१०९) भु2 भु4 म) 'सद्वचनं निशाम्य'
(११०) भु2) 'च'
(१११)भु2) 'सौरभभरैश्चक्रे-' भु4 म) 'सौहृदभरैश्चक्रे-'
(११२) भु4) 'कुसुम्भम्'
(११३) भु4 म) 'पश्य प्रमोदे'
(११४) भु2 म) - 'चित्तपुष्पे'
(११५) भु2 भु4 म) - 'स्फुटत्ययं काननमध्यवर्ती'

यथा–

११६
कान्ते बालकुरङ्गचारुनयने संङ्गीतगानोत्सुके
११७ ११८
श्यामे त्वं पुरतोऽत्र पश्य विपिने श्यामां प्रसूनोज्झिताम् ।
११९ १२० १२१
कान्तस्येति सकौतुकातिमृदुलं श्रुत्वा वचः सात्मनो
१२२
नाम्ना प्रीतिमवाप्य गीतवचनैश्चक्रे हि तां पुष्पिताम् ॥

१२३ १२४
तिलकाश्च विकासन्ते मधुमत्ताक्षिवीक्षणैः ॥

यथा –

तिलके गतपुष्पभूषणे मधुमत्ताक्षि सुवीक्षणेन यत् ।
१२५ १२६
कुसुमं विदधेऽधुना त्वया वितनिष्ये वरभूषणं प्रिये ॥

पुंनागो हसितेनैव प्रफुल्लत्वमुपैति च ॥३३॥

पा.टि.

(११६) भु3) - 'सङ्गितरङ्गोत्सुके'-(११७) भु2 भु3) 'श्यामा त्वं' भु4) 'श्यामासि'
(११८) भु1 भु2 भु4) 'विपिनेऽत्र पश्य पुरतः'
(११९) भु4) 'कान्तश्चत' (१२०) भु4 म) - 'कातिललितं'-
(१२१) भु2) 'सारवो' भु4) 'सन्मनो' (१२२) भु3) 'गीतरचनैश्चक्रे'
(१२३) भु3) 'तिलकानां विकासः स्यान्' (१२४) भु4) '-वीक्षितैः' ।
भु3) 'वीक्षणैः' इत्यस्मात् परं 'यथा' इत्यस्मात् पूर्वं च- तिलकाः क्षुरकाख्यस्तरू विशेषाः ।'' इति अधिकं दृश्यते । (१२५) भु3) 'तव भूषणं'
(१२६) भु3) 'प्रिये' इत्यस्मात् परं 'पुंनागो' इत्यस्मात् पूर्वं च- मधुमत्तेनाक्ष्णा यत् स्पष्टवीक्षणं तेन । यत्-कुसुमविहितं तेनेतिविशेषः ।'' इति अधिकं दृश्यते ।

यथा –

१२७ १२८

वने व्रजन्त्याः सुरसं सृजन्त्याः कान्ताङ्गसंसर्गसुखं भजन्त्याः ।

१२९

स्मरार्द्रभावान्वितहासवृष्ट्या पुंनागकः कोरकितो बभूव ॥

१३०

मधूत्कटेन हासेन नमेरुः पुष्पितो भवेत् ॥

यथा –

१३१

बाला वधू रञ्जितमन्दहासा मधूत्कटैर्हासरसैर्नमेरुम् ।

१३२ १३३

चकार पुष्पस्तबकावनम्रं गतप्रसूनं सहसा वनान्ते ॥

१३४ १३५

सम्यक् कुसुमितः शीघ्रं मन्दारो हस्तचालनैः (हस्तधूननैः ?) ॥३४॥

पा.टि.

---

(१२७) भु4) 'रसलासवृन्त्याः' म) 'रसभासवत्याः' (१२८) भु1 भु2) '-संस्पर्शसुखं'
(१२९) भु3) 'पुंनागतः कोरकितो बभूव' भु4 म) 'पुंनागवृक्षः कुसुमं दधाति'
(१३०) भु ३) 'भवेत्' इत्यस्मात्परं 'यथा' इत्यस्मात्पूर्वं च - 'नमेरुः सुरपुंनाग इति प्रसिद्धः ।'' इति अधिकं दृश्यते । (१३१) भु4) 'नमेरुः'
(१३२) भु4) 'पुष्पाभरणान्तशोभं' म) 'पुष्पाभरणातिशोभं'
(१३३) भु3) 'वनान्ते' इत्यस्मात् परं 'सम्यग्' इत्यस्मात् पूर्वं च- ''गतप्रसूनं नमेरुं पुष्पस्तवकानताग्रं चकार इत्यन्वयः ।'' इति अधिकम् । (१३४) भु3) 'भवेत्' ।
(१३५) भु3) 'हस्तचालनैः' इत्यस्मात् परं 'यथा' इत्यस्मात् पूर्वं च- ''अत्र चालनैरित्यत्र धूननैरिति पाठ्यं चलते ण्यन्तात् कम्पने चलिरिति........वेन हस्तचलनैरित्येव स्यात्, कम्पनार्थत्वात् ।'' इति अधिकं दृश्यते ।

यथा –

करचरणविलासैः[१३६] कान्तकामं ददद्भि-[१३७]
बहुतरसुखयुक्तैः बालिकायाः ससख्याः ।
[१३८]अधररुचिदिदृक्षातत्परायाः वनान्ते
स्फुटितकुसुमवृन्दः पारिभद्रो बभूव[१३९] ॥

कोविदारो विकासी स्यात् स्नेहाश्लेषेण[१४०] संमदात्[१४१] ।

यथा –

कान्तायाः कुन्ददन्त्याः कुसुमितविपिने कोविदाराश्रयस्थं
प्राणेशं पुष्पबाणाशुगहतवपुषं तत्पथं प्रेक्षमाणम् ।
आलिङ्गन्त्यास्तरुण्याः कमलदलदृशः[१४२] प्रेमवत्याः सुमत्याः
स्नेहाश्लेषान्मुदायं विकसति पुरतः सत्वरं कोविदारः ॥

नारीणां मधुमत्तानामालापेनापि चम्पकः ॥३५॥

यथा –

चम्पको मधुपभोगवर्जितो[१४३] लज्जयेव[१४४] न वकिासमृच्छति ।
सीधुपानरसिके सुकोमलालापकेन विकसत्यलं तव ॥

पाटि..

(१३६) भु4) 'विन्यासैः' (१३७) भु 2 म) 'दधद्भि-'

(१३८) भु3) 'स्वरददशनाभाप्रेक्षणेच्छोःवनान्ते' ।

(१३९) भु 3) 'बभूव' इत्यस्मात् परं 'कोविदारो' इत्यस्मात् पूर्वं च-पारिभद्रो मन्दारतरुः ।'' इति अधिकं दृश्यते । (१४०) भु4 म) 'स्तेहालिङ्गनकौतुकैः' ।

(१४१) भु3) 'संमदात्' इत्यस्मात् परं 'यथा' इत्यस्मात् पूर्वं च- 'कोविदारः कद्दाल इति ख्यातः ।'' इति अधिकं दृश्यते ।

(१४२) भु4 म) 'मनसिजरुचिरं' (१४३) भु4) -'मधुपरोषवर्जितो'

(१४४) भु1 भु2 भु4 म) 'लज्जया स्फुटतरोऽपि नाधुना ।'

प्रफुल्लो जायतेऽत्यन्तं कदम्ब: करजक्षतै: ।

यथा –

प्रियकधरणिजोऽयं पुष्पितो नैव काले
कुसुमचयमनोज्ञे किं वृतो दोषकारी (?) ।
१४५
इति ललितवयस्या वाचमाकर्ण्य नीपं
१४६
सपदि करजघातै: पुष्पवन्तं चकार ॥

ग्रन्थविस्तरभयात् सर्वपुष्पदोहदानि न लिखितानि । तानि च दशरूपकादिप्रबन्धेषु विज्ञेयानि ।

वसन्ते वर्णितव्यं स्यान् मदनोत्सवपूजनम् ॥३६॥
पुष्पकोकिलभृंगाद्यैस्तस्य दिग्विजयक्रम:

ऋतुक्रीडाविवेके–
१४७
वसन्ते चूर्णविक्षेपो व्यात्युक्षी मन्मथार्चनम् ॥३७॥
१४८ १४९
हिन्दोलरागगानं च पुष्पावचय एव च ।
दोलाकेलिविवाहश्च माधवीसहकारयो: ॥३८॥
१५०
अशोकबकुलादीनां तरूणां दोहदक्रिया ।

पा.टि.

---

(१४५) भु3) 'सकुतुकमितिसख्या' (१४६) भु3) 'फुल्लयामास काचित्'

(१४७) भु3) 'व्यात्यक्षी' भु2) 'व्याचक्षम्' भु4 म) 'वित्युक्षा'

(१४८) म) 'हिन्दोलो रानगानं' (१४९) भु4) 'पुष्पोपचय' म) 'पुष्पोपाच्चय'

(१५०) भु3) 'दोहदक्रिया' इत्यस्मात् परं 'तत्र' इत्यस्मात् पूर्वं च- ''व्यात्यक्षी-परस्परजलक्षेप: । हिन्दोलेति हिन्दोलाख्यरागेण तदन्तिके गानम् । पुष्पावचय: यथा कथंचित् पुष्पलवनं न तु हस्तेनादानं, तथा सति पुष्पावचाय इति स्यादिति प्रागुपपादितमेव ।'' इति अधिकं दृश्यते ।

तत्र मदनपूजा —

१५१

चैत्रे मासि त्रयोदश्यां शुक्लपक्षे शुभप्रदे ।।३९।।
शास्त्रोक्तेन क्रमेणैव पूजयेत् कामदैवतम् ।
पुष्पिताशोकमूले च तथैव बकुलाम्रयोः ।।४०।।
माल्याद्यैश्चामरैस्तत्र मण्डितव्यं यथोचितम् ।

१५२

चन्दनाद्युदकैः स्नानं मार्जनाद् विमलीकृतम् ।।४१।।
सच्चूर्णैर्वा परागैर्वा वाथवा कुङ्कुमादिभिः
सच्चित्रं कमलं तत्र लिखितं पट्टवाससि ।।४२।।

१५३

तन्मध्ये कलशं रक्षेन्मण्डितं पीतवाससा
दिव्यासने च सौवर्णे नानापुष्पोपशोभिते ।।४३।।
मदनप्रतिमां तत्र स्थापयेत् स्वर्णनिर्मिताम् ।
अथवा मान्मथं चित्रं सत्परागादिभिर्युतम् ।।४४।।

१५४

वसन्तं पञ्चबाणांश्च वरादां मदनप्रियाम् ।।

१५५

षोडशाद्युपचारैश्च स्तुतिभिः सह पूजयेत् ।।४५।।

अथ मदनदिग्विजयः —

कन्दर्पं वर्णयेत् भूपं पुष्पशस्त्रास्त्रधारिणम् ।

पाटि...

(१५१) भु2) ''शुभक्षणे (प्रदे)''
(१५२) भु4) 'मार्जनान्निर्मलीकृतम्' म) 'मार्जनं निर्मलीकृतम्'
(१५३) भु2) 'रक्षेत् पण्डितं' भु4) 'स्थाप्य मण्डितं'
(१५४) भु3 म) 'पुष्पबाणांश्च' भु4) 'पञ्चवासांश्च'
(१५५) भु4 म) 'षोडशाद्युपचारेण'

यथा मालतीमाधवे –✩ १५६

"शताङ्गमारुह्य स माधवानिलं
१५७
समागत: सूनमरन्दभूषणम् ।
जयाय योषिद्हृदयस्य मानसो-
द्भवाधिराज: सह केतकीषुभि: ॥"

ख्यात: सहचरस्तस्य वसन्त: सचिव: प्रिय: ॥४६॥

सहचरो यथा कुमारसंभवे–✩✩

"अथ सुललितयोषिद्भ्रूलताचारुशृङ्गं
रतिवलयपदाङ्के चापमासज्य कण्ठे ।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्र: १५८
शतमखमुपतस्थे प्राञ्जलि: पुष्पकेतु: ॥"

वसन्त: प्रियसचिवो यथा मालतीमाधवे–✩✩✩

"सरले सहासरागं परिहर रम्भोरु मुञ्च संरम्भम् ।
कुसुमविशिखोर्वीभृज्जयति (विजृम्भति ?) सह वसन्तसचिवेन ॥"

पत्तनं कामदेवस्योपवनं पुष्पकाननम् ॥

यथा मम –

कान्तोत्तमा कामुकसौख्यहीना कामाशुगैर्वेपथुयुक्तगात्री ।
१५९ १६०
विहर्तुमत्यन्तमनोरथेन गता वने मन्मथपत्तने सा ॥

पा.टि.

(१५६) म) 'माधवोऽनिलं' (१५७)म) 'सूममरन्दभूषणम्' (१५८)म) 'पुष्पधन्वा' (१५९) म) 'गते' (१६०) भु2) 'मन्मथपत्तनेन' भु4 म) 'मन्मथपत्तनेशा'

टि.

✩ पद्यमिदं भवभूतिकृते मालतीमाधवे नोपलभ्यते ।

✩✩ कालि-कुमा.II/64 .

✩✩✩ भव.मा.मा.VI/10 .

लताश्च वनिताः ख्यातास्तरवः पुरुषास्तथा ॥४७॥

१६१

यथा कुमारसम्भवे –☆

पर्याप्तपुष्पस्तबकास्तनाभ्यः स्फुरत्प्रवालौष्ठमनोहराभ्यः ।
लतावधूभ्यस्तरवोऽप्यवापुर्विनम्रशाखाभुजबन्धनानि ॥"

१६२

लतालयाः संप्रयुक्ता माधवीमण्डपादयः ।

लतागृहं यथा भारवौ --☆☆

"श्रीमल्लताभवनमोषधयः प्रदीपाः
शय्या नवानि हरिचन्दनपल्लवानि ।
१६३
अस्मिन् रतिश्रमनुदश्च सरोजवाताः
१३४ स्मर्तुं दिशन्ति न दिवः सुरसुन्दरीभ्यः ॥"

यथा च मम भृङ्गदूते –

एतद्वल्लीभवनमनिशं चन्द्रमोभानुयुक्तं १३५
सद्यः सान्द्रैर्बहुलविद्रलैर्यूयमासाद्य सख्यः ।
स्वच्छाभिर्वा वसनरुचिभिः शीघ्रमाच्छादयध्वं
नो पश्यामो मनसिजहतं पूर्णपीयूषभानुम् ॥

पा.टि.

(१६१) भु3) " यथा – कुमारसम्भवे- "लतावधूभ्यस्तरवोऽप्यवापुर्तिनम्रशाखाभुजबन्धनानि" इति । अत्र लतासु स्त्रीत्वारोपणे तरुषु पुंस्त्वारोप इत्यर्थः ।" इति ।

(१६२) भु4 म) 'लतागृहं वर्णितव्यं' (१६३) भु2 भु3) 'रतिश्रमजितश्च'

(१६४) भु2 भु3) 'यथा च मम भृंगदूते- एतद्वल्ली'त्यादि नोपलभ्यते ।

(१६५) म) 'माच्छाद्य'

टि.

☆ कालि. कुमा. ☆☆ भार. किरा.V/28 .

यथा च – १६६

वृषभानुसुतासङ्गसंकल्पमनसा हरि: ।
वल्लरीभवनं रम्यं दृष्टवान् यमुनातटे ॥

माधवीमण्डपो यथा –☆ 'रक्ताशोकश्चलकिसलय' इत्यादि ।

उन्मत्ता: कोकिला दूतास्तेप्यानकविशेषका: ।

ध्वन्यर्थेन दूतोदाहरणमुच्यते ऋतुसंहारे –☆☆

१६७

"पुंस्कोकिलै: कलवचोभिरुपात्तहर्षै:
कूजद्भिरुन्मदकराणि वचांसि धीरम् ।
लज्जान्वितं सविनयं हृदयं क्षणेन
पर्याकुलं कुलगृहेऽपि कृतं वधूनाम् ॥"

आनकविशेषो यथा माघे –●

"अतिसुरभिरभाजि पुष्पश्रियामतनुतरतयेव सन्तानक: ।
तरुणपरभृत: स्वनं रागिणामतनुत रतये वसन्तानक: ॥"

१६८

तमाल: कुञ्जर: ख्यातो घोटक: शुकसंचय: ।

तमालकुञ्जरो यथा मालतीमाधवे –▲ १६९

"तमालमातङ्गगतागतोऽयं काम: क्षितीश: सह पत्रिपद्भि: ।
१७० १७१
अशेषमादाय सुगाढमेव ददस्व दद्वासिसि दन्तघातम् ॥"

पा.टि...

(१६६) म) 'वृषभानुसुतासृष्टं-'
(१६७) भु2) - 'रुपान्तहर्षै:' म) -रुपात्तदर्पै:
(१६८) भु4) 'सुखसंचय:'
(१६९) भु4) 'पत्रिपत्ति:' म) 'पत्रिपत्तिभि:'
(१७०) भु2) 'सुखानिमेव'
(१७१) भु4 म) 'तद्वासिसि'

टि.

☆ कालि. मेघ.II/15. ☆☆ ऋतुVI/23. ● माघ. शिशुVI/67.
▲ पद्यमिदमुपलभ्यमाने भवभूतिरचिते मालतीमाधवे नोपलभ्यते ।

शुकाश्वो यथा तत्रैव —☆

''किं वा भणामि विच्छेददारुणायासकारिणि ।
कामराजशुकाश्वोऽस्ति (?) देहि मे परिरम्भणम् ॥''

पत्रिणः पत्तयश्चैव स्यन्दनो मलयानिलः ॥४९॥

पक्षिपदातिर्यथा — 'तमालमातङ्गगता' इत्यादि ।

मलयानिलो रथो यथा — 'शताङ्गमारुह्य' इत्यादि ।

१७२ १७३
सिञ्जिनी भृङ्गमालाऽस्य कौसुमं धनुरुत्तमम् ।
१७४ १७५
तथैक्षवं धनुः प्रोक्तं केतकी कुन्त एव च ॥५०॥
१७६
चारुणि मृदुपुष्पाणि वर्णनीयाः शरास्तथा ।

पौष्पधनुभृङ्गमालागुणोदाहरणं स्पष्टम् । ऐक्षवं धनुर्यथा— मृग्यम् ।

मृणालसूत्रमृदुपुष्पशरोदाहरणं कुमारसम्भवे —☆☆

'अमुना ननु पार्श्ववर्तिना जगदाज्ञां ससुरासुरं तव ।
विसतन्तुगुणस्य कारितं धनुषः पेलवपुष्पपत्रिणः ॥'

अथ कामसायकाः ग्रन्थान्तरे —● १७७

''अरविन्दमशोकं च चूतं च नवमालिका ॥५१॥
नीलोत्पलं च कामस्य पंच बाणाः प्रकीर्तिताः ॥

पा.टि...

(१७२) भु4) ''वर्णनीयं धनुः पौष्पं सिञ्जिनी भृङ्गमालिका'

(१७३) भु 1 भु 3) 'माला स्यात्' । (१७४) भु 4 म) 'वर्ण्यं'

(१७५) भु4 म) 'विसतन्तुर्गुणस्तथा'। (१७६) भु 1 भु 2 भु 3) 'चारुणि इत्यतः ग्रन्थान्तरे इत्यन्तं यावन्नास्ति । (१७७) भु 1 भु 2) 'नवमल्लिका' ।

टि.

☆ भव.मा.मा.VI/11 .☆☆ कालि. कुमा.IV/29 ● अमरकोषे प्रक्षिप्तश्लोकः पृ. ६

१७८

प्रधानभूत एतेषु शरश्चूतं सपल्लवम् ॥५२॥

यथा कुमारसम्भवे –☆

"हरितारुणचारुपल्लवः कलपुंस्कोकिलशब्दसूचितः ।
वद संप्रति कस्य बाणतां नवचूतप्रसवो गमिष्यति ॥"

यथा तत्रैव –☆☆

"नवप्रवालोद्गमचारुपत्रे नीते समाप्तिं नवचूतबाणे
निवेशयामास मधुद्विरेफान् नामाक्षराणीव मनोभवस्य ॥"

"सुललितमदयोषिद्" इत्यादि

यथा च श्रीगीतगोविन्दे –●

"पाणौ मा कुरु चूतसायकममुं मा चापमारोपय" इति ।

बहूदाहरणं बहुग्रन्थेषु दृष्टम् ।

क्रमेण पुष्पपञ्चवाणानां प्रभावो क्रमेण वक्ष्यते –●●

उन्मादनस्तापनश्च शोषणः स्तम्भनस्तथा ।
संमोहनश्च कामस्य पञ्चबाणाः प्रकीर्तिताः ॥५३॥

१७९

उन्मादत्वमदेहदेवनृपतेः पद्माशुगः संततं
तापत्वं च तथैव वञ्जुलशरश्चूताशुगः शुष्कताम् ।
स्तम्भत्वं नवमालिकास्त्रमखिलं वासन्तिकं कामिने
नीलेन्दीवरमार्गणो विरहिणे दत्ते महामोहताम् ।५४।

पा.टि.

(१७८) भु1 भु2 भु3) 'प्रधानभूत' इत्यतः 'बहुग्रन्थेषु दृष्टम्' इत्यन्तं यावन्नास्ति ।

(१७९) भु1 भु2 भु3) 'उन्मादत्वम्' इत्यादि पद्यं नास्ति ।

टि.

☆ कालि. कुमा.IV/14. ☆☆ कालि. कुमा.III/27.

● जय. गीत.III/4 ●● अमरकोषे प्रक्षिप्तश्लोकः पृ. ६

अथ कामपरमायुधमाह-रासपञ्चाध्यायीतोषणीटीकायाम्—

“वामता दुर्लभत्वं च स्त्रीणां या च निवारणा ।
१८०
तदेव पञ्चबाणस्य मन्येत परमायुधम् ॥५५॥
प्रोद्भेदं कदलीपत्रं स्फुरच्च केतनं चलत् ।

यथा माघे—☆ १८१

‘जगद्वशीकर्तुमिमाः स्मरस्य
प्रभावनीके तनवै जयन्तीः ।
इत्यस्य तेने कदलीर्मधुश्रीः
प्रभावनी केतनवैजयन्तीः ॥”

पताकाद्याः पल्लवाश्च पत्रं खड्गादिकं स्मृतम् ॥५६॥
१८२
ह्रीवेरं चामरं ख्यातं छत्रं त्वस्फुटकेसरम् ।

ह्रीवेरचामरोदाहरणं यथा मम—

ह्रीवेरकाभ्यामभिदीप्य (वीज्य?) मानं-
प्रकीर्णकाभ्यां स्मरराजराजम् ।
प्रसूनबाणासनबाणहस्तं १८३
रतिप्रियं तं सततं नमामि ॥

पा.टि.

(१८०) भु1 भु2) ‘मन्ये तत्परमायुधम्’ (१८१) भु1 भु2) ‘कर्तुमिव’ भु4) ‘कभूमीव’
(१८२) भु1 भु2 भु3) ‘ह्रीवेरं चामरं...केसरम् ।’ इतिकारिकांशः नोपलभ्यते ।
(१८३) भु3) ‘नामामि’ इत्यस्मात्परं ‘केसरच्छत्रोदाहरणम्’ इत्यस्मात्पूर्वं च- “ह्रीवेरं-बालं ह्रीवेरबर्हिष्ठोदीच्यं केशाम्बुनाम च” (अ.को. वनौ/८१२ पंक्तिः) इत्यमरोक्तं कुरुवेलीति लोके प्रसिद्धम् ।” इति अधिकतया दृश्यते ।

टि.

☆ माघ. शिशु.VI/69.

केसरछन्नोदाहरणं यथा — 'मलयपवनसङ्गीत्यादि ।

गुञ्जद्भृङ्गः शङ्खवादी मल्लिकामुकुलस्थितः ॥५७॥

यथा - 'मल्लिकामुकुले चण्डि !' इत्यादि ।

वर्ण्यः स्वनाढ्यो विहगो हरिद्रा-
वसन्तनामा कविभिर्वसन्ते ।
स मर्दलः कामविभोर्विजेतु- १८४
र्वियोगिनां धैर्यहरः प्रमुख्यः ॥५८॥

यथा मम—

कन्दर्पभूपस्य समीपवर्ती कश्चित्खगः सुस्वरशब्दरम्यः ।
१८५
तेने स्वनं मर्दलशब्दतुल्यं वियोगिनां धैर्यविनाशहेतुम् ॥
१८६ १८७
सुषिरो बाद्यभेदश्च कीचकध्वनिरावृतः ।

यथा रघुवंशे —☆

''स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम् ।
१८८
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥''

पा.टि.

---

(१८४) भु2) 'धैर्यहरःप्रमुग्धः' भु3) 'धैयलताकुठारः'
(१८५) म) 'मङ्गलशब्दतुल्यं' (१८६) भु3) 'कीचको मधुरध्वनिः' ।
(१८७) भु3) '-रावृतः' इत्यस्मात्परं 'यथा' इत्यस्मात्पूर्वं च- ''मधुरध्वनिः कीचको वेणुविशेषः । सुशिरवाद्यत्वेन वर्णनीयः । अत्र च -
''**वेणवः कीचकास्ते स्युः ये स्वनन्त्यनिलोद्धता**'' (वनौ./पंक्ति ९७१) इत्यमरोक्त्या यद्यपि स्वनयुक्त एव वेणुः कीचकशब्देनोच्यते इति मधुरध्वनिरिति पौनरुक्तत्यम् । तथापि महाकविसंप्रदायात् कीचकशब्देन केवलवेणुरपि कीचक उच्यते इति न पौनरुक्त्यम् ।'' इति अधिकं दृश्यते । (१८८) 'स्वकीयमुद्गीयमानं' ।

टि.

☆ कालि. रघु.IX/13

भ्रमरो गायकः श्रेष्ठः स्वनगीतिप्रसारकः ॥५९॥
चलत्पल्लवहस्ताग्राः कुसुमाभरणान्विताः ।
नृत्याभिनयसंयुक्ता लतावेशाङ्गनास्तथा[१८९][१९०] ॥६०॥

क्रमेणोदाहरणं तत्रैव–☆

"श्रुतिसुखभ्रमरस्वनगीतयः कुसुमकेसरदन्तरुचो बभुः ।
उपवनान्तलताः पवनाहतैः किसलयैः[१९१] सलयैरिव पाणिभिः[१९२] ॥"

[१९३]
इत्येवं कामराजस्य वियोगिभयदायकम् ।
विजयोत्सवदिङ्मात्रं कथितं सर्वसंमतम् ॥६१॥

इति वसन्त ऋतुः ।

पा.टि.

(१८९) म) 'लतावेश्याङ्गनास्तथा'

(१९०) भु3) 'लावावेशांगनास्तथा' इत्यस्मात्परं क्रमेणोदाहरणम् इत्यस्मात्पूर्वं च- भ्रमरो गायको वर्णनीयः । चलदित्यादिविशेषणविशिष्टाः लताश्च वेश्याङ्गना वर्णनीयाः । वेशो गणिकाग्रामस्तत्र भवा अङ्गना वेशाङ्गनाः वेश्या इत्यर्थः । प्रयुक्तं च **प्राचीनेन कविना-**

"परधनरत्नहृदयहरा का सत्कविता वेशवनिता च ।"

इति वेशे भवा वेश्येति । वेश्यापदव्युत्पत्तिरपि बोध्या दिगादित्वाद् यत् ।" इति अधिकं दृश्यते ।

(१९१) भु2) 'किसलयै मलयै-' भु4) 'सकिशलैः कुसुमै-'

(१९२) भु3. म) 'पाणिभिः' इत्यस्मात्परम् 'इत्येवम्' इत्यस्मात्पूर्वं च- "यमकश्लेषादौ शकारसकारयोडलयोः पवर्गान्तस्थयोर्बवकारयोश्चाभेदात् किसलयैरिति सकारस्य पाठो न दूष्यति ।" इति अधिकं दृश्यते ।

(१९३) भु 4 म) इत्येवं....सर्वसंमतम् । इति कारिकायाः स्थाने- 'इत्येवं कामराजदिग्यात्रोत्सवो दिङ्मात्रः कथितः । म पाठे) दिङ्मात्रोपवर्णितः ।' इति दृश्यते ।

टि.

☆ कालि. रघु. IX/35

[२०२] **प्रपा यथा ममैव –**

कान्ताङ्गसङ्गरसवर्जितखिन्नगात्र: [२०३]
कामानलेन परिदग्धसुचित्तकाष्ठ: ।
मार्गे प्रपां [२०४] परिमलां समवेक्ष्य पान्थ-
[२०५] स्तृष्णातिसक्तहृदय: प्रविवेश तत्र ॥

स्त्री यथा ऋतुसंहारे –☆

"सविभ्रमै: सस्मितजिह्मवीक्षितै-
र्विलासवत्यो मनसि प्रसङ्गिणाम् (प्रवासिनाम्?) ।
अनङ्गसन्दीपनमाशु कुर्वते
यथा प्रदोषा: शशितारभूषणा: ॥"

शीतलस्थानं यथा तत्रैव –☆☆

"कमलवनचिताम्भ: पाटलामोदरम्य:
सुखसलिलनिषेक: सेव्यचन्द्रांशुहार: ।
व्रजतु तव निदाघ: कामिनीभि: समेतो [२०६]
निशि सुललितगात्रै:(गीते ?) हर्म्यपृष्ठे सुखेन ॥"

[२०७]
चन्द्रकान्तिसमो हारस्तन्वंशुकसुभूषणम् ॥६६॥

पा.टि.

(२०२) भु4 .म) 'प्रपा यथा ममैव' इत्यस्मादारभ्य 'प्रविवेश तत्र' इत्यन्तं यावन्नास्ति ।
(२०३)भु3) 'परिदग्धमन: समित्क:' (२०४) भु3) 'सुविमलं'
(२०५) भु3) 'तृष्णाभरार्त्तहृदय:' (२०६) भु4) 'समन्तो' म) 'समन्तात्'
(२०७) भु1) 'हार: स्तनंशुक-' भु2) 'हार: स्तथाशुंक'-

टि.

☆ तत्रैव।/12.

☆☆ तत्रैव।/28.

हारो यथा -✩ 'कमलवने' त्यादि ।

तन्वंशुकं यथा तत्रैव – ✩✩

"समुद्गतस्वेदचिताङ्गसन्धयो
विमुच्य वासांसि गुरूणि सांप्रतम् ।
स्तनेषु तन्वंशुकमुन्नतस्तना
निवेशयन्ते प्रमदाः सयौवनाः ॥"

सुभूषणं यथा- मृग्यम् ।

सदावगाहनं चैव दिनान्ते रम्यता सुखम् ।

यथा –● 'प्रचण्डसूर्ये'[२०८] त्यादि ।

आम्रादेः फलपाकत्वं[२०९] सक्तु पेयं सरस्तथा ॥६७॥

आम्रफलपाको यथा मम –

सत्पक्वचूतफलमञ्जुलतां विलोक्य बालागणप्रबलरागगुणप्रसन्ना ।
वक्षोजयोरुपमितां परिकल्पयन्त्याः[२११] सख्या गिरा सुरसपूरितयोत्सुकासीत्[२१२] ॥

पा.टि.

(२०८) भु3) 'प्रचण्डसूर्य.....प्रिये', इति संपूर्णं पद्यमस्ति ।

(२०९) भु3) 'पक्वफलता' (२१०) भु2 भु4 म) 'परिकल्पयन्ती'

(२११) भु1 भु4 म) '-तया सुखासीत्' भु 3) 'तयोत्सुकासीत्' इत्यस्मात्परं 'सक्तु' इत्यस्मात्पूर्वं च- "बालागणस्यात्मनि यः प्रबलः स्नेहः स एव गुणः स्पृहणीयो धर्मः, तेनात्मनस्तद्वत्ताभिमानेन प्रसन्ना काचिन्नायिकेतिशेषः ।वक्षोजयोः स्वकुचयोः सम्बन्धिनाम् उपमिताम्, अर्थात् सख्यैव तत्कुचमञ्जुलतया समीकृतां सत्साधु यथा स्यात्तथा पक्वस्य परिणतस्य चूतफलस्य मञ्जुलतां विलोक्य वर्णतो वैपुल्यतश्च शोभां निरीक्ष्य उपमिताम् अर्थात् स्वयमेव ससखीकुचमञ्जुलतोपमितां कल्पयन्त्याः सख्याः सुरसपूरितया सुष्टुशृंगाररसव्यञ्जकतया तदुद्दीपिकया वा गिरा परिहासवचनेन इदं परिणतचूतमाम्रफलं त्वदीयकुचवद् यूनां मनोहरं भवति' इत्यादि रूपेण उत्सुका प्रियसङ्गमोत्कण्ठावती आसीत् ।" इति अधिकं दृश्यते ।

टि.

✩ तत्रैव.I/ 28. ✩✩ तत्रैव I/7. ● तत्रैव.I/1.

२१२
सक्तुर्यथा-नैषधीये—☆ २१३ २१४ २१५ २१६

"प्रतिहट्टपथे घरट्टजात् पथिकाह्लादनसक्तुसौरभे ।
२१७ २९७ २१८
कलहान्न घनाद् यदुत्थितादधुनाप्युज्झति घर्घरस्वरः ॥"

२१९
पेयम् - स्पष्टम् । सरो यथा मम,—

सुललितकलहंसैः कामिनीसंगहृष्टै-
र्मदनमदकलाढ्यैरावृतं सत्तडागम् ।
कमलवनरसज्ञैः शोभमानं द्विरेफै-
२२०
र्मधुरसलिलपूर्णं दृष्टवान् कश्चिदेव ॥

पा.टि.

---

(२१२) भु3) 'सक्तवो यथा'
(२१४) म) 'पथिकाह्लानद-'
म) 'सक्तुसौरभैः' ।
(२१३) भु1 भु2 भु4) 'घरट्टजा'
(२१५) भु2) '-सौक्तसौरभे'
(२९७) भु1) 'दधुनाप्युच्चतत्'
(२१६) भु2 भु4 म) सतिरस्कृतकामिनोरहोऽनुनयामास बलेन कामिनीम्'
(२१८) भु1) 'घर्घरस्वनः' भु3) 'स्वरः' इत्यस्मात्परं 'पेयम्' इत्यस्मात्च- "अत्र उत्तरार्धस्थाने सतिरस्कृतकामिनोरहोऽनुनिनायप्रबलंव्यथोऽबलाम्' इति पाठः स्थितः क्वचित्पुस्तके । स चासंगततया त्याज्यः ।" इत्यधिकमस्ति ।
(२१९) भु3) 'पेयम् - स्पष्टम्' इत्यस्य स्थाने- पेयं प्रपानकपयः' पेटीशीतल सलिलप्रभृति । यथा-**दीक्षितगोपीनाथमहापात्रस्य**-
उपगच्छन्ति तपःसमये सुखिनः पानं च शिशिरसलिलं च ।
उपयुञ्जते यथेष्टं मृद्वीं स्वाद्वीं पयःपटीम् ॥
पानं प्रपानकम् ।" इति
(२२०) भु3) 'तूर्णमभ्येति पान्थः । अभ्येति अभिमुखं गच्छति ।'

टि.

☆ श्रीहर्ष नैष.॥ 85

२२१

स्फोटनं गिरिशृङ्गादेर्वृक्षादेः शुष्कपर्णता ।

स्पष्टमुदाहरणम् । २२२

व्यजनं वल्लकीनाद औशीरं व्यजनं तथा ॥६६॥

व्यजनं यथा ऋतुसंहारे --☆

सचन्दनाम्बुव्यजनोद्भवानिलैः सहारयष्टिस्तनमण्डलार्पणैः ।
सवल्लकीकाकलिगीतनिःस्वनैः प्रबोध्यते सुप्त इवाद्य मन्मथः ॥

पा.टि...

(२२१) भु1 भु2) पर्णशुष्कता भु3) 'पर्णशुष्कता' इत्यस्मात परं व्यजनम्' इत्यस्मात् पूर्वं च स्पष्टमुदाहरणमि'त्यस्यस्थाने "आदिना लतानां ग्रहणं यथा-- वासुदेवरथदीक्षितराजगुरोरष्टदुर्गीयस्य --

"दीर्यन्ते भूमिभागा गुरुगिरिदृषदो जर्जरीभूत्य भूयः
शीर्यन्ते यत्रतापान्मृदुलदलभृतां का कथा भूरुहाणाम् ।
तस्योद्दामप्रतापद्युतिभरडमरप्लुष्टतामिस्रसृष्टेः
कष्टं लज्जाविदः किं न भवति सवितुः कैरवे वैरवेगः ॥"

उद्दामो ग्रष्मर्तुः प्रचण्डः प्रतापः प्रकृष्टदाहशक्तिर्यस्येति द्युतिभरविशेषणम् ।" इति ।

(२२२) भु 3) 'तथा' इत्यस्मात्परं 'यथा ऋतुसंहारे' इत्यस्मात्पूर्वं च- व्यजनं तालवृन्तम् । यथा दीक्षितमहापात्रस्य--

"तालवृन्तैस्तपे धन्याः कन्यकाकरलालितैः ।
वीज्यमानाः क्षणमिव क्षपयन्ति दिवानिशम् ॥"

दिवा च निशा चेति द्वन्द्वैकत्वम् अधिकरणशक्तिप्रधानस्यापि दिवाशब्दस्य सामान्यतः शक्तिमत्परत्वस्य दिवामन्या रात्रिरित्यादौ दर्शनात् कर्मपरत्वम् । 'औशीरव्यजनैर्धन्या' इति 'दिवा तपे' इति वा पाठ्यम् । तदा तु दिवा दिवसं पूर्ववत् कर्मत्वशक्तिपरत्वं दिवाशब्दस्य बोध्यम् । वल्लकीनादसहिततालवृन्तो" इति अधिकं दृश्यते ।

टि.

☆ कालि. ऋतु.1/8

[२२३]वल्लकीनादो यथा– तत्रैव । औशीरव्यजनं यथा– मृग्यम् ।

दिग्धूमवर्णतोद्धतधूलयः पथिकश्रमः ।

[२२४]दिग्धूमवर्णता [२२५]यथा मम –

दिग्धूम[२२६]वर्णतां वीक्ष्य वामाक्षी कापि कामिनी ।
सखि यास्याव आराममित्युक्त्वा हृष्टमानसा ॥

उद्धतधूलिर्यथा –☆

"असह्यवातोद्धतरेणुमण्डला प्रचण्डसूर्यातपतापिता मही ।
न शक्यते द्रष्टुमपि प्रवासिभिः प्रियावियोगानलदग्धमानसैः ॥"

पथिकश्रमो [२२७]यथा - मम –

स्वेदावगाहितः पान्थो दुःखितस्तप्तपांशुभिः ।
[२२८]श्रमयुक्तः पीडितांघ्रिः शुष्कास्यः 'सप्तपांशुभिः (तपनांशुभिः?) ॥

पाटि...

(२२३) भु3) 'वल्लकीनादो' इत्यस्मादारभ्य 'मृग्यम्' इत्यन्तं यावन्नोपलभ्यते ।
(२२४) भु1) 'दिग्धूमवर्णत्वम्' भु3) 'दिशां धूम्रता' भु4) 'दिग्धूमवर्णितम्'
(२२५) भु1) यथा मम– दिग्धूम..............................हृष्टमानसा । इत्यादिस्थाने-'यथा दीक्षितगोपीनाथमहापात्रस्य' इत्यतः परं यत्पद्यं लिखितमासीत् तदेव कीटदष्टम् (भु 3) यथा मम–दिग्धूम...........हृष्टमानसा' इत्यादिस्थाने यथा तस्यैव दिग्धूम....मानसा ।

"ग्रीष्मे दिशो धूम्ररूचः समीक्ष्य कन्दर्पवीरेण बलोत्तरेण ।
पुरा ततज्यं जगतां जयाशां विपर्ययात्कार्मुकमुज्झितं किम् ? ॥"

पुरा बलोत्तरेणापि इत्यन्वयः ।" इति । (२२६) भु2 भु4) '-वर्णिताम्' ।
(२२७) भु1 भु3) 'यथा-दीक्षितगोपीनाथमहापात्रस्यैव–

"प्रियाविरहसन्तापद्विगुणैस्तपनातपैः ।
तपे तप्ततरः श्रान्तः पान्थः छायां चावीक्षते ॥"

तपे-ग्रीष्मर्तौ ।" इति ।
(२२८) भु4) श्रमयुक्तः' इत्यस्मादारभ्य 'पांशुभिः' इत्यन्तं यावन्नोपलभ्यते ।

टि.

☆ कालि. ऋतु.1/10.

जलयन्त्रगृहं रम्यं गवाक्षानिलसेवनम् ।[२२९]

जलयन्त्र गृहं यथा ऋतुसंहारे – ☆

निशाः शशांकक्षतनीलराजयः
क्वचिद् विचित्रं जलयन्त्रमन्दिरम् ।
[२३०] मणिप्रवेकाः सरसं च चन्दनं
शुचौ प्रिये यान्ति जनस्य सेव्यताम् ॥[२३१]

[२३२] **गवाक्षानिलसेवनं यथा-मम –** [२३३]

कान्तसंगसुरतश्रमखिन्नाकामिनी ललितकोमलगात्री ।[२३४]
कांक्षति स्म पवनायनवातंकापि शीतलयुतं च निशान्ते ॥

पा.टि.

(२२९) भु 3) 'सेवनम्' इत्यस्मात् परं 'जल' इत्यस्मात् पूर्वं च 'वर्ण्यमिति शेषः' इत्यधिकम् । (२३०) भु 2 भु 4) 'मणिप्रकाराः'

(२३१) भु 1 भु 3) 'सेव्यताम्' इत्यस्मात्परं 'गवाक्षा' इत्यस्मात्पूर्वं च -
"'मणिप्रवेका :- रत्नश्रेष्ठानि ।
क्लीवे प्रधानं प्रमुखं प्रवेकानुत्तमोत्तमाः ।
मुख्यवर्यवरेण्याश्च प्रवहोऽनवरार्ध्यवत् ।।अ:को विशेपनिऽन२९३८-३१।"
इत्यधिकमस्ति ।

(२३२) भु 3) 'मम-कान्तसंग....निशान्ते' इत्यादि पद्यस्य स्थाने 'कपीतनं शिरीषकुसुमम्' । शिरीषस्तु कपीतनइत्यमरः । वातवर्त्मनि-वातायने ।" इत्यधिकं दृश्यते । (२३३) भु 4) लुलितकोमलगीतिः

(२३४) भु 1) निशान्ते इत्यस्मात् परं यथा वा **दीक्षितमहापात्रस्यैव** –
'वेश्मकर्मसु तपागमखिन्ना कापि नूतनकपीतनमृद्वी ।
घर्मवारि परितः समुदितं वातवर्त्मनि शमं प्रणिनाय ।।"

टि.

☆ कालि. ऋतु. I/2

२३५

स्नानादिभोगहेतुत्वं जलक्रीडा प्रभा सुखम् ॥

स्नानादिभोगहेतुत्वं यथा माघे –✩

"नारीभिर्गुरुजघनस्थलाहताना-
मास्यश्रीविजितविकासिवारिजानाम् ।
लोलत्वादपहरतां तदङ्गरागं २३६
संजज्ञे सकलुष आशयो जलानाम् ॥"

जलक्रीडा यथा- तत्रैव ।

प्रभा यथा- ऋतुसंहारे –✩✩ 'असह्यवातोद्धतरेणुमण्डले' त्यादि ।

चन्दनालेपनं चैव युवतीनां पयोधरे ॥६८॥

यथा ऋतुसंहारे –●

"पयोधराश्चन्दनपङ्कचर्चिता-
स्तुषारगौरार्पितहारशेखराः ।
नितम्बदेशाश्च सहेममेखलाः २३७
प्रकुर्वते कस्य मनो न सोत्सुकम् ॥"

पाटि.

---

(२३५) भु3) 'सुखम्' इत्यस्मात्परं 'स्नानादि-' इत्यस्मात्पूर्वं च -"स्नानादिसुख हेतुत्वं ग्रीष्मर्तोः जलक्रीडा उज्ज्वलाङ्गकान्तित्वं च वर्णनीयमित्यर्थः ।" इति अधिकं दृश्यते ।

(२३६) भु3) 'जलानाम्' इत्यस्मात्परं 'जलक्रीडा' इत्यस्मात्पूर्वं च- "लोलत्वात् चञ्चलत्वात्, कामुकपक्षे सतृष्णत्वात् । जलानामाशयो ह्रदः डलयोरैक्याज्जडानामाशयोऽभिप्रायः । छन्दोऽभिप्राय आशय इत्यमरः । इति अधिकं दृश्यते ।

(२३७) भु3) 'सोत्सुकम्' इत्यस्मात्परं 'पाटली' इत्यस्मात्पूर्वं च- 'सोत्सुकं सौत्सुक्य मित्यर्थः । उत्सुकपदस्य भावप्रधानो निर्देशः । अत एव प्रयोगादौ औत्सुक्येऽपि वृत्तिर्वा ।" इति अधिकं दृश्यते ।

टि.

✩ माघ. शिशु. VIII/47 . ✩✩ कालि. ऋतु. I/10 . ● कालि. ऋतु. I/6 .

पाटलीमल्लिकाधात्रीशाल्मलीक्रमुकादयः ।
तृणराजश्च बाणश्च बिल्वकाश्मीरतिन्दुकाः ॥६९॥
मन्दारो धातुकी पद्मं शिरीषाम्रातकौ स्मृतौ ।

एतेषामुदाहरणं काव्यादौ मृगयम् ।

नाट्यं युद्धं च यात्रां च मृगयां मधुपानकम् ॥७०॥
२३८ २३९
सुरतं तत्र ग्रीष्मे च भ्रमणं नैव वर्णयेत् ॥

इति ग्रीष्म ऋतुः ।

अथ वर्षा ऋतुः ।

सजला नीलमेघाश्च वर्णनीया घनागमे ॥७१॥

यथा ऋतुसंहारे –✩

'नितान्तनीलोत्पलपत्रकान्तिभिः
क्वचित्प्रभिन्नाञ्जनराशिसंनिभैः ।
क्वचित् सगर्भप्रमदास्तनप्रभैः
समाचितं व्योम घनैः समन्ततः ॥''

पा.टि...

(२३८) भु3) 'सुरतं भ्रमणं नैव ग्रीष्मर्तावुपवर्णयेत्'

(२३९) भु4 म) 'वर्णयेत्' इत्यस्मात् परम् 'इति' इत्यस्मात् पूर्वं च- कुत्रचिन्मधुपानं वर्णनीयम्- यथा ऋतुसंहारे –(1/3)

''सुवासितं हर्म्यतलं मनोहरं
प्रियामुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रिगीतं मदनस्य दीपनं
शुचौ निशीथेऽनुभवन्ति कामिनः ।''

इति अधिकं दृश्यते ।

टि. ___

✩ कालि. ऋतु. ॥/2 .

नभ:संचरणं वर्ण्यं घनानां स्तनितानि च ।

यथा तत्रैव-✩ 'नितान्तनीलोत्पले' त्यादि ।

स्तनितं यथा तत्रैव –✩✩

“तृषाकुलैश्चातकपक्षिणां कुलैः
प्रयाचितास्तोयभरावलम्बिनः ।
प्रयान्ति मन्दं बहुवारिवर्षिणो २४०
बलाहकाः श्रोत्रमनोहरस्वनाः ॥”

गिरिकूटे निवासित्वं जलदानां निरन्तरम् ॥७२॥

यथा तत्रैव –● .

“सविद्युदम्भोधरचुम्बितोपलाः
समाचिताः प्रस्रवणैः समन्ततः ।
प्रवृत्तनृत्यैः शिखिभिः समाकुलाः
समुत्सुकत्वं जनयन्ति भूधराः ।”

२४१
मेघज्योतिश्च विस्तीर्णं सर्वत्र बहुलं तमः ।
२४२
रमणीया पयोवृष्टिः करका चपलाप्रभा ॥७३॥
२४३

एतेषामुदाहरणं स्पष्टम् । २४४

इन्द्रचापप्रकाशित्वं सूर्यादीनामदर्शनम् ।

पा.टि.

---

(२४०) भु 3) 'हरस्वनाः' इत्यस्मात्परं 'गिरिकूटे' इत्यस्मात्पूर्वं च-तोयभारेण अवलम्बिनः अधोलम्बमानान्' इति अधिकं दृश्यते ।(२४१) भु4 .म) 'विस्तीर्णा' ।

(२४२) भु 1 भु 4. म) 'जलवृष्टी रम्यमाणा' भु2) 'रम्यमाशा'

(२४३) भु3) 'मेघसन्देशादौ स्पष्टम्' ।

(२४४) भु3) 'मदर्शनम्' इत्यस्मात्परं 'यथा' इत्यस्मात्पूर्वं च - “सूर्यादीनामित्यादिपदाच्चन्द्रतारकाग्रहाणां संग्रहः ।” इति अधिकं दृश्यते ।

टि.

✩ तत्रैव I/2 . ✩✩ तत्रैव .II/3 . ● तत्रैव .II./16 .

यथा ऋतुसंहारे –☆

“तडिल्लताशक्रधनुर्विभूषिताः
पयोधरास्तोयभरावलम्बिनः ।
स्त्रियश्च कांचीमणिकुण्डलोज्ज्वला
हरन्ति चेतो युगपत् प्रवासिनाम् ॥”

वेपथुर्वज्रघातैश्च गिरिशृङ्गस्य दारणम् ॥७४॥
गिरिकाननरम्यत्वं जलनिर्झरकर्दमाः ।

स्पष्टमुदाहरणम् ।

प्रवाहोत्कटनादश्च पवनस्यैव वेगिता ॥७५॥

प्रवाहोत्कटनादः स्पष्टः । पवनवेगिता यथा - ऋतुसंहारे –☆☆

तनुजलकणसङ्गात् शीततामादधानः
कुसुमभरनतानां लास्यदः पादपानाम् ।
जनितरुचिरगन्धः केतकीनां रजोभिः २४५ .
प्रहरति च नभस्वान् प्रोषितानां मनांसि ॥
२४६

वृक्षादीनां च भग्नत्वं नद्यादेरुन्नता गतेः ।

यथा तत्रैव –●

“निपातयन्त्यः परितस्तटद्रुमान्
विवृद्धवेगैः सलिलैरनिर्मलैः ।
स्त्रियः प्रहृष्टा इव जातविभ्रमाः
प्रयान्ति नद्यस्त्वरितं पयोनिधिम् ॥”

पा.टि...

(२४५) भु3) ‘मनांसि’ इत्यस्मात्परं ‘वृक्षादीनाम्’ इत्यस्मात्पूर्वं च-
“जनितः रुचिरगन्धो यस्येति नभस्वतो विशेषणम् ।” इत्यधिकमस्ति ।

(२४६) भु3) ‘गतेः’ इत्यस्मात् परं ‘यथा’ इत्यस्मात् पूर्वंच-
“प्रथमादि पदान्नदीकूलादेः, द्वितीयादिपदाच्च कृत्रिम.....दीनां संग्रहः ।”
इति कीटदष्ट टिप्पणी दृश्यते ।

टि. ---

☆ तत्रैव.II/20 . ☆☆ तत्रैव.II/27 . ● तत्रैव.II/7 .

सुरतिर्जलजन्तूनां[२४७] भेकानामुच्चनिस्वनः[२४८] ॥७६॥

उदाहरण स्पष्टम्[२४९] ।

गतिस्तु कलहंसानां त्वरितं मानसं प्रति ।

यथा- घटकर्परकाव्ये –☆

‘हंसपंक्तिरपि नाथ संप्रति प्रस्थिता वियति मानसं प्रति ।
चातकोऽपि तृषितोऽम्बु[२५०] याचते दुःखिता पथिक सा प्रिया च ते ॥’’

घनमुक्तजलै[२५१] रम्यैश्चातकानां प्रहृष्टता ॥७७॥

यथा ऋतुसंहारे –☆☆ ‘तृषाकुलैरि’[२५२] त्यादि ।

पा.टि.

(२४७) भु3) ‘सुरतं जलजन्तूनां’ (२४८) भु3) ‘भेकानां चोच्चनिस्वनः’

(२४९) भु3) ‘उदाहरणं स्पष्टम्’ इत्यत्र ‘भेकानामुच्चध्वनिर्यथा- कस्यचित् कवेः–

‘एक एव विषमो नवमेघः सोपि वर्षतितरामनिवारम् ।
तदन्न चेदविरतं प्लवशब्दाः पूर्णमद्य सुतनोः शतमब्दाः ॥’’

अतिशयेन वर्षति वर्षतितराम् ।अतिशयनेति इत्यनुवृत्तौ ।तिङ्श्चेति चानुवृत्तौ ‘द्विवः न विभज्योपददेतरवीयसुनाविति तरप् ।’ तस्य’ तरप्तमपौ ‘घ’ इति घसंज्ञायां किमे तिङव्ययघादित्यादिना षामुप्रत्ययः ।तद्धितान्तत्वात् प्रातिपदिकसंज्ञा, उत्सर्गिकं नपुंसकप्रथमैकवचनम् ।तस्य तु ‘स्व मोर्नपुंसकादिति लोपः’ (पाः अष्टा ७.१.२३) इति ।

(२५०) भु2) ‘तृषितोऽस्य याचते’ भु3) ‘तृषितोऽनुयाचते’

(२५१) भु3) ‘घनमुक्तैर्जलैः स्वच्छैश्चा-’ (२५२) भु3) ‘तृषाकुलैरित्यादि’ इत्यस्मात्परं ‘महीघ्र-’ इत्यस्मात्पूर्वं च- **‘मेघसंदेशे च–** अम्भोविन्दुग्रहणरभसांश्चातकान् वीक्ष्यमाण’ इ‌त्यादि अधिकं दृश्यते ।

टि.

☆ घट. घटक9/ . ☆☆ कालि. ऋतु.II/3 .

महीध्रशिखरे रम्ये पादपे चार्जुनादिके ।।
मत्तनृत्यं मयूराणां मयूरीस्नेहवर्धनम् ।।७८।।
२५३

पर्वतशिखरे मयूरनृत्यं यथा – 'सविद्युदम्भोधरे'त्यादि । शेषं मृग्यम् ।
२५४ २५५ २५६

२५७ घृष्टीनां भल्लुकादीनां विलासः सुखहेतुकः ।

यथा – मृग्यम् ।

बलाकानां च संचारः शब्दो दात्यूहबर्हिणाम् ।।७९।।
२५८

उदाहरणमूह्यम् । २५९ २६०

२६१ कृषिकाणां प्रमोदश्च इन्द्रगोपाः समाकुलाः ।

कृषिकाणां प्रमोदः स्पष्टः ।

पा.टि.

(२५३) भु3) '-धरे त्यादि' इत्यस्मात्परं शेषम्' इत्यस्मात्पूर्वं च - ''यथा वा कस्यचित्-
''उपरि घनं घनपटलं तिर्यग् गिरयोरपि नर्तन्ति मयूराः ।
क्षितिरपि कन्दलधवला दृष्टिं पथिकः क्व पातयतु ।।
इति अधिकं दृश्यते ।

(२५४) भु1 भु3) 'घृष्ट्यच्छ-' (२५५) भु4) 'चोल्लूकादीनां'

(२५६) भु3) 'सुखसाधनम्' (२५७) भु3) 'उदाहरणंमृग्यम्

(२५८) भु3) ''बलाकासंचारो यथा मेघसंदेशे- (1/9)
''मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगर्वः ।
गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ।।''
दात्यूहशब्दोदाहरणमूह्यम् ।'' इति दृश्यते ।

(२५९) भु1 भु2 भु4 .म) 'प्रमोदत्वम्' (२६०) भु3) 'शक्रगोपसमाकुलाः'

(२६१) भु3) 'कृषिकप्रमोदो यथा- मेघसन्देशे –(1/16)
''त्वयायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।'' इति ।

इन्द्रगोपो यथा- **ऋतुसंहारे** –☆

"प्रभिन्नवैदूर्यनिभैस्तृणाङ्कुरैः समाचिता प्रोत्थितकन्दलीदलैः ।
विभाति कण्ठे वररत्नभूषिता वराङ्गनेव क्षितिरिन्द्रगोपकैः ॥"

२६२
जातं जलदशब्देभ्यो रत्नं विदूरभूमिषु ॥८०॥
२६३
'विदूरो रत्नपर्वते' इति शब्दार्णवे ।

यथा **कुमारसम्भवे** –☆☆

"तया दुहित्रा सुतरां सवित्री स्फुरत्प्रभामण्डलया चकासे ।
विदूरभूमिर्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेव ॥"

२६४
पद्मादेर्मज्जनं चैव नारीणां प्रौढकामता ।
२६५
पद्मादिमज्जनं - यथा- मृग्यम् ।

पा.टि.

---

(२६२) भु3) **'जातं विदूरधरणौ वैदुर्यघनगर्जितात्'** ।
(२६३) भु 3) 'शब्दार्णवे' इत्यस्मात्परं 'यथा' इत्यस्मात्पूर्वं च- "वैयाकरणैस्तु बालवायो नाम नगरं वैदुर्यरत्नस्याकरत्वेन प्रसिद्धम् (?) पक्षे दूरदेशः । तच्च वार्तिकं 'बालवायोर्विदूरं च प्रकृत्यन्तरमेव वेति' बालवा...... शब्दः विदूरं आदेशं लभत इति तदर्थः । विदूर इति प्रकृत्यन्तरं वा इत्यर्थः ।" इति अधिकं दृश्यते ।
(२६४) भु3) 'प्रौढकामता' इत्यस्मात्परं 'पद्मादि-' इत्यस्मात्पूर्वं च-'आदिपदात्कुमुद कल्हारसंग्रहः ।'इत्यधिकमस्ति । (२६५) भु3) 'यथा कस्यचित्- (हनु.हनुम् V/64)

"यत्त्वनेत्रसमानकान्तिसलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी ।
ये च त्वद्गमनानुकारिगतयस्ते राजहंसा गता-
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥"

इति दृश्यते

टि.

☆ तत्रैव.II/5 . ☆☆ कालि. कुमा.I/24

नारीणां प्रौढकामता-यथा- ऋतुसंहारे – ✰

“पयोधरैर्भीमगभीरनिस्वनैर्ध्वनद्भिरुद्वेजितचेतसो[२६६] भृशम् ।
कृतापराधानपि योषितः प्रियान् परिष्वजन्ते शयने निरन्तरम् ॥”

रसिकानां यौवतानां प्रेमाधिक्यं च वर्णयेत् ॥८१॥

यथा – तत्रैव – ✰✰

‘‘शिरोरुहैः श्रोणितटावलम्बिभिः कृतावतंसैः कुसुमैः सुगन्धिभिः ।
स्तनैः सहारैर्वदनैः ससीधुभिः[२६७] स्त्रियो रतिं संजनयन्ति कामिनाम्[२६८] ॥”

रसोक्तिभिर्वर्णितव्यो रम्ये हर्म्ये रतोत्सवः ।

काव्यादावुदाहरणं ज्ञेयम् ।

चारुतां कन्दलोत्पत्ते वनशोभां च वर्णयेत्[२६९] ॥८२॥

पा.टि.

---

(२६६) म) ‘ज्वलद्भिरुद्वेजितचेतसो’ (२६७) भु 3) ‘ससाधुभिः’ ।

(२६८) भु 3) ‘कामिनाम्’ इत्यस्मात्परं रसोक्ति’ इत्यस्मात्पूर्वं च- ससाधुभिरिति साध्यालंकारयुक्तैः, पाठान्तरं वा मृग्यम्’ इति अधिकं दृश्यते ।

(२६९) भु 3) ‘वर्णयेत्’ इत्यस्मात् परं ‘कन्दलो-’ इत्यस्मात् पूर्वं च– ‘कन्दलानि कन्दलीकुसुमानि’ इति अधिकं वर्तते

टि.

✰ कालि. ऋतु. II/11 ✰✰ कालि. ऋतु. II/18.

कन्दलोत्पत्तिर्यथा—☆ 'प्रभिन्नवैदूर्ये' त्यादि[२७०] ।

वनशोभा यथा तत्रैव—☆☆

"तृणोत्तमैरुद्गतकोमलाङ्कुरैर्नितान्तनीलैर्हरिणीमुखक्षतैः ।
वनानि रम्याणि हरन्ति मानसं विभूषितान्युद्गतपल्लवैर्द्रुमैः ॥"

हस्तिनं वर्णयेन्मेघं बलाकालीं[२७१] रदं तथा[२७२] ।
मर्दलोऽशनिनादश्च पताका च तडिल्लता[२७३] ॥८३॥
घनकालश्च कामो वा वर्णनीयो महीपतिः ।

क्रमेणोदाहरणम्- ऋतुसंहारे—●

"ससीकराम्भोधरमत्तकुञ्जरस्तडित्पताकोऽशनि[२७४]शब्दमर्दलः ।
समागतो राजवदुन्नतद्युतिर्घनागमः कामिजनप्रियः प्रिये ॥"

पाटि...

(२७०) भु3) - वैदूर्ये' त्यादि' इत्यस्मात्परं 'वनशोभा' इत्यस्मात्पूर्वं च-

यथा वा माघे – (VI/72)

मुदमब्द्भुवामपां मयूराः सहसायन्त नदी पपाट लाभे ।
अलिनारमतालिनी शिलीन्ध्रेसह सायन्तनदीपपाटलाभे ॥

पूर्वार्धे- 'सहसा आयन्त नदी पपाट लाभे' इति द्वितीयपादे पंचधा छेदः चतुर्थे पादे तु 'सह सायन्तनदीपपाटलाभे' इति द्विधा च्छेदः । तत्र शिलीन्ध्रे इत्यस्य कन्दलीकुसुमे इत्यर्थः । मयूराः अब्द्भुवां अपां लाभे सति सहसा मुदं आयान्त अगमन् । नदी च नद्यश्च इत्यर्थः । एकवचनं जालाभिप्रा......नदीः पपाट विस्तृता वभूव । अलिनी सायन्तनदीपपाटलाभे शिलीन्ध्रे अलिना सह अरमत 'इत्यन्वयः ।' इत्यधिकः कीटदष्टांशो दृश्यते ।

(२७१) भु2) 'बलाकानी' भु3) 'बलालाकाली' भु4 म) 'बलाकाली'

(२७२) भु 2 भु 3 भु 4 म) 'रदस्तथा'

(२७३) भु3) तडिल्लता' इत्यस्मात्परं 'मनोरथस्तु' (पृ61) इत्यस्मात्पूर्वं च ग्रन्थपातः ।

(२७४) म) '-पताकाशनि-'

टि.

☆ कालि. ऋतु. II/5 ☆☆ तत्रैव. II/8 ● तत्रैव. II/1.

२७५
तडिद्गुणो वर्णनीय इन्द्रकोदण्डयोजितः ॥८४॥
धारासन्ततयश्चोग्रा वर्ण्या मार्गणसंचयाः ।

यथा - तत्रैव - ✩ २७६

“बलाहकाश्चाशनिशब्दभीषणाः
सुरेन्द्रचापं दधतस्तडिद्गुणम् ।
सुतीक्ष्णधारापतनोग्रसायकै-
स्तुदन्ति चेतो न कथं प्रवासिनाम् ॥”

घनेन्द्रचापसौदामिनीवर्षोपलानां प्रावृड्वर्णितानामन्येषां वस्तूनां च यद्यदाकृतिकान्तिर्भवति तत्तदेव वर्णनीयम् । २७७

भेकनादो महावाद्यश्चातकाः स्तुतिपाठकाः ॥८५॥
दात्यूहाः प्रतिहाराश्च मयूरा नृत्यकारिणः ।
२७८
तेषां स्वनह्लश्चैव काहलेति निगद्यते ॥८६॥

यथा भोजराजचम्पौ (चंप्वाम्-) ✩✩

“महासमरसूचकः प्रतिदिशं मनोजन्मनो २७९
मयूरगलकाहलाकलकलः समुज्जृम्भते ।
पयोदमलिने दिने परुषविप्रयोगव्यथां
२८०
नरेषु वनितासु वा दधति हन्त केका इति ॥”

मालतीयूथिकाजातिकदम्बाः केतकास्तथा ।
२८१
कुटजार्जुनलोध्राश्च निचुलश्चम्पकोऽपि च ॥८७॥
लिकुचस्तालहिन्तालौजम्बूदुम्बरशिंशपाः ।

पा.टि.……………………………………

(२७५) भु 2 म) ‘कोदण्डवर्जितः’ (२७६) भु 1 भु 2) ‘शनिशब्दभूषणाः’
(२७७) म) ‘वन्दिपाठकाः’ (२७८) भु 2) ‘काहालीति’ भु 1 भु 4 म) ‘काहलीति’
(२७९) भु 2) ‘कलकण्ठः’ (२८०) भु 4.म) ‘नरेषु वनितास्तदा’
(२८१) भु 4) ‘हिञ्जल चम्पकोऽपि च’ ।

टि.

✩ कालि. ऋतु. II/4 ✩✩ भोज. ‘चम्पू’. IV/27.

एतेषामुदाहरणं काव्यादौ मृग्यम् ।

२८२

वर्णनीयो न पद्मादिकुसुमावचयस्तथा ॥८८॥
भुवः काठिन्यमत्यन्तं तथा च धूलिदर्शनम् ।

२८३

कामिनीनां गुरुर्मानः प्रयाणं मृगया रणः ॥८९॥

उद्हरणं काव्यादिषु । २८४

इति वर्षर्तुः ।

अथ शरद्तुः ।

शरदृतौ वर्णनीया कमलानां विकासिता ।

यथा ऋतुसंहारे –☆ २८५

"आकम्पयन् फलभरानथ शालिजाला-
नानर्तयन् तरुवरान् कुसुमावनम्रान् ।
उत्फुल्लपङ्कजवनां नलिनीं विधुन्वन्
यूनां मनः प्रचलति (चलयति ?) प्रसभं नभस्वान् ॥"

२८६

जलनिर्मलता चैव पटुत्वं चन्द्रसूर्ययोः ॥९०॥

एतयोरुदाहरणमृतुसंहारे –☆☆

"शरदि कुसुमसङ्गाद् वायवो वान्ति शीता
विगतजलदवृन्दा दिग्विभागा मनोज्ञाः ।
विगतकलुषमम्भः शान्तपङ्का धरित्री
विमलकिरणचन्द्रं व्योम तारावकीर्णम् ॥"

पा.टि...

(२८२) भु1 भु2) '-वचितिस्तथा' । (२८३) भु4 म) 'मृगयारणौ' ।
(२८४) म) 'वर्षा ऋतुः' (२८५) म) 'वनभरानथ'
(२८६) भु2) 'जलनिर्मलता.......चन्द्रसूर्ययोः' इति न दृश्यते ।

टि.

☆ कालि. ऋतु.III/10

☆☆ तत्रैव.III/22.

२८७

चारुत्वं कुसुमादीनां संचारः पवनाशिनाम् ।

यथा – ☆

“काशैर्मही शिशिरदीधितिना रजन्यो
हंसैर्जलानि सरितः कुमुदैः सरांसि ।
सप्तच्छदैः कुसुमभारनतैर्वनान्ताः
शुक्लीकृतान्युपवनानि च मालतीभिः ॥”

२८८

मौनित्वं मदहीनत्वं शिखिनां पक्षपातनम् ॥९१॥

यथा मम –

“मदनमदविहीनाः षड्जनादं विहाय
नभसि विशदमेघानुन्मुखा दृष्टवन्तः ।
गिरितरुशिखरेभ्यो भ्रान्तचित्ता भ्रमन्तो
दिशि दिशि च बभूवुस्त्यक्तपक्षा मयूराः ॥”

हंसानां मानसत्यागः क्रीडा मदकलस्वनः ।

यथा कुमारसम्भवे – ☆☆

“तां हंसमालाः शरदीव गङ्गां
महौषधिं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले
प्रपेदिरे प्राक्तनजन्मविद्याः ॥”

पा.टि.

(२८७) भु 4) ‘उरगाणां प्रचारणम्’ । म) उरगाणां प्रचारता’ ।

(२८८) भु 2 म) ‘मदहानित्वम्’ ।

टि.

☆ तत्रैव. III/2.

☆☆ कालि. कुमा. I/30

क्रीडामदकलस्वनौ यथा – ऋतुसंहारे –☆

"कारण्डवाननविघट्टितवीचिमालाः
कादम्बसारसकुलाकुलतीरदेशाः ।
कुर्वन्ति हंसविरुतैः परितो जनस्य
प्रीतिं सरोरुहरजोरुणिताश्च नद्यः ॥"

गतिर्मन्दा नदीनां च पुलिनस्यैव मंजुता ॥९२॥

यथा –☆☆

"जल्पन्मनोज्ञशफरीरसनाकलापाः
पर्यन्तसंस्थितसिताण्डजपङ्क्तिहाराः ।
नद्यो विशालपुलिनोरुनितम्बबिम्बा
मन्दं प्रयान्ति प्रमदाः समदा इवाद्य ॥"

घनानां विशदत्वं च नभोनिर्मलताद्युतिः ।

घनविशदत्वं यथा – 'मदनमदविहीने' त्यादि ।

नभोनिर्मलताद्युतिर्यथा – स्पष्टम् ।

दिक्प्रसन्नत्वमत्यन्तं दूतीसंप्रेषणं तथा ॥९३॥

दिक्प्रसन्नत्वं यथा –● शरदि कुसुमसङ्गादि' त्यादि ।

दूतीसंप्रेषणं – मृग्यम् ।

पक्वता शालिवल्लीनां काशानां च प्रफुल्लता ।

यथा ऋतुसंहारे –●●

"काशांशुका विकचपद्ममनोज्ञवक्त्रा
सोन्मादहंसकलनूपुरनादरम्या ।
आपक्वशालिललितकातनुगात्रयष्टिः
प्राप्ता शरन्नवधूरिव चारुरूपा ॥"

टि.

☆ कालि. ऋतु III/8
☆☆ तत्रैव III/3.
● तत्रैव III/22.
●● तत्रैव III/1.

गीतिः कलमगोपीनां कर्दमानां च शुष्कता ॥९४॥

कलमगोपीगीतिर्यथा – माघे– ☆

२८९ २९०

“विरतसस्यजिघत्समघट्टयत् कलमगोपवधूर्न मृगव्रजम् ।

२९१

श्रुततदीरितकोमलगीतकध्वनिमिषेनिमिषेक्षणमग्रतः ॥”

कर्दमशुष्कता यथा – मृग्यम् ।

सस्य क्षेत्रेषु रम्येषु मृगादीनां प्रवेशनम् ।
वृषभाणां च मत्तत्वं कामिनीमानपोषणम् ॥९५॥

२९२

जनानां हर्षबाहुल्यं कान्तानामभिसारिता ।

एतेषामुदाहरणं काव्यादौ मृग्यम् ।

शरत्कालेऽपि मालत्यो वर्णितव्याः सतां मताः ॥९६॥

२९३

श्यामालताश्च बन्धूकं कोविदारसुमं तथा ।
जपा शेफालिका चैव कुमुदं सप्तपर्णकम् ॥९७॥

उदाहरणं काव्यादौ ज्ञेयम् ।

वर्णनीयं, न तत्रैवं नदीनां वीचिवर्धनम् ।
चन्द्रस्यैवाप्रसन्नत्वं तारकाणां च तत्तथा ॥९८॥
जलाशयेषु सर्वेषु चाविलत्वं न वर्णयेत् ।

इति शरदृतुः ।

पा.टि.

---

(२८९) म) ‘मघट्टया’ । (२९०) भु 1 भु 2) ‘कलमगोप्तृवधुर्न’ ।
(२९१) भु 1 भु 2) ‘मग्रमग्रतः’ । (२९२) म) ‘कान्तानामभिसारिका’ ।
(२९३) भु 2) ‘विंहारकुसुमं’ ।

टि.

☆ माघ शिशु. VI/49.

अथ हेमन्त ऋतुः ।

हेमन्ते दिवसस्यैव लाघवं वर्णयेद् बुधः ॥९९॥
रजनीवर्धनं चैव तुषारपतनं तथा ।

यथा मम – २९४

लघुतरदिनमानं चक्रवाको निरीक्ष्य
२९५
विरतविरहखेदश्चक्रवाकीयुतोऽपि ।
सचकितमदयुक्तो दीर्घरात्राकुलार्तो
हिमपतनविशीर्णः शब्ददम्भाद्रुरोद ॥

उत्तरानिलसंचारो हिमाद्रेः शृंगवर्धनम् ॥१००॥

उदाहरणं मृग्यम् । २९६

तेजोविरहितः सूर्यो वह्निकोणं समाश्रितः ।

यथा –

"शीतार्ता इव संकुचन्ति दिवसा नैवाम्बरं शर्वरी
२९७
मुञ्चत्यम्बुजबान्धवोऽपि हुतभुक्कोणाश्रितो भास्करः ।
त्वं चानङ्ग हुताशभाजि हृदये सीमन्तिनीनां प्रभो
नास्माकं वसनं न वा युवतयः कुत्र व्रजामो वयम् ॥"

शालीनां परिपक्वत्वं नम्रतां वर्णयेत् तथा ॥१०१॥
विलीनत्वं च पद्मानां वह्निसेवा महादरा ।

यथा ऋतुसंहारे –✩

"नवप्रवालोद्गमपुष्परम्यः प्रफुल्ललोध्रः परिपक्वशालिः ।
विलीनपद्मः प्रपतत्तुषारो हेमन्तकालः सुमुखि ! प्रपन्नः ॥"

पा.टि.

(२९४) भु4 म) '-दिनवृन्दं' । (२९५) भु4 म) 'विरहचलितचित्त-' ।
(२९६) भु4 म) 'वह्निकोणे' (२९७)भु4) 'शीघ्रं मुञ्चति पश्य देव हुतभुक्' ।

टि.

✩ कालि ऋतु.IV/1 .

वह्निसेवा[२९८]—स्पष्टा ।

मनोरथस्तु मुग्धानां [२९९]कान्तालिंगनकादिषु ॥१०२॥

[३००]यथा मम —

काचिन्मुग्धा कमलनयना हैमरात्रावसाने
कान्ताश्लेषैर्मदनसुखदैः प्राप्य हृष्टं मनश्च ।
शीतत्रस्ता [३०१]सुरससहितैश्चुम्बनैः कान्तचित्ते
सोत्कण्ठत्वं मदनविषये त्यक्तलज्जा चकार ॥

पाटि.

(२९८) भु 3) 'स्पष्टा' इत्यस्मात्परं 'मनोरथस्तु' इत्यस्मात्पूर्वं च —

"...सहसन्तीं हसन्तीं वामलोचनां
हेमन्ते ये न सेवन्ते ते जना दैववंचिताः ॥"

हसन्तीं ज्वलज्ज्वलनां हसन्तीं अङ्गारशकटीं च हसन्तीं हासयुक्तां वामलोचनां च इत्यर्थः । इति अधिकं दृश्यते ।

(२९९) भु 1) 'कान्तालिङ्गनतोत्सवम्' । भु 3) 'कान्तालिङ्गनकर्मसु' ।
भु 4) 'कान्तालिङ्गनतादिषु' । इत्यस्मात्परं 'यथा - मम' इत्यस्मात्पूर्वं च - "तु शब्दोऽप्यर्थे । मुग्धानां नवोढानामित्यर्थः ।" इति अधिकं दृश्यते ।

(३००) भु 3) 'यथा मम - काचिन्मुग्धा....चकार ।" इति पद्यस्य स्थाने -

यथा — दीक्षितगोपीनाथमहापात्रस्य —

'हिमपतनमहिम्ना शाणचेलावृतांग्यो-
ऽननुमतपरिरम्भा अप्यकाण्डे नवोढाः ।
विधुतरदनवस्त्राः कामिनाभाशुतिष्वे (?)
स्वयमपि परिरम्भारम्भसम्भारमीषुः ॥

अकाण्डे अनवसरे नायकप्रार्थनामन्तरेणापीत्यर्थः ।" इति ।

(३०१) भु 4) 'सुरतसहितै-' ।

सुरतेच्छापि[३०२] हेमन्ते वर्णनीया वरस्त्रियाः[३०३] ।
कामिनां मधुपानेन रतिः[३०४] स्त्रीषु बलाद्भवेत् ॥१०३॥

यथा माघे –☆

"कान्ताजनेन रहसि प्रसभं गृहीत-[३०५]
केशे रते स्मरसहासवतोषितेन ।
प्रेम्णा मनःसु रजनीष्वपि हैमनीषु[३०६]
के शेरते स्म रसहासवतोषितेन ॥"

सुरतं विपरीताख्यं गाढालिंगनचुम्बने[३०७] ।
शाकिनी गुरुवासांसि शिरस्त्राणादयस्तथा ॥१०४॥

पा.टि.

(३०२) भु4 म) सुरतेच्छा.....नवस्त्रियाः' इतिकारिकार्धस्य स्थाने "आदिशब्दात्सुरतानि ।"

(३०३) भु3) 'वरस्त्रियाः' इत्यस्मात्परं 'कामिनी' इ्यस्मात्पूर्वं च -

यथा तस्यैव –

"महत्त्वं हन्त हेमन्तसामन्ते वर्णयन्तु के
अप्रौढवयसो यत्र कामयन्ते रतोत्सवम् ॥" इति अधिकं दृश्यते ।

(३०४) भु4) 'चित्तम्' ।

(३०५) भु4) 'स्मरहासवतीसितेन' ।

(३०६) भु3) '-वतोषितेन' इत्यिस्मात्परं 'सुरतम्' इत्यस्मात्पूर्वं च – द्वितीये पादे गृहीत केश इति रते इति स्मरसहासवतोषितेन इति च च्छेदः । चतुर्थे तु के इति शेरत इति स्मेति रसहासवतेति उषितेनेति च च्छेदः । तत्र च मनसस्तु उषितेन कृतवतेनेति कान्ताजनविशेषणम् ।" इति अधिकं दृश्यते ।

(३०७) भु1 भु2 भु4 म) 'गाढालिंगनचुम्बनम्' ।

टि.

☆ माघ. शिशु. VI/77

रम्यं हसन्तिकायन्त्रमुष्णस्थानादिसेवनम् ।
तैलसंमर्दनं चापि घृतापूपादिभोजनम् ॥१०५॥

३०८
एतेषामुदाहरणं स्पष्टम् ।

उष्णत्वं स्तनयोर्मध्ये युवतीनां सुखप्रदम् ।

यथा मम –

३०९
हिमकालमवेक्ष्य साध्वसात्
तव कान्ते स्तनशैलकन्दरे ।
त्वरया सविलीन ऊष्मकः ३१०
परिरम्भैः कुरु मेऽधिकं सुखम् ॥

अश्वत्थः खदिरो लोध्रः कपित्थो मधुकादयः ॥१०६॥

३११ ३१२
उदाहरणं तु काव्यादौ ज्ञेयम् ।

३१३
वर्णनीयं न हेमन्ते वलयं नूपुरादयः ।
३१४
वृक्षाणां च मनुष्याणां दलकान्त्यादिवर्णनम् ॥१०७॥

पा.टि.

---

(३०८) भु 3) '-मुदाहरणानि स्पष्टानि' । (३०९) भु 2 भु 4) शिशिरं समवेक्ष्य' ।

(३१०) भु 2 भु 4) 'मे सुखाधिकम् । भु 3) 'सुखाधिकम्' इत्यस्मात्परम् 'अश्वत्थः' इत्यस्मात्पूर्वं च- उष्णैव उष्णकः, स्वार्थे कः ।'' इति अधिकं दृश्यते ।

(३११) भु 3) 'उदाहरणानि' । (३१२) भु 3) 'ज्ञेयानि' । तत्र लोध्रमात्रं माघे ।

(३१३) भु 1 भु 2 भु 4) 'हेमन्ते न वर्णनीयं' । म) 'वर्णितव्यम्' ।

(३१४) भु 1 भु 2) 'मनुष्याणां च वृक्षाणां दलकान्त्यादयस्तथा' ।

३१५
पथिकानां प्रवासित्वं योषितां मानपूर्णता ।

इति हेमन्त ऋतुः ।

अथ शिशिर ऋतुः ।

३१६
शिशिरे किरणाल्पत्वं न्यूनोष्णत्वं खरत्विषः ॥१०८॥

३१७
ऊह्यमुदाहरणम् ।

तुषारपतनं चैव पद्मानां परिदग्धता ।

तुषारपतनं यथा ऋतुसंहारे —☆

"तुषारसंघातनिपातशीतलाः
शशाङ्कभाभिः शिशिरीकृताः पुनः ।
विपाण्डुतारागणचारुभूषणा
जनस्य सेव्या न भवन्ति रात्रयः ॥"

पा.टि.

---

(३१५) भु3.) 'मानपूर्णता' इत्यस्मात्परं 'इति' इत्यस्मात्पूर्वं च -

"तत्र मानपूर्णत्वाभावः स्तनयोरुष्णत्वं च माघे — (VI/65)

"शिशिरकालमपास्य गुणोऽस्य नःक इव शीतहरस्य कुचोष्मणः ।
इति धियास्तरुषः परिरेभिरे घनमतोनमतोऽनमतान् प्रियाः ॥"

चतुर्थपादे घनमिति अत इति नमत इति अनुमतानिति च छेदः ।नमतो नम्रान् अनुमतान् प्रियान् इत्यर्थः । इति अधिकं दृश्यते ।

(३१६) भु1 भु4 म) 'न्यूनोष्णं तिग्मदिधितेः ।' इति ।

(३१७) भु1 भु3) 'ऊह्यमुदाहरणम्' इत्यस्य स्थाने यथा रघुवंशे— (IV/49)

"दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥" इति

टि.

☆ कालि. ऋतु V/4.

पद्मानां दग्धता यथा – ३१८ ३१९

"किं बान्धवेन हरिणा रविणापि किं वा ३२०
लक्ष्म्या च किं सरसिजोदरजेन किं वा ।
एतस्य शुद्धचरितस्य सरोरुहस्य
नैषा तुषारजनिता शमिता विपत्तिः ॥"

३२१ ३२२
गवाक्षमुखसंरोधो वेश्मन्यगुरुधूपनम् ॥१०९॥

गवाक्षमुखसंरोधो यथा ऋतुसंहारे–✫

"निरुद्धवातायनमन्दिरोदरं
हुताशनो भानुमतो गभस्तयः ।
३२३
गुरूणि वासांस्यबलाः सयौवनाः ३२४
प्रयान्ति काले तु जनस्य सेव्यताम् ।"
३२५
कस्तूर्यादेर्लेपनं च सुन्दरीणां पयोधरे ।

पा.टि.

(३१८) भु 3) 'रविणा हरिणा च' ।। (३१९) भु 4) 'हरिणा च' ।
(३२०) भु 3 भु 4.म) 'च क्रमलोदरजेन'
(३२१) भु 2 भु 4.म) "गवाक्षमुखसंरुद्धमगुरोर्धूपवेश्मनि" ।
(३२२) भु 3) 'वेश्मस्वगुरुधूपनम्'। (३२३) भु 4) 'सुयौवनाः' ।
(३२४) भु 1 भु 3) सेव्यताम्' इत्यस्मात्परं 'कस्तूर्या-' इत्यस्मात्पूर्वं च –
अगुरुधूपनं यथा - दीक्षितगोपीनाथमहापात्रस्य–
"शिशिरेऽगुरुधूपधूपितेऽन्तरगारे कमनीयकामिनीम् ।
परिरभ्य नयन्ति यामिनीं कृतपुण्याः सुसुखेन कामिनः ॥" इत्यधिकमस्ति ।
(३२५) भु 3) 'पयोधरे' इत्यस्मात्परं 'यथा मम' इत्यस्मात्पूर्वं च –
चकारात् कुंकुमलेपनं यथा तस्यैव–
"शीतार्त्ताः शिशिरर्त्तौ तरुणास्तरुणीकुचौ विलुम्पन्तः ।
मृगमदकुङ्कुमपङ्कैराश्लिष्य निशां नयन्ति निःशंकम् ॥"
इति अधिक दृश्यते ।

टि.

✫ कालि ऋतु.V/2.

यथा मम–

“रसिकः शिशिरार्तश्च कस्तूर्या चोष्णहेतवे ।
लेपनं कुरुते प्रेम्णा प्रियापीनपयोधरे ॥”

आदिपदात् कुङ्कुमलेपनम् ।

उत्सङ्गेषु रसज्ञानां सौख्यदा कामुकस्थितिः ॥११०॥

यथा ऋतुसंहारे–✩

“पयोधरैः कुंकुमरागपंकिलैः
सुखोपसेव्यैर्नवयौवनोष्मभिः ।
विलासिनीभिः परिपीडितोरसः
स्वपन्ति शीतं परिभूय कामिनः ॥”

कस्तूर्या मृगनाभिभ्यो वर्णनीयस्तदोद्भवः ।
श्रीपुष्पकुङ्कुमादीनां कुसुमेषु रजः स्थितिः ॥१११॥
सरलं लोध्रकुन्दे च तद्गन्धाढ्यश्च मारुतः ।
अश्वादेर्धावनं चैव शस्त्राभ्यसनमेवच ॥११२॥
लवणास्वादनं तत्र[३२६] सूर्यस्य करसेवनम् ।
कामिनीजघनात् कांचीहारादेर्मोक्षणं[३२७] परम् ॥११३॥
गोधूमचणकादीनां फलैश्चारुतरा क्षितिः ।
वराहशुनकादीनां[३२८] मत्तत्वं च रतोत्सवः[३२९] ॥११४॥

पा.टि.

(३२६) भु3) 'तद्वत् सूर्यदीधितिसेवनम्” । (३२७) भु3) कांच्याः हारादेरपि मोचनम्' ।
(३२८) भु1 भु2) 'शुनकानां च मत्तत्वं' । (३२९) भु1 भु2) 'सुरतोत्सवः' ।

टि.

✩ कालि. ऋतु.V/9.

दारुनिर्जासजननं[३३०] कौषेयोत्पत्तिरेव च ।
करीरकुसुमानां च क्षतत्वं शिशिरागमे[३३१] ॥११५॥

एतेषामुदाहरणं काव्यादौ ज्ञेयम् ।

वर्णयेन्नातपस्नातं[३३२] काननं शिशिरागमे[३३३] ।
मधूत्पत्तिं[३३४] च वृष्टिं च हर्म्ये पक्षिगणस्थितिम् ॥११६॥
रम्यतां वनजन्तूनां बहुला:स्वच्छतारका: ॥११७॥

एतेषामुदाहरणं काव्यादौ मृग्यम् ।

[इति शिशिर ऋतुः]

इति श्रीमत्खिमुण्डिमहाराज्येश्वर- गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायण देवमहाराज-विद्वत्सभाराजित-प्रबन्धकविताप्रकाशक- करणकुलसंभव- कविभिषग्वर- वासुदेवपात्रतनय-श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ काव्योचित [ऋतु] वर्णननिरूपणं नाम एकोनविंशः[335] किरणः ।

पा.टि.

(३३०) म) 'जन्मत्वम्' । (३३१) भु 2 भु 4) 'शिशिरागमः' । भु 3) 'शिशिरागमे' इत्यस्मात्परं 'एतेषा-' इत्यस्मात्पूर्वं च- तदा- शिशिर ऋतौ । श्रीपुष्प-लवंगतरुः, श्रीसंज्ञकं पुष्पं यस्तेति व्युत्पत्तेः । लवङ्ग कुसुमस्य श्रीसंज्ञत्वात् । तथा चामरः लवंगं देवकुसुमं श्रीसंज्ञमिति । करीरकुसुमानामित्यत्र पुष्पाणां करवीरस्येति पाठ्यम् । करवीरः प्रसिद्ध एव ।'' इत्यधिकमस्ति ।

(३३२) भु 3 भु 4) 'वर्णयेन्नातपस्थानम्' । (३३३) भु 4 म) 'शिशिरेषु च' ।

(३३४) भु 2 भु 4म) ''**मधूत्पत्तिश्च वृष्टिश्च हर्म्ये पक्षिगणस्थितिः ।**''

(३३५) भु 1 भु 2 म) 'ऊनविंशतिः' भु 4) 'अष्टादशः' ।

◆ ◆ ◆

[विंशः किरणः]

[१]अथ पुत्रादीनां बाल्यचेष्टा उच्यते–

पुत्रादौ शैशवे खेलात्यन्तकोमलभाषणम् ।
स्मितं मृद्भक्षणं चैव भयवाक्यादिसूचनम् ॥१॥

[२]गतिर्जानुकराभ्यां च भित्त्याश्रयगतिस्ततः ।
[३]शिशुसङ्गमजाप्रीतिः [४]धात्र्यादि[५]स्नेहवर्धनम् ॥२॥

[६]एतेषामुदाहरणं स्पष्टम्[७] ।

पौगण्डसमये चैव [८]वर्णनीयं यथोचितम् ।
विद्याभ्यासगुणासक्तितुरगारोहणादयः ॥३॥

पा.टि.

(१) भु1 भु2 भु4 म) 'अथ पुत्रादीनां बाल्यचेष्टा उच्यते' इति नास्ति ।
(२) भु3) 'जानुभ्यां च कराभ्यां च गतिर्भित्यागृहागतिः' ।
(३) भु3) शिशुसङ्गमहर्षश्च' ।भु1 भु2) 'शिशुसङ्गमप्रीतित्वं' ।म) 'शिशुसङ्गमताप्रीतिः'।
(४) भु4) 'धात्र्यादेस्ततं तत्वर्णनीयम्' म) धात्र्यादीनां च वर्णनम् ।
(५) भु3) '-वर्धनम्' इत्यस्मात्परम् 'एतेषा-' इत्यस्मात्पूर्वं च - 'भयवाक्यादीत्यादिपदाद्भयहेतुदर्शनपरिग्रहः । गृहागतिः गृहं प्रति पलायनम्' इति अधिकं दृश्यते ।
(६) भु3) 'एतेषामुदाहरणानि मृग्यानि' ।भु4 म) एतेषामुदाहरणं.....तद्ववर्णनीयम्' (पृ369) इति ग्रन्थभागो नोपलभ्यते ।
(७) भु3) 'स्पष्टम्' इत्यस्मात्परं 'पौगण्ड'- इत्यस्मात्पूर्वं च– ''मृदुकोमलभाषणे दिङ्मात्रमुदाहरणं यथा रघुवंशे (I/25) यदाह धात्र्या प्रथमोदितं वच' इत्यादि ।'' इति अधिकं दृश्यते । (८) भु3) 'वर्णितव्यम्' ।

[९] उदाहरणं तु स्पष्टम् । आदिशब्दात् कुमार्य्यामपि यदुचितं तद्ववर्णनीयम् ।

कैशोरे यौवने कामरसासक्तं [१०] मनस्तथा ।
विभ्रमप्रियता सौख्यं [११] सम्भोगादिप्रकाशिता ॥४॥
परिहासोक्तयः सार्धं स्वजनैः [१२] प्रियवादिभिः ।
पठनं कामशास्त्रस्य यौवनोद्भेदगर्विता ॥५॥
असत्कथाकन्दुकादि [१३] खेलानां वर्जनं तथा ।
उद्दीपनविभावाद्यैश्चित्तस्योत्फुल्लतादयः ॥६॥
[१४] बलिता प्रियवाक्यत्वं शास्त्राभ्यासो विवेकिता ।
पित्रादिभक्तिचित्तत्वं महत्ता च गुणाढ्यता ॥७॥

एतेषामुदाहरणं मृग्यम् ।

पा.टि.

(९) भु 3) 'उदाहरणं.................... तद्वर्णनीयम्' इति समुदायस्य स्थाने- "यथोचितम् इति ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणां चानुगुणेनेत्यर्थः ।

विद्याभ्यासो यथा रघुवंशे– (III/28)

स वृत्तचौलश्चलकाकपक्षैरमात्यपुत्रैः सवयोभिरन्वितैः ।
लिपेर्यथावद्ग्रहणेनवाङ्मयं नदीमुखेनेव समुद्रमाविशत् ॥

तत्र तृतीये वर्षे चूडा, ततो लिपिग्रहणं, ततः समस्तविद्याभ्यास इति पौगण्डविद्याभ्यासो दर्शितः ।

तुरगारोहणादय इत्यादिपदात् कुमारीणामपि यदुचितं तद्वर्णनीयम् ।

यथा च **कुमारसम्भवे** - (I/30)

"तां हंसमालाः शरदीव गंगां महौषधिं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ॥" इति

(१०) भु 3) 'भवेन्मनः' ।
(११) भु 3) 'संभोगाद्युत्कता तथा' ।
(१२) भु 3) 'प्रियवयस्यैः ।
(१३) भु 3) 'क्रीडानां' ।
(१४) भु 3) 'बलवत्त्वं प्रियालापः' ।

अथ [१५]कुमारीणां कैशोरयौवनयोर्यद्वर्णनीयं तदुच्यते-

तनुशोभातिशायित्वं [१६]कुचयोरुद्गमः स्मितम् ।
[१७]नयनाधरयोर्नैल्यं [१८]शोणिमानं च वर्णयेत् ॥८॥
सद्व्रीडासक्तता तद्वद् [१९]वक्रता भ्रूवि वाचि च ।
प्रियत्वमभिलाषित्वं वस्त्राद्याभरणादिषु ॥९॥
वक्षोजस्थूलताऽपांगचपलत्वं प्रगल्भता ।
रोमाली त्रिवली ख्याताऽत्यन्तमन्दा गतिस्तथा ॥१०॥
[२०]पृथुता च नितम्बस्य घनता जघनस्य च ।
पुष्पोद्भेदोत्सवश्चैव विहारित्वं वनादिषु ॥११॥
रत्युत्सवकथालापो विरहः सात्त्विकादयः ॥१२॥

[२१]उदाहरणं मृग्यम् ।

पा.टि.

(१५) भु1 भु2 भु4 म) 'कुमारी कैशोरयौवने' । (१६) भु2 भु4 म) 'कुचोद्गमनता'
(१७) भु3) 'नेत्रयोरोष्ठयोनैल्यशोणिमानौ क्रमाद्भवेत्' ।
(१८) भु4. म) 'शोणत्वं वर्णयेत्तथा' । (१९) भु3) 'भ्रूभङ्गी वाक्यवक्रता'.
(२०) भु3) 'प्रथिमा' ।
(२१) भु3) 'उदाहरणं स्पष्टम्' इत्यस्य स्थाने- जघनस्य च इति चकारात् स्तनयोरपि । इदं च स्तनयो: काठिन्यस्याप्युपलक्षणम् । दिङ्मात्रमुदाहरणम् ।

कैशोरे यथा –

''नोदञ्चौ च कुचौ न चारु गमनं रोमावली नोद्गता
न स्पष्टं च वलित्रयं न कुटिला दृष्टिर्न पुष्टं वपुः ।
अस्या: कापि कलैव लोकमखिलं संमोहयत्यद्भुतं
तारुण्येसति किं करिष्यति मनो यूनामियं बालिका ॥''

इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस- वीरश्रीगजपति- जगन्नाथ नारायणदेवमहाराज- विद्वत्सभाराजित- प्रबन्धकविताप्रकाशक- करणकुलसंभव-कविभिषग्वर- वासुदेवपात्रतनय-**श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ काव्योचितं [पुत्रादीनां बाल्यचेष्टादि] वर्णन-निरूपणं नाम विंशतितमः किरणः ।**

२२

पा.टि....

कैशोरयौवनयोः सन्धौ च-- अनर्घराघवे--

"अनाकूतैरेव प्रियसहचरीणां शिशुतया
वचोभिः पांचाली मिथुनमधुना संगमयितुम् ।
उपादत्ते नो वा विरमत न वा केवलमियं
कपोलौ कल्याणी पुलकमुकुलैर्दन्तुरयति ॥"

किं च- मनोपि शङ्कमानाभिर्बालाभिरुपदीव्यते

किं च-

"उरोभुवि न तुङ्गिमा नयनयोर्न च द्राघिमा
न वा वचसि वक्रिमा तरलिमा न तादृक् भ्रुवोः ।
परं तु हरिणीदृशोर्वपुषि कापि कान्तिच्छटा
पटावृत- महामणि- द्युतिरिवान्तरालक्ष्यते ॥"

यौवने च-

मध्यस्य प्रथिमानमेति जघनं वक्षोजयोर्मन्दता
दूरं यात्युदरं च लोमलतिका नेत्रार्जवं धावति ।
कन्दर्पं परिवीक्ष्य नूतनमनोराज्याभिषिक्तं क्षणा-
दङ्गानीव परस्परं विदधते निर्लुण्टनं सुभ्रूवः ॥

पा.टि....

यथा वा अनर्घराघवे–

"तदात्वत्प्रोन्मीलन्म्रदिमरमणीयात् कठिनतां
निचित्य प्रत्यङ्गादिव तरूणभावेन घटितौ ।
सन्तौ संविभा……मसृणवैजात्यविनय
प्रोन्मेषी: केषामुपरि न रसानां युवतयः ॥"

शेषं मृग्यम् । अत्र च बाल्यपौगण्डकैशोराणां वस्तुतो भेदेऽपि पौगण्ड कैशोरयोर्बाल्येऽन्तर्भावाभिप्रायेण कविभिः प्रायस्तयोः वर्णनं न कृतम्, किं तु बाल्योत्तरयौवमेव वर्ण्यम् ।

तथा च नैषधे– (I/30)

"वयसी शिशुतातदुत्तरे सुदृशि स्वाभिविधिं विधित्सुनी ।
विधिनापि न रोमरेखया कृतसीम्नी प्रविभज्य रज्यतः ॥"

यथा चानर्घराघवे–

तदात्वेत्यादि श्लोकेऽपि कैशोरं न दर्शितम् ।

एवमन्येषा मुदाहरणानि तत्र तत्र विद्यमानान्यूह्यानि ।" इति ।

(२२) भु1 भु2 म) 'विंशतिः' । भु4) 'ऊनविंशः' ।

* * *

[एकविंशतितमः किरणः]

अथ स्त्रीणां सर्वावयवोपमानमुच्यते –

वेणी[१] प्राज्ञैर्वर्णनीया सर्पोऽसिर्भृङ्गमालिका ।
स्वर्भानुर्लाङ्गुलं[२] चाथ कबर्याश्च विधुन्तुदः ॥१॥
चामरं केशपाशस्य तमालो[३] घनकज्जले ।
नीलकण्ठकलापश्च[४] कस्तूरी यमुनाजलम् ॥२॥
कुहूरात्रिस्तमो भृङ्गः कामस्य नीलकेतनम्[५] ।
सीमन्तस्यायनं दण्डो मदनस्यैव शोभनः ॥३॥
वर्णनीयो[६] ललाटस्य शाणार्धो मुकुरार्धकः ।
अष्टमीचन्द्रमाश्चैव वर्णनीयः[७] कवीश्वरैः ॥४॥
मुकुरश्च[८] कपोलस्य फलकं चन्द्रमाः स्थलम् ।
भ्रुवोः कामधनुर्यष्टिर्लता रेखा च पल्लवः ॥५॥

पा.टि. ....

(१) भु 4.म) 'उपमानं वर्णनीयं वेण्याः सर्पोऽलिमालिका' ।

(२) भु 3) 'लाङ्गुलं सैंहिकेयोऽथ' । भु 4) 'असिस्तमो लाङ्गुलश्च' ।

(३) भु 2 भु 4.म) 'तमालौ घनकज्जलौ' ।

(४) भु 4) 'नीलकण्ठः कलापोऽपि' । म) 'नीलकण्ठकलापोऽपि' ।

(५) भु 3) 'नीलं कामस्य केतनम्' । (६) भु 4.म) 'वर्णनीयन्' ।

(७) भु 4.म) 'वर्णनीयं यथोचितम्' । (८) म) 'मुकुरस्य' ।

नेत्रयोर्हरिणः पद्मं खञ्जनेन्दीवरं (रे?) झषः ।

मन्दिरः[९] कुमुदं भृङ्गो लौल्यं कामशरादयः[१०] ॥६॥
[११]कटाक्षेषु मदनस्य कुन्तखड्गपरिघच्छुरिकादयो यथासम्भवं वर्णनीयाः[१२] ।

पा.टि...

(९) म) 'मन्दिरम्' ।

(१०) भु३) 'कामशरादयः' इत्यस्मात्परम् 'आदिशब्दात्' इत्यस्मात्पूर्वं च - "वेणी सैंहिकेय इत्यन्तेनान्वेति । अथ कवरीस्थाने राहुः, केशपाशस्थाने चामरादयः । कामस्य नीलपताकान्ता वर्ण्याः । सीमन्तस्थाने मार्गः मदनदण्डश्च । ललाटस्थाने साणार्धो, दर्पणार्धः, अष्टमीचन्द्रश्च । कपोलस्य स्थाने पूर्णः दर्पणः, फलकं, तच्च चर्मणो वर्तुलाकृतिः नैस्त्रिंशकानां खड्गधारिणां वामपाणिधार्यः शस्त्रनिवारणार्थम् आयुधविशेषः । तथा च पूर्णचन्द्रः, स्थलमकृत्रिमा भूमिः । भ्रुवोः स्थाने कामचापयष्टिः । लता, रेखा पल्लवश्च । नेत्रयोः स्थाने हरिणः, मृगनेत्रे च, पद्मं नीलोत्पलं खञ्जनो, मीनः मत्तखञ्जनश्च । 'मदिरो मत्तखञ्जन' इति कोषः । कैरवं भ्रमरः मदकलमदिराक्षीति प्रयोगश्च-। चक्षुषोश्चाञ्चल्यं च कन्दर्पशरादयश्च वर्ण्याः । आदिशब्दात् कामधनुश्च' । इति अधिकं दृश्यते ।

(११) भु३) 'तथा कटाक्षेषु' ।

(१२) भु३) 'वर्ण्याः ।'

भु३) 'वर्णनीयाः' इत्यस्मात्परं 'चम्पकं (पृ४०) इत्यस्मात्पूर्वं च क्रमेण तेषामुदाहरणानि ।

कस्यचित् प्राक्तनस्य–

"कचभारात् कुचभारः कुचभाराद्भीतिमेति कचभारः ।
कचकुचभाराज्जघनं..............(कीटदष्टः) ॥"

अत्राद्यपादे कचभारे प्रथमं रात्रित्वमध्यवसीयते । कुचभारे च चक्रवाकत्वम् । द्वितीयपादे तु कुचभारे घटत्वम् । कचभारे वेणिरूपे सर्पत्वमिति विवेकः ।

असिर्यथा-दीक्षितमहापात्रस्यैव–

"ललनाललाटफलकः प्रथयति सुधियां प्रथीयसीम् ।
बुद्धिं वेणिविधुन्तुदवक्त्रादर्द्धविमुक्तेन्दुबिम्बस्य ॥"

अथ लाङ्गूलस्य यथा तस्यैव–

"उल्लसति वेणिरेणीनयनायाः कामसमरकुतुकिन्याः ।
अमरपतिरत्नरुषितमिव लाङ्गूलं शिरस्तस्य ॥"

पा.टि...

अथ कबरीस्थाने राहुः – यथा तस्यैव –

ललनाललाटेति पद्ये तृतीयपादस्थाने 'कबरी विधुन्तुदमुखादि'ति पठित्वा उदाहरणीयम् ।

अथ केशपाशस्थाने चामरं यथा कुमारसम्भवे – (I/48)

"लज्जा तिरश्चां यदि चेतसि स्यादसंशयं पर्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्युर्वालप्रियत्वं शिथिलं चमर्याः ॥"

यथा वा नैषधीये – (I/20)

"चिकुरप्रकरा जयन्ति ते विदुषी मूर्द्धनि सा विभर्ति यान् ।
पशुनाऽप्यपुरस्कृतेन तत्तुलनामिच्छतु चामरेण कः ॥"

तमालो यथा दीक्षितमहापात्रस्य –

"आस्यं पद्मेन तस्याः कुवलययुगलेनाक्षिणी दन्तवस्त्रे
बन्धूकाभ्यां विधायाम्बुजजनिरसृजद् वज्रपुष्पेण नासाम् ।
अम्भोजैः पाणिपादं तनुरुचिमखिलां केतकीगर्भभाभिः
सन्तत्य न्यास मस्तोपरिचिकुरचयं क्लृप्तमालैस्तमालैः ॥"

वज्रपुष्पेण तिलकुसुमेन । 'वज्रपुष्पं तिलस्य यदि'त्यमरः । पाणि च पादौ च पाणिपादं, समाहारद्वन्द्वे प्राण्यङ्गत्वादेकवद्भावे नपुंसकत्वम् । सन्तत्य विस्तीर्य न्यास-निदधौ ।

घनो यथा कस्यचित् –

"घन इव चिकुरौघे लम्बमाने मृगाक्ष्या-
स्तडिदिव विचचाल स्वर्णताटङ्कयुग्मम् ।
स्तनितमिव व्यजृम्भे निक्वणः काञ्चिदाम्ने
न्यपतदुरसि भर्तुर्वारिधारेव हारः ॥"

कज्जलं यथा दीक्षितगोपीनाथमहापात्रस्यैव–

"वैश्वानरस्य यदतप्यत कज्जलौघस्तीव्रव्रती तपतपर्यत एव पुण्यात् ।
मन्ये शशाङ्कवदना चिकुरोपमानं धत्ते कुरुङ्गनयनानयने निवासम् ॥"

पा.टि...

शशाङ्कवदनेति चिकुरनिकर- सदृशवदनसंनिकर्ष- प्रयुक्तपरभागलाभाय कुरङ्गनयनेति च कज्जलस्य तादृशनयननिवास-प्रयुक्तोत्कर्षलाभायेति पदद्वयस्य साभिप्रायत्वात् पौनरुक्त्यदोष: । अत्र घत्ते इति क्रिया उभयत्रावृत्यान्वयान्न चकारापेक्षा ।

"तदोजसस्तद्यशस: स्थिता वि" त्यत्रैव
"श्रीमद्विट्ठुलमानमपाणिन्यादिगुरुन्मुनीनि"'त्यत्रैव च ।

नीलकण्ठकलापो यथा नैषधीये– (VII/20)

"अस्या: सपक्षैकविधौ कचौघ: स्थाने मुखस्योपरिवासमाप ।
पक्षस्थतावत् बहुचन्द्रकोऽपि कलापिनां येन जित: कलाप: ॥"

सपक्ष: सदृश:सहायभूतश्चैकोविधुर्यस्य मुखस्य तस्य सपक्षैकविधो: । तृतीयादिष्वित्यादिना (पा. अष्टा. ७.१.७४) पाक्षिक: पुंवद्भाव: । पक्षे गरुतिष्ठन्तीति पक्षस्था: तेषां भाव: प........................(कीटदष्ट:)........................ ।

कामधनुर्यथा नैषधीये – (VII/24 ;

"पौष्पं धनु: किं मदनस्य दाहे स्यामीभवत् केसरशेषमासीत् ।
व्यधाद्द्विधेशस्तदपि क्रुधा किं भैमी भ्रुवौ येन विधिर्व्यधत्त ॥"

यथा वा तत्रैव – (II/128)

पुष्पेषुश्चिकुरेषु ते शरचयं स्वं भालमूले धनू
रौद्रे चक्षुषि यज्जितस्तनुमनुभाष्ट्रं च यश्चिक्षिपे ।
निर्विघ्नाश्रयदाश्रमं स वितनुस्त्वां तज्जयायाधुना
पत्रालिस्त्वदुरोजशैलनिलया यत्पर्णशालायते ॥

यथा वा **श्रीगीतगोविन्दे** – (II/5)

"भ्रूचापे निहित: कटाक्षविशिखो निर्मातु मर्मव्यथां
श्यामात्मा कुटिल: करोतु कवरीभारोऽपि मारोद्यमम् ।
मोहं तावदयं च तन्वि ! तनुतां विम्बाधरो रागवान्
सद्वृत्त: स्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति ॥"

रागवानरुणवान् द्वेषवांश्च । अन्यत् सुबोध्यम् ।

पा.टि..

भ्रूस्थाने लता यथा दीक्षितगोपीनाथमहापात्रस्यैव–

"सिन्दूरविन्दुसुभगं भ्रूयुगमाभाति हरिणनयनायाः ।
नवसमुदितैककुसुमार्धपत्रिणः कुञ्जलतिकेव ॥"

कुञ्जलतिका नाम रक्तपुष्पं स्वनामप्रसिद्धा लता ।

तत्र रेखा यथा तस्यैव –

"भ्रूयुगलं कमलाक्ष्या विलसति चतुराननेन कामेषुम् ।
निर्मातु मसिरेखा प्रथमोत्कीर्णा किमादर्शः ॥"

कामेषुं निर्मातुं चतुराननेन प्रथमोत्कीर्णा आदर्शभूता मसिरेखा किं कज्जलरेखेवेत्युत्प्रेक्षा ।आदर्शो नाम यद्दृष्ट्वा तत्सदृशमन्यत् लिख्यते सः ।

तत्रैव पल्लवो यथा नैषधीये – (II/120)

"अहो तपः कल्पतरुर्नलीयस्त्वत्पाणिजाग्रस्फुरदङ्कुरश्रीः ।
त्वद्भ्रूयुगं यस्य खलु द्विपत्री तवाधरो रज्यति यत्कलम्बः ।"

प्रथमोत्पन्नपत्रद्वयस्य पल्लवत्वमेवेति ।

नेत्रस्थाने हरिणो यथा नैषधे – (X/134)

"स्मितेन गौरी हरिणीदृशेयं वीणावती सुस्वरकण्ठभूषा ।
हेमैव कायप्रभयाङ्गशेषैस्तन्वीमतिं क्रामति मेनकापि ॥"

हरिण इति जातिपरत्वात् हरिणीत्यपि गृह्यते ।अत्र गौर्यादिशब्दैः गौरवर्णेत्यादयोर्थाः प्रथमं विवक्षिताः ।तत्र च अङ्गशेषैः शेषावयवैः ।कापि तन्वी मे मतिं नाक्रामति इति योजना ।अथ च गौरी नाम्नी सुराङ्गना एवं हरिणादयोऽपि काव्यप्रभया हेमा नाम सुराङ्गना शेषाङ्गैर्मेनकानाम्नी तन्व्यपि मे मतिं क्रामतीति द्वितीयार्थोऽपि विवक्षितः ।अत एव द्वयोरप्यर्थयोः प्रकृतत्वात् श्लेषालंकारः ।तत्रापि पादत्रये हेमेत्येतद्वर्जम् अर्थश्लेषः । अन्यत्र शब्दश्लेषः इति विवेकः ।

हरिणनेत्रमपि नेत्रस्थानेवर्णनीयं यथा नैषधीये – (I/21)

"स्वदृशोर्जनयन्ति सान्त्वनां खुरकण्डूयनकैतवान्मृगाः ।
जितयोरुदयत्प्रमीलयोस्तदखर्वेक्षणशोभया भयात् ॥"

पा.टि...

नेत्रस्थाने पद्मं यथा नैषधीये– (I/23)

"नलिनं मलिनं विवृण्वति पृषतीमस्पृशती तदीक्षणे ।
अपि खञ्जनगञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम् ॥"

अस्मिन् पद्ये पद्महरिणखञ्जना उपात्ताः । **तत्रेन्दीवरं यथा–**

आस्यं पद्मेन तस्याः कुवलयंयुगलेनाक्षिणी'त्यत्र प्रागुदाहृतश्लोके

तत्रैव झषो यथा- कस्यचित्–

"किमिन्दुः किं पद्मं किमु मुकुरबिम्बं किमु मुखं
किमब्जे किं मीनौ किमु मदनबाणौ किमु दृशौ ।
खगौ वा गुच्छौ वा कनककलशौ वा किमुकुचौ ।
तडिद्वा तारा वा कनकलतिका वा किमबला ॥"

खगौ-चक्रवाकौ । मदिरो मत्तखञ्जनः । **स च नेत्रस्थाने- यथा कस्यचित् -**

"अविदितसुखदुःखं निर्गुणं वस्तु किञ्चित्
जडमतिरिह कश्चिन्मोक्ष इत्याचचक्षे ।
मम तु मतमनङ्गस्मेरतारुण्यघूर्णन्-
मदकलमदिराक्षी नीवीमोक्षो हि मोक्षः ॥"

नेत्रस्थाने कुमुदं यथा कस्यचित्- (साहित्यदर्पणेX/पृ684)

"करमुदयमहीधरस्तनाग्रे गलिततमःपटलांशुके निवेश्य ।
विकसितकुमदेक्षणं विचुम्बत्ययममरेशदिशो मुखं सुधांशुः ॥"

मुखं प्राग्भागं वक्त्रं च । तत्र **भृङ्गे यथा सौन्दर्यलहर्य्याम्–** (४५)

"अरालैः स्वाभाव्यादलिकलभसश्रीभिरलकैः
परीतं ते वक्त्रं परिहसति पङ्केरुहरुचिम् ।
दरस्मेरे यस्मिन् दशनरुचिकिञ्जल्करुचिरे
सुगन्धौ माद्यन्ति स्मरदहनचक्षुर्मधुलिहः ॥"

यद्यपि कलभः करिशावकः इत्यमरः । तथापि गौड्या लक्षणयान्यत्रापि प्रयोगः । सश्रीभिरित्यत्र 'समानस्य छन्दसीति' सूत्रे समीकस्येतियोगविभागात्.... । अलिकुलसमश्रीभिरिति पाठे तु न काप्यनुपपत्तिः ।

पा.टि..

मेघसन्देशे– 'कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम् ।' इति ।

लौल्यमित्यत्र नेत्रे चाञ्चल्यं वर्णनीयमित्यर्थः । तद् यथा- **कुमारसम्भवे**- (I/46)

"प्रवातनीलोत्पलनिर्विशेषमधीरविप्रेक्षितमायताक्ष्या ।
तया गृहीतं नु मृगाङ्गनाभ्यस्ततो गृहीतं नु मृगाङ्गनाभिः ॥"

अत्र यद्यपि विक्षेपितमिति नपुंसके भावे क्तेन प्रेक्षणार्थकमिति तत्रैवाधीरत्वं प्रतीयते न तु लोचने तथापि अधीरत्वस्य चलनक्रियात्मकत्वात् प्रेक्षणोत्कमिति क्रियाया असमत्वाल्लोचनमेव तदाश्रयः, उपचारात् उत्प्रेक्षतो वर्णितम् ।

नेत्रे कामशरो यथा –

"किमिन्दुः किं पद्मम्" इति श्लोके 'किमु मदनबाणौ किमु दृशा' विति । आदिपदात् पद्मं कामधनुरादयः ।

तत्र **पद्मं** यथा– तत्रैव श्लोके 'किमब्जे किं मीनावि'त्यादि ।

कामधनुर्यथा श्रीगीतगोविन्दे - (XII/ रामकिरीरोगे अष्टपद्याम् २)

"अलिकुलगञ्जनसञ्जनकं रतिनायकसायकमोचने
त्वदधरचुम्बनलम्बितकज्जलमुज्ज्वलय प्रियलोचने ।" इति ।

आहे हे प्रिये मम लोचने एव रतिनायक-सायकमोचने कामशरासनेऽधिकरणे अलिकुलस्य गञ्जनसञ्जनकं परिभावजनकं त्वदधरचुम्बनेन त्वदधरकर्तृकचुम्बनेन लम्बितं विश्रंसितं प्रसृष्टं यत् कज्जलं तत् उज्ज्वलय उज्ज्वलं कुरु । मन्नेत्रयोगादञ्जनमेवोज्ज्वलं कुरु । न त्वञ्जनेन नेत्रमिति । अहो नयनयोः सौन्दर्यमिति भावः । अलिकुलेत्याद्यञ्जनविशेषणाद् भृङ्गमालायाः काम धनुर्गुणत्वस्य "**धनुः पौष्पं मौर्वी मधुकरमयी पंचविशिखा** इत्यादि प्रसिद्धत्वात् । तत् सादृश्यात् कज्जलरेखामेव गुणं नेत्ररूपे कामधनुषि योजयेति ध्वनिः । अत एव च ध्वनेः पदैकदेशाश्रितत्वात् अधरेत्यादिपदैकदेशरूपेऽधरचुम्बनलम्बिते त्वनेनाधोदेशसम्बन्धविश्रंसितव्यस्याप्यर्थस्य गुणविशेषणीभूतस्य ध्वनिरुन्नेयः । इदमुपलक्षणम् ।

१३

चम्पकं पाटलीपुष्पं श्रुतेर्दोला च पाशकः ।

पा.टि...

नेत्र स्थाने चकोरनेत्रमपिवर्णनीयं यथा नैषधीये –

“न पीयतां नाम चकोरजित्त्वया कथं चिदेतन्मुखचन्द्रचान्द्रिका ।
इमां किमाचामयसे न चक्षुषी चिरं चकोरस्य भवन्मुखस्पृशी ।।”इति ।

एवं कटाक्षस्थानेऽपि बाणकुन्तखड्गपरिघच्छुरिकादिशस्त्राणि वर्ण्यानि ।

बाणो यथा–

“हत्वा कटाक्षविशिखैर्गत्वा कतिचित् पदानि वामाक्षी ।
जीवति युवा न वा किं शिव शिव भूत्यै विलोकयति ।।”

अन्यान्यपि शस्त्राणि सामान्यत: **शस्त्रत्वेन यथा दीक्षितगोपीनाथमहापात्रस्य-**

“इतो गता सा क्व गता न जाने गेहं गता वा हृदयं गता वा ।
कटाक्षहेतिप्रसभप्रहारैर्विदार्य वक्षस्तटसत्कबाटम् ।।”

अत्र प्रथमार्धं प्राचीनस्य कस्यचित् । दितीयार्धं हि तस्य । अत्र कटाक्ष एव हेति: । शस्त्रमिति सामान्येन निर्देश: । एवमन्यत्रापि शस्त्रविशेषो मृग्य: ।

“‘ज्याकृष्टबद्धखटकामुखपाणिपृष्ठ-
प्रेङ्खन्नखांशुचयसंबलितोऽम्बिकाया: ।’

इति अमरुकेण (अम. अ.श/1) ।” इति अधिकं दृश्यते ।

(१३) भु3) ‘पाशक:’ इत्यस्मात् परं ‘नासादण्डस्य’ (पृ382) इत्यस्मात्पूर्वं च-

अथ श्रुतिस्थाने चम्पककुसुमपाटलाकुसुमे दोलापाशा: चकारात् शष्कुली तद्गर्भे नवाङ्कुरश्च श्रवणपाल्यां धनुर्गुणश्च । क्रमेण यथा–

तत्र चम्पककुसुमं दीक्षितगोपीनाथमहापात्रस्य–

“इन्द्रनीलमणिभूषणयुक्तं भ्राजते श्रवणयुग्मममुष्या: ।
मुक्तजीवनमधुव्रतयुक्तं चम्पकद्वयमिवार्द्धविकासि ।।”

अर्धविकसितत्वेन मधुव्रतस्यान्त:प्रवेशाभाव: ।

‘न षट्पदो गन्धफलीमजिघ्रदि’ त्यस्य तु दैवादाघ्रातो म्रियत इत्यर्थशेष: ।

पा.टि..

तत्रैव **पाटलाकुसुमं** यथा - अस्मिन्नेव पद्ये द्वितीयार्धे--

'गन्धलोल्म धूपव्रतपाटलायुगमिव प्रविकासि'

इति पाठ्यम् । पाटलायुगं पाटलापुष्पद्वयम् । पुष्पे क्लीवे च पाटलेत्यमरः ।

तत्रैव **दोला** यथा **दीक्षितगोपीनाथमहापात्रस्यैव**--

''भुवनविजयी नित्यक्लान्तः श्रमापनिशं यया-
तिशयवलितापाङ्गश्रेणिगुणैरिव सन्ततम् ।
श्रवणयुगलव्याजाद् दोलायुगे युगपत्स्मरः
स्वपिति चरति प्राचीरेखा सताशतलेखने (?) ॥'

अथ **तत्रैव पाशः** । यथा **तस्यैव** –

''नयनकपटगुप्तो खञ्जनो मञ्जुनेत्रा-
स्त्रिभुवनविजिगीषामिच्छतो मत्स्यकेतोः ।
श्रवणयुगलपाशौ न्यास किं प्राग्विधाता
वशयितुमनुकूलद्रव्यमव्यग्रचेताः ॥

कटाक्षस्य वक्रिमापि वर्णनीयः । यथाष्टदुर्गीयस्यार्वाचीनस्य **वासुदेवरथराजगुरोः**–

''शशधरकलयेक्षितुं न शक्यः
खलचरितस्य न चानुभूतपूर्वः ।
कविजनमनसो विदूरवर्ति
नृपवुदितु(?) दृशि वक्रिमप्रकारः ॥''

दृशीत्यस्य कटाक्ष इति पर्यवसितः । नेत्रवक्रत्व भावात् । कटाक्षस्य चापलमपि वर्ण्यम् । यथा **अमरुकेण**-(?) 'न्यास किं प्राग्विधाता विशयितुमनुकूलद्रव्यमव्यग्रचेताः(?)

अथ तत्रैव । **शष्कुली** यथा - **नैषधीये**.... ....(उदाहरणं न लिखितम्)

यथ **कर्णगर्तेन वक्रो** यथा - **नैषधीये**........................(उदाहरणं न लिखितम्)

श्रवणपाल्यां धनुर्गुणो यथा **तत्रैव**.............. ....(उदाहरणं न लिखितम्)

इत्यधिकं दृश्यते ।

नासादण्डस्य[१४] चञ्चुश्च वंशाधोमुखतूणकौ[१५] ।।७।।
तिलप्रसूनदण्डौ च स्फुटचम्पकमेव च[१६] ।

पा.टि.……………………………………………………………………

(१४) म) 'नासादण्डश्च' ।　　(१५) भु2) 'वंशार्द्धोमुख-'।

(१६) भु3) 'स्फुटचम्पकमेव च' इत्यस्मात्परं निश्वास'(पृ383) इत्यस्मात्पूर्वं च -

अथ नासादण्डे शुकचञ्चुर्यथा - दीक्षितगोपीनाथमहापात्रस्य –

"पचेलिमं विम्बफलं ग्रहीतुं शुकस्य चञ्चोरवनम्रितायाः ।
नासाश्रियं पुष्यति वारनार्याः प्रत्योष्ठलेखामिति तिष्ठमाना । (?)"

नासादाण्डे वंशो यथा सौन्दर्यलहर्याम् – (६१)

"असौ नासावंशस्तुहिनगिरिवंशध्वजपटी
त्वदीयो नेदीयः फलतु फलमस्माकमुचितम् ।
त्वदीयान्तर्मुक्ताः शिशिरतरनिःश्वासघटिताः
समृद्ध्या यस्तासां बहिरपि च मुक्तामणिधरः ।।"

अधोमुखो तूणो यथा नैषधीये - (VII/36)

"नासादसीया तिलपुष्पतूणं जगत्त्रयन्यस्तशरत्रयस्य ।
श्वासानिलामोदभरानुमेयां दधद्द्विवाणीं कुसुमायुधस्य ।।"

अत्र च तूणत्वेन सामान्यत उक्तावप्यधोमुखत्वमर्थात्वयानि (?) योग्यतावशात् । तिलपुष्पत्वमप्यस्मिन्नेव पद्ये ।

नासिकास्थाने दण्डो यथा–

'पुरटघटितोन्यस्येत्यस्मिन् पद्ये सीमन्ताख्यमित्यत्र 'नासाव्याजादि' ति पाठ्यम् ।

अथ नासिकास्थाने विकसितचम्पककुसुमं यथा - दीक्षितगोपीनाथमहापात्रस्यैव-

'नेदं मुखं तामरसं तरुण्या नीलोत्पलद्वंद्वमिमे न नेत्रे ।
प्रफुल्लचाम्पेयमियं न नासा नोष्ठाविमौ रक्तकयुग्ममेव ।।"

रक्तकयुग्मं बन्धूककुसुमद्वयम् । एवेत्यस्य सर्वत्र विधेयवाक्योत्तरमन्वयः ।" इति अधिकं दृश्यते ।

निःश्वासपवनस्यैव पद्मादेरतिसौरभम् ॥८॥
अधरस्यैव बन्धूकं प्रवालो नवपल्लवः ।
बिम्बं[१७] फलं पद्मरागं[१८] चारुणोऽरुणवर्णकम्[१९] ॥९॥

पा.टि.

---

(१७) भु4 म) 'बिम्बफलं' । (१८) म) 'पद्मरागमरुणारुण' ।

(१९) भु3) 'चारुणोऽरुणवर्णकम्' इत्यस्मात्परं (पृ384) 'दन्तानाम्' इत्यस्मात्पूर्वं च-

अथ निःश्वाससौरभस्य पद्मातिशायित्वं यथा तस्यैव–

"सखि ! मुखमपिधेहि मानुलापीस्तवमुखमारुतसौरभात् ।
अलिकुलमुपयाति पद्मषण्डादुचितमवस्यति को विशेषकामः ॥"

अवस्यति -जानाति, उचितं चिरपरिचितापरित्यागरूपम्। मा अनुलापीः न मृदुर्भाषेथाः । पद्मषण्डात् पद्मषण्डं चिरपरिचितमप्यपहाय । ल्यब्लोपे पञ्चमी । मलिनात्मनां नीलविग्रहाणाम् अनिर्मलचित्तानां च । अत्र हि पद्मषण्डपरित्यागपूर्वक कामिनीमुखमारुतोपगमनेन तस्य पद्मातिशायि सौरभं व्यज्यते ।

अधरस्थाने बन्धूकं यथा तस्यैव –

'आस्यं पद्मेन तस्याः कुवलययुगले 'त्यादि प्रागुक्ते पद्ये ।

यथा वा- 'नेदं मुखं तामरसं तरुण्या' इत्यादि सन्निहिते पद्ये ।अत्रैव प्रवालो विद्रुमः । स च यथा- **कस्यचित् –**

"चातिकान्तरदनच्छदव्यथा संकटादरिवधूजनस्य यः ।
ओष्ठविद्रुमदलान्यमोचयन्निर्दिशन् युधि रुषा निजाधरम् ॥"

तत्रैव नवपल्लवो यथा - कस्यचित् – (शृङ्गारतिलके ?)

"इन्दीवरेण नयनं मुखमम्बुजेन कुन्देन दन्तमधरं नवपल्लवेन ।
अङ्गानि चम्पकदलैः स विधाय धाता बाले कथं घटितवानुपलेन चेतः ॥"

अधरे बिम्बिकाफलं यथा नैषधीये - (I/24)

"अधरं किल बिम्बनामकं फलमस्मादिति भव्यमन्वयम् ।
लभतेऽधरबिम्ब इत्यदः पदमस्या रदनच्छदो वदत् ॥"

दन्तानां पद्मरागाणि हीरकाः कुन्दमौक्तिकम्(के?) ।
चारुदाडिमबीजानि मौक्तिकालिस्तथैव[२०] च ॥१०॥

पा.टि..

तत्रैव पद्मरागो यथा - दीक्षितगोपीनाथमहापात्रस्यैव –

"दृग्भाग्यकल्पलतिकेव कुरङ्गनेत्री
व्याजान्ममावनितलं कमवातरद् या ।
दन्तच्छदप्रसृमरस्मितलोहिताश्म
पात्रीभृतामृतमिमे तृषिते अपीप्यत् ॥"

इमे दृशौ अपीप्यत् - पायितवती ।

अथ तत्रैवारुणो यथा तस्यैव –

"उपर्युपरि वक्षोजहेमाद्रिमधरारुणः ।
उदितो न मदे तन्व्याः कस्य चित्ताम्बुजन्मनः ॥"

उदित उत्पन्न रञ्जितश्च । कस्य पुंसः चित्तमेवाम्बुजन्म तस्य ।

अधरस्यारुणवर्णता यथा - नैषधीये - (VIII/39)

"जानेऽतिरागादिदमेव बिम्बं बिम्बस्य च व्यक्तमितोऽधरत्वम् ।
द्वयोर्विशेषावगमाक्षमाणां नाम्नि भ्रमोऽभूदनयोर्जनानाम् ॥"

नाम्नि नामांशे विषये इदं विम्बपदवाच्यमित्यादिभ्रमस्य बिम्बपदस्य रूपनामविषयकत्वादिति बोध्यः । इति अधिकं दृश्यते ।

(२०) भु3) '-स्तथैव च' इत्यस्मात्परं (पृ386) 'चन्द्रिका' इत्यस्मात् पूर्वं च-

अथ दन्तस्थाने पद्मरागरत्नं यथा- मेघसन्देशे (I/19)

"तन्वी श्यामा शिखरदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद् युवतिविषये सृष्टिराद्येव धातुः ॥"

अत्र हि शिखरदशनेत्यत्र **'पक्वदाडिमबीजाभमाणिक्यं शिखरं विदुरिति** कोषात्तादृशमाणिक्यसदृशदन्तीत्यर्थः । शिखरिदशनत्वपि क्वचित् पाठः । तदा शिखरवन्तो दशना यस्या इति व्याख्येयम् ।

पा.टि..

नैषधीयेऽपि– (XI/48)

“भूयस्ततो निखिलवाङ्मयदेवता सा
हेमोपमेयतनुभासमभाषतैनाम् ।
एनं स्वबाहुबहुवारनिवारितारिं
चित्ते कुरुष्व कुरुविन्दसकान्तिदन्ति ॥”

‘कुरुविन्दः पद्मराग’ इति विश्वः । सकान्तीत्यत्र समास्येच्छन्दस्य मूर्द्धप्रभृत्यदर्केष्वित्यत्र समानस्येति योगविभागात् सादेशः ।

दन्तस्थाने हीरकरत्नं यथा- दृग्भाग्यकल्पलतिके’ति प्रागुदाहृते पद्ये द्वितीयार्धस्थाने

“ओष्ठान्तरप्रसृतदन्तरुचिच्छलेन
माणिक्यपात्रभृतहीरमदन्तताभ्याम् ।’ (हीरकजालमाभ्याम् ?)

इति पठनीयम् । आभ्यां दृग्भ्याम् । यथा वा **तस्यैव**–

“धाता निर्माति नानाविधकृतकुतुकी योषितामक्षियुग्मं
युक्तं माहेन्द्रनीलोपलमयमधरौ पद्मरागैः सरागैः ।
यद्दन्तान् किन्तु हीरैस्तदनुचिततरं यत्ततो वज्ररुक्षा
हन्त प्रेयःसु नम्रेष्वपि नन ननतेत्येव निर्यान्ति वाचः ॥”

हीरकाणां वज्रत्वात्तदुत्पन्नानां च तद्गुणग्राहित्वौचित्या नकाराणां च दन्त्यत्वादिति भावः ।

अथ दन्तस्थाने कुन्दकुसुमानि यथा **तस्यैव**–

“आस्यं पद्मेन तस्याः कुवलययुगलेनाक्षिणी दन्तवस्त्रे
बन्धुकाभ्यां च कुन्दैर्दशनतति मजो वज्रपुष्पेण नासाम् ।
अम्भोजैः पाणिपादं तनुरुचिमखिलां केतकीगर्भभाभिः
सन्तत्य न्यासमस्तोपरिचिकुरचयं क्लृप्तमालैस्तमालैः ॥”

इति पठित्वा अजो ब्रह्मा, सन्तत्य निर्माय इति व्याख्येयम् । शेषं तुल्यम् ।

अथ दन्तस्थाने मुक्ताफलानि - तस्यैव–

‘दृग्भागकल्पलतिके’ ति श्लोकस्योत्तरार्द्धम्-

दत्तेऽधरप्रसृतदन्तरुचिच्छलेन
माणिक्यपात्रभृतमौक्तिकजालमाभ्याम् ।

इति पठनीयम् ।

२१

चन्द्रिकामृतपुष्पाणि हासस्य च स्मितस्य च ।

पा टि...

अथ रदस्थाने दाडिमबीजानि - तस्यैव –

"सुदतीरदनैः पचेलिमानां यदि बीजावलिरालि दाडिमानाम् ।
सदलक्तकरागयोगिनी स्यादुपमीयेत नवा न वा तदापि ॥"

हे आलि ! पचेलिमानां स्वयमेव पक्वानां न तु कृत्रिमपाकानं दाडिमानां दाडिमीफलानां बहूनां न त्वेकस्य तस्य बीजानां आवलिः श्रेणिः, न त्वेकं बीजम् । सा किंभूता बीजावलिः, नवा न तु चिरन्तना, सापि यदि सदलक्तकरागयोगिनी स्यात् न तु केवला । तत्रापि यदि सदलक्तकरसयोगिनी स्यात् न तु साधारणारक्तकरसयोगिनी तदापि एतादृशविशेषण विशिष्टापि सुदत्याः शोभनदन्तायाः अस्याः रदनैः उपमीयेत वा नवा ।" इति अधिकं दृश्यते ।

(२१) भु3) 'स्मितस्य च' इत्यस्मात्परं 'वचनस्यामृतं'-(पृ 386) इत्यस्मात्पूर्वं च-

अथ स्मितस्थाने मौक्तिकालिः - यथा तस्यैव –

'दृग्भाग्यकल्पलतिके' ति श्लोके द्वितीयार्धे
'दत्तेऽधरप्रसृमरस्मितऋक्च्छलेन' इत्यादि पठनीयम् ।

अथ तत्रैव चन्द्रिका यथा तस्यैव –

"आयान्त्या नवकान्तसङ्गमरसप्रश्नोत्सुकाभिः समं
स्निग्धाभिः निभृतं निभालय मुहुः स्मेराननायाः पुरः ।
नासाभूषणमौक्तिकं वितनुते कान्तिं कुरङ्गीदृशः
पीयूषद्युतिबिम्बसंनिधिमिलद्गीर्बाणगुर्वाद्धताम् ॥

अत्र हि चन्द्रमण्डलसमीपवर्ति-बृहस्पतिशोभाभाजिनासामौक्तिकवर्णनेन मुखस्य चन्द्रोपमेयत्वं दर्शितम् । स्मेराननाया इत्यनेन च स्मितस्य चन्द्रिकोपमेयत्वं व्यञ्जितम् ।

यथा वा सौन्दर्यलहर्याम्– (६३)

"स्मितज्योत्स्नाजालं तव वदनचन्द्रस्य पिवतां
चकोराणामासीदतिरसतया चञ्चूजडिमा ।
अतस्ते शीतांशोरमृतलहरीमम्बुरुचयः (मम्लरुचयः ?)
पिवन्ति स्वच्छन्दं निशि निशि भृशं काञ्चनधिया (काञ्जिकधिया ?) ॥"

वचनस्यामृतं प्रोक्तं [२२]कीरः पुंस्कोकिलस्तथा ॥११॥
मधुरं कोमलं भृङ्गो[२३] विपञ्ची सारिका[२४]स्वरः ।

पाटि...

यथा तस्यैवामृतम् –

“पदन्यासैरासीत् कमलपरिपूर्णा वसुमती
दृशान्दोलैरिन्दीवरमयमभूदम्बरतलम् ।
अतः किंचिद्याचे विरचय मुखं स्मेरमधुना
धरायामप्यास्तां विधुमुखि ! सुधायाः परिचयः ॥”

अथ तत्र पुष्पं यथा - दीक्षितगोपीनाथमहापात्रस्यैव –

“संवर्तिके इव रदच्छदने प्रवाल-
लीलो करौ कररुहाः किल कोरकाभाः ।
सूनच्छविस्मितमुरोजयुगं फलाभं
संचारिणीव लतिका ललनेयमेति ॥”

एति आगच्छति ।

एवं हासस्थानेऽपि– 'सपुष्पहासा इव रेजिरे भुव' इत्यादि ।

किरातार्जुनीयादौ पुष्पस्य द्रष्टव्यान्युदाहरणानि, विस्तरभयान्न लिखितानि ।एवं मौक्तिकालिप्रभृतीनाम् । यद्वा हसेति पाठ्यम् स्मेरेति पाठेऽतः माभूत् ।” इति अधिकं दृश्यते ।

(२२) भु 4.म) 'तद्वत्' । (२३) भु 1 भु 2) 'भृङ्गी' ।

(२४) भु 3) 'सारिकास्वरः' इत्यस्मात्परं 'चाञ्चल्यम्' (पृ.390)इत्यस्मात्पूर्वं च-

अथ वचःस्थानेऽमृतम्- पूर्वोक्ते 'पदन्यासैरासीदि'ति पद्ये द्वितीयार्धे-

“अतः किञ्चिद्याचे विरचय वचः स्मेरमधुरम् ।” इत्येव पाठः ।

तत्र हि वचसि सुधात्वमारोप्यते । तस्यैव विशेष्यत्वेन प्रधानतया आरोपाधिकरणतोपपत्तेः । न तु स्मिते इत्यस्य विशेषणत्वेनाप्रधानत्वात् । अत्र एव स्मितस्थानेसुधावर्णनप्रकरणें “मुखं स्मेरमधुनेति पाठं प्रकल्प्य तत्र मुखे उद्देश्ये स्मेरत्वं विधीयते । विधेयविशेषणस्य मुख्यत्वाभ्युपगमात् ।

पा.टि...

अथ वचः कीरत्वम्- यथा-वा नैषधीये-- (X/7)

"गिरः श्रुता एव तव श्रवः सुधाः
श्लथा भवन्नाम्नि तु न श्रुतिस्पृहा ।
पिपासुता शान्तिमुपैति वारिणा
न जातु दुग्धान्मधुनोऽधिकादपि ॥"

वारिणि जाता वारिजा सप्तम्यां जने......वारिणे.....स्तु प्रमादिक एव तद्विचारस्त्वप्रकृतत्वान्नेह प्रपञ्चितः । यथा वा तत्रैव–

"त्वद्वाचः स्तुतये वयं न पटवः पीयुषमेव स्तुमः ।
यस्यार्थे गरुडामरेन्द्रसमरः स्थाने सजानेऽजनि ।
द्राक्षापानकमानमर्दनसृजा क्षीरे दृढावज्ञया
यस्मिन्नेव धृतोऽनया निजपदप्रक्षालनानुग्रहः ॥"

अत्र हि सुधापेक्षया वाचो वैशिष्ट्यवर्णनमपि तत्साम्यपर्यवसायि ।

यथा वा दीक्षितगोपीनाथमहापात्रस्य वेश्याभिसारप्रकरणोक्ते–

"ताम्बुलं चर्वयन्ती नयनविलसितैः सस्मितैः कामचित्ता ।
न्याकर्षन्ती वचोभिः श्रुतिममृतरसस्यन्दिभिस्तर्पयन्ती ॥" इति

यथा गोवर्धनाचार्यस्य–

"सत्कविरसनासूर्पीनिस्तुषतिरशब्दशालिपाकेन ।
तृप्तो दयिताधरमपि नाद्रीयते का सुधादासी ॥"

तत्रापि सत्कविकाव्यस्य उत्कृष्टत्वं सुधायाश्च निकृष्टत्वम् । तस्य च साम्य एव पर्यवस्यति ।

यथा वाऽर्वाचीनस्य नरसिंहमिश्रस्य रुक्मिणीपरिणये–

"अमृतं सुतनोश्च भाषितं तुलयामास विधिः समादरम् ।
दिवमेकमवाप लाघवादपरं गौरवतोधरातलम् ॥"

एवमादीनि बहून्युदाहरणीयानि ।

पा.टि..

अथ **वचसि शुको** यथा - **दाक्षिणात्यस्य कस्यचित्**–

“वीराग्रेसर कृष्णरायनृपते ! त्वद्वैरिकान्ता वने
धावन्त्यः कुचजानुलोमलतिकाव्याहारलीलावृतान् ।
प्राप्तान् कोकमहे.....पन्नगशुकान् रुन्धन्ति वक्त्रेन्दुना
मध्येनापि कचेन कङ्कणलसद्वैदुर्यरत्नैरपि ॥”

अत्र हि व्याहारलीला........(कीटदष्टः).....आहूतान् शुकान् कङ्कणखचितैवैदुर्यरत्न न विडालाक्षिसदृक्षेण निवारयन्तीति तात्पर्यः ।

अथ तत्र **पुंस्कोकिलः** - यथा **नैषधीये**– (VI/59)

कण्ठः किमस्याः पिकवेणुवीणास्तिास्त्रो जितः सूचयति त्रिरेखः ।
इत्यन्तरस्तूयत कापि यत्र नलेन बाला कलमालपन्ती ॥

अत्र हि कण्ठ इत्यनेन तदीयस्वरो लक्ष्यते । कण्ठमात्रस्य वीणादिजयासम्भवात् ।

यथा वा **तत्रैव**– (III/60)

“वाचं तदीयां परिपीय मृद्वीं मृद्वीकया तुल्यरसां स हंसः ।
तत्याजतोषं परिपुष्टघोषे घृणां च वीणाक्वणिते वितेने ॥”

तत्र **माधुर्यं** यथा **सौन्दर्यलहर्याम्**– (६६)

“विपंच्या गायन्ती विविधमवदानं पशुपते-
स्त्वयारब्धे पातुं (वक्तुं ?) चलितशिरसा साधुवचने ।
तदीयैर्माधुयैरपलपिततन्त्रीं कलरवां
निजां वीणां वाणी निचुलयति चेलेन निभृतम् (?) ॥”

अत्र चेलेनोत्तरीयवसनेनेत्यर्थः । चोलेन केचित् पठन्ति । तन्मन्दं, चोलेन कञ्चुलिकापरपर्यायेण वीणायाः संगोपनासंभवात् ।

तत्र कोमलत्वं यथा–.........................(कीटदष्टः)...................
.......................समापयद् वाचि मृदुत्वमुद्राम् ।”

‘वाचं तदीयां परिपीय मृद्वी’ मित्यत्र च ।

तत्रैव वीणा सारिकास्वरः यथा– ‘कण्ठः किमस्या’ इत्यत्रैव ।

[२५]चाञ्चल्यं रसनायाश्च [२६]लौल्यं च स्निग्धभावता ॥१२॥
चतुर्थीचन्द्रमा [२७]वर्ण्यश्चिबुकस्यैव [२८]धीवरैः ।
पूर्णेन्दुः पङ्कजं चैव दर्पणो [२९]वदनस्य च ॥१३॥
[३०]कण्ठदेशस्य कम्बुश्च [३१]कुंभोंसस्यैव शोभनः ।
मृणाललहरी[३२]शाखापाशश्च [३३]बाहुयुग्मयोः ॥१४॥
[३४]पाणेः कोकनदं [३५]पद्ममुपमानं च पल्लवः ।
[३६]सद्गन्धफलिकाऽद्गल्याः पल्लवाशोककोरकौ ॥१५॥

पा.टि..

सारिकास्वरो यथा- दीक्षितगोपीनाथमहापात्रस्य–

“विरहविधुरामर्यादाहव्यतिक्रमणोच्चलन्
मदनदहनज्वालाजालाविनोदमथेच्छती ।
कथमपि वधूः सारीं क्षामाक्षरां यदपाठय
यद्यद्पठतसौ भेदं वाचो न चोपलभे तयोः (?) ॥”

मर्यादाहः अवधि दिनम् । तयोः पाठयन्ती-पठन्ती-सम्बन्धिन्याः भेदं विशेषम् । इति अधिकं दृश्यते ।

(२५) भु1 भु2) ‘चञ्चला’ । भु4 म) ‘चञ्चलो’ ।

(२६) भु3) ‘शोभात्वं स्निग्धकान्तिता’ (२७) भु4) ‘वर्ण्यं चिबुकस्य च धीवरैः’

(२८) भु3) ‘वर्ण्यश्चिबुकस्य सुधीवरैः’ । (२९) भु3) ‘वदनेऽपि च’ ।

(३०) भु3) ‘कण्ठदेशे च’ (३२) भु3) ‘वल्ली’ । म) ‘शाखी’ ।

(३१) भु2 भु4) ‘कुम्भोशस्यैव’ म) ‘कुम्भास्यस्यैव’

(३३) भु3) ‘बाहुयुग्मके’ । (३४) भु3) ‘पाणौ’ ।

(३५) भु1 भु2) ‘पद्मं वर्णितव्यश्च’ । (३६) भु1 भु2) ‘सद्गन्धफलिना-’ ।

३७
नखस्य रत्नं तारा च प्रसूनं जातिमल्लिके ।
३८
स्तनयोश्चक्रयुगलं स्तबको गिरिकन्दुकौ ॥१६॥
घटसंपुटकौ चैव कुम्भिकुम्भश्च बिल्वकम् ।
नागरङ्ग(नारंगक?)फलं पद्मकोषं तालफलादय: ॥१७॥
३९
वेदिका सिंहमध्यं च कट्या: डमरुमध्यक: ।
४०
द्व्यणुकं परमाणुश्च शून्यं च मुष्टिमानता ॥१८॥
४१
रोमाल्या वल्लरी रेखा शैवालं कृष्णसर्पिणी ।
४२ ४३
यमुनासी च भृङ्गालिर्नीलरत्नलता तथा ॥१९॥
४४
कालसूत्रं धूमरेखास्तथा दमनकस्तरु:
४५
विवरो ह्रदकूपौ च नाभेरावर्तिकाम्बुजम् ॥२०॥
४६
सोपानं वीचिनि:श्रेण्यौ त्रिवल्याश्च यथोचितम् ।
पुलिनं जघनस्यैव फलकं पीठमेव च ॥२१॥

पा.टि.

(३७) भु 3) 'नखेषु रत्नता स च प्रसूनो' । (३८) भु 1भु 2) 'श्चक्रयुग्मं च' ।
(३९) भु 1 भु 2) 'कटिदेशस्य डमरु:' ।
(४०) भु 1 भु 2) 'द्व्यणुकं परमाणुश्च' इत्यादि नास्ति । (४१) भु 1 भु 2) 'सर्पिका'।
(४२) भु 3) 'यमुनासिश्च' । भु 4) 'यमुना सा च' । म) 'यमुनानीर-' ।
(४३) भु 3 भु 4म) 'लतास्तथा' । (४४) भु 1 भु 2भु 4 म) 'कालसूतं' इत्यादि नास्ति ।
(४५) भु 3) '-वर्तिकोऽम्बुजम्' । भु 4) 'वर्तिनाम्बुजम्' ।
(४६) भु 1 भु 2) 'त्रिवल्याश्चैव सुन्दरौ' ।

तस्यापि कृतिभिर्वर्ण्या घनता मदनाङ्गनम् ।
मण्डलं च नितम्बस्य चक्रं सिंहासनस्थलम् ॥२२॥
चरमस्य प्रभा हैमी वर्ण्या च कनकस्थलिः ।
४७
करभेभकरावूर्वो रम्भास्तम्भौ मनोरमौ ॥२३॥
४८
स्तम्भौ हैमौ वर्णनीयौ जङ्घयुग्मस्य सूरिभिः ।
४९
पादयोः स्थलपद्मं च कमलं नवपल्लवः ॥२४॥
५०
अङ्गुल्याः कलिकापङ्क्तिश्चम्पकाशोकयोरपि ।
नखावल्याः प्रसूनानि गतेर्हंसश्च वारणः ॥२५॥
केतकी कनकं कान्त्याश्चम्पकं च तडिल्लता ।
५१
मृदुत्वं सौकुमार्यस्य नवनीतं शिरीषकम् ॥२६॥
५२

योषितामेतान्युपमानान्युक्तानि । यथोचितान्य (तम ?) न्यान्युपमानानि च प्रयोक्तव्यानि ।

५३
तासां कैशोरकादौ स्यात् नानावेशादिवर्णनम् ।
ललाटे सूद्र्ध्वरेखा च सिन्दूरेणैव सोज्ज्वला ॥२७॥

पा.टि.

---

(४७) भु3) 'जानुकरभोरु' ।
(४८) भु3 भु4 म) 'हैमस्तम्भौ चोपमानं जंघायुग्मस्य सुन्दरौ'
(४९) भु1 भु2) 'वर्ण्यं सत्पल्लवाम्बुजम्' । (५०) भु1 भु2) 'कलिकालिश्च' ।
(५१) भु3) 'सौमुमार्यं स्यात्' । (५२) भु1 भु2 भु4 म) '-न्युक्तान्यपि' ।
(५३) भु3 भु4 म) 'कैशोरे यौवने तासाम्' ।

सैव रेखा च शोभाढ्या कस्तूर्या चन्दनादिना ।
तत्र कज्जलरेखा च कर्णपर्यन्तगा वरा ।।२८।।
प्रौढावुचितो वेषो वर्णनीयः कवीश्वरैः ।
सौभाग्यगुणशीलत्वात् सदा सिन्दूरमण्डलम् ।।२९।।
कस्तूर्या मकरीपत्रं गण्डमण्डलयुग्मयोः[५४] ।
चिबुकस्यैव मध्ये तु मधुपो मृगनाभिना[५५] ।।३०।।
स्तनयोः पत्रलेखा च कस्तूरीकुङ्कुमादिना ।
यद् यत्र भूषणं रम्यं वर्ण्यं[५६] तत्तद् यथोपमम् ।।३१।।

अथ कविकल्पलतायां पुरुषाङ्गस्योपमानमुच्यते – ☆

स्कन्धस्य[५७] वृषरक्ताक्षस्कन्धो[५८] बाह्वोरहीश्वरः ।
हस्तिहस्तकरिस्तम्भार्गलदण्डाश्च वक्षसः ।।३२।।
शिलाकपाटे यानस्य प्रमत्तोक्षगतिः पुनः ।
एकैकेनापि धर्मेणोपमानं बहुधा भवेत् ।।३३।।

एतेषामुदाहरणं काव्यादौ ज्ञेयम् ।

इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथ नारायणदेवमहाराज-विद्वत्सभाराजित-प्रबन्धकविताप्रकाशक-करणकुलसम्भव-कविभिषग्वर-वासुदेवपात्रतनय-श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ उपमानं[५९] (उपमाननिरूपणं ?) नाम एकविंशतितमः[६०] किरणः ।

पा.टि...

(५४) भु 3) 'युग्मको' ।
(५५) भु 3) 'मृगनाभिजः' ।
(५६) भु 3) 'तद्वर्ण्येत' ।
(५७) भु 1 भु 2 भु 4) 'स्कन्धश्च' ।
(५८) म 'वृषभस्यैव' ।
(५९) भु 'पुरुषोपमानम्' ।
(६०) भु 1 भु 2 म) 'एकविंशतिः' । भु 4) 'विंशतिः' ।

टि. ____

☆ देवे. कवि./ पृ. 69

[द्वाविंशतितमः किरणः]

अथ कविसंमतिः[१] –

अकीर्तौ व्योम्नि[२] पापे च कृष्णतां[३] वर्णयेत् ध्रुवम् ।
पुण्ये हासे यशःकीर्त्योर्वर्णितव्या[४] च शुक्लता ॥१॥
प्रतापे रक्ततोष्णत्वे क्रोधे रागे तथा[५] स्मृता ।
नद्यादौ सागरे वर्ण्यं कमलं कुमुदादिकम् ॥२॥
अखिलेऽपि जलाधारे खगा हंसादयो मताः ।
चकोरैश्चन्द्रिका पेया वर्णितव्या[६] विचक्षणैः ॥३॥
हंसादिपक्षिणो मत्ताः क्रीडन्त्यल्पजलाशये ।
हंसा[७] मानसरो यान्ति सत्वरं जलदागमे ॥४॥
सद्यूनां सुरसज्ञानामङ्गेषु विरहज्वरैः ।
हारादयः स्फुटन्त्येव जायते तनुकृष्णता[८] ॥५॥

पा.टि.

(१) भु3 भु4 .म) 'कविसमयः' ।
(२) भु3) 'मूर्ध्नि' ।
(३) भु1 भु2) 'कार्ष्ण्यताम्' ।
(४) भु3) 'वर्णनीया' ।
(५) भु3) 'तथोष्णता' ।
(६) भु1 भु2 भु4 म) 'वर्णनीया' ।
(७) भु3) 'हंसानां मानससरोयानमब्दागमे द्रुतम् ।'
(८) भु1 भु2 भु4) तनुकार्ष्ण्यता ।

धनुर्गुणो भृङ्गमाला वर्ण्यो मन्मथभूपतेः।
कौसुमाश्च [९]धनुर्बाणाः [१०]वर्णनीया विशारदैः ॥६॥
कामदेवस्य बाणौघैः सुन्दरीणां कटाक्षकैः।
वर्ण्यते हृदयं भिन्नं यूनां व्रणयुतं [११]वपुः ॥७॥
[१२]दिवसे विकसत्येव कमलं कुमुदं निशि।
चन्द्रिका शुक्लपक्षे च तमिस्रं कृष्णपक्षके ॥८॥
मयूराणां रुतं नृत्यं प्रावृट्काले च वर्णयेत्।
वसन्ते [१३]नैव वर्ण्ये च जात्यशोके फलं तथा ॥९॥
[१४]गन्धसारद्रुमे नैव कुसुमं फलसम्पदः।
रत्नानि यत्र तत्राद्रौ वर्णनीयानि कोविदैः ॥१०॥
चतुष्कत्वं समुद्रस्य [१५]वर्णनीयं सदा बुधैः।
सारसादीनि पुष्पाणि नभोनद्यां च [१६]वर्णयेत् ॥११॥
हिमाद्रावेव भूर्जत्वङ् मलये चन्दनं तथा।
[१७]वर्णनीयं वसन्ते च पिकानां कलकूजितम् ॥१२॥

पाटि……

(९) म) 'धनुःशरा'। (१०) भु 1 भु 2 भु 4.म) 'वर्णितव्या'।
(११) भु 1 भु 2) 'तनुः'। (१२) भु 3) 'दिवसेष्वेव कमलं विकचं कुमुदं निशि'
(१३) भु 1) 'नैव वर्ण्या च'। भु 3) 'वर्णनीये नो'। भु 4) 'वर्णितव्या ये'। म) 'वर्णितो ह्यनो'।
(१४) म) 'गंधसारद्रुमेणैव'। (१५) भु 1 भु 2 भु 4.म) 'वर्णितव्यं बुधैर्मतम्'।
(१६) भु 1 भु 2) 'वर्ण्यते'। (१७) भु 1 भु 2) 'वसन्त एव सद्वर्ण्यं'।

कविकल्पलतायाम्—☆

“‘कामिदन्तेषु कुन्दानां कुड्मलेषु च रक्तता ।
रक्तत्वं रत्नबन्धूकबिम्बाम्भोजविवस्वताम् ।।१३।।
सामान्यग्रहणे शौक्ल्यं छत्राम्भःपुष्पवाससाम्
विभावर्यां भिन्नतटाश्रयणं चक्रवाकयोः ।।१४।।
तिमिरस्य तथा मुष्टिग्राह्यत्वं सूचीभेद्यता ।
अञ्जलिग्राह्यता कुम्भोपवाह्यत्वं विधुद्विषः ।।१५।।
कमलासंपदोः कृष्णहरितोः सर्पनागयोः ।
पीतंलोहितयोः स्वर्णपरागाग्निशिखादिषु ।।१६।।
चन्द्रे [१८]शशैणयोः काम ध्वजे मकरमत्स्ययोः ।
[१९]दानवासुरदैत्यानामैक्यमेवाभिसंमतम् ।।१७।।
बहु[२०]कालजन्मनोऽपि शिवचन्द्रस्य बालता ।
मानवा मौलितो वर्ण्या [२१]देवाश्चरणतः पुनः ।।’’१८।।

अथ वर्णभेद उच्यते । तत्र श्वेतानि –

[२२]उच्चैःश्रवः कीर्तिशरद्घनाश्च प्रासादज्योत्स्नाकरकाहिमानि ।
पीयूषशम्भू तगरोहिमाद्रिर्मन्दारसौधौ रजतं सुधांशुः ।।२१।।

पा.टि.

(१८) भु4) ‘शशैलयोश्चैव’ । (१९) भु3) “दानवासुरदैत्येयरक्षसामैक्यमिष्यते”
(२०) भु3) ‘चिरन्तनस्यापि वृषध्वज’ । (२१) म) ‘देवाश्चरणयोः’ ।
(२२) भु3 भु4 म) ‘उच्चैःश्रवः……सुधांशुः ।’ इति पद्यस्य स्थाने-
‘‘प्रसादस्तगरः शिवेन्दुकरका हैमो गिरिश्चामृतं
मन्दारो हिमसौधशारदघना उच्चैःश्रवा घोटकः ।
ज्योत्स्नाकीर्तियशांसि हंसरजतं तारा मृगेन्द्रस्तथा
शंखः शर्करमौक्तिकध्वजरदाः छत्रं मृणालं पयः ।’’ इति

टि.

☆ देवे. कवि./ पृ.16-21 .

सूर्येन्दुकान्तघनसारकरम्भभस्म-
हिण्डीरचन्दनदधीनि जलं च दुग्धम् ।
निर्मोकहारसिकताबककैरवाणि
मन्दाकिनी सुरधुनी कुसुमं च कुन्दम् ॥२०॥

[२३]शेषाहिशर्कररदाश्च तथैव हंस-
शंखौ च निर्झरसुमौक्तिकतारकाश्च ।
लोध्रः कपर्दकमृणालकपुण्डरीक-
छत्रध्वजा मृगपतिः सुकृतं च काशः ॥२१॥

चूर्णं पारदशुक्तिवासवगजाः [२४]कार्पासहासौ हली
शक्रश्चामरनारदौ च कठिनी पिण्डीतकं त्वभ्रकम् ।
कैलासः स्फटिकश्च दन्तिरदनः सत्[२५]केतकीसूनकम्
[२६]रम्भागर्भयशोस्थिकेतकगुणाः श्वेतानि प्रोक्तानि च ॥२२॥

[२७]अथ कृष्णानि –

कलिर्ध्वान्तं [२८]रात्रिर्विषमदमसीधूमयमुना:
कुहुः पापं पङ्कं [२९]जलधिगगने चासुरपिकौ ।

पा.टि.

(२३) भु 3 भु 4 म) 'शेषाहि.....काशः' इत्यस्य स्थाने
शेषोरगो निर्झरलोध्रकाशाः कपर्दकः शुक्लकुशेशयं च । इति

(२४) भु 1 भु 2) 'कार्पासहास्यो' । भु 4) 'कार्पासवासौ' ।

(२५) भु 3) 'रम्भोदरं केतकी' । भु 4 म) 'रम्भोदरः केतकी' ।

(२६) भु 3 भु 4 म) 'शुक्लान्येव गुणोऽस्थिकाव्यमतिभिर्वर्ण्यं तथा केतकम्' ।

(२७) भु 2) 'अथ कृष्णवर्णानि । म) 'कृष्णानि' ।

(२८) भुम) 'रात्री विष' । (२९) भु 1भु 2 भु 4म) 'जलधिगगनञ्चासुरपिकौ' ।

[३०]
कटाक्षः काकाली द्रुपदतनुजा चागुरुलते
[३१]
[३२] तमालस्तालेन्दीवरफलगजांगारचिकुराः ॥२३॥
विन्ध्याचलः केशवसारिके च
वृक्षोऽञ्जनाद्री च शशांकलक्ष्म ।
सर्पो वनं चीरघनौ शनिश्च
[३३] काली यमो राक्षसभैरवौ च ॥२४॥
कण्ठः शिवस्यैव धनञ्जयश्च
द्वैपायनः कज्जलराजपट्टौ ।
कस्तूरिकाशस्त्रमयूरकण्ठाः
[३४] कण्ठस्तथा खञ्जनपक्षिणश्च ॥२५॥
गावो मुखं लाङ्गुलकश्च भिल्लः
कनीनिका गुञ्जमुखं त्वकीर्तिः ।
रामस्तिलं चन्द्ररिपुश्च मुस्ता
छायाखलान्तःकरणादयश्च ॥२६॥
शृङ्गाराख्यरसस्तद्वदद्भुतश्च विदूरजम् ।
गवलं नीलपद्मं च कथ्यते कृष्णवर्णकम् ॥२७॥

पाटि.

---

(३०) भु3 भु4 म) 'गजचिकुरपांचालिलतिकाः'

(३१) भु3 भु4. म) 'फलं कालस्कन्धागुरुवनयमेन्दीवरघनाः।'

(३२) भु3 भु4. म) विध्याचलः ...... भैरवौ च' इतिपद्यस्य स्थाने –
'विंध्यो गिरिः कज्जलशैलवृक्षाश्चीराच्युतौ चन्द्रकलंकसारी ।
अङ्गारतालावहिभानुपुत्रौ काली तथा राक्षसभैरवौ च ॥'' इति ।

(३३) भु3 भु4. म) कण्ठः शिव....पक्षिणश्च ॥'' इति पद्यं नोपलभ्यते ।

(३४) भु3 भु4 म) गावो मुखं इत्यस्मादारभ्य 'कृष्णवर्णकम्' इत्यन्तं यावत् नोपलभ्यते ।

अथ नीलानि- कविकल्पलतायाम् –☆

"नीलानि शुकशैवालदूर्वादलतृणं तथा ।
वंशाङ्कुरो मरकतेन्द्रनीलादिरिति क्रमात् ॥"२८॥

अथ शोणानि –

माणिक्यभौमरविताम्रकुसुम्भगुञ्जाः
३५
युक्तेन्द्रगोपकुरुविन्दजपादृगन्ताः
खद्योततक्षकतडित्कमलं च (कमलानि ?) बिम्बं
किंपाकपल्लवसुकुंकुमधातवश्च ॥२९॥
सिन्दूरं रसनाधरौ च पिसितं ताम्बूलरागस्तथा
रक्तं सारसमस्तकं च कथितं हिंगूललाक्षारसौ ।
धर्मो रौद्ररसस्तु किंशुकसुमं बन्धूकपत्रांगकं ३६
दाडिम्याः कुसुमं च कुक्कुटशिखा हंसस्य चञ्चूपदे ॥३०॥
चकोरपारावतयोः पिकस्य नखश्च नेत्रं वदनं तथैव ।
३७
शुकाननं मर्कटवक्त्रकं तु स्यात्पाटलाशोकनखक्षतानि ॥३१

अथ पीतानि –

गोमूत्रं मधु रोचना च कनकं जीवेन्द्रगौर्यस्तथा
३८
ब्रह्माद्यापरीतिगन्धकगरुत्मान्चक्रवाका अपि ।

पा.टि.

(३५) भु 1 भु 2 भु 4 म) 'स्यादिन्द्रगोपकरिविन्दु' ।

(३६) भु 1 भु 2 भु 4 म) 'चञ्चुः पदः' ।

(३७) भु 3) 'शुकाननं मर्कटवक्त्रकसिंहनखक्षताशोकसुमं च रक्तम्' ।

(३८) भु 2 भु 4) 'ब्रह्माद्याः पर-' ।

टि.

☆ तत्रैव./ पृ 24

मण्डूकश्च तथैव चम्पकसुमं किञ्जल्कसारीमुखं
शालिश्चैव शिवस्य लोचनजटे[३९] पीताम्बरस्यांशुकम् ॥३२॥
मनःशिला रजो दीपः परागो हरितालकः ।
कर्णिकारं तथैतानि पीतानि कथितानि तु ॥३३॥

अथ धूसराणि - कविकल्पलतायाम्—☆

धूसराणि रजो लूता करभो गृहगोधिका ।
[४०]कपोतमूषकावभ्रक्रमेलकखरादयः ॥३४॥

एतेषामुदाहरणं प्रयोगवशात् ज्ञेयम् ।

अथ संपूर्णगर्भवृत्तादीनि –कविकल्पलतायाम्[४१]—☆☆

''संपूर्णगर्भवृत्तानि मुखपद्मेन्दुदर्पणाः ।
चक्रारघट्टतिलकमृदंगपुटशाणकाः ॥३५॥
आवर्तः कमठो लूतागृहं छत्रमपूपकम् ।
आलवालमहीजालचर्मकाः शाणकादयः[४२] ॥३६॥
वृत्तानि राहुनारङ्गस्कन्धधम्मिल्लमोदकाः ।
रथाङ्गं लावुकं कुन्दं कुम्भीकुम्भाढकादयः ॥३७॥

पा.टि...

(३९) म) 'लोचनतटे' । (४०) भु1. म) 'कपोतमूषिकोरभ्र-' भु3) 'कपोतमूषिको रत-' । भु4) 'कपोतो मूषिको रभ्रः' ।

(४१) भु1 भु2) 'कविकल्पलतायामानीय लिख्यन्ते ।' (४२) म) 'स्थालकादयः' ।

टि.____

☆ तत्रैव / पृ25 ☆☆ तत्रैव / पृ 27.28 .

कर्णपाशभुजापाशाकृष्टचापघटननम् ।
मुद्रिकापरिखायोगपट्टहारस्रगादयः[४३] ॥३८॥
त्रिकोणानि हलेशाक्षि कामाख्या(?)वह्निमण्डलाः
सन्ध्यक्षराणि दम्भोलिशृङ्गाटशकटादयः[४४] ॥३९॥
वक्राण्यलंकभालभ्रूनखाङ्कङ्कुशकुञ्चिकाः ।
भग्नकंकणबालेन्दुदात्रकुद्दालचन्द्रिकाः (?) ॥४०॥
शुकास्यं किंशुकं विद्युत् कटाक्षेन्द्रधनुः फणाः[४५] ।
पुरोधःकरतलेभदन्तसिंहनखादयः ॥४१॥
तीक्ष्णानि प्रतिभाहीरकटाक्षा दुर्वचो नखाः ।
लघुत्वं परमाणूनां गुरुत्वं वर्ण्यते गिरेः ॥४२॥
गुरूणि सन्मनः श्रोणिकपाटस्तनबुद्धयः ।
सुखदानि शशी गीतपुष्पलक्ष्मीसुतोद्भवाः ॥४३॥
नष्टाप्तिस्वस्पृहालब्धिवियुक्तप्रियसङ्गमाः ।
दातृस्वातंत्र्यसन्मित्रविद्यासन्तोषसूक्तयः ॥४४॥
दुःखानि पारतंत्र्याधिव्याधिमानच्युतिद्विषः ।
कुभार्या क्लैब्यकुग्रामवासकुस्वामिसेवनम् ॥४५॥
परवेश्मनि वासश्च विरहोऽपि[४६] वरस्त्रियाः ।
कन्याबहुत्वं वृद्धत्वं द्रव्यनाशो द्विषज्जयः ॥४६॥
वर्षाप्रवासो द्वे भार्ये कुभृत्योऽर्धहलं कृषिः ।

पा.टि.

(४३) भु2) 'श्रमादयः' । (४४) म) 'कटका' ।
(४५) म) '-फणी' । (४६) म) 'विहारोऽपि' ।

ग्रन्थान्तरे –

''दरिद्रता च दासीत्वं[४७] दाराहानिः[४८] स्वयंकृषिः ॥४७॥
मूर्खत्वं[४९] च ऋणं सेवा दुःखान्येतानि चक्षते[५०] ।

अथ स्थिराणि –

स्थिराण्याजौ भटः साध्वी धर्माधर्मौ सतां मनः ॥४८॥

अथास्थिराणि –

अस्थिराण्यबलादोलापांगयौवनदुर्जनाः ।
स्वामिप्रसादेभकर्णस्वप्नमत्स्यकपिश्रियः ॥४९॥

अथ मन्दगानि –

मन्दगानि शनिज्ञानिवृषहंसगजस्त्रियः ।

अथ क्रूरस्वराः –

क्रूरस्वराः काकभेकघरट्टोष्ट्राश्वगर्दभाः ॥५०॥

अथ बलिष्ठानि –

बलिष्ठान्यनिलो[५१] विष्णुर्गरुडो हनुमान् यमः ।
महावराहः शरभः सत्प्रतिज्ञा गजः पृथुः ॥५१॥
हली वाली बलिर्भीमः सती शेषः पुराकृतम् ।

अथ सुरूपाः -

सुरूपा नकुलैलाश्विनलकूबरमन्मथाः ॥५२॥

पाटि

---

(४७) म' 'दासत्वम्' ।

(४८) भु1 भु2 भु4) 'दाराहीनम्' । म) 'दाराहीनः' ।

(४९) भु4) 'मूर्खत्वं तरुणं' ।

(५०) भु1 भु2 भु4) 'कथ्यन्ते' । म) 'कथ्यते' ।

(५१) म) 'बलिष्ठान्यचला' ।

अथ उष्णानि –

उष्णानि स्मरतापाधिप्रतापा दुर्वचस्तपः ।

अथ मधुराणि–

मधुराणि विदग्धोक्ति प्रियाधरशशत्विषः ॥५३॥
मधुरं चामृतं प्रोक्तं सत्कवेर्वचनं तथा[५२] ।

अथाष्टभोगो–ग्रन्थान्तरे –

चन्दनं वनिता वस्त्रं गीतं ताम्बूलभोजनम्(भोजने ?)॥५४॥
शय्या वाहनकं चैवाष्टभोगः कथ्यते बुधैः ।

अथ षोडशशृङ्गारः –कामशास्त्रे –

ततं घनं च सुषिरमानद्धं गाननर्तने ॥५५॥
सुवेषश्च सुवासश्च शृङ्गारं चित्तचित्रकम् ।
कोकिलानां रुतं पुष्पं वस्त्रं बहुधनं तथा ॥५६॥
हासं[५३](सो ?)रूपवती नारी युग्मौ पारावतौ तथा ।
षोडशैतानि राजेन्द्र कन्दर्पोद्दीपनानि[५४] च ॥''॥५७॥
कीर्तिर्दानोद्भवा वर्ण्या प्रतापजननं[५५] यशः ।

अथ लावण्यं– कर्णामृतसुवर्णचषकटीकायाम्[५६] –

''मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा ॥५८॥
प्रतिभाति यदंगेषु तल्लावण्यमिहोच्यते ।''

पाटि..

(५२) भु3) 'तथा' इत्यस्मात्परम् 'अथा ष्टभोगो'- इत्यस्मात् पूर्वं च- 'तथा क्षीरद्राक्षामक्षिकाणि दधि तस्य विक्रियाः ।' इत्यधिकं दृश्यते ।

(५३) भु3) 'हास्यं' ।

(५४) भु3) 'कन्दर्पोद्दीपकानि' ।

(५५) भु1 भु2 म) 'प्रतापाज्जनकं । भु4) 'प्रतापाज्जनकं' ।

(५६) भु2 भु4) 'कर्णामृतसुवर्णटीकायाम्' । म) 'कर्णामृतचषकटीकायाम्' ।

अथ प्रेमादिलक्षणं– रतिकलिकायाम्– ५७

“अंकुरपल्लवकलिकाप्रसूनफलभोगभागयं क्रमशः ॥५९॥
प्रेमा मानः प्रणयः स्नेहो रागोऽनुरागश्चेति ॥”

५८
भावप्रकाशे च –

“सुखदुःखात्मकं भोग्यं सुखत्वेनाभिमन्यते ॥६०॥
५९
येन रागः स इत्युक्तो रञ्जनाद्विषयात्मकः ।”

अथ कविकल्पलतायामारोप्यगुणानाह–☆

“औदार्यधैर्यगाम्भीर्यशौर्यसौन्दर्यशक्तयः ॥६१॥
माधुर्यैश्वर्यचातुर्यमर्यादाऽक्रौर्यकीर्तयः ।
तेजस्तारुण्यषाड्गुण्यसौलक्षण्यरसज्ञताः ॥६२॥
ब्रह्मण्यदानदाक्षिण्यशीलशौच सुवेषिताः ।
६०
सत्यशौच(सत्यौनत्य?)कलामान्यभक्तिश्रद्धाकृतज्ञताः ॥६३॥
दृढप्रतिज्ञताप्रज्ञाश्रद्धामेधोद्यमक्षमाः ।
६१
दयानयार्जवाचारसन्तोषमितभाषिताः ॥६४॥
विद्याविवेकविनयारोग्यसौभाग्यबंधुताः(बक्तृताः?)
उत्साहित्वं कुलीनत्वं निर्दोषत्वं महेच्छता ।
आराध्यतो (?) पकारित्वाभयास्तिक्येङ्गितज्ञताः ॥६५॥

पा.टि.

---

(५७) भु2 भु4. म) 'भागियं' ।
(५८) भु3) 'भावप्रकारे' ।
(५९) म) 'रञ्जनी विषया' ।
(६०) म) 'शक्तिश्रद्धा' ।
(६१) भु २ 'दयानयाजीवाचार-' ।

टि.

☆ देवे. कवि. / पृ.28-29.

६२
प्रसादप्रतिभाधृष्टा(ष्या?)धिगम्यसुसहायताः ।
श्रीर्माहात्म्यमहारम्भनिःशंकत्वगभीरताः ॥६६॥
बहुश्रुतत्वसौजन्यपरिच्छेदाप्रमादिताः ।
६३ ६४ जितेन्द्रियत्वागर्वत्वे वर्ण्यमेतत् कवीश्वरैः ॥६७॥

अथ सर्वांगवर्णनं तत्रैव—✫

प्रपादांघ्रिगुल्फपार्ष्णिजंघाजानूरुवंक्षणम् ।
कटित्रिकनितम्बस्फिग्बस्त्युपस्थकुकुन्दरम् ॥६८॥
जघनं जठरं नाभिर्वलिवक्षोजचूचुकम् ।
क्रोडोरोजत्रुपृष्ठांशकक्षदोःपार्श्वमध्यमम् ॥६९॥
प्रगण्डः कूर्परो हस्तः प्रकोष्ठोमणिबन्धनम् ।
अंगुल्यंगुष्ठकरभनखपर्वचपेटकम् ॥७०॥
६५
कण्ठः शिरोऽधरः श्मश्रुमुखौष्ठचिबुकं हनुः ।
६६
सृक्कतालुरदं जिह्वा नासा भ्रूगण्डलोचनम् ॥७१॥
६७
अपांगस्तारकाकर्णभालमस्तकमूर्धजम् ।
यथासम्भवमेतेषु वर्ण्यं स्त्रीपुंसयोर्बुधैः ॥७२॥

पा.टि.

(६२) भु1 'धृष्टीधिपस्य' । भु2 'धिष्टाधीपस्य' । (६३) भु2 भु4 'अथ सर्वाङ्गवर्णनं' इत्यस्मादारभ्य 'स्त्रीपुंसयोर्बुधैः' (कारिका ७२) इत्यन्तं यावद् ग्रन्थपातः ।

(६४) भु4 म) सर्वाङ्गवर्णितं'

(६५) भु3) 'मुखौष्ठः' ।

(६६) भु1 भु2) 'सृक्कतालुरदा' । म) 'सृक्कणीरदना' ।

(६७) भु1 भु2 भु4 म) '-मूर्धजाः' ।

टि

✫ तत्रैव / पृ.35

अथैकस्मादारभ्य सहस्रपर्यन्तं वक्ष्यते- कविकल्पलतादौ–☆

एक[६८]मातेन्द्रहस्त्यश्व[६९]गजास्यरदशुक्रदृक् ।
द्वयं पक्षनदीकूलासिधारारामनन्दना: ॥७३॥
त्रयं काला[७०]ग्निभुवनगङ्गामार्गेशदृग्गुणा: ।
ग्रीवारेखा कालिदासकाव्यं शूलशिखावली ॥७४॥
सन्ध्यापुरपुष्कराणि रामविष्णुज्वरांघ्रय: ।
चत्वारि वेदब्रह्मास्य[७१]वर्णाब्धिहरिबाहव: ॥७५॥
स्वर्दन्तिदन्तसेनांगोपाययामयुगाश्रमा: ।
पञ्च पाण्डवरुद्रास्येन्द्रियस्वर्द्रुव्रताग्नय: ॥७६॥
महापापमहाभूतमहाकाव्यमहामखा: ।
पुराणलक्षणान्यङ्गानिलवर्गेन्द्रियार्थका: ॥७७॥
षड् [७२]वज्रकोणत्रिशिरनेत्रवेदांगदर्शनम् ।
चक्रवर्ति महासेनवदनानि गुणा रसा: ॥७८॥
सप्त पातालभुवनमुनि[७३]द्वीपार्कवाजिन: ।
[७४]वारिधिस्वरराज्यांगव्रीहिवह्निशिखादय: ॥७९॥
कृशानुहेतिशिखरिपङ्क्तिकांगेतिभीतय: ।
अष्टौ योगांग[७५]वस्वीशमूर्तिदिग्गजसिद्धय: ॥८०॥

पा.टि.

(६८) भु4) '-मात्येन्द्र-' । (६९) भु3) '-गजाश्वरथ-' ।
(७०) भु2 म) 'बालाग्नि-' । (७१) भु1 भु2) '-युगाब्धि' । भु4) 'वर्ण्या'
(७२) भु2) 'वद्रिकोण' । म) 'वज्रकोष-' (७३) म) 'द्विपानिवाजिन:' ।
(७४) भु4) 'वारिधीश्वर' । (७५) भु2) '-वस्वांश-' ।

टि.

☆ द्र. देवे. कवि / पृ.35

ब्रह्मश्रुतिव्याकरणदिक्पालाहिकुलाद्रयः ।
नवाङ्गद्वारभूखण्डकृत्तरावणमस्तकाः ॥८१॥
व्याघ्रीस्तनसुधाकुण्डशेवध्यङ्कुरसा ग्रहाः ।
७६
दश हस्ताङ्गुलिशम्भुबाहुरावणमौलयः ॥८२॥
कृष्णावतारदिक्विश्वेदेवावस्थेन्दुवाजिनः ।
एकादश महादेवाः सेनाश्च कुरुभूपतेः ॥८३॥
द्वादशार्कमासराशिसंक्रान्तिगुहबाहवः ।
सारिकोष्ठकसेनानिनेत्रक्ष्मापतिमण्डलाः ॥८४॥
त्रयोदशोक्तास्ताम्बूलगुणा अथ चतुर्दश ।
विद्यामनुयमाः स्वाराट् भूवनध्रुवतारकाः ॥८५॥
तिथयः स्युः पञ्चदश षोशशेन्दुकला मताः ।
७७
अष्टादश द्वीपविद्यापुराणस्मृतिधान्यकम् ॥८६॥
विंशती रावणभुजाः शतमङ्गुलयस्तथा ।
धार्तराष्ट्राः शतभिषक्तारकाः पुरुषायुषम् ॥८७॥
७८
रावणांगुल्यब्जदलशक्रयज्ञाब्धियोजनम् ।
सहस्रं जाह्नवीवक्त्रं शेषशीर्षाम्बुजच्छदाः ॥८८॥
रविभासार्जुनकरवेदशाखेन्द्रदृष्टयः ।"

एतेषां यथासम्भवमुदाहरणं मृग्यम् ।

७९

अथ राजसभाप्रविष्टपुरुष उच्यते- कविकल्पलतायाम्—☆

"अनिन्द्यः सर्वविद्यासु सर्वालंकारपारगः ॥८१॥

पा.टि.

(७६) भु 1 भु 2) '-बाहो-' । (७७) भु 1 भु 2 भु 4 .म) 'श्रुति' ।
(७८) म) 'ब्जदश-' । (७९) म) 'पुरुषोच्यते'।

टि.

☆ देवे. कवि / पृ.40

८०
सविता कवितापद्मकानने तर्ककर्कशः ।
भरते भारतेऽभिज्ञः प्राज्ञो मन्त्रादिनाथवा ।।९०।।
सुवेषः पुरुषो गच्छेत् सभ्यान् सम्भावयन् सभाम् ।''

अथ प्रथमतस्तत्र धरित्रीरमणं प्रति –☆

''विद्वद्वृन्दप्रमोदार्थमाशीराशिमुदीरयेत् ।।''९१।।

उदाहरणं तत्रैव–☆☆

''अतुल्यकल्याणभवनं भव । प्राज्यसाम्राज्यमापादय ।''

तत्र सभ्यानुनयः –● ८१

''तथा चामी चामीकराचलवदचलाः कलाकलापमण्डिताः पण्डिताः खण्डिताखिलविपक्षाः क्षाम्यन्तु नाम मामकं चापलं विचारयन्तु च मया निरुच्यमानमुचितमनुचितं वा । यदेते सदसद्विचारचातुरीचतुराश्चतुरानन इव शिवप्रसादासादितमहितमहिमानो मानोन्नताः ।''

अथ वादितर्जनं तत्रैव–●●

''अथ वादिनमाहूय वचांस्युच्चार्य धैर्यवान् ।
८२
प्रतिक्षेत विपक्षस्य भारतीं प्रातिकूलिनीम् ।।९२।।
ततः संरम्भसंभारगम्भीरारम्भनिर्भराम् ।
विपक्षं क्षिप्रमाक्षिप्य वाचमुच्चारयेदिमाम् ।।९३।।
''यन्मया सह दुर्बुद्धे वाग्युद्धं कर्तुमर्हसि ।
तत्पङ्गुः शृङ्गमुत्तुङ्गं मेरोरारोढुमिच्छसि ।।
८३
फेरुस्त्वं सुप्तसिंहस्य सङ्गं क्रष्टुमिहेच्छसि ।
८४
व्याघ्रं शीघ्रं समाघ्रातुं शशकोऽपि प्रवर्तसे ।।
शुकशावः शशादस्य चञ्चुं चुम्बितुमिच्छसि ।।''

एवं ज्ञेयम् ।

पाटि

(८०) भु4) 'कविता' । (८१) भु4) 'वदचञ्चला' । (८२) भु1 भु2) 'भरणम्' ।
(८३) भु4) 'क्रोष्टुनि-' । म) 'क्रोष्टुमि-' (८४) भु1 भु2 भु4) 'प्रवर्तते'.।

टि.

☆ देवे. कवि / पृ.40
☆☆ कविकल्पलतायां नोपलभ्यते ।
● तत्रैव./ पृ.43 .
●● तत्रैव./ पृ.53 .

अथ कीर्तिप्रकाशपुरुष उच्यते –

सत्पार्श्ववर्ती[८५] कविरेव मन्त्री पुरोहितो धीरसुहृज्जनौ च ।
सद्ब्राह्मणो ज्यौतिषकश्च साधुः पौराणिको वन्दिजनश्च[८६] पूतः[८७] ॥९४॥

अथाकीर्तिप्रकाशपुरुषः–

दुष्टो मूर्खो ज्ञानशून्योऽप्यदक्षो नीचो गर्वी निन्दको मन्दबुद्धिः ।
वाङ्माधुर्यात्यन्तहीनोऽरसज्ञः[८८] खेलासक्तः सालसो विह्वलश्च ॥९५॥

अथ पराजितशत्रोः धर्माः कविकल्पलतायाम्–☆

लज्जाकोपयशोनाशरोषाक्रन्दास्यकृष्णताः ।
रागपाण्डुरताशस्त्रविषझम्पतपोजपाः ॥९६॥
राजप्रसादहंसैकदण्डभक्तिनिषेवणम्(?)
दुःखस्नेहा[८९]भिचारेर्ष्यासहनोद्ग्रीवकादयः[९०] ॥९७॥

क्रमेणोदाहरणं काव्यादौ ज्ञेयम् ।

पा.टि.

(८५) भु4) 'तत्पार्श्ववर्ति' । (८६) भु4 म) 'वन्दिजनस्य' ।
(८७) भु4) 'पुत्रः' । (८८) म) 'वाङ्माधुर्यात्यक्त-' ।
(८९) भु4) 'दण्डस्नेहा' । (९०) भु3) '-नोद्जीविकादयः' ।

टि.

☆ देवे. कवि. / पृ55 .

[९१] अथ नृपाग्रभाषिणो जना उच्यन्ते –

सामाजिकाः सततमुत्तमबुद्धियुक्ता-
विद्यारसैर्जनितबोधहृदः सभायाम् ।
ये साधुसङ्गमुदिता गुणिनो नृपाग्रे
ते वक्तुमाशु वचनं चतुराः समर्थाः ॥९८॥

इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायणदेव महाराज- विद्वत्सभाराजित- प्रबन्धकविताप्रकाशक- करणकुलसंभव-कविभिषग्वर- वासुदेवपात्रतनय- श्रीमद्गोपीनाथकविभूषणकृतौ[९२] कविचिन्तामणौ [कविसंमत्यादिनिरूपणं] नाम [९३]द्वाविंशतितमः किरणः ।

पा.टि.

---

(९१) भु3 भु4 म) 'अथ नृपाग्रभाषिणो' इत्यस्मादारभ्य 'समर्थाः' इत्यन्तं यावद् ग्रन्थपातः ।
(९२) भु1 भु2) 'श्रीगोपीनाथविद्याभूषणकृतौ' ।
(९३) भु1 भु2) 'द्वाविंशतिः' । भु4 म) 'एकविंशतिः' ।

* * *

[त्रयोविंशतितमः किरणः]

अथ समस्यापूरणविधिरुच्यत—कविकल्पलतायाम्—☆

‘‘कल्पादिसिन्धुलघुभिर्गुरुता युगान्त-
दूरावलोकगुरुभिर्लघुता विधेया ।
विष्णोरधोमुखतया प्रतिबिम्बितस्य
[१]स्याद्वैपरीत्यमुदकादिषु युग्मता च ॥१॥
चन्द्रान्धकाररविकीर्तिकुकीर्तिसन्ध्या
रागादिसंगकृतवर्णविपर्ययेण ।
दृष्टान्तवद्धयदिशब्दतया पुराणै-
र्वात्सल्यशोकमधुपानवियोगमद्यैः[२] ॥२॥
स्वप्नैन्द्रजालिकमतिभ्रमचित्रमाया-
मन्त्रौषधीमणितपःपदभंगभावात् ।
शौर्य्योष्मवांछितमनोगतिपुण्यदेव-
प्रश्नोत्तरक्षयसमासविभिन्नसाध्यात् ॥३॥
श्रीहाटकेश्वरजगत्प्रलयग्रहास्त-
पाथोधिमन्थसमयप्रतिबिम्बभावैः ।
संग्रामचन्द्रपुरचन्दनशस्त्रपातै-[३]
श्चण्डीशसद्मगुरुताभिरुदीरितानि ॥४॥

पा.टि.

---

(१) भु1 भु4) ‘सा वैप-’।   (२) भु1 भु2) ‘वियोगपद्यैः’।

(३) भु3 म) ‘श्चण्डीशसद्मगुरुता-’।

टि.

☆ देवे. कवि./पृ73.

[अथ लघुपदार्थस्य] कल्पादिना गुरुताभिधेया[४] । यथा –

"कल्पादिकाले गुरुदेहदृश्या
पिपीलिका राजति शैलतुल्या ।
तदा लघीयानपि गण्डशैलो
महेन्द्रशैलस्य तुलां तनोति ॥"

सिन्धुना यथा –☆

"माहात्म्यं तस्य पाथोधेर्व्याख्यातुं शक्यते कथम् ।
सापि यत्र विभात्यम्भ:कीटिका कुम्भिसंनिभा ॥"

लघुभिर्यथा –☆

"लिक्षालक्षाग्रत: कीटकोटि: करिघटायते ।
विंध्याद्रिमुद्रमाधत्ते मत्तेभ:कलभाग्रत: ॥"

अथ गुरुपदार्थस्य युगान्तेन दूरावलोकनेन गुरुभिश्च लघुता विधेया । यथा –☆

"कल्पान्तकालकवलीकृतसर्वगात्रो[५]
[६] गोत्रो बिभर्ति सुतरां परमाणुरूपम् ।
संवर्तपूर्वसमये बिभरांबभूव
यो जातरूपधरणीधरसंनिभत्वम् ॥"

विष्णोरधोमुखतया वैपरीत्यं यथा –●

"कालीयाहिग्रहव्यग्रे यमुनायां जगन्निधौ ।
झम्पयाधोमुखे[७] जातं[८] विपरीतं जगत्त्रयम् ॥"

पा.टि.

---

(४) भु1 भु2) '-भिधेया कल्पनीया' । (५) भु2) 'पात्रो' ।
(६) भु1 भु2) 'स्वमूर्त्ति' । (७) भु4) 'मुखो' । (८) भु1 भु2) 'जात:' ।

टि.

☆ तत्रैव. / पृ.74. ● तत्रैव. / पृ.75.

प्रतिबिम्बवैपरीत्यं यथा–☆

‘‘तडागे दर्पणप्राये प्रतिबिम्बादजायत ।
जलशय्यागते कृष्णे प्रासादः कलशोपरि ॥’’

उदकादौ युग्मता यथा–☆

‘‘रात्रौ चन्द्रोदये तोयप्रतिबिम्बितविग्रहः ।
लोकैरेकोऽपि कोकोऽयं [९]सद्वितीयः समीक्ष्यते ॥’’

अपरं च–☆

‘‘पूर्वाद्रौ रत्नभित्यन्तर्जातोऽर्कः प्रतिबिम्बितः ।
[१०]शंक्यते शक्रकान्ताभिः किमुदेति रविद्वयम् ॥’’

प्रथमश्लोकेनैवं (श्लोके एवं ?) ज्ञेयमुदाहरणम् ।

द्वितीयश्लोकस्य उदाहरणं चन्द्रेण यथा–

‘‘[११]उल्लसत्तुहिनज्योतिर्द्युतिर्विद्योतितोऽभितः ।
कैलासशैलसंकाशः काशते विन्ध्यभूधरः ॥’’
‘‘जपापुष्पं जातिसमं सुवर्णं रजतप्रभम् ।
सुधाकरकरस्पर्शाद् भाति चन्दनवन्मसी ॥’’

अन्धकारेण यथा–☆

‘‘कैलासो विन्ध्यसंकाशः कर्पूरः कज्जलप्रभः ।
जपा तापिंच्छगुच्छश्रीस्तमसा भाति निर्मिता ॥’’

रविणा यथा–●

रविर्बालार्कस्तेन प्रथमं रक्तास्तदनु पीताः क्रियन्ते । इत्थमन्यत्रापिवर्णविपर्ययः कार्यः । यदा पुनश्चन्द्रादीनामेव वर्णविपर्ययः कार्य इत्यपि चिकीर्षितस्तदा कीर्त्यादिभिरेव तेषां वर्णविपर्ययः कार्यः ।

पा.टि.

(९) भु3) ‘द्वित्रिप्रायः’ । (१०) भु4) ‘शक्यन्ते’ ।

(११) भु3) ‘उल्लसत्तु....भितः’ इति पद्यार्धं न दृश्यते ।

टि.

☆ तत्रैव / पृ.75 -,76 .☆☆ तत्रैव / पृ.75 ;-76 .● तत्रैव / पृ.77

[कीर्त्या रवेर्वर्णविपर्ययो यथा –☆]

"स्वर्धुनीसलिलसंनिभस्फुरत्तावकीनघनकीर्तिमण्डलैः ।
विस्तृतैस्त्रिजगति क्षमापते[१२] ! शीतरश्मिरिव दृश्यते रविः ॥"

[कीर्त्या] अन्यवस्तूनां[१३] यथा –☆

"मेदिनीदयित[१४] ! तावकैर्यशःसंचयैरूपचितैः समन्ततः ।
क्षीरनीरनिधिसोमकोमलैर्जायते रजतकान्तिः कज्जलम् ॥"

"हिमाद्रिसदृशो मेरुर्भाति कुंकुमबिन्दुवत् ।
भूमिधर[१५] (भूमिपाल ?) भवत्कीर्त्या शुभ्रते भुवनस्थलम् ॥"

कुकीर्त्या यथा –☆

"भूमिपाल ! भवदीयविद्विषन्मेदिनीपतिकुकीर्तिपंक्तिभिः ।
प्रावृषेण्यजलवाहकान्तिभिः श्यामलो जयति यामिनीपतिः ॥"

[कुकीर्त्या] अन्यवस्तूनामपि यथा –☆

'मेदिनीदयित तावकद्विषत् प्रोन्मिषद्गुरुतरायशः शतैः ।
अन्धकारनिकरैरिवोद्गतैः कुङ्कुमं मृगमदायतेतराम् ॥"

"हिमाद्रिर्विन्ध्यबन्धुश्रीः स्वर्णं मरकतप्रभम् ।
धराधर ! भवद्द्वेषिकुकीर्तिप्रसरैर्बभौ ॥"

पा.टि.

(१२) भु4) 'क्षमापतेः' ।
(१३) भु4) 'वस्तुना' ।
(१४) भु1 भु2) 'मेदिनीम्' ।
(१५) भु3 भु4 म) 'भूमिधव' ।

टि.

☆ तत्रैव. / पृ.77 .

सन्ध्यारागेण –

"पूर्वभूधरशिरस्तटीचरः सान्ध्यरागपटलैः परीवृतः ।
दृश्यतामिह विभावरीमुखे विद्रुमप्रतिनिधिः सुधानिधिः ॥"

वर्णान्तरसंयोगाद्यथा –●

"शशिमुकुटललाटे शैलजागण्डपाली-
विगलितमृगनाभिर्व्यक्तघर्माम्बुसिक्तः ।
समजनि नरकारिश्यामलो यामिनीशो
जगति मलिनसङ्गात् को न मालिन्यमेति ? ॥"

दृष्टान्तवद्धयदिशब्दतया यथा –☆

"प्रतीच्यां यदिमार्तण्डः समुदेति स्फुरत्करः ।
तदा संजायते नूनमग्निस्तुहिनशीतलः ॥"

पुराणैः पुराणचरितैर्यथा –☆

"अगस्त्यमुनिनिष्पीतनिःशेषजलमण्डलात् ।
अहर्पतिमहःशुष्कात् समुद्राद्धूलिरुत्थिता ॥"

वात्सल्येन यथा –☆

"अतुच्छवत्स- वात्सल्य- पिच्छिलीभूत-चेतसा ।
जनन्या मन्यतेऽत्यर्थं व्याघ्रः सौम्यवपुः क्षमी ॥"

शोकमधुपानवियोगमदस्वप्नेन्द्रजालमतिभ्रमचित्रमायामंत्रौषधिमणितपोभिः समस्या पूर्यते । एतेषामुदाहरणानि ग्रन्थविस्तर भयान्न लिखितानि ।

पदभङ्गेन यथा –☆ 'मृगात् सिंहः पलायते ।'

मृगमत्तीति मृगादिति सिंहस्य विशेषणम् । पलाय मांसाय । ते तव (इत्यर्थः) ।

☆ "अयं मृगः समायाति मृगात् सिंहः पलाय ते ।
ततो वेगात् पलायस्व त्वरितं त्वरितैः पदैः ॥"

१६

शौर्येणोष्मणा वांच्छितेन मनोगत्या पुण्येन दुर्घटमपि घटते ।

पा.टि.

---

(१६) भु3) 'घटते' इत्यस्मात् परं सदा (पृ418) इत्यस्मात् पूर्वं च ग्रन्थपातः ।

टि.

● तत्रैव / पृ.78. ☆ तत्रैव. / पृ.79 .

देवप्रसादेन असाध्यमपि साध्यते । यथा—☆

निःश्रीकोऽपि विभो ! विभातसमये पश्यत्यवश्यं पुमान्
यस्ते पद्मसमानमाननमसौ स्यादिन्दिरामन्दिरम् ।
देहोल्लासि किमु स्तुमस्त्वदपरं यस्य प्रसादाद्भुतैः
मूको जल्पति संशृणोति बधिरः पङ्गुर्नरीनृत्यते ॥''

प्रश्नोत्तरेण यथा—●

''कस्तूरी जायते कस्मात् ? को हन्ति करिणां कुलम् ?
किं कुर्यात् कातरो युद्धे (?) मृगात् सिंहः पलायते ॥''

क्षयस्योदाहरणम् - मृग्यम् । **समासविभिन्नसाध्यात् यथा**—●

''कर्पूरपूरछविवादविद्यासंवादूकद्युति शुभ्रिताभ्रे ।
इन्दोर्नृपद्वेषितमोवितानसूर्योदये रोदिति चक्रवाकी ॥''

हाटकेश्वरयात्रया यथा—●

''हाटकेश्वरयात्रायां शिवरात्रिमहोत्सवे ।
सुरेन्द्रादिभिरायातैः स्वर्गः पातालमाययौ ॥''

जगत्प्रलयेन यथा—●

''जगत्प्रलयकालेऽसौ पृथ्वी पातालमाययौ ।
संहारघोरचण्डीशकोपाटोपात्तु[१७] सत्वरम् ॥''

ग्रहास्तेन यथा—●

''कदाचिच्चारभेदेन क्रमादस्तमुपागतैः ।
ग्रहैः संभाव्यते सम्यग् ययौ व्योम रसातलम् ॥''

पाथोधिमन्थसमयेन यथा—●

''पाथोधिमन्थनारम्भे संगमाद्देवनागयोः ।
पृथिव्यां स्वर्गपताले दृश्येते स्म. समागते ॥''

पा.टि.

(१७) भु1 भु2 भु4) '-टोपापिसत्वरात्' ।

टि.

☆ तत्रैव. / पृ.79 .

● तत्रैव / पृ.80 .

प्रतिबिम्बेन यथा –☆ १८

"दर्पणप्रतिमोल्लासिपयःपूरे सरोवरे ।
प्रतिबिम्बच्छलादेतद् भुवि व्योम समागतम् ॥"

संग्रामेण यथा –☆

"संग्रामधीरवीराणां विलोकनकुतूहलात् ।
समायातैः सुरेन्द्राद्यैः सूर्यो(स्वर्गो?)नभसि दृश्यते ॥"

चन्द्रपुरं हरिश्चन्द्रपुरं, तेन यथा –☆

"आकाशान्तरसंचारिहरिश्चन्द्रपुरच्छलात् ।
१९
भूतस्य मिलनायैव जगाम धरणी नभः ॥"

२०
चन्दनशस्त्रपातेन यथा–●

"श्रीरामरावणरणे कपिमण्डलेन
शस्त्रीकृतैर्मलयजद्रुमचक्रवालैः ।
रिङ्गद्भुजङ्गमकुलैः परितः स्फुरद्भिः
सम्भाव्यते नभसि सर्पपुरं प्रसर्पत् ॥"

चण्डीशेन यथा –●

"श्रीकण्ठकण्ठदोर्दण्डजटाजूटाहिमण्डलैः ।
२१
अहो पाताल लोकोऽयं स्वर्लोक्कलिताश्रयः ॥'

पा.टि.

(१८) भु2 भु4 म) '–दर्पणप्रथमो' । (१९) भु4 म) 'धरणीम्' ।
(२०) म) 'चलनशास्त्रपातेन' । (२१) म) 'कलिकाश्रयः' ।

टि.

☆ तत्रैव. / पृ.80 . ● तत्रैव. / पृ.81 .

[२२]सद्मना यथा—☆

“अभ्रंलिहगृहव्यूहचन्द्रशालाविलासिभिः ।
नरनारीगणैरेष मर्त्यलोको द्युलोकगः[२३] ॥”

गुरुतया यथा—☆

“सुमेरुशिखरप्रान्तस्फुरद्दिव्यवधूमुखैः ।
परितः स्फुरितैः (तं ?) शङ्के शतचन्द्रं नभःस्थलम् ॥

अथ चित्रसमस्यायाः पूरणोपाय उच्यते ।
पद्यैः साधारणैः छन्दः श्रुत्वा संपूरयेद्यथा ॥५॥

“अशेषजनताचित्तचमत्कारनिकेतनम् ।
हरिसिन्धुः स्फुरद्रोचिः केषां न कुरुते सुखम् ॥”

स्फुरत्सौदामिनीकान्तिर्बहल[२४]श्लाघनीयभाः ।
कलधौतरुचात्यर्थं कुरुते सुखसंपदम् ॥

जनताविस्मयाधानं वसुधासुखकारणम्[२५] ।
महतां चक्रवालेन व्यतिभाति समन्ततः ॥

विशदच्छाययातीव विलसत् प्राणिसौख्यकृत् ।
[२६]आश्चर्यशीला तनुरुक् कुरुतेऽपचितिं सताम् ॥

सदा विलाससदनं निदानं परमश्रियाम् ।
महासुखलताबीजं नेत्रयोः कुरुते रतिम् ॥

विभाति विभुतास्थानं घनोपल[२७]सितोरुभाः ।
मनोरमप्रभारामः कलया लोकसौख्यकृत् ॥”

पा.टि...

(२२) भु4) ‘पद्मना’ । (२३) म) ‘द्युलोकशः’ । (२४) म) ‘वहन’- ।
(२५) भु2) ‘सुखकारकम्’ ।(२६) भु4) ‘आश्चर्यशाली’ ।(२७) म) ‘घनोपम’ ।

टि.

☆ देवे. कवि. / पृ.81 - 82.

हरिमातङ्गसच्छायरोचिः परमभूषणम् ।
[२८] कस्यामोदैकहेतुर्न गोमण्डलविभूषणम् ॥
उद्दामविस्फुरत्कान्तिरुचिरं परिभाषते ।
सदामोदपदं चित्रनिदानं हरिचित्रभाः ॥"

मनोहराकारतयातिरम्यभाः समुल्लसच्चारुकलानिकेतनम् ।
अशेषभूमीतल[२९]वर्तिसौख्यकृद् विलोचनानां कुरुते सुखावलिम् ॥"

अथ क्षितिख्यातकतिचित्समस्या उच्यन्ते—☆

"त्रियामा शतयामा स्यात् शतचन्द्रं नभःस्थलम् ।"
"शतेषुरेष पञ्चेषुर्भवेद् यूनां वियोगिनाम् ॥"
"महावराहस्याग्रे च समुद्रो गोष्पदायते ।"
"कृष्णेनाकारि कुञ्जान्ते यदा सन्मुरलीस्वनः ।
गोवर्धनाचलादीनां प्रस्तरोऽपि घृतायते ॥"

कविकल्पलतायाम्—☆☆

"उषाप्रीत्यै पटे सूक्ष्मे चित्रितं चित्रलेखया ।
मक्षिकापादघातेन कम्पितं भुवनत्रयम् ॥"

● "[३०]घनवालमनोहारि सुमनोभिर्निषेवितम् ।
[३१]बहुधातुलसत्कान्ति [३२]पुस्तकं मस्तकायते ॥"

पा.टि..

(२८) म) 'कस्यामोदैकहेतुर्न गोमण्डलविभूषणम्' इति न दृश्यते ।
(२९) भु2) 'वित्तसौख्यकृद्' ।
(३०) भु4) 'दानवारि' ।
(३१) म) 'बहुधातुल्यस्त्कान्ति' ।
(३२) म) 'मस्तकं पुस्तकायते' ।

टि.

☆ तत्रैव. / पृ.82. ☆☆ तत्रैव. / पृ.81. ● तत्रैव. / पृ.84.

३३

☆ “एषा न जातबालेन्दुर्घनोत्तुङ्गपयोधरा ।

३४

अभिरामवयोवामा सन्ध्या वन्ध्या वधूरिव ॥”

● आद्यं निशायाः क्षणमन्त्यमन्त-

३५

र्बुद्धा विधुं तापिनमुष्णभानुम् ।

३६

बिम्बं स्वकं भ्रान्तिवशाच्च कान्तं
चन्द्रोदये नृत्यति चक्रवाकी ॥

एवं समस्यापूरणोपायविधिर्विज्ञेयः ।

इति श्रीमत्खिमुण्डिमहाराज्येश्वर- गङ्गवंशावतंस-वीरश्रीगजपति- जगन्नाथ- नारायणदेवमहाराज- विद्वत्सभाराजित- प्रबन्धकविताप्रकाशक- करणकुलसंभव- कविभिषग्वर वासुदेवपात्रतनय-**श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ समस्यापूरणोपाय-**

३७

निरुपणं नाम त्रयोविंशतितमः किरणः ।

पा.टि.

(३३) भु2) ‘र्घनो भृङ्गपयोधरा’ । (३४) भु2) ‘वयो वास्या’ ।
(३५) भु2) ‘र्बुद्ध्या’ । (३६) भु3 भु4 .म) ‘कान्ति’ ।
(३७) भु1 भु2) ‘त्रयोविंशतिः’ । भु4 म) द्वाविंशतिः ।

टि.

☆ तत्रैव. / पृ.84 . ● तत्रैव. / पृ.86 .

□□□

[चतुर्विंशतितमः किरणः]

अथ कामशास्त्रमते प्रथमतः पुरुषलक्षणमुच्यते –

स्मरदीपिकायाम्- शशकजातिपुरुषः –

स्त्रीजितो[१] गायकश्चैव नारीजनमनोहरः ।
षडङ्गुलशरीरो हि श्रीमांश्च शशको मतः ॥१॥

मृगजातिपुरुषः –

स्त्रीजितः[२] स्वल्पभुग् दक्षः सत्यवादी प्रियंवदः ।
सुशीलो धर्मतत्त्वज्ञो द्विजभक्तः शुचिः सदा ॥२॥
अष्टाङ्गुलशरीरश्च भवेत् सर्वजनप्रियः ।
रूपयुक्तो विदग्धश्च विद्यायुक्तो मृगो मतः ॥३॥

वृषजातिपुरुषः–

उपकारपरो नित्यं स्त्रीवशः श्लेष्मणस्तथा ।
दशाङ्गुलशरीरश्च तेजस्वी वृषभो मतः[३] ॥४॥

अश्वजातिपुरुषः–

लुब्धकः कृपणश्चैव मिथ्यावादी च निर्दयः ।
द्वादशाङ्गुलशेफश्च[४] कुनखोऽपि हयो मतः ॥५॥

अथ पद्मिन्यादिचतुर्विधनायिका निरुप्यन्ते-पञ्चसायके-

पा.टि.

(१) भु2) 'स्त्रीजितोपायकश्चैव' । (२) भु1 भु2) 'स्त्रीयुतः' ।
(३) म) 'मदः' । (४) म) 'द्वादशांगुलरेफश्च' ।

तत्र पद्मिनी—

संपूर्णेन्दुमुखी विलोलनयना पीनस्तनी दक्षिणा
मृद्वङ्गी विकचारविन्दसुरभिः श्यामा च गौरद्युतिः ।
स्वल्पाहाररता विलासकुशला हंसस्वनागामिनी
लज्जालुर्गुरुदेवपूजनवती[५] सा नायिका पद्मिनी ।।६।।

श्यामा वरवर्णिनी यथा-मम—

ग्रीष्मे या सुखशीतला वरवधूर्भावोन्नता सौख्यदा
शीते चोष्णवती सकामहृदया भक्ता प्रियस्योत्तमा ।
सा श्यामा परिकीर्तिता कविवरैर्लोकेषु मुख्या[६] सदा
सैवेयं वरवर्णिनी निगदिता प्रेमार्पिता वल्लभे ।।७।।

''शीतेषु कोष्णसर्वाङ्गी[७] ग्रीष्मेषु[८] च सुशीतला ।
भर्तुर्भक्ता च या नारी सा भवेद् वरवर्णिनी ।।८।।

'सा श्यामा परिकीर्तिता' इति रुद्रादयः ।

यथा च ग्रन्थान्तरे—'श्यामा यौयनमध्यस्था' इति ।

उत्पलमालायां[९] च - 'तप्तकाञ्चनवर्णा या सा श्यामा परिकीर्तिता' इति ।

चित्रिणी—

श्यामा पद्ममुखी कुरङ्गनयना क्षीणोदरी वत्सला
संगीतागमवेदिनी[१०] वरतनुस्तुङ्गस्तनी शिल्पिनी ।
काव्यालापरता मतङ्गजगतिर्माद्यन्मयूरस्वना
विज्ञेया कविशेखरैः प्रणयिनी चित्राम्बरा चित्रिणी ।।९।।

पा.टि...

(५) भु4) 'पूजनरति' । (६) भु2) 'मृग्या' । (७) भु1 भु2) 'कोष्णं सर्वाङ्ग' ।
(८) भु3) 'ग्रीष्मेन्या सुखशीतला' । भु4 .म) 'गीष्मे या सुखशीतला' ।
(९) भु1 भु2) उत्पल..........................परिकीर्तिता' इति न दृश्यते ।
(१०) भु1 भु2 भु4) 'संगीतागमवेशिनी' ।

शंखिनी–

तन्वङ्गी कुवलेक्षणा लघुकुचा भोगी मदावेशिनी
प्रायो दीर्घकचा स्वभावपिशुना कष्टोपभोग्या रतौ ।
पिङ्गा लोलगतिश्च घर्घररवा रक्ताम्बरा ह्लादिनी
नानास्थाननखप्रदानरसिका सेयं मता शंखिनी ।।१०।।

हस्तिनी –

पीना स्वल्पतरेक्षणा मृदुगतिः क्रूरा लसत्कन्धरा
स्तोकापिङ्गलकुन्तला पृथुकुचा लज्जाविहीनानना ।
लम्बोष्ठी बहुभोज्यभोजनरुचिः कष्टैकसाध्या रतौ
११ गौराङ्गी करिदानगन्धवदना सा नायिका हस्तिनी ।।११।।

अपि च स्मरदीपिकायाम् –

पद्मिनी हस्तशोभा च नेत्रशोभा च चित्रिणी ।
शंखिनी कटिशोभा च ऊरुशोभा च हस्तिनी ।।१२।।

रतिरहस्ये –●

पद्मिनी पद्मगन्धा स्यान्मधुगन्धा च चित्रिणी ।
शंखिनी क्षारगन्धा च मदगन्धा च हस्तिनी ।।१३।।

स्मरदीपिकायाम्–

पद्मिनी पद्मनिद्रा च पुष्पनिद्रा च चित्रिणी ।
शंखिनी शंखनिद्रा च मत्तनिद्रा च हस्तिनी ।।१४।।

अथ देवसत्त्वा नायिका - पञ्चसायकादिषु–

त्रिवलिललितमध्या कम्बुकण्ठी विदग्धा
कमलसुरभिदेहा केतकीगर्भकान्तिः ।
शुचिरुचिरचरित्रा शिल्पविद्यानुरक्ता
सुललितपिकवाणी स्यादियं देवसत्त्वा ।।१५।।

पा.टि.

(११) भु4) "अपि च स्मरदीपिकायाम् ....हस्तिनी ।।" इति ग्रन्थभागो न दृश्यते ।

टि.

● उपलभ्यमाने रतिरहस्ये पद्यमिदं नोपलभ्यते ।द्र. कोक्को रति.

गन्धर्वसत्त्वा–

हरिणचपलदृष्टिर्नृत्यगीतानुरक्ता
मधुरबहुलदृष्टिर्गन्धमाल्यानुरक्ता ।
शिशिरसुरभिगात्री क्रीडिता प्रेमपात्री (त्रं?)
भवति रुचिरमूर्तिः सैव गन्धर्वसत्त्वा ॥१६॥

यक्षसत्त्वा–

गुरुकुचयुगभारा गौरदेहातिदेहा
तरुणहरिणनेत्रा कोपिनी वीतलज्जा ।
विविधमधुरमूर्तिर्मत्स्यमांसादिभोग्या
मुनिभिरियमनर्घ्या यक्षसत्त्वा प्रदिष्टा ॥१७॥

प्रेतसत्त्वा–

चिरविरहविकारा रात्रिसंचारधीरा
निरतपिशुनचित्ता कुत्सिताहारचेष्टा ।
विकृतवदनचन्द्रा कृष्णवर्णातिखर्वा
मलिनवसनरक्ता कीर्तिता प्रेतसत्त्वा ॥१८॥

येन पुरुषेण या नायिका सन्तुष्टा भवति तदुच्यते-

स्मरदीपिकायाम्–

शशेन पद्मिनी तुष्टा मृगेणापि च चित्रिणी ।
वृषेण शंखिनी तुष्टा हयेन हस्तिनीं रता ॥१९॥

अथ रतम्[१२] –

अन्तराख्यं बाह्यमिति तद् द्विविधम् । तत्र अन्तराख्यरतं कामशास्त्रादिषु सममुपरतिभ्रमणचक्रबन्धादिरतिविशेषादयः ।

पाटि

---

(१२) भु2) 'अथ रतम्' इत्यस्मादारभ्य 'बुधोत्तमैः' (पृ425)इत्यन्तं यावन्नोपलभ्यते । भु 3 भु 4 म) 'अथ रतम्...............विशेषादयः' इतिसमुदायस्य स्थाने 'अथान्तर्बाह्यमिति सुरतं द्विविधम् ।'' इति ।

अथ बाह्यरतम्[१३] –

आश्लेषो[१४] मृदुचुम्बनं गलरुतं केशग्रहश्चुत्कृतिः[१५]
केशस्यैव सुमार्जनं च मधुरा वाणी स्मरोद्दीपनी[१६] ।
उत्कामा नखरक्षतिः सुखजनिर्दन्तक्षतिः स्पर्शनं
ताम्बूलादिसमर्पणं कुचयुगाद्यङ्गाभिसंदर्शनम्[१७] ॥२०॥

सुखप्रदाङ्गरागैश्च[१८] लेपनं घुसृणादिभिः ।
सरोवरवनागारनगखेलास्मितादिकम् ॥
रतान्येतानि बाह्यानि कथितानि बुधोत्तमैः[१९] ॥२१॥

अथ सर्वजातिसाधारणी चन्द्रकला निरूप्यते– रतिरहस्ये –☆

अङ्गुष्ठे पदगुल्फजानुजघनेयोनौ च नाभौ कुचे
कक्षे कण्ठकपोलदन्तवसने नेत्रान्तिके मूर्धनि ।
शुक्लाशुक्लवि भागतो मृगदृशामंगेष्वनंगस्थिति
रूर्ध्वाधोगमनेन वामपदतः पक्षद्वये लक्षयेत् ॥२२॥

अथ कामचालनम्– स्मरदीपिकायाम्–

चक्राकारेण चरति पुरुषे विपरीतके ।
स्त्रीस्थानात् स्रवते (?)ऽनङ्गो गोमुत्रसदृशः क्रमात् ॥२३॥
पादगुल्फोरुदेशे च स्तने कुक्षौ स्थले श्रुतौ ।
नखक्षतं प्रदातव्यं भगे नाभौ च मर्दनम् ॥२४॥

पाटि...

(१३) भु2) 'अथ बाह्यरतम्' इत्यस्मादारभ्य 'बुधोत्तमै' इत्यन्तः ग्रन्थभागो नास्ति ।
(१४) भु1 .म) 'आश्लेषम्' । (१५) म) 'ग्रहं चूकृतिः' ।
(१६) भु4) 'स्वरोद्दीपिनी' । (१७) भु3) 'कुचयुगाद्यङ्गादिसं-' ।
(१८) भु4 .म) 'सुखप्रदानरागैश्च' । (१९) भु3 भु4 म) 'बुधोत्तमैः' इत्यस्मात् परम् 'अथ' इत्यस्मात् पूर्वं च- 'अन्तः सरतं स्पष्टम्' इति अधिकं दृश्यते ।

टि.___

☆ कोक्को. रति ॥/1

हृदये ताडनं हस्तौ दन्तेनाधरपीडनम् ।
गण्डे नेत्रे ललाटे च चुम्बनं कामुकैरिह ॥
इति कामुकसंघातैर्दातव्यं कामचालनम् ॥२५॥

अथ बन्धः– स्मरदीपिकापञ्चसायकादिषु–

पादद्वयं गले कृत्वा क्षिप्त्वा लिङ्गं भगे लघु ।

किरणेऽस्मिन्–'कमुकान्तौ' इति भ्वादिगणीय सकर्मकात्मनेपदिधातोः
'कामयेत्' इति परस्मैपदिप्रयोगश्चिन्त्यः ।

[२०] कामयेत्(?)कामुकः कान्तां बन्धः कामप्रदो हि सः ॥२६॥
पादमेकमूरौ स्थित्वा द्वितीयं बन्धसंस्थितम् ।
नारीं च कामयेत्(?)कामी बन्धः स्याद्विपरीतकः ॥२७॥
[२१] ऊरुमूलोपरि स्थित्वा योषिदूरुयुगं यदि ।
ग्रीवां धृत्वा कराभ्यां तु बन्धो नागरको मतः ॥२८॥
पीडयेदूरुयुग्मेन कामुको यदि सुन्दरीम् ।
रतिपाशास्तदा ख्यातः कामिनां च सुखावहः ॥२९॥
[२२] स्त्रीजंघोरू सुसंयतौ दोर्भ्यामालिंग्य सुन्दरीम् ।
कामयेत्(?) विह्वलः कामी बन्धोऽयं रससंज्ञकः ॥३०॥
नारीपादौ करार्धेन धारयन् चालयन् यदि ।
स्तनार्पितकरः कामी कामयेत्(?) प्रियतोषणः ॥३१॥
योषित्पादौ हृदि स्थित्वा कराभ्यां धारयेत् कुचम् ।
यथेष्टं ताडयेत् योनिं बन्धः स्मरपदः स्मृतः ॥३२॥

पाटि

---

(२०) भु3) 'कामये' । भु4) 'कामयते' ।
(२१) भु4) 'भूजामूलोपरि' ।
(२२) भु4) 'स्त्रीजंघोरुषु संदतौ' ।
म) 'स्त्रीजंघोरुषु संपत्तौ' ।

पादमेकं हृदि स्थित्वा द्वितीयं बन्धसंस्थितम् ।
स्तनौ धृत्वा रमेत्[☆ २३] (?) कामी बन्धोऽयं चार्धसंपुटः ॥३३॥
स्वजंघाद्वयबाह्वेषु (तु ?) धृत्वा योषित्पदद्वयम् ।
स्तनौ धृत्वा रमेत् (?) कामी बन्धः स्तनभरः स्मृतः ॥३४॥
नारीपादद्वयं कामी धारयेत् स्तनमण्डले ।
कण्ठे कृत्वा रमेत् (?) तत्तु(चेत्तु ?)बन्धोऽयं रतिसुन्दरः ॥३५॥
नार्या ऊरुयुगं धृत्वा कारभ्यां धारयेत् पुनः ।
कामयेन्निर्भरः कामी बन्धोऽयमूरुपीडनः[२४] ॥३६॥
धृत्वा वामकरे ह्यूरुं[२५] पादं चापि शिरःस्थितम् ।
सुदृढं कामयेत्[२६] (?) कामी स्मरचक्रः प्रकीर्तितः ॥३७॥

एवं स्मरशास्त्रेऽनेकप्रकारा बन्धाः सन्ति । ग्रन्थविस्तरभयात् ते न लिखिताः ।

अथ आलिंगनविधिः । तत्र स्पृष्टकं यथा–

संमुखे कामिकामिन्योरन्योन्यमङ्ग (न्यं त्वङ्ग) ?)संगमः ।
स्पृष्टकालिंगनं ख्यातं निरतं सुखवर्धनम् ॥३८॥

पीडकं यथा–

भित्याश्रितायाः कान्तायाः निर्भरं त्वंगपीडनम् ।
पीडकालिंगनं[२७] ख्यातं स्मरशास्त्रविचक्षणैः ॥३९॥

विद्धकं यथा–

भुजाभ्यां कण्ठमाश्लिष्य वसतो रसिकस्य च ।
यत्ताडनं स्तनाग्रेण वक्षोविद्धकमुच्यते ॥४०॥

पा.टि...

(२३) भु3) 'रमे' ।
(२४) भु1 भु2 भु4 म) 'पीडनम्' ।
(२५) भु1 भु2) 'ह्योरु' । भु4 म) 'दूरम्' ।
(२६) भु3) 'रमयेत्' ।
(२७) भु3 म) 'पीडिता'- ।

घृष्टालिंगनं यथा–

अन्धकारे च यात्रादौ चिरकालांगघर्षणम् ।
तद्घृष्टालिंगनं प्रोक्तं प्रेमवृद्धिकरं परम् ।।४१।।

दुग्धजलं यथा– २८

अंगभंगीमनादृत्य गाढं श्लिष्यति कामुकः ।
तद्दुग्धजलमाख्यातमाश्लेषं च विदुर्बुधाः ।।४२।।

कुचो (ऊरु?) पगूहनं यथा–

निजोरुयुगलेनैव तथा कान्तोरुयुग्मकम् ।
वेष्टयित्वा तु यः कान्तः पीडयेदतिनिर्भरम् ।।४३।।
तदालिंगनमाख्यातमूरुपगूहनं मतम् (बुधैः?)

लालाटिकं यथा –

कान्तामुखे मुखं दत्त्वा ललाटेन ललाटकम् ।।४४।।
ताडयेत् लीलयाश्लेषः तल्लालाटिकमुच्यते ।

जघनोपगूहनं यथा –

चुम्बनाय बलात्काराद्रसिता युवती रसैः ।।४५।।
कान्तस्य जघनं सौख्याक्रम्य तस्मिन् विशेद्यदि ।
जघनोपगूहनं तदाश्लेषः कथितं बुधैः ।।४६।।

लतावेष्टितं यथा –

उत्तिष्ठन्तं प्रियं कान्ता कामविभ्रममानसा ।
आश्लिष्य स्वभुजाभ्यां च चुम्बिता (चम्बन्ती?) वदने मुहुः ।।४७।।
लतावेष्टितमाख्यातं तदालिंगनमुत्तमम् ।

वृक्षारूढं यथा–

प्रियपादं पदा बद्ध्वा पदैकेन सुकामुकः ।।४८।।
योजयित्वोरुमत्यन्तं भुजाभ्यां पृष्ठमुद्धृतः ।
वृक्षारूढालिंगनं तत् कथितं रसिकोत्तमैः ।।४९।।

पा॰टि॰

---

(२८) भु1 भु3 भु4) 'गाढमाश्लिष्यति प्रियः ।

एतानि आलिंगनानि उभयोरपि कथितानि ।

☆ द्वादशालिंगनं चैतद् रतिरंगप्रधानकम् ।
पुरुषास्तद् विना लोके सुरतं ये प्रकुर्वते ॥५०॥
पशुसंगममित्याहुः कुतस्तेषां रतौ सुखम् ।
आलिंगनसुखारूढं जानीयात् सुरतोत्तमम्[२९] ॥५१॥

चुम्बननखक्षतप्रकारादयो रतिरहस्यादिषु ज्ञेयाः ।

अथ वयःक्रमः । स्मरदीपिकादिषु—

बालेति गीयते नारी यावत् षोडशवत्सरः (रा:?)
ततः[३०] परं तरुणी स्यात् यावत् त्रिंशति[३१] (च्च?) वत्सरः (रा?) ॥१५२॥
अत ऊर्ध्वमिति प्रौढा यावत्पञ्चाशकं[३२] भवेत् ।
वृद्धा चातः परं ज्ञेया सुरतोत्सववर्जिता ॥५३॥

अथ येन द्रव्येण या नायिका वश्या भवति तदुच्यते—

फलताम्बूलमालाभिर्बाला वश्या भवेद् ध्रुवम् ।
विविधाभरणैः स्नेहैस्तरुणी वश्यवर्तिनी ॥५४॥
गाढालिंगनचुम्बैश्च[३३] प्रौढा वश्या स्थिरा भवेत् ।
गौरवैर्[३४]मधुरालापैर्वृद्धा वश्या भवेद् ध्रुवम् ॥५५॥

पा.टि.

(२९) भु1 भु2) 'सुरतोत्तमः' । (३०) भु1 भु2 भु4 म) 'ततःपञ्च' ।
(३१) भु3) - 'त्रिंशत-' ।(३२) भु4) 'पञ्चाशद्' । (३३) भु1 भु2 म) 'प्रौढा'-।
(३४) भु3) 'गौरवै-' इत्यस्मादारभ्य 'विषयिणां भवेत्' इत्यन्तं यावत् नोपलभ्यते ।

टि.

☆ "द्वादशालिंगनं चैतद्रतिरंगप्रधानकमि'त्यस्य वाक्यस्य पूर्वोक्तैः स्पृष्टकादिभिर्दशभिरालिंगनभेदैः संख्यायां संगतिर्न भवति ।

बाला तु प्राणदा नित्यं तरुणी चित्तहारिणी[३५] ।
प्रौढा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ।।५३।।

यस्मिन् ऋतौ या नायिका सुखदा तदुच्यते–

निदाघशरदोर्बाला पथ्या विषयिणां भवेत् ।
हेमन्ते शिशिरे योग्या प्रौढा वर्षावसन्तयोः ।।५७।।

अथ सेवनोपायम् (पायाः?)–

आसनेऽनुनयेद् बालां तरुणीं शयने तथा ।
उत्कण्ठितेन या प्रौढां (च प्रौढां?) लालनं त्रिविधं स्मृतम् ।।५८

अथ कामस्थानम्[३६]–

यस्मिन् देशे वसेत् कामः शृणु वीर महामते ।
पुंसां वसेत् दक्षिणांशे वामे स्त्रीणां प्रकीर्तितः ।।५९।।

अथ नायिकानां मदनतृष्णावर्धनकालः[३७] रतिरहस्ये–☆

"व्रजति रतिसुखार्थं चित्रिणी पूर्वयामे
भजति[३८] दिनरजन्योर्हस्तिनी च द्वितीये ।
गमयति च तृतीये शंखिनी चार्द्रभावं
रमयति रमणीयं पद्मिनी तुर्ययामे ।।६०।।

इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथनारायणदेवमहाराज- विद्वत्सभाराजित- प्रबन्धकविताप्रकाशक- करणकुलसंभव-कविभिषग्वर- वासुदेवपात्रतनय- श्रीमद्गोपीनाथकविभूषणकृतौ कविचिन्तामणौ नायकादि● (पुरुषादि?) निरूपणं नाम चतुर्विंशतितमः[३९] किरणः ।

पा.टि.

---

(३५) भु2) 'वित्तहारिणी' । (३६) भु4) 'संस्थानम्' ।
(३७) भु1 भु2) 'मदनकालवर्धनकाल-' । (३८) भु3) 'भवति' ।
(३९) भु1 भु2) 'चतुर्विंशतिः'। भु3) 'त्रयोविंशतितमः'। भु4 म) 'त्रयः विंशतिः'

टि.

☆ द्र. कोक्को. रति.I/22. ● किरणेऽस्मिन् कामशास्त्रसंमतपुरुषादिनिरुपणसद्भावात् नायकादि निरुपणम्' इत्यस्य स्थाने पुरुषादिनिरूपणमिति स्याद्वा ?

□□□

[पञ्चविंशतितमः किरणः]

अथ संगीतमुच्यते । संगीतोत्पत्तिमाह-- संगीतनारायणे—☆

“पुरा चतुर्णां वेदानां सारमाकृष्य पद्मभूः ।
[३] [१]इमं तु पञ्चमं वेदं [२]संगीताख्यमकल्पयत् ॥”१॥

कस्मात् किं जातमित्याह—☆

“ऋग्भ्यः पाठ्यमभूद् गीतं सामेभ्यः समपद्यत ।
यजुर्भ्योऽभिनया जाता रसाश्चाथर्वणः स्मृताः ॥’२॥

संप्रदायशुद्धिमाह—☆

“ब्रह्मेशनन्दिभरतदुर्गानारदकोहलाः ।
दशास्यवायुरम्भाद्याः [४]संगीतस्य प्रचारकाः ॥”३॥

प्रशस्तिमाह – ☆

“[५]श्रुतिस्मृत्यादिसाहित्यनानाशास्त्रविदोऽपि च ।
संगीतं ये न जानन्ति ते द्विपादमृगाः स्मृताः ॥”४॥

प्रयोजनमाह—☆

“त्रिवर्गफलदाः सर्वे दानयज्ञस्तवादयः ।
एकं संगीतविज्ञानं चतुर्वर्गफलप्रदम् ॥”५॥

कथमित्याह—☆

“हरीशादिस्तुतेर्धर्मो धनकामौ नृपादितः ।
[६]निष्कामात् तदनुष्ठानान्मोक्षस्तस्मात् तदभ्यसेत् ॥”६॥

पा.टि...

(१) भु1 भु2 भु4) ‘इदं’ । (२) भु1 भु2 म) ‘संगितार्थ-’ ।
(३) भु1 भु2) ‘तस्मात्’ ।(४) भु4) ‘संगितस्वरचारकाः’ ।(५) भु3) ‘स्मृतिभिः’
(६) भु1 भु3 भु4) ‘निष्कामम्’ ।

टि. ____

☆ गज. संगी.।/3 - 8

सुखिजनसुखकारी दुःखिनो दुःखहारी
श्रवणपुटविनोदी मानिनीचित्तचोरी (चोरः ?)
रतिरभसविलासी मन्मथस्याग्रदूती(दूतः ?)
७
पशुशिशुफणिमोदी पञ्चमो नादवेदः ॥७॥

किं स्वरूपं संगीतमित्याह-- शिरोमणौ–

८
गीतं वाद्यं च नृत्यं च त्रयं संगीतमुच्यते ।
गीतवाद्य उभे एव संगीतमिति केचन ॥८॥
तत्तिर्यङ्नरदेवादिमनोहारि प्रकीर्तितम् ।

अथ संगीतप्रकारमाह –☆

मार्गदेशविभेदेन संगीतं भवति द्विधा ॥९॥
९
स्वर्गे मार्गाश्रितं देशाश्रितं भूतलरञ्जनम् ।

अथ गीतस्य हेतुं नादमाह –☆

"न नादेन विना गीतं न नादेन विना स्वरः ॥१०॥
न नादेन विना रागस्तस्मान्नादात्मकं जगत् ।"

तदुत्पत्तिप्रकारमाह–☆

"आत्मा विविक्षमाणोऽयं मनः प्रेरयते यतः ॥११॥
देहस्थं वह्निमाहन्ति स प्रेरयति मारुतम् ।
१०
नकारः प्राणवायुः स्याद् दकारो हव्यवाहनः ॥१२॥
आभ्यामुत्पद्यते यस्मात्तस्मान्नादोऽयमुच्यते ।"

पा.टि.

(७) म) 'शिशुपशु' । (८) भु1 भु2) 'गीतं वाद्यं' ।
(९) भु4) 'देवा' । (१०) भु2) 'स्यादाकारे' ।

टि.

☆ द्र. तत्रैव.I/II-14

☆व्यवहारे त्वसौ नादः प्रोच्यते त्रिविधो[११] बुधैः ॥१३॥
मन्द्रो हृदि स्थितः कण्ठे मध्यस्तारश्च मूर्धनि ।

कोहलीये तु –

आहतोऽनाहतश्चेति स नादो द्विविधो[१२] मतः ॥१४॥
यत्रोभयोश्च संयोग आहतः स प्रकीर्तितः ।
आकाशसंभवो नादस्तथानाहत[१३] उच्यते ॥१५॥
तं नादं[१४] सप्तधाकार्षीत्तथा[१५] षड्जादिभिः स्वरैः ।

अथ गीतम् –

तल्लक्षणमाचार्याणां मतभेदाद् बहुविधम्[१६] । तत्रापि[१७] बहुसंमतमेवोच्यते ।

संगीतसारे – 'गीतं रञ्जकधातुमातुसहितम्' इति[१८] ।

गीतस्यावयवो धातू रागादिर्मातुरुच्यते[१९] ॥१६॥

कौमुद्यां तु – 'रागैर्विरचितं[२०] गीतम्' इति ।

गीतप्रकाशे तु – 'रञ्जकस्वरसन्दर्भो गीतम्' इति ।

पा.टि.

(११) भु2) 'प्रोच्यतेऽत्र विधो' । (१२) म) 'द्विधो' ।
(१३) भु2 भु4 म) 'हतमुच्यते' । (१४) भु4) 'तन्नादं' । (१५) म) 'कार्षीत्तदा' ।
(१६) भु1 भु2) 'बहुधा' । (१७) भु3 भु4) 'तथापि' ।
(१८) भु1 भु2) 'इति गीतम्' । (१९) भु1 भु2) 'मातुसहितमिति गीतम्'' ।
(२०) भु3) 'रागं विरचितं' । भु4) 'रागैर्विरहितं' ।
म) 'रागैर्विरचितं गीतम्' इति । गीतप्रकाशे तु' इति ।

टि.

☆ तत्रैव.I/15.

नारदसंहितायाम्–

धातुमातुसमायुक्तं गीतमित्यभिधीयते ।
गुणादि धारणाद्धातुर्गीतावयव एव सः ॥१७॥
''गुणालंकारवाक्येषु रञ्जकौजस्विता यदि ।
मातुः स[२२] गदितस्तज्ज्ञै[२१]र्मानसस्य प्रमोदनात् ॥''१८॥

नादपदेन नादजन्यानां श्रुतिस्वरादीनां ग्रहणम् । तदुक्तम्–☆

''नादाच्च श्रुतयो जातास्ताभ्यः षड्जादयः स्वराः ।
तेभ्यः स्युर्मुर्च्छनास्ताभ्यस्तानाख्या ग्रामसंभवाः ॥''१९॥

अथ श्रुतयः –☆ [२३]

''चतस्रः पञ्चमे षड्जे मध्यमे श्रुतयो मताः ।
ऋषभे धैवते तिस्रो द्वे गान्धारे निषादके ॥''२०॥
इति स्वराणां श्रुतयो द्वाविंशतिरुदीरिताः ।

अथ स्वरः –☆

''स स्वरो यः श्रुतिस्थाने स्फुरन्[२४] हृदयरञ्जकः ॥२१॥

के त इत्याह –☆

षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ।
धैवतश्च निषादश्च स्वराः सप्त प्रकीर्तिताः ॥''२२॥
सरिगामपधनिश्चेति (षऋगामपधनिश्चेति ?) ।

तत्र षड्जस्वरः –☆

''नासां कण्ठमुरस्तालुजिह्वादन्तांश्च संस्पृशन् ।
षड्भ्यः संजायते यस्मात्तस्मात् षड्ज इति स्मृतः ॥''२३॥

पा.टि.

(२१) म) 'र्मातुरस्य' । (२२) म) 'स्वराणां' । (२३) भु4) 'तिस्रः' ।
(२४) भु1) 'स्वरस' । भु2) 'स्वरः' । भु3 भु4) 'स्वरन्' ।

टि.

☆ कम्रशः तत्रैव -I/23 तत्रैवI/26 तत्रैवI/41 तत्रैवI/44.

ऋषभस्वरः —☆

‘‘नाभिमूलाद् यदा वात[२५] उत्थितः[२६] कुरुते ध्वनिम्[२७] ।
ऋषभस्येव[२८] निर्याति हेलया ऋषभः स्मृतः[२९] ॥’’२४॥

गान्धारः —☆

‘‘नाभेः समुद्गतो वायुर्गले श्रोते च चालयन् ।
सशब्दं येन निर्याति गान्धारंस्तेन कथ्यते ॥’’२५॥

मध्यमः —☆

‘‘मध्यमो मध्यमस्थानात् शरीरस्योपजायते ।
नाभिमूलाच्च गम्भीरः किंचित्तारः स्वभावतः ॥’’२६॥

पञ्चमः --☆

‘‘प्राणोऽपान : समानश्च उदानोव्यान एव च ।
एतेषां समवायेन जायते पंचमः स्वरः ॥’’२७॥

धैवतः --☆

‘‘गत्वा नाभेरधोभागं वस्तिं प्राप्योर्ध्वगः पुनः ।’’
धावन्निव च यो याति कण्ठदेशं स धैवतः ॥’’२८॥

निषादः --☆

‘‘षड्जादयः षडेतेऽत्र स्वराः सर्वे मनोहराः ।
निषीदन्ति यतो लोके निषादस्तेन कथ्यते ॥’’२९॥

पाटि.

(२५) भु3) ‘वातं’ । (२६) भु3) ‘उत्पत’ । भु4) ‘उत्पतन्’ । म) ‘उत्पत्तिं’ ।
(२७) म) ‘ध्वनिः’ । (२८) भु2 भु4) ‘-स्येति’ । (२९) म) ‘स्वरः’ ।

टि.

☆ गज. संगी.।/46-51 (क्रमशः)

☆ मयूरः षड्जमाख्याति ऋषभं वक्ति चातकः ।
३० ३१
छागो गान्धारमाचष्टे क्रौञ्चो वदति मध्यमम् ॥३०॥
३२
☆ कोकिलः पञ्चमं ब्रूते भेको वदति धैवतम् ।
३३
निषादं भाषते हस्तीत्येवं ब्रह्मादिसंमतम् ॥३१॥

अथ ग्रामाः –☆

ग्रामः स्वराणामतिसूक्ष्मभावसंयोजनस्थानकुलं त्रिधा सः ।
षड्जस्तथा मध्यम एव भूम्यां गान्धारनामा किल देवलोके॥३२

[अथ मूर्च्छना –☆]

यत्र स्वरो मूर्च्छित एव रागतां प्राप्तश्च तामाह मुनिश्च मूर्च्छनाम् ।
३४ ३५
ग्रामोद्भवास्ताः स्वरसप्तसंयुताः स्थानत्रये स्युः पुनरेकविंशतिः॥३३

अथ तानाः –☆

मूर्च्छना एव तानाः स्युः शुद्धा आरोहणाश्रिताः ।
३६
तेऽप्येकोनपञ्चाशत्प्रकारा भवन्ति ।

पाटि..

(३०) भु3) 'छागो' गान्धारमाचष्टे क्रौञ्चो वदति' इत्ययमंशः कीटदष्टः ।

(३१) भु1 भु2) 'भवति' ।

(३२) भु1 भु2) 'भवति' ।

(३३) भु1 भु2 भु3 भु4) '-त्येते' ।

(३४) भु3) '-सप्तमं युताः' ।

(३५) भु3) 'स्थानप्रिये' ।

(३६) भु2) 'तेऽपि ऊनविंशत्' ।

टि.

☆ गज. संगी.I/52, 53, 59, 65, 69 (क्रमशः)

अथ रागानाह–☆

यैस्तु चेतांसि रज्यन्ते जगत्त्रितयवर्तिनाम् ।
ते रागा इति कथ्यन्ते मुनिभिर्भरतादिभिः ॥३४॥

तत्र प्रथमतः श्रीरागः कथ्यते - नारदसंहितायाम् –

लीलाविहारेण वनान्तराले चिन्वन् प्रसूनानि वधूसहायः ।
विलासिवेषोऽसितदिव्यमूर्तिः श्रीराग एष प्रथितः पृथिव्याम् ॥३५॥

कर्णाटः - नारदसंहितायाम्–

कृपाणपाणिस्तुरगाधिरूढो मयूरकण्ठोपमकण्ठकान्तिः ।
स्फुरत्सितोष्णीषधरः प्रयाति कर्णाटरागो हरिणान् विहन्तुम् ॥३६॥

रेवगुप्तः[३७] - निबन्धान्तरे–

अङ्के[३८] निषण्णां सुरतान्तखिन्नामाश्वासयन् स्वाञ्चलवीजनेन ।
सीमन्तिनीं श्वासचलत्कुचान्तां[३९] सुवर्णकान्तिः किल रेवगुप्तः[४०] ॥३७॥

वसन्तः-नारदसंहितायाम्–

चूताङ्कुरेणैव कृतावतंसो विघूर्णमानारुणनेत्रपद्मः ।
पीताम्बरः काञ्चनपद्मदेहो वसन्तरागो युवतिप्रियश्च ॥३८॥

भैरवः - निबन्धान्तरे –☆☆

सचन्द्रहासं फलकं दधानो निबद्धकक्षो दृढबद्धचूडः ।
चारु (गतीः?) वितन्वन् बहुधा पदातिः प्रचण्डरूपः किल भैरवोऽयम् ॥३९

पा.टि.……………………………………………………………………

(३७) म) 'रेवगुप्तिः' । (३८) भु2 भु4) 'अग्रे' ।

(३९) म) '-चान्तः' । (४०) म) '-गुप्तिः' ।

टि.

☆ तत्रैव.I/99. ☆☆ तत्रैव.I/143.

बङ्गालरागः—☆

मनोज्ञमौञ्जीगुणगुम्फिताङ्ग[४१]स्त्वचं दधानो धरणीरुहस्य ।
चण्डः कुमारः कमनीय[४२]मूर्तिर्बङ्गालरागः शुचिसामगानः ।।४०

कामोदरागः—☆☆

अक्षमालां करे कृत्वा[४३] दधानस्तारवीं त्वचम् ।
जपन् जह्नुसुतातीरे कामोदः परिकीर्तितः ।।४१।।

कामोदिका-- नारदसंहितायाम्—

भर्त्रा समं पाथसि हेमवर्णा पयोविहारेण सरोरुहाणि ।
विचिन्वती[४४] सौरभमोदमाना कामोदिकेयं कथिता विदग्धैः ।।४२।।

वराडी- नारदसंहितायाम्—

कर्णे दधाना सुरपुष्पयुग्मं सुवृत्तवक्षोजमनोहराङ्गी ।
स्मेरानना चारुविलोलनेत्रा गौरांगयष्टिः कथिता वराडी ।।४३।।

दक्षिणगुज्जरी संगीतसारे—

श्यामा सुकेशी मलयद्रुमाणां मृदूलसत्पल्लवतल्पयाता ।
श्रुतेः स्वराणां दधती विभागं[४५] तन्त्रीमुखी दक्षिणगुज्जरीयम् ।।४४।।

गुज्जरी- नारदसंहितायाम्—

कर्णोत्पलासंगिमधुव्रतानां संशृण्वती मंगलकूजितानि ।
कान्तान्तिकं गन्तुमनाः प्रदोषे सा गुज्जरी वेषकलांचितांगी[४६] ।।४५।।

पा.टि.

(४१) भु4) 'पुष्पिताङ्ग' ।
(४२) भु4) 'रमणीय' ।
(४३) भु4) 'धृत्वा' ।
(४४) भु1 भु2) 'वितन्वती' ।
(४५) भु3 भु4 म) 'विरागं' ।
(४६) भु2) 'वेषकलांचितांघ्री' ।

टि.

☆ द्र. तत्रैव.I/144
☆☆ तत्रैव.I/151

संगीतरत्नमालायां दशधा गुज्जरी प्रोक्तापि ग्रन्थविस्तरभयान्नोक्ता ।

तोडी –☆

उन्निद्रपङ्केरुह चारुनेत्रा कुरङ्गशावं कलमाङ्कुरेण ।
संभावयन्ती विपिनोपकण्ठे तोडीयमिन्दीवरदामरम्या ॥४६॥

मालश्रीः (मालसी ?) –☆

लीलारविन्दस्य दलानि बाला विभावयन्ती तनुदेहयष्टिः ।
मालूरवृक्षस्य तले निषण्णा शोणा [४७]मृदुर्मालसिका प्रदिष्टा ॥४७॥

सिन्धुडा – ४८☆

सदिन्द्रनीलद्युतिरम्बुजाक्षी प्रवादयन्ती [४९]कपिलासयन्त्रम् ।
यत्नैर्विचित्राभरणा सुकेशी सा सिन्धुडा कान्तसमीपसंस्था ॥४८॥

रामकिरिः –☆

स्वर्णप्रभाभासुरभूषणाढ्या [५०]नीलं निचोलं वपुषा वहन्ती ।
कान्ते [५१]पदोपान्तमधिश्रितेऽपि मानोन्नता रामकिरिः प्रदिष्टा ॥४९॥

[५२]पढमञ्जरी –☆

वियोगिनी [५३]कान्तवितीर्णपुष्पस्रजं दधाना वपुषातिमुग्धा ।
आश्वास्यमाना प्रियया च सख्या विधूसराङ्गी पढमञ्जरीयम् ॥५०॥

पा.टि.

---

(४७) म) 'मालंश्रिका' । — (४८) म) 'स्यादिन्द्र'- ।
(४९) भु1 भु2) 'कपितास' । — (५०) भु4) 'मालं' ।
(५१) भु4) 'पदप्रान्ते । — (५२) म) 'पडि' ।
(५३) भु1 भु2) 'विचित्र' । — म) 'वतीर्ण' ।

टि.

☆ गज. संगी.I/164, 166, 169. 173-175. (क्रमशः)

वेलावली—☆

संकेतदीक्षां दयितस्य मत्वा वितन्वती भूषणमंगयष्टेः ।
मुहुः[५४] स्मरन्ती स्मरमिष्टदेवं वेलावली नीलसरोजकान्तिः ॥५१॥

गौडी—☆

शुचिहरिचन्दनपङ्कै रतिसहितं मन्मथं पुरः कृत्वा[५५] ।
गौरतनुर्बहुविधिना गौडी परिपूजयत्येषा ॥५२॥

मेघरागः—☆

पर्यङ्के प्रियया सार्धमासीनमुपवीणयन्[५६] ।
पीताम्बरः सुभूषाढ्यो[५७] मेघरागो घनद्युतिः ॥५३॥

नाटरागः—☆

तुरङ्गमस्कन्धनिबद्धरागः स्वर्णप्रभः शोणितशोणनेत्रः ।
शृंगारभूमौ (संग्रामभूमौ?) विचरन् धृतासिर्नाटोयमुक्तः किल काश्यपेन ॥५४

घण्टारवः— संगीतरत्नमालायाम्—

प्रसरदिभवरस्य[५८] स्कन्धमारूढ उद्य-
त्कनकरुचिरमध्यं धूनयन् शर्वलाग्ग्रम्[५९] ।
प्रदलितरिपुसैन्यो भीमघण्टारवेण
स्फुरितकनककान्तिर्भाति घण्टारवोऽयम् ॥५५॥

पा.टि. :

---

(५४) भु2 भु4) 'मृदुः' ।
(५५) भु4 म) 'पुरस्कृत्य' ।
(५६) म) '-मुपवेशयन्' ।
(५७) भु4) 'सुवेशाढ्यो' ।
(५८) भु1 भु2) '-दिभकरस्य' ।
(५९) भु4) 'सर्वलास्य' म) 'शर्वलाग्रम्' ।

टि.

☆ गज. संगी. I/ 179, 181, 182 & 154 (क्रमशः)

नटनारायणः—☆

स्त्रीवेषधारी पुरुषो नवीनः संगीतशाले भ्रमिमादधानः ।
गायन् सतालं सलयं मनोज्ञः स्यान्नट्टनारायणराग एषः ॥५६॥

भूपतिः– निबन्धान्तरे–

सिंहासनगतः श्वेतचामरद्वयवीजितः ।
मन्त्रिभिर्वेष्टितः श्यामछत्राढ्यो रागभूपतिः ॥५७॥

६०

शंकराभरणः– संगीतरत्नमालायाम्–

६१

व्याघ्रचर्मशकलं पिदधानो भोगिहारवलयांगदभूषः ।
६२
सान्द्रभूतिपरिलिप्तशरीरः शंकराभरण एष उदीतः ॥५८॥

गौडः निबन्धान्तरे – ६३

विधाय शंभुं सुरनिम्नगातटे मुदार्चयन् नीलसरोजसंघैः ।
मनोज्ञमूर्तिर्दधदंशके सिते त्वगासनस्थो द्विज एष गौडः ॥५९॥

देशी–संगीतरत्नमालायाम्–

गजपतिगतिरेणीलोचनेन्दीवराङ्गी
पृथुलतरनितम्बालम्बिवेणीभुजङ्गी ।
तनुतरतनुवल्ली पीतकौसुम्भवासा ६४
इयमुदयति देशी रागिणी चारुहासा ॥६०॥

पा.टि.

(६०) भु1 भु2) 'गीत' । (६१) भु4) 'व्याघ्रधर्मसकलं चपिधानो' ।
(६२) भु4) 'रुदितः' । (६३) भु3) 'सदा'- । म) 'मृदा'- ।
(६४) म) 'वाणिनी' । भु4) 'वाशिनी (वासिनी?)

टि.

☆ तत्रैव -I/187.

६५

धनाशी —☆

दूर्वादलश्यामतनुर्मनोज्ञा कान्तं लिखन्ती फलके विदग्धा ।
६६ ६७ ६८
बाला गलल्लोचनवारिबिन्दुर्निस्यन्दधौतद्युतिहृद्धनाशी ॥६१॥

कोलाहलः —☆

उन्मत्तपुंस्कोकिलवृन्दरम्यनादं स्वरं गायति कृष्णगाथाः ।
वशी सदा सर्वपुरप्रवर्ती कोलाहलोऽयं तरुणोऽसिताङ्गः ॥६२॥

देशाख्यः —☆

आस्फोटनाविष्कृतलोमहर्षो नियुद्धसंनद्धविशालबाहुः ।
प्रांशुः प्रचण्डद्युतिहेमगौरो देशाख्यरागः किल मल्लराजः ॥६३॥

शवरी —

श्रीखण्डशैलशिखरे शिखिबर्हवासा
मातङ्गमौक्तिककृतोत्तमहारयष्टिः ।
आकृष्य चन्दनतरोः शवरी भुजंग-
माबध्नती वलयमुज्ज्वलनीलकान्तिः ॥६४॥

६९ ७०
इयं तु कलांकुरनिबन्धे ।

पाटि.

---

(६५) भु2 भु4 म) 'धनाश्री:' । (६६) म) '-नि:स्पन्द' ।
(६७) भु1 भु2) '-स्तमाहु' । (६८) भु2 भु4 म) '-धनाश्री' ।
(६९) भु1 भु2) 'इदम्' । (७०) भु2) 'कालांकुरनिबन्धे' ।

टि.

☆ गज संगी. I/ 201, 203, 207. (क्रमशः)

मध्यमादिः— चन्द्रिकायाम् –

अतितरुणवयःश्रीः कुन्दकर्पूरकान्ति-
युर्वतिभजनदक्षः क्रौञ्चचाटूक्ति भासः ।
अरुणजलजनेत्रः स्कन्धसंन्यस्तवीणः
स्मितमधुररदाली राजते मध्यमादिः ॥६५॥

मल्लारः –☆

शंखावदातं[७१] पलितं दधानः प्रलम्बकर्णः कुमुदेन्दुवर्णः ।
कौपीनवासाः शुचिहारधारी मल्लारराग: कथितस्तपस्वी ॥६६॥

देशकारिः– नारदसंहितायाम्–

सार्धं सखीभिर्विजने वसन्ती विचित्रवक्षोजनखक्षतानि ।
निरीक्षमाणा मणिदर्पणेषु सा देशकारिः कथिता गुणज्ञैः ॥६७॥

केदारः - चन्द्रिकायाम् – [७२]

चिरप्रवासी जलदावलोकाद् विचिन्तयन्नीलसरोरुहाक्षीम् ।
कामी युवा गीतकलाभिलाषी[७३] केदाररागस्तरुणोऽरुणाभः ॥६८॥

मालवरागः[७४] –☆

नितम्बिनीचुम्बितवक्त्रपद्मः शुकद्युतिः कुण्डलवान् प्रमत्तः ।
संगीतशालां प्रविशन् प्रदोषे मालाधरो मालवराग एषः ॥६९॥

हिन्दोलरागः –☆

नितम्बिनीमन्दतरंगितासु दोलासु खेलासुखमादधानः ।
खर्वः कपोतद्युतिकर्बुरश्रीः हिन्दोलरागः कथितो मुनीन्द्रैः[७५] ॥७०॥

पा.टि.

---

(७१) भु2 भु4) 'गङ्गावदातं' । (७२) भु1 भु2 भु4) 'जलदाद् विलोकाद्' ।
(७३) भु4) 'वीतकलाभिलाषी' । (७४) भु4) 'मालिनी' ।
(७५) भु3) 'मुनीन्द्रैः' इत्यस्मात् परं 'फुत्कारको विस्वरः (पृ447)
इत्यन्तं यावद् ग्रन्थपातः ।

टि.

☆ तत्रैव।/235, 238, 240 (क्रमशः)

गौरी –☆

सरोवरस्थे स्फटिकस्य मण्डपे सरोरुहैः शंकरमर्चयन्ती ।
तानप्रयोगैः प्रतिबद्धगीता गौरीतनुर्नारदभैरवीयम् ॥७१॥

इयमेव नारदभैरवी ।

गुण्डकिरिः –☆ [७६]

रतोत्सुका कान्तपथप्रतीक्षामापादयन्ती मृदुपुष्पतल्पे ।
इतस्ततः प्रेरितदृष्टिरार्ता श्यामांगिका गुण्डकिरिः प्रदिष्टा ॥७२॥

गान्धारः –☆

जटां दधानः कृत भूतिभूषः कषायवासा स्तनुदेहयष्टिः ।
सयोगपट्टः कृतनेत्रमुद्रो गान्धारराग: कथितस्तपस्वी ॥७३॥

[७७] मेघरञ्जी– निबन्धान्तरे–

श्रुतौ दधाना नवकर्णिकारमारामगा केसरपुष्पकाञ्ची ।
अध्यापयन्ती स्वकरस्थसारीं श्रीरामरामेति च [७८] मेघरञ्जी ॥७४॥

शेषा रागा: संगीतनारायणादिषु ज्ञेयाः । एषां रागाणामन्योन्यसंसर्गात् संकीर्णा भवन्ति ।

पौरवी –☆

देशाख्यायश्चाथ मल्लारिकाया:
स्यादंशाभ्यां पौरवीयं प्रदिष्टा ।

कल्याणी –☆

वराट्य (ड्या ?)ख्यानाटकर्णाटकेभ्यः
संभूतेयं मंजुकल्याणिकाख्या ॥७५॥

पा.टि..

(७६) भु2) 'पथि' । (७७) भु4) 'मेघरञ्जी' । (७८) भु4) 'मेघरञ्जी' ।

टि. ____

☆ गज. संगी.1/242, 246, 256, 262 & 263 (क्रमशः)

सारङ्गी —☆

“सारङ्गी स्यात् तोडि धन्नाशिकाभ्यां[७९]

[गौरी]-- श्रीरागात्स्याद् गौडरागाच्च[८०] गौरी ।”

नट्टमल्लारिका—☆

“जाता नाटस्याथ मल्लारकस्य
स्यादंशाभ्यां नट्टमल्लारिका च ॥”७६॥

वल्लवी--☆

“देशाख्याशाबरीयोगाद्वल्लवी परिकीर्तिता ।”

मुखावरी--☆

“सैन्धवीतोडिकायोगात् समुत्पन्ना मुखावरी ॥”७७॥

कर्णाटिका--☆

“कर्णाटतो[८१] भैरवतोंऽशकाभ्यां
कर्णाटिकाख्या गदिता सकम्पा ॥”७८॥

आशावरी--☆

“मल्लारीसैन्धवीतोडीयोगादाशावरी भवेत् ।”

रामकेरिः--☆

“गुज्जरीदेशिकासंगाद् रामकेरिरजायत ॥”७९॥

● अन्येऽपि सन्ति भूयांसो रागाः संकीर्णलक्षणाः ।
ये ये यथा श्रुता देशे ज्ञेयास्ते ते तथा बुधैः ॥८०॥
देशे देशे भिन्ननाम्नां रागाणां तत्त्वनिर्णयम् ।
कोऽपिकर्तुं न शक्नोति निरणायि[८२] न तन्मया ॥८१॥

पाटि.

---

(७९) भु 'धनाश्रि-' । (८०) म) 'श्रीरागः' । (८१) म) 'कर्णाटिकात्' ।
(८२) भु4) 'निरलायिन' । म) 'निर्णयं नानि' ।

टि.

☆ द्र. गज. संगी.।/265-270 ● तत्रैव.।/275.

अथ रागाणां गानकालमाह संगीतकौमुद्याम् –

८३

''श्रीपञ्चम्याः समारभ्य विष्णोः शयनमेव च ।
तावद्वसन्तो गीयेत प्रभाते भैरवादिकम् ॥८२॥
मध्याह्ने तु वराड्यादेः सायं कर्णाटनाट्योः ।
श्रीरागमालवादेस्तु गाने दोषो न विद्यते ।''८३॥
☆ ''इन्द्रपूजां समासाद्य यावद् गिरिसुतार्चनम् ।
तावदेव समुद्दिष्टं गानं वै मालवश्रियः ॥८४॥
☆ एवं तु बहुधाचार्यैर्गाने कालः समीरितः ।
यस्मिन् देशे यथा शिष्टैर्गीतं विज्ञस्तथाचरेत् ॥''८५॥

अकालगाने दोषमाह --☆

८४

''समयोल्लंघने गानं सर्वनाशकरं ध्रुवम् ।''

[अपवादमाह] --☆

८५

''श्रेणीबन्धे नृपाज्ञायां रङ्गभूमौ न दोषकम् ॥''८६॥

संगीतकौमुद्याम्--

''आज्ञया भूमिपादीनां रंगभूमौ विशेषतः ।
सर्वेषामेव रागाणां न गाने कालनिर्णयः ॥''८७॥

८६

दोषपरिहारमाह – कोहलीये --

''लाभाल्लोभाच्च ये केचिद् गायन्ति च विरागतः ।
सुरसा गुज्जरी तेषां दोषान् हन्तीति कथ्यते ॥''८८॥

पाटि.

(८३) भु4 म) 'श्रीपचमीं' ।

(८५) भु 1 म) 'दोषजम्' ।

(८४) भु4) 'समयोल्लंघने' इत्यस्मादारभ्य 'दोषपरिहारमाह' (पृ447) इत्यन्तं यावत् ग्रन्थपातः ।

(८६) भु1 भु2) 'कोलाहलीये' ।

टि.

☆ तत्रैव.I/296-298

अथ गायकः – तदुक्तम् –☆

"शिक्षाकारोऽनुकारश्च रसिको रञ्जकस्तथा ।
भावुकश्चेति गीतज्ञाः पंचधागायकं जगुः ॥८९॥
८७
अन्यूनशिक्षणे दक्षः शिक्षाकारो मतः सताम् ।
अनुकार इति प्रोक्तः परभंग्यनुकारकः ॥९०॥
रसाविष्टस्तु रसिको रञ्जकः श्रोतृरंजकः ।
८८
गीतस्यातिशयाधानाद् भावुकः परिकीर्तितः ॥९१॥
एक एव तु यो गायेदसावेकलगायकः ।
८९
सद्वितीयस्तु यमलः सवृन्दो वृन्दगायकः ॥"९२॥

अथ गायकदोषमाह--☆

"भीतोऽव्यक्तपदः शिरोविचलितः फूत्कारको विस्वरः ।
स्यात् संदष्टरदो निमीलनयनो ग्रामाव्यवस्थस्तथा ।
९०
गायन् वक्रगलः स्वराल्पबहुलः स्याद्रागसंमिश्रकः
कंपाङ्गोऽनवधानको विरसकृत् काकस्वरः सत्वरः ॥९३

पा.टि...

(८७) म) 'तन्नून-' ।
(८८) भु1) '-स्यातिशयाधीनो' । भु2) '-सातिशयाधीनो' ।
(८९) भु4) सद्विदीयस्तु यमलः सवृन्दो वृन्दगायकः' इति न वर्तते ।
(९०) म) 'निमीलनयने' । (९१) भु2) 'वक्त्र' ।

टि. ---

☆ द्र. तत्रैव 1/532-36.

किं च --☆ ९२

वितालको गीततनु:प्रकाशकः
करालकः छागलकोऽव्यवस्थितः ।
९३
उत्फुल्लगण्डस्त्वनुनासिकः स्या-
देवं हि दुष्टः किल गायनः स्यात् ॥९४॥

अथ तालाङ्गपरिभाषा -- 'मस्त्रिगुरुस्त्रिलघुश्च नकार' इत्यादि ।

● ''गुरुरेको गकारश्च लकारो लघुरेककः ।
९४
प्लुतः पकार इत्येव दो द्रुतश्च प्रकीर्तितः ॥९५॥
अनुद्रुतो द्रुतश्चैव लघुर्गुरुरतः परम् ।
प्लुतश्चैव क्रमेणैव तालाङ्गानि च पञ्चधा ॥''९६॥

अथैषां विन्यासप्रकारः --▲

''तिर्यग्रेखानुद्रुताङ्गं शून्याकारं द्रुतं स्मृतम् ।
लघु ऋज्वल्पिका रेखा रेखाधोवक्रिता गुरुः ॥९७॥
९५ ●●
प्लुतं गुरोर्मूर्ध्निरेखा तिर्यग् तद्दक्षपार्श्वगा ।''

पा.टि.

(९२) भु3) 'गीततनुप्रकाशकः'। म) 'गीततनू प्रकाशकः' ।
(९३) भु4) 'नासिकी' । (९४) भु4) 'नो' । (९५) म) 'दक्षिणपार्श्वगा' ।

टि.

☆ द्र. गज. संगी.I/537. ● द्र. तत्रैवI/382-3 ▲ द्र. गज. संगी.I/386.

●● मातृकासु ग्रन्थेन सह रागस्य संकेता अपि सूचीताः सन्ति । संकेतसूचनमेतत् प्रायः मातृकालेखकानां संयोजनं स्यादिति अस्माभिः तर्क्यते । तस्मात् ते संकेताः सर्वे पादटिप्पण्यां संयोजिताः सन्ति ।

अथ तालघातस्थानमाह– ☆

"द्रुताश्रयं तु कथितं चतुरंगुलमुच्छ्रितम्[९६] ॥९८॥
लघुरष्टांगुल:[९७] प्राक्तो गुरु: स्यात् षोडशांगुल: ।
प्लुतस्त्वष्टांगुलश्चानुद्रुत: किंचित्करक्रिया ॥"९९॥

तालशब्दव्युत्पत्तिमाह–

तलयत्येष संगीतं यत्तत्तालो निगद्यते ।

तलयति प्रतिष्ठापयति' इति ताल: । तल् प्रतिष्ठायामिति धातो: ।

संगीतसारे-तु–

तकार ईशो गिरिजा लकार-
स्तालस्तत: स्यात् शिवशक्तियोगात् ॥१००॥

संगीतरत्नमालायाम्–

तकार: शरजन्मा स्यादकारो विष्णुरुच्यते ।
लकारो मारुत: प्रोक्तस्ताले देवा वसन्त्यमी ॥१०१॥

अथ तालानाह- संगीतकौमुद्याम्-

ताले कुड्डुक[९८]नाम्नि स्याद् द्रुतद्वन्द्वाल्लघुद्वयम्[९९] ।

यथा – "जय जनरञ्जन दनुसुतभञ्जन!" इत्येवम् ।

आदिताले लघु: प्रोक्तो द्रुतत्रयमपीष्यते[१००] ॥१०२॥

यथा - 'कमलाकुचभरविमलाम्बरहर[१०१] ! इति ।

पा.टि.

---

(९६) भु4 म) '-मुज्झितम्' । (९७) भु1 भु2) 'ष्टादशाङ्गुल' ।

(९८) भु1) 'कुभुक्' ! भु2) 'कुभुक्क' । म) 'कुडुक' ।

(९९) भु1 म) 'द्वयम्' इत्यस्मात् परं 'यथा' इत्यस्मात् पूर्वं च '00।। ' इति तालसंकेतो दृश्यते ।

(१००) भु1 भु3 म) 'पीष्यते' इत्यस्मात् परं 'यथा' इत्यस्मात् पूर्वं च '1000 ' इति तालसंकेतो दृश्यते । (१०१) भु2) 'कुचघरविमला' ।

टि.

☆ तत्रैव 1/387.

१०२

एकताली द्रुतेन च ।

यथा – गोपीनन्दित ! सुरनरवन्दित !’ इति ।

१०३ १०४

लघुद्वन्दाद् द्रुतद्वन्द्वं यतिताले प्रकीर्तितम् ॥१०३॥

१०५

यथा – ‘आ आ श्यामसुन्दर ! धृतमन्दर ।’ इति ।

१०६

त्रिपुटाक्षे तु ताले स्यात् सविरामं द्रुतत्रयम् ।

यथा – ‘कमललोचन ! दुरितमोचन !’ इति । १०७

निर्विरामं द्रुतद्वन्द्वं लघुना झम्पको मतः ॥१०४॥

यथा – ‘नमो भुवनमण्डन दनुजबलखण्डन’ इति ।

१०८

सविरामं द्रुतद्वन्द्वं लघुः स्याद्द्रुतालके ।

यथा –✩ [यदुमणे ! कुरु कृपां मयीश्वर सदा’ इति ।]

पा.टि.

---

(१०२) भु1 भु3 म) ‘द्रुतेन च’ इत्यस्मात्परं ‘यथा’ इत्यस्मात्पूर्वं च ‘0 ’ इति ।
(१०३) भु1) ‘यत्रि’ । भु2) ‘यत्र’ । (१०५) भु1 भु2) ‘विधुत’ इति ।
(१०४) भु3 भु3) ‘प्रकीर्तितम्’ इत्यस्मात्परं ‘यथा’ इत्यस्मात्पूर्वं च ‘।।00 ’इति ।
(१०६) भु1 भु3 म). ‘द्रुतत्रयम्’ इत्यस्मात्परं ‘यथा’ इत्यस्मात्पूर्वं च ‘00। ’ इति ।
(१०७) भु1 भु3 म) ‘मतः’ इत्यस्मात् परं ‘यथा’ इत्यस्मात्पूर्वं च ‘00। ’ इति ।
(१०८) भु1 भु3 म) ‘तालके’ इत्यस्मात्परं ‘यथा’ इत्यस्मात् पूर्वं च ‘-00। ’ इति ।

टि.

✩ यद्यपि उपलभ्यमानासु मातृकासु ‘यथा-’ इति दृश्यते तथापि तासुकुत्रापिउदाहरणं नोपलभ्यते । किरणोयं संगीतनारायणं प्रायः अनुसरति इत्यतः तदुदाहरणं संयोजितमास्ते ।

उपाद्रुताल एकेन द्रुतेन परिकल्पितः[१०९] ॥१०५॥

यथा – नमो नन्दनन्दनम्' इति ।

सविरामद्रुतद्वन्द्वान्निःसारौ तु लघुद्वयम्[११०] ।

यथा – 'जय सुरनरकिंनरेश ! लीलाधृतगोपवेश ! इति ।

सगणाल्लघवोशब्दाश्चत्वारो मण्ठके[१११] पुनः[११२] ॥१०६॥

यथा – 'जय कंसासुरनृशंस करसरसिजकलितवंश' इति ।

रूपकाख्ये तु ताले स्यात् सविरामद्रुतद्वयम्[११३] ।

यथा – [११४]'सुरनरकिंनरेश ! लीलाधृतगोपवेश ! इति ।

एते ताला भुवि ख्याताः स्वर्गे चञ्चत्पुटादयः ॥१०७॥

एकोत्तरं शतं ताला ग्रन्थविस्तरभीत्या नोक्ताः । [११५]अत्र संगीतप्रकरणे वाद्यनिरूपणादौ पुस्तकान्तरस्य वैशिष्ट्यात् तल्लिख्यते ।

अथ वाद्यम् –

न वाद्येन विना यस्माद् गीतं तालं च शोभते ।

तस्मान्मांगल्यमस्माभिः[११६] वाद्यमत्र निगद्यते ॥१०८॥

पा.टि...

(१०९) भु1 भु3 म) - 'कल्पितः' इत्यस्मात्परं 'यथा' इत्यस्मात्पूर्वं च'0 ' इति ।

(११०).भु1 भु3 म) '-द्वयम्' इत्यस्मात्परं 'यथा' इत्यस्मात्पूर्वं च '-00।। ' इति ।

(१११) म) 'मस्तके' ।

(११२) भु3 म) 'पुनः' इत्यस्मात् पूर्वं 'यथा' इत्यस्मात् पूर्वं च। S । इति ।

(११३) भु2) '-द्वयम्' इत्यस्मात् परं 'यथा' इत्यस्मात् पूर्वं च '-00 ' इति ।

(११४) भु2) जय सुरनरकिंनरेश' ।(११५) भु भु4 म) अत्र...तल्लिख्यते ।' इति नास्ति ।

(११६) भु3) '-मस्माभि'- इत्यस्मात्परं 'नातिदीर्घा' (पृ455) इत्यस्मात्पूर्वं च ग्रन्थपातः

टि. ---

☆ द्र. जग. संगी.I/399 ☆ तत्रैव I/401 ☆ तत्रैव.II/1.

ततमानद्धसुषिरघनानि' इति चतुर्विधानि । एतेषां नामधेयममरकोषे –☆

तंतं वीणादिकं वाद्यमानद्धं मुरजादिकम् ।
वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ॥१०९॥

तत्र ततवाद्यमाह –☆☆

आलावणी ब्रह्मवीणा किंनरी लघुकिंनरी ।
विपञ्ची वल्लकी ज्येष्ठा चित्रा घोषवती जया ॥११०॥

अथानद्धम् –●

मर्दलो मुरजश्चैव ढक्कापटहचांगवः ।
पणवः कुण्डली भेरी घटवाद्यं च झर्झरः ॥१११॥

सुषिरवाद्यम् –●●

वंशोऽथ पारीमधुरीतित्तिरीशंखकाहलाः ।

घनवाद्यम् –▲

करतालः कांस्यतालो जयघण्टोऽथ शक्तिकः ॥११२॥

११७

ग्रन्थविस्तरभीत्या यस्य वाद्यस्य यत्स्वरूपं, तन्नोक्तम् । तत् संगीतनारायणादिषु विज्ञेयम् ।

किं च –▲▲

ततं वाद्यं च देवानां गन्धर्वाणां च सौषिरम् ।
आनद्धं राक्षसानां च मानवानां घनं विदुः ॥११३॥

अथ नृत्यमाह –✦

नर्तनं त्रिविधं नाट्यं नृत्यं नृत्तमिति क्रमात् ।

तत्र नाट्यं यथा –✦✦

योऽयं स्वभावो लोकस्य नानावस्थान्तरात्मकः ॥११४॥
सोऽङ्गाभिनयनैर्युक्तो नाट्यमित्युच्यते बुधैः ।

पा.टि...

(११७) भु1 भु4) 'यत्स्वरूपनिर्णयं तन्नोक्तं' भु2) 'यत्स्वरूपं तन्निर्णयं नोक्तम्' ।

टि.

☆ द्र अम. अ.को.I/4.4. ☆☆ गज. संगीत.II/3. ● तत्रैव II/ 80
●● तत्रैव II/ 100 ▲ तत्रैव.II/ 121.
▲▲ तत्रैव II/131. ✦ तत्रैवIII/3. ✦✦ तत्रैवIII/4.

अथ नृत्यम् –☆

देशरीत्या प्रतीतो यस्तालमानलयाश्रितः ॥११५॥
सविलासांगविक्षेपो नृत्यमित्युच्यते बुधैः ।

विलासो यथा –११८☆

नायकालोकनादौ तु विशेषो हि क्रियासु यः ॥११६॥
शृङ्गारचेष्टासहितो विलासः स निगद्यते ।

नृत्तमाह –☆

गात्रविक्षेपमात्रं तु सर्वाभिनयवर्जितम् ॥११७॥
आंगिकोक्तप्रकारेण नृत्तं नृत्यविदो विदुः ।

अथ लास्यमाह –☆

लास्यं तु सुकुमाराङ्गं मकरध्वजवर्धनम् ॥११८॥

११९

एतच्च स्फुरितं यौवतमिति द्विविधम् ।

तत्र स्फुरितलास्यमाह –☆

१२०

यत्राद्येऽभिनवैर्भावै रसैराश्लेषचुम्बनैः ।
नायिकानायकौ यत्र नृत्यतः स्फुरितं हि तत् ॥११९॥

यौवतलास्यमाह –☆ १२१

मधुराबद्धलीलाभिर्नटीभिर्यत्र नृत्यते ।
वशीकरणविद्याभं तल्लास्यं यौवतं मतम् ॥१२०॥

नारदसंहितायां तु –

पुंनृत्यं ताण्डवं प्रोक्तं स्त्रीनृत्यं लास्यमुच्यते ॥

पा.टि.……………………………………

(११८) भु4 म) 'नायिका' । (११९) भु4 म) 'यौवनं' ।
(१२०) भु1 भु2 म) 'भिनयै' । (१२१) भु2) 'लीलाभनटी' ।

टि.

☆ तत्रैव.III/5, 6, 7, 26, 27. (क्रमशः)

अथ सभानिवेशनम्—☆ १२३

''शालायाः पूर्वदिग्भागे कारयेन् नृपमण्डपम् ।
सर्वोपकरणैर्युक्तो वसेत् तत्र महीपतिः ॥''१२१॥

महीपतिरिति नायकमात्रोपलक्षणम् ।

● ''विशेषज्ञस्तूर्यत्रितयनिपुणज्ञोऽभिनयवि-
द्रसालंकारज्ञः सकलगुणदोषैकनिकषः ।
पराभिप्रायज्ञो यशसि बहुमाने धृतरुचिः
क्षमी दाता वीरो जगति गदितो नायक इति ॥''१२२॥

पुरो भूपस्य विप्राश्च मण्डपस्य च दक्षिणे ।
अमात्या राजपुत्राश्च उत्तरां भित्तिमाश्रिताः ॥१२३॥
पुरोभागे नरपतेर्वेश्याः स्युर्भित्तिमाश्रिताः ।

१२३

वन्दिनः कवयोऽत्रैव कलानाट्यविदोऽपि ये ॥''१२४॥

▲ नाट्यनाम्नो (धाम्नो ?) बहिर्योधमुख्यास्तिष्ठन्ति शस्त्रिणः
राज्ञोऽङ्गरक्षा तैः कार्या यावन्नाटकदर्शनम् ॥''१२५॥

अथ सभासदः --

''मध्यस्थाः सावधानाश्च वाग्मिनो न्यायवेदिनः ।

१२४

अगर्वा रसभावज्ञा तौर्यत्रितयकोविदाः ॥१२६॥
त्रुटितात्रुटिताभिज्ञा असदादिनिषेधकाः ।
सानन्दरसभावज्ञा गुणिनः स्युः सभासदः ॥''१२७॥

पा.टि.

(१२२) म) 'कारयेन्नट' । (१२३) म) 'विदा' । (१२४) भु4) 'त्रितयवेदिनः' ।

टि.

☆ गज. संगी.III/50, ● गज. संगी.III/56 ▲ गज. संगी.III/53-55.

अथ नृत्यग्राह्यस्त्रियः—☆

[१२५]“नातिदीर्घा न खर्वा च सुपक्ष्मा च सुलोचना ।
सर्वाङ्गसुभगा चारुनितम्बजघनस्तना ॥’१२८॥
“लयमानसमायुक्ता यतितालग्रहोत्तमा ।
कन्या सरभसा [१२६]पुण्या नर्तकी समुदाहृता ॥”१२९॥

अथ नृत्यवर्ज्याः—☆

“अत्युच्चा वामना स्थूला कृशाङ्गी दन्तुरालसा ।
नीचस्तनोरुजघना पीताक्षी नृत्यवर्जिता ॥”१३०॥

अथाभिनयः—☆

“नर्तनेऽभिनयो मुख्यः सोऽवस्थानुकृतिर्भवेत् ।
आहार्यश्चांगिकश्चैव वाचिकः सात्त्विकस्तथा ॥”१३१॥
एवं चतुर्विधः । एतल्लक्षणं संगीतनारायणादिषु ज्ञेयम् ।

अथ नाट्यसमयः—☆

[१२७]“याममात्रसमाप्यं यत्तन्नाट्यं रागवर्धनम् ।
दीर्घं विरागजनकमतो नाट्यं विवर्जयेत् ॥
निद्रया पीडितांगानां रसोद्बोधो न जायते ॥”१३२॥

ग्रन्थबाहुल्यभीत्या संगीतलक्षणमति[१२८]संक्षिप्तमुक्तम् ।

[१२९]हे राधिकाकृष्ण तव प्रसादादयं प्रबन्धः सुखदो मयोक्तः ।
भवत्वनेकेषु च पण्डितेषु सदादृतो लोकसुखं ददातु ॥१३३॥

पा.टि.

---

(१२५) भु3) ‘नातिदीर्घा’ इत्यस्मात्परं पुनरियं भु3 मातृका दृश्यते ।
(१२६) भु3 भु4 म) ‘गुण्या’ । (१२७) भु2 भु4 म) ‘याममात्रं समाप्यं’ ।
(१२८) भु1 भु2 भु4 म) ‘संक्षेपमुक्तम्’ । (१२९) भु2) ‘इह’ ।

टि.

☆ गज. संगी. III/ 67-69, 90, 249 & 250 (क्रमशः)

१३०
मुदा सद्ग्रन्थाब्धेर्विमलकविचिन्तामणिरसौ
गुणात्यन्तासक्तः कविवचनशाणोत्थितरुचिः ।
मयोनीतो लब्ध्वा सुजनकरुणानावमनिशं
सदा विद्वत्कण्ठाभरणवरशोभां जनयतु ॥१३४॥
यावद्विष्टपरक्षणं च कुरुते विष्णुर्मुदा माधवो
१३१ १३२
यावज्जह्नुसुतासुधाकरकले भूतेशमूर्ध्नि स्थिते ।
१३३
यावत् पद्मभुवो मुखेषु विदिता वेदा जगत्कारणं
१३४ १३५
तावत् काव्यकृतां प्रसन्नहृदयं ग्रन्थोऽयमालिंगतु ॥१३५॥
१३६
ग्रन्थोऽयं रसगर्भवाक्यमधुरः पीयूषसारोपमो
लोकानां बहुगद्यपद्यविसरद्बुद्धिप्रदस्तत्क्षणात् ।
१३७
नानाकाव्यकलाविलासचतुराभीकालिकण्ठस्थितः
१३८ १३९
सत्काव्योचितवर्णनागुणयुतः सौख्यप्रदो राजतु ॥१३६॥

पा.टि.

(१३०) भु2) 'सदा' । (१३१) भु1 भु2 भु4 म) 'काला' ।
(१३२) भु1 भु2 भु4 म) 'स्थिता' । (१३३) भु1 भु2) 'णास्तावत्' । भु4) 'काव्याकर' ।
(१३४) भु1 भु2 भु4 म) 'काव्यकर' ।
(१३५) भु3) '-मालङ्गितु' इत्यस्मात्परं 'ग्रन्थोऽयम्' इत्यस्मात्पूर्वं च-
"प्रसन्नहृदयमि 'त्यत्र 'मनः सुविमलमि' त्येव युक्तम् । यथाश्रुते तु विधेयाविमर्षदोषापत्तिः ।" इति अधिकं दृश्यते ।
(१३६) भु3) 'पीयूषधारो' । (१३८) भु1 भु2) 'दिसहितः' ।
(१३७) भु1 भु2) 'र्भकालि' । म) 'र्भिङ्गालि' ।
(१३९) भु3) 'राजतु' इत्यस्मात् परं 'श्रीमद्' इत्यस्मात् पूर्वं च-
"नानाकाव्यकलाविलासचतुराश्च तेऽभीकाः कामुकाश्चेति कर्मधारयः । तेषामालिः श्रेणिस्तस्याः कण्ठस्थितिः सन् राजतु इत्यन्वयः ।" इति अधिकं दृश्यते ।

श्रीमद्गंगान्ववायप्रवरजलधिजः[१४०] सत्कलामण्डिताङ्गः
साहित्यादिप्रमोदामृतभरिततनू राजते भूपचन्द्रः ।
सत्कारैः प्रीतियुक्तैः कविजनकुमुदामोददाता[१४१] प्रसन्नो
दुःखध्वान्तस्य भेत्ता[१४२] प्रचुरगुणवतां[१४३] श्रीजगन्नाथनामा[१४४] ॥१३७॥

आयुर्वेदसुधासमुद्रविलसत्सत्कर्णधारो महान्
धर्मज्ञानविवेकभूषणधरो[१४५] विद्यारसज्ञः सदा ।
श्रीमद्राजसभासु[१४६] युक्तवचनव्यापारपारंगमः
वाद्याढ्यं[१४७] कविभूषणं जनितवान् श्रीवासुदेवः[१४८] कविः ॥१३८॥

पा.टि...

(१४०) भु3) 'गंगाधिवंशप्रचुरजलधिजः' । (१४१) भु1) 'दायी' । भु2) 'दार्य' । (१४२) भु3) 'हन्ता' । (१४३) भु1 भु2 भु4) 'प्रवरधिगुणिनां' । म) 'प्रभुरधिगुणिनां' । (१४४) भु3 भु4 म) 'नाम्ना' इत्यस्मात्परम् 'आयुर्वेद'- इत्यस्मात्पूर्वं च- अन्ववायप्रवर एव जलधिस्तज्जः । प्रचुराश्च ते गुणवन्तश्चेति कर्मधारयः । न तु प्रचुर पदगुणपदयोः कर्मधारयोत्तरं मतुप् । न कर्मधारयोन्मत्वर्थीय इत्युत्सर्गतो निषेधात् ।

धर्मज्ञो ज्ञानशीलः सुगुणगणमतिर्वैद्यशास्त्रानुरक्तो
धीरो दक्षो विवेकी सततजनमनः प्रीतियुक्तो रसज्ञः ।
श्रीमत्क्ष्माभृत्सभेषूचितवचनपटुः काव्यकर्ता दयाढ्यो
नित्यं साधुः सुशीलो द्विजगुरुदयया पात्रकं वासुपात्रः ॥

दयापात्रमेव दयापात्रकं, स्वार्थे कः नियतलिङ्गता च । वासुपात्र वासुदेवपात्रः तन्नामा । भीमसेनो भीम इतिवननामैकदेशे नामिन उपस्थितिः ।'' इति अधिकं दृश्यते । परन्तु भु ४ म) इत्यनयोःपाठेतु 'श्रीमत्क्ष्माभृत्सभेषूचितवचनपटुः' 'श्रीमत्क्ष्माभृत्सभायामुचितवचन धीः' इति 'द्विजगुरुदयया पात्रकं' इत्यत्र द्विजगुरुषु दयापात्रको ॥ इति च दृश्येते ।(१४५) भु1 भु2) 'पगे' । (१४६) भु1 भु2 भु4 म) 'सभानियुक्तवचन' । (१४७) भु3 भु4 म) शास्त्रज्ञः कविभूषणस्य जनकः सन् वासुदेवसुधीः । (१४८) भु3) 'सुधीः' इत्यस्मात्परम् 'इति' इत्यस्मात्पूर्वं च -

इति श्रीमत्खिमुण्डिमहाराज्येश्वर-गङ्गवंशावतंस-वीरश्रीगजपति-जगन्नाथ नारायणदेवमहाराज-विद्वत्सभाराजित-प्रबन्धकविताप्रकाशक-करणकुलसंभव- कविभिषग्वर-वासुदेवपात्रतनय- श्रीमद्गोपीनाथ[१४९]कविभूषणकृतौ[१५०] कविचिन्तामणौ संगीतनिरूपणं नाम पञ्च[१५१]विंशतितमः किरणः[१५२] । [१५३]

समाप्तश्चायं ग्रन्थः । श्रीः ।

पा.टि

"ग्रन्थेऽस्मिन् कविभूषणेन रचिते या या च्युतिः संस्कृते-
यान्यन्यान्यपि दूषणानि बहुशः संशोध्य पद्यान्यपि ।
कृत्वान्यानि सुसज्जितोयमुपमाधृष्णौ निजैः प्राक्तनैः-
गोपीनाथसुधीः कृतेष्टिरयुनक् पद्यैः समग्रेऽपि तु ॥

समग्रे उपमाधृष्णौ उपमाकिरणे कविनानुक्तोदाहरणे इति शेषः, निजैः प्राक्तनैरपि पद्यैरपुनक् युक्तमकरोदित्यन्वयः । अर्थादिमं ग्रन्थम् ।" इति अधिकं दृश्यते । (१४९) भु1 भु2) 'विद्या' ।

(१५०) भु3) 'दीक्षितगोपीनाथ महापात्रपरिशोधितभूयिष्ठे कविचिन्तामणौ' इति ।

(१५१) भु3 भु4 म) 'चतुःविंशतितमः' ।

(१५२) भु3) 'किरणः' इत्यस्मात् परं 'सामबशिवाय नमः' इति दृश्यते ।

(१५३) भु1) 'ग्रन्थः' इत्यस्मात् परं "श्रीराधाकान्तः शरणम् ।

"भीमस्यापि रणे भङ्गो मुनेरपि मतिभ्रमः ।
यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥"

इति अधिकं दृश्यते ।

परिशिष्टम् - १

श्रीगोपीनाथपात्रविरचितेकविचिन्तामणौ
उदाहृतानांपद्यानांगद्यानांच
अकारादिवर्णक्रमानुरोधिनी सूची

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
अकस्मादेव		114
अखिलेषु वि		252
अगस्त्यमुनि	कविकल्पलता	415
अग्रे गीतं स	नीतिशतकम्	15
अङ्गनामङ्गना	कर्णामृतम्	57
अजायत रति		193
अतिखरनिज	शिशुपालवधम् (?)	321
अतिसुरभिर		58, 332
अतुच्छवत्सव	कविकल्पलतां	415
अतुल्यकल्याव्ण		408
अत्रान्तरे किम	मालतीमाधवम्	111
☆ अथ तत्र पाण्डु-	शिशुपालवधम्	46
अथ लक्ष्मणा	शिशुपालवधम्	57
अथ सुललित	कुमारसंभवम्	330
☆ अथ स्तुते	रघुवंशम्	75
अथाग्रे हसता	शिशुपालवधम्,	51
अद्यापि तिष्ठति		261

तारकाचिह्निताः प्रक्षिप्तांशेषु समुपलभ्यन्ते ।

उदाहृतांश:	आकरग्रन्थ:/ग्रन्थकार:	पृष्ठाङ्क:
अद्यापि स्तनशै	हनुमन्नाटकम्	124, 189
अध: कृताम्भो		261
✩ अधरं किल-	नैषधीयचरितम्	383
अधरस्य मधु	आर्यासप्तशती	16, 63
अधरेकरजक्ष		191
अनन्तरत्न	कुमारसंभवम्	243
अनङ्गमङ्गल		172
अनलंकृतोपि	साहित्यदर्पण:	92
✩ अनाकूतैरेव	अनर्घराघवम्	371
अनिशं करवा		265
अनुरागवती	ध्वन्यालोक:	267
अनुनीय चिरमं		170
अनुभवननव	रघुवंशम्	204
अन्तर्गते म	गोपीनाथ:	235
अन्तिकगत	साहत्यिदर्पण:	120
अन्यदेवाङ्ग		219
अन्यासु ताव	विकटनितम्बा	139
✩ अपि तुरग-	रघुवंशम्	215
अपि मां पा	कुवलयानन्दम्	249
अब्जेन त्व	कुवलयानन्दम्	227
अभवत् प्रि	गोपीनाथ:	242
अभ्रंलिहगृ	कविकल्पलता	418
अभ्युन्नतस्त	दशरूपकम्	89
अमुना ननु पार्श्व	कुमारसम्भवम्	333
अमृतदीधिति	नैषधीयचरितम्	57

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
✩ अमृतं सुतनो	रुक्मणीपरिणयम्	388
अमृतोपमि	गोपीनाथः	260
अम्भोबिन्दु	मेघदूतम्	350
अयमुदयति		178
अयं मृगः स	कविकल्पलता	415
अयं रेवाकुञ्जः	रसमञ्जरी	320
अयं स रस	महाभारतम्	264
अयि मयि मा		187
✩ अरालैः स्वाभा	सौन्दर्यलहरी	378
अरे भूपाश्चा	प्रतापरुद्रयशो भूषणम्	133
✩ अलिकुलगंज	गीतगोविन्दम्	379
अलीकप्रसुप्त	गाथासप्तशती	150
अवलम्बस्व	शाकिनीसहकारः	29
अवलोकयतः	गोपीनाथः	215
✩ अविदितसुख		378
अशेषजनता	कविकल्पलता	418
अश्रीके न च		16
असह्यवातो	ऋतुसंहारम्	334
असंभृतं म	कुमारसंभवम्	107
असंशयं क्षत्र	अभिज्ञानशाकुन्तलम्	136
असावुदेति		263
असूत सद्यः	कुमारसंभवम्	309, 321
✩ असौ नासा-	सौन्दर्यलहरी	382
अस्त्युत्तरस्यां	कुमारसंभवम्	30
अस्माकं सखि	शृङ्गारतिलकम्	80, 95
✩ अस्याः सप	नैषधीयचरितम्	376

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
अस्याः सर्ग	अभिज्ञानशाकुन्तलम् (?)	219
अहमेव मतो	रघुवंशम्	84
✿ अहो तपः कल्प	नैषधीयचरितम्	377
आ आ श्याम्	संगीतकौमुदी	450
आकम्पयन्	ऋतुसंहारम्	356
आकाशान्तर	कविकल्पलता	417
आघ्रातं परि		251
आज्ञप्तं किल	रसमञ्जरी	108
आदीप्तवह्नि	ऋतुसंहारम्	312
आद्यं निशा	कविकल्पलता	420
आनन्दमम	काव्यालंकारः	233
आनन्दितस्व		192
आनीयनीर	रसमञ्जरी	81
आनेतुं नर	प्रतापरुद्रयशोभूषणम्	129
आपादसुख		171
आभासः कि	शृङ्गारशतकम्	319
आमीलिताल	साहित्यदर्पणः	264
आयातः कुमु	रसमञ्जरी	81
✿ आयान्त्या नव	दीक्षितगोपीनाथ महापात्रः	386
आयुर्वेदसुधा	गोपीनाथः	457
आरोग्यं भास्क-		31
आलीभिः स	गोपीनाथः	324
आवर्त एव		192
आवासो विपि	गीतगोविन्दम्	62, 210
आशीः परम्परा		183
आश्लिष्टभू	शिशुपालवधम्	132

उदाहृतांश:	आकरग्रन्थ:/ग्रन्थकार:	पृष्ठाङ्क:
☆ आश्लेषादनु	गीतगोविन्दम्	99
आसन्नेऽपि	प्रतापरुद्रयशोभूषणम्	176
आसीन्मुकुलि		193
☆ आस्यं पद्मेन	दीक्षितगोपीनाथ महापात्र	375,378,383,385
आहरन्त्यो	गोपीनाथ:	242
आहवे निघ्न		158
आहुतस्याभि	महानाटकम्	85
इति गदित	शिशुपालवधम्	103
☆ इतो गता वा	दीक्षितगोपीनाथमहापात्र:	380
इदमपास्य	शिशुपालवधम्	317
☆ इन्दीवरेण	शृंगारतिलकम्	383
इन्दुर्विभाति		187
☆ इन्द्रनीलमणि	दीक्षितगोपीनाथमहापात्र:	380
इयं सुरतर		121
☆ इह जगति		99
ईदृशैश्चरितै		262
उच्चरद्भूरि		227
उच्चित्य प्र	शिशुपालवधम् (?)	247
उटजेभ्यो व्र		167
उत्क्षिप्तं क		97
उत्तिष्ठ दूति	दशरूपकम्	101
उदेतिसवि		196
उद्दामविस्फु	कविकल्पलता	419
उन्नतं पद	काव्यप्रकाश	224
उन्मीलन्ति क	कुवलयानन्दम्	222
उन्मीलन्मधु	गीतगोविन्दम्	201

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
उपकृतं बहु	शब्दशक्तिप्रकाशिका	69
✿ उपगच्छन्ति	दीक्षितगोपीनाथमहापात्रः	342
✿ उपर्युपरि	दीक्षितगोपीनाथमहापात्रः	384
✿ उरोभुवि न		107, 371
उल्लसत्तुहि		413
✿ उल्लसति वेणि	दीक्षितगोपीनाथमहापात्रः	374
उषसि च ग	रघुवंशम्	317
उषाप्रीत्यै प	कविकल्पलता	419
✿ एक एव		350
एकत्रासन	अमरुकशतकम्	92
एकावयव	ध्वन्यालोकः	72
एतद्वल्लीस	भृङ्गदूतम् (गोपीनाथः)	331
एवमुक्तो म		188
एवं वादिनि	कुमारसंभवम्	134, 165
एषा न जात		20
औन्नत्यं मह	प्रतापरुद्रयशोभूषणम्	175
कः समर्थो	गोपीनाथः	231
कः स्वर्गाधि		206
कः स्वर्धुनि		228
✿ कचभारात्		374
कचाः कलि		244
कटिस्ते हर		182
✿ कण्ठः किमस्याः	नैषधीयचरितम्	389
कथमीक्षे कु	साहित्यदर्पण	144, 146
कथमुपरि क	साहित्यदर्पणः	219
कदाचिच्चार	कविकल्पलता	416

उदाहृतांश:	आकरग्रन्थ:/ग्रन्थकार:	पृष्ठाङ्क:
कन्दर्प भूपस्य	गोपीनाथ:	336
कन्दर्पराजो	गोपीनाथ:	313
कमललोचन	संगीतकौमुदी	450
कमलवनचि	ऋतुसंहारम	340, 341
कमलाकुच	संगीतकौमुदी	456
कमले चर		183
करचलनवि	गोपीनाथ:	327
करमुदयमही	साहत्यिदर्पण:	123, 378
कर्णेषु योज्यं	ऋतुसंहारम्	315, 316
कर्पूरधूलिर	चाटुकारसंग्रह:	30
कर्पूरपूरछ	कविकल्पलता	416
कलयति कु		223
कलाकरो व-	गोपीनाथ:	224
कल्पादिका	कविकल्पलता	412
कल्पान्तका	कविकल्पलता	412
कवि: करोति		15
कविता वनि		17
कविना च वि		235
कस्तूरिका च	गोपीनाथ:	256
कस्तूरी जाय	कविकल्पलता	416
काकतिपुरंध्र:	प्रतापरुद्रयशोभूषणम्	126
का काली का		256
काचित् कान्ता	गोपीनाथ:	322
काचिद् वधू:	गोपीनाथ:	323
काचिन्मुग्धा	गोपीनाथ:	361
काचिन्मुरारे	छन्दोमञ्जरी	53

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
काठिन्यं कुच		249
कातार्थ्यं यातु		181
कान्तसंगसु		345
कान्ताकलाप	गोपीनाथः	305
कान्ताङ्गसंग	गोपीनाथः	304
कान्ताजनेन	शिशुपालवधम्	362
कान्तामणिर्य	गोपीनाथः	252
कान्तामुखं	गोपीनाथः	210
कान्तायाः कु	गोपीनाथः	327
कान्तायाः प्रा	गोपीनाथः	248
कान्ता वसन्तसमये त	गोपीनाथ	139
कान्ता वसन्तसमये नि	गोपीनाथ	319
कान्ते कज्जलरे	गोपीनाथ	235
कान्ते कामकला	गोपीनाथ	109
कान्ते तथा	शृङ्गारतिलकम्	88
कान्ते त्वत्का	गोपीनाथः	241
कान्ते त्वत्त	गोपीनाथः	253
कान्ते बाल	गोपीनाथः	325
कान्तेऽलक्त	गोपीनाथः	230
कान्तोत्तमा	गोपीनाथः	330
कापि काम	गोपीनाथ	317
काप्यङ्गना	गोपीनाथः	230
कामाधिरा	गोपीनाथः	319
कामासक्ते	गोपीनाथः	54
कायमनोवा	छन्दोमञ्जरी	51

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
कारण्डवान	ऋतुसंहारम्	358
कार्त्तार्थ्यं यातु		181
कालक्रमाति		169
कालिन्दीती	गोपीनाथः	62
कालियभोगा	छन्दोमञ्जरी	51
कालियाहि	कविकल्पलता	412
काले कोकिल		260
काले पिकालि	गोपीनाथः	311
काशांशुका	ऋतुसंहारम्	358
काशैर्महीशि	ऋतुसंहारम्	357
काश्मीरगौर	गीतगोविन्दम्	99
किंचित् कुंचि	रसमञ्जरी	94
किं त्वं दूति		257
किं प्राणैः किं		159
किं बान्धवेन		365
किं भूषणं		240
किं भृङ्ग म	चन्द्रालोकः	227
किं रुद्धः प्रि	शृङ्गारतिलकम्	102, 140
किं वा भणा	मालतीमाधवम्	333
किमधिकम		234
किमिन्दुः किं	चौरपंचाशिका (?)	216, 378
किसलयमि	उत्तररामचरितम्	139
कीटोऽपि सु	हितोपदेशः	243
कुचोपपीड		155
कुञ्जं हन्ति		185

उदाहृतांश:	आकरग्रन्थ:/ग्रन्थकार:	पृष्ठाङ्क:
कुञ्जाभिपू	गोपीनाथ:	220
☆ कुन्दक्षेपानुग	मेघदुतम्	379
कुबेरगुप्तां	कुमारसंभवम्	306
कुमारस्ते न		191
कुरंगैरुत्त		260
कुसुमसौरभ	शिशुपालवधम्	267
कुसुमावच	गोपीनाथ:	233
कुसुम्भराग	ऋतुसंहारम्	316
कूजन्ति को		205
कृतं वपुषि	रसमञ्जरी	102
कृष्णेनाका		419
केतकी गर्भ	गोपीनाथ:	213
के द्रुमास्ते	मुक्ताचरितम्	112
केयं शिरीष	गोपीनाथ:	232
के यूयं स्थ		259
केश: काश	साहित्यदर्पण:	202
कैलासो वि	कविकल्पलता	413
को निर्दग्ध		207
कोऽयं कोप	रसमञ्जरी	80
को वा शस्त्र	प्रतापरुद्रयशोभूषणम्	133
को विवेको		167
क्रीडत्कालि	छन्दोमञ्जरी	62
क्वचित्ताम्बू	अमरुकशतकम्	89
क्वाकार्यं श	अभिज्ञानशाकुन्तलम् (?)	171
क्षमी दाता गु	भर्तृहरि: (हितोपदेश: ?)	13
क्षीरोदजा व		184

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
खड्गाघातनि	प्रतापरुद्रयशोभूषणम्	174
खमिव जलं		211
गच्छ गच्छ		230
गङ्गायां घोष		68
गजेन्द्राननं	गणेशाष्टकम्	56
गतागतकु	रसमञ्जरी	86
गता निशा		186
गन्धवहाः	गोपीनाथः	258
गलत्परागं	नैषधीयचरितम्	314
गाण्डीवी क	किरातार्जुनीयम्	185
गाङ्गमम्बु सि		254
✿ गिरः श्रुता एव	नैषधीयचरितम्	388
गीतेषुकर्ण		183
गुरुतरकल	शिशुपालवधम्	116
गुरुपादाः स	लटकमेलकम्	168
गुरोर्गिरः	लटकमेलकम्	157
गृहीतप्रत्यु	कुमारसंभवम्	46
गोकुलबन्धो	गोविन्दलीलामृतम्	54
गोपीनन्दित	संगीतकौमुदी	450
गोष्ठे गिरिं	छन्दोमञ्जरी	538
✿ ग्रन्थेऽस्मिन्	गोपीनाथः	458
ग्रन्थोऽयं रस	गोपीनाथः	456
✿ ग्रीष्मे दिशो		344
घन इव चिकु-		375
घनबालम		419

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
घोरो वारि		188
चञ्चलचू	छन्दोमञ्जरी	49
चण्डीशचू		193
चतुरास्य प		253
चतुर्णां पुरु	चन्द्रालोकः	226
चन्द्रमण्ड		193
चन्द्र सन्द		229
चन्द्रे मृगे		238
चन्द्रोदये च	रसमञ्जरी	98
चम्पको म	गोपीनाथः	327
चरणानतका		188
चातकस्त्रिच		247
चातिकान्तरदन		383
✩ चिकुरप्रकारा	नैषधीयचरितम्	375
चित्रं चित्रम		196
चिन्ताभिः स्ति	साहित्यदर्पणः	153
चिरं रागिणि		254
चिररतिपरि	शिशुपालवधम्	313
चिराद् विरह		155
चूतांकुरास्वाद	कुमारसंभवम्	316
चेतश्चञ्चल	रसमञ्जरी	145
जगत्प्रलय	कविकल्पलता	416
जगद्वशीक	शिशुपालवधम्	335
जघनस्स्थल	उदात्तराघवम्	168
✩ जनकः कवि		17
जनताविस्म	कविकल्पलता	418

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
जपापुष्पं जा	कविकल्पलता	413
जय कंसासुर	संगीतकौमुदी	451
जय जनरञ्जन		449
जय जय जना	छन्दोमञ्जरी	65
जयन्ति ते क	नीतिशतकम्	4, 5
जय सुरनरकिंनरेश	संगीतकौमुदी	451
जल्पन् मनोज्ञ	ऋतुसंहारम्	358
जाता लज्जा		193
जितमदनवि	प्रतापरुद्रयशोभूषणम्	174
जितोऽसि म		242
जिष्णुरिन्द्रः	प्रतापरुद्रयशोभूषणम्	203
जेतुः काकतिभू	प्रतापरुद्रयशोभूषणम्	69
जेतुः काकतिवी	प्रतापरुद्रयशोभूषणम्	178
ज्याकृष्टबद्ध	अमरुकशतकम्	30, 380
ज्वलतु गगने	मालतीमाधवम्	110
तडागे दर्पण	कविकल्पलता	413
तडिल्लताः	ऋतुसंहारम्	349
ततश्चचार		191
ततस्तस्यां	चम्पूरामायणम्	64
तथा चामी	कविकल्पलता	408
तथा तस्या	दशरूपकम्	106
तथा समा	प्रतापरूद्रयशोभूषणम्	137
तदभाग्यं	कुवलयानन्दम्	249
✩ तदात्वप्रोन्	अनर्घराघवम्	341
तदवितथ	शिशुपालवधम्	96
तद्गच्छं	कुमारसंभवम्	185

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
✿ तदोजसस्त	नैषधीयचरितम्	376
तनुजलक	ऋतुसंहारम्	349
✿ तन्वी श्यामा	मेघदूतम्	384
तमालमा	मालतीमाधवम्	332, 333
तमेव ध्यायते		245
तया दुहित्रा	कुमारसंभवम्	352
तरणिजा	छन्दोमज्जरी	52
तरला तरङ्ग	छन्दोमञ्जरी	51
तव कितव	शिशुपालवधम्	103, 318
तवाग्रसूची	नैषधीयचरितम्	311
तवारुणाधरः	गोपीनाथः	233
तस्य च प्रव		239
तस्या हेम	गोपीनाथः	244
तस्यां सुत	रसमञ्जरी	146
तापेन भ्राज-	चन्द्रालोकः	223
तामुद्वीक्ष्य		193
तामेव ध्याय-		245
✿ ताम्बुलं चर्व-	दीक्षितगोपीनाथमहापात्रः	97, 388
✿ तारानायक		214
तारुण्यस्य	चन्द्रकला	108
तारुण्यं म	गोपीनाथः	233
तालवृन्तैस्तपे	दीक्षितगोपीनाथमहापात्रः	343
तां जानीयाः	मेघदूतम्	101, 343
तां हंसमाला	कुमारसंभवम्	357, 369
✿ तिमिरमसिभि	रूपगोस्वामी	99
तिलके गत	गोपीनाथः	325

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
तीर्थे तदीये	रघुवंशम्	189
तीव्राभिषङ्ग	कुमारसंभवम्	131
तुषारसंघा	ऋतुसंहारम्	364
तृणोत्तमैरु	ऋतुसंहारम्	354
तृषाकुलैश्चा	ऋतुसंहारम्	348
तौ सरांसि	रघुवंशम्	55
त्यज त्यज		167
त्रस्यन्ति चल	शिशुपालवधम्	112
त्रिभागशेषा	कुमारसंभवम्	146
त्रियामा शं	कविकल्पलता	419
त्रैलोक्यादा	गोपीनाथः	234
त्वत्तेजोनल	गोपीनाथः	217
✩ त्वद्दर्शन		149
त्वद्वक्त्रस		182
✩ त्वद्वाचः स्तु-	नैषधीयचरितम्	388
त्वद्वाजिरा	साहित्यदर्पणः	166
त्वद्वियोग		147
त्वद्वीरचरितम्		162
त्वान्नेत्रसदृश	गोपीनाथः	212
त्वमेव कीर्ति	कुवलयानन्दः	223
त्वयि दातरि	चन्द्रालोकः	262
✩ त्वयि यत्		148
त्वामालिख		258
दयितालिङ्ग	प्रतापरुद्रयशोभूषणम्	126
दरमुकुलित	रसमञ्जरी	87
दर्पणप्रथ	कविकल्पलता	416

उदाहृतांश:	आकरग्रन्थ:/ग्रन्थकार:	पृष्ठाङ्कः
दलिते उत्प		187
दत्तमातव	शिशुपालवधम्	316
देत्ते सालस	प्रभावतीपरिणयम्	87
दत्त्व कटा		239
दातु: काक	प्रतापरुद्रयशोभूषणम्	73
दानार्थिनो	वलयानन्द:	251
दिग्धूमव	गोपीनाथ:	344
दिवमप्युप	काव्यालंकार:	235
दिवि वा भु	मुकुन्दमाला	165
दिशि मन्दा	रघुवंशम्	364
दीपमुद्दीप		246
दीपमुद्द्यो		248
दुरालोक:	गीतगोविन्दम्	60
दूरादाकर्ण्य	प्रतापरुद्रयशोभूषणम्	175
दूरादागतव	गोपीनाथ:	114
दूरादागतेन		116
दूरं समाग	साहित्यदर्पण:	222
✿ दीर्यते भूमि	वासुदेवरथः	343
दृग्भाग्यकल्प	दीक्षितगोपीनाथमहापात्रः	384, 385
दृप्तारिविज		182
दृशा दग्धं	विद्धशालभञ्जिका	201, 236
दृशौ तव म	गीतगोविन्दम्	60
✿ दृष्टिं हे प्रति	विज्जिका	100
दृष्टिस्तृणी	उत्तररामचरितम्	84
दृष्ट्वा प्राङ्गण	रसमञ्जरी	95
दृष्ट्वा शार्दू		160

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
दृष्ट्वैकासन	अमरुकशतकम्	93
देवः पायाद		266
देहि मत्क		228
देहि मे वा		190
दैत्येन्द्रवंशा	छन्दोमञ्जरी	56
द्रुमाः सपुष्पा	ऋतुसंहारम्	306
धनिनोऽपि		231
धन्यासि या	विज्जिका	90
धम्मिलमर्ध		116
✿ धर्मज्ञो ज्ञान-	गोपीनाथः	457
धवलयति		194
✿ धाता निर्माति	दीक्षितगोपीनाथमहापात्रः	385
धीरो वरो		186
धूमस्तोमं त		218
ध्याता मूर्त्तिः	छन्दोमञ्जरी	54
नखक्षतमु	रसमञ्जरी	89
न खलु व	शिशुपालवधम्	103
न च मेऽवग	शिशुपालवधम्	96
न तज्जलं	भट्टिकाव्यम्	237
न तथा भूषय-		133
न दत्तो य		159
न द्यूतमेत		262
✿ ननु हो मथना		208
✿ न नो न नुन्नो	किरातार्जुनीयम्	207
✿ न पीयतां नाम	नैषधीयचरितम्	380
न ब्रूते परु	अमरुशतकम्	109

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
नभोभूषा पूषा		9
नमस्तस्मै	चन्द्रालोकः	228
नमामि विष्णुं	गोपीनाथः	67
नमो नन्द	संगीतकौमुदी	451
नमो भुवन	संगीतकौमुदी	150
नरनाथ च	प्रतपरुद्रयशोभूषणम्	127
✫ नलिनं मलिनं	नैषधीयचरितम्	378
नवनखप	शिशुपालवधम्	151
नवपलाश	शिशुपालवधम्	204, 305
नवप्रवालोद्गमचा	कुमारसंभवम्	334
नवप्रवालोद्गमपु	ऋतसंहारम्	360
नवा लता ग	नैषधीयचरितम्	225
नश्येद्राजवि		224
न षट्पदो गन्ध		380
नष्टं वर्षवरै	रत्नावलि	82
नाभिप्ररूढा	रघुवंशम्	261
नाम्बुजैर्नकु	रसमञ्जरी	98
नारीभिर्गुरु	शिशुपालवधम्	346
नाश्यन्तो घ		188
✫ नासादसीया	नैषधीयचरितम्	382
नाहं तूदीत	कुवलयानन्दम्	229
नितम्बगुर्वी		253
नितम्बविम्बैः	ऋतुसंहारम्	339
नितान्तनीलो	ऋतुसंहारम्	347
निध्यञ्जनौष		247
निपातयन्त्यः	ऋतुसंहारम्	349

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
निपीय यस्य	नैषधीयचरितम्	32
निरङ्कुशाश्च		5
निरुद्धवाता	ऋतुसंहारम्	365
निशाः शशा	ऋतुसंहारम्	345
निःश्रीकोऽपि	कविकल्पलता	416
निःसाणध्वनि	प्रतपरुद्रयशोभूषणम्	129
नीति र्भूमिभु	नवरत्नमाला	10
☆ नीलानीनालि		208
☆ नीलोत्पलाक्ष्या		216
नीवीं हरेद्दु	रसमञ्जरी	144
नृपे वीरे		68
नेत्रे खञ्जन	साहित्यदर्पणः	88, 108, 146
☆ नेदं मुखं ताम	दीक्षितगोपीनाथमहापात्रः	382
नो चाटु श्र	साहित्यदर्पणः	101, 152
नोदञ्चौ न कुचौ		107, 370
नोष्ठं स्मितै		107
न्यक्कोरो ह्य	महानाटकम्	184
न्यस्ताक्षरा	कुमारसंभवम्	310
☆ पचेलिमं विम्ब	दीक्षितगोपीनाथमहापात्रः	382
पञ्चमोदञ्चने		263
पटुतरवन	ऋतुसंहारम्	338
☆ पतिपुलक	गोवर्द्धनाचार्यः	99
पत्युः काकति	प्रतापरुद्रयशोभूषणम्	70
पथि संच		167
पयोधराश्च	ऋतुसंहारम्	346
पयोधरैःकु	ऋतुसंहारम्	366

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
✪ परधनरत्न		337
पयोधरैर्भी	ऋतुसंहारम्	353
परिस्फुरन्	किरातार्जुनीयम्	137
पर्याप्तपुष्प	कुमारसंभवम्	331
पल्लवाकृति		186
पल्लवोपमि	शिशुपालवधम्	111
पश्चादेव वि		169
पश्य त्वमेव	गोपीनाथः	323
पश्य पश्य		169
पाणिः पल्लव		185
पाणिरोधम	शिशुपालवधम्	114
पाणौ मा कु	गीतगोविन्दम्	334
पाण्डवानां		206
पाथोधिम	कविकल्पलता	416
पादाघाताद		191
पानधौतन	शिशुपालवधम्	55
पीत्वा मत्ता	छन्दोमञ्जरी	52
पीयूषसार	गोपीनाथः	226
पुंस्कोकिलैः	ऋतुसंहारम्	332
पुण्येऽरण्ये		162
पुनातु भ	छन्दोमञ्जरी	50
पुष्पप्रमोदे	गोपीनाथः	324
पुष्पानिल	गोपीनाथः	312
पुष्पेषुश्चिकु	नैषधीयचरितम्	376
पुरा कवीनां		262
✪ पुरोपकण्ठ	रघुवंशम्	75

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
पूतिदुर्गन्ध		161
पूरिते रो		196
पूर्वभूधर	कविकल्पलता	415
पूर्वाद्रौ र	कविकल्पलता	413
✩ पौष्पं धनुः किं	नैषधीयचरितम्	376
प्रचण्डतर	प्रतापरुद्रयशोभूषणम्	177
प्रचण्डसूर्यः	ऋतुसंहारम्	338, 341
प्रणमत्युन्नति		234
प्रणम्य शंभुं	भारतरत्नकोषः	43
प्रणम्य शिर		43
प्रणयकुपि		150
प्रणयसखी	मालतीमाधवम्	131
प्रतापः का	प्रतापरुद्रयशोभूषणम्	204
प्रतापरुद्रदे	प्रतापरुद्रयशोभूषणम्	225
प्रतापरुद्रनृ	प्रतापरुद्रयशोभूषणम्	240
प्रतिफलमव	रसमञ्जरी	92
प्रतिहट्टपथे	नैषधीयचरितम्	342
प्रतीच्यां य	कविकल्पलता	415
प्रत्यग्रप्रस	प्रतापरुद्रयशोभूषणम्	73
✩ पदन्यासैरासीत्	दीक्षितगोपीनाथमहापात्रः	387
प्रभिन्नवैदु	ऋतुसंहारम्	352, 354
प्रवातनीलो	कुमारसम्भवम्	379
प्रवालताम्रा	ऋतुसंहारम्	308
प्रवासादाग	गोपीनाथः	257
प्रसन्नेन दृग-		213
प्रससार श		182

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
प्रसाधिकाल	रघुवंशम्	116
प्रस्थानं व	अमरुकशतकम्	153
प्राणेशेन प्र	साहित्यदर्पणः	135
प्रातिभं त्रि	शिशुपालवधम्	130
प्राप्तनाभि	शिशुपालवधम्	47
प्रियकन्धर	गोपीनाथः	328
प्रियप्रसादि		138
प्रियसखीस	शिशुपालवधम्	318
☆ प्रियाविरह	दीक्षितगोपीनाथमहापात्रः	344
प्रिये जीवा	रसतरङ्गिणी	154
प्रेमोत्कर्ष	गोपीनाथः	126
प्रोज्ज्वलज्ज्वलन		187
फलिनीः कु	किरातार्जुनीयम् (?)	321
फेरुस्त्वं सु	कविकल्पलताः	408
बन्धं विभिद्य		169
बलावलेपा	शिशुपालवधम्	221
बलाहकाश्चा	ऋतुसंहारम्	355
बालाय नी	कर्णामृतम्	59
बाला लीला	गोपीनाथः	126, 127
बाला वधू	गोपीनाथः	326
बाले नाथ	अमरुकशतकम्	91
बालेऽबलार	चौरपंचाशत्	52
बालेन्दुवक्रा	कुमारसंभवम्	218, 308, 313
बिम्बोष्ठं बहु	शिशुपालवधम्	58
बृहत्तुलैर	शिशुपालवधम्	230
भुजङ्ग एव	—	259

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
✩ भुवनविजयी	दीक्षितगोपीनाथमहापात्रः	381
भूतयेऽ स्तु		184
भूतिप्रदो भू	गोपीनाथः	221
भूमिपाल भ	कविकल्पलता	414
✩ भूयस्ततो निखि	नैषधीयचरितम्	385
भृङ्गैः प्रिया	गोपीनाथः	232
भो लङ्केश्वर	महानाटकम्	159
भ्रातर्द्वि रेफ	चन्द्रकला	135, 146
✩ भ्रूचापे निहितः	गीतगोविन्दम्	376
भ्रूभेदे रचिते	अमरूकशतकम्	150
✩ भ्रूयुगलं कम	दीक्षितगोपीनाथमहापात्रः	377
मच्चित्तामर	गोपीनाथः	212
मणिमालो		236
मतल्लिका	अमरकोषः	50
मत्तद्विरेफ	ऋतुसंहारम्	309
मदनमद	गोपीनाथः	357, 358
मदेन भाति	चन्द्रालोकः	221
मधुभिर्मधुपः	गोपीनाथः	223
मधुरवचनैः	श्रृङ्गारतिलकम्	89
मध्यस्य प्र	साहित्यदर्पणः	87, 371
मध्येन त	साहित्यदर्पणः	241
✩ मनुष्यवाह्यं	रघुवंशम्	75
मनोहराकार	कविकल्पलता	419
मन्दं मन्दं	मेघदूतम्	351
मयाभिला-	गोपीनाथः	236

उदाहृतांश:	आकरग्रन्थ:/ग्रन्थकार:	पृष्ठाङ्क:
मयि सकपटं	साहित्यदर्पण:	136, 146
मय्येव जी		252
मरुल्ललत्	नैषधीयचरितम्	55
मलयगिरि	चम्पूरामायणम्	307
मलयपवन	गोपीनाथ:	313, 336
मल्लिकाचित्त		255
मल्लिकामाल		255
मल्लिकामु		314, 336
मल्लीमत्तल्ली	उदात्तराघवम्	168
✿ महत्त्वं हन्त		362
महावराह	कविकल्पलता	419
महासमर	चम्पूरामायणम्	355
मांसकीकस	प्रतापरूद्रयशोभूषणम्	176
मा गर्वमु-	दशरूपकम्	112
माद्यन्ते चातका	कुवलयानन्दम्	222
मानमस्या	काव्यादर्श:	241
मानं माकु		193
मानं मुञ्च	गोपीनाथ:	311
मामाकाश	मेघदूतम्	132
मारमा सु	साहित्यदर्पण:	205
मालिन्यमब्ज		244
माहात्म्यं त	कविकल्पलता	412
मीलन्ति य	चन्द्रालोक:	251
मुक्ताहारं	रसमञ्जरी	145
मुग्धा दुग्ध		215
मुञ्च चन्द्रं		189

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
मुञ्च मानं हि		185
☆ मुदमब्द्भुबा	शिशुपालवधम्	354
मुदितमधुभु	शिशुपालवधम्	328
मुनिर्जयति	ध्वन्यालोकः	260
मृगात्सिंहः	कविकल्पलता	415
मृणालव्याल		110
मृत्पिण्डवा		128
मेघैर्मेदुर	गीतगोविन्दम्	74, 246
मेदिनीदयित तावक	कविकल्पलता	414
मदिनीदयित तावकै	कविकल्पलता	414
यः कौमारहरः	शिलाभट्टारिका	134
यत्त्वनेत्रस	महानाटकम्	212, 352
यथा ग्रीष्म	अलंकारकारिका	179
यथा तावत्	अलंकारकारिका	179
यथानङ्गस्त्व	अलंकारकारिका	179
यथा मधुक	अलंकारकारिका	179
यथायं भ्रमर	अलंकारकारिका	179
यथा वैरिशि	अलंकारकारिका	180
यथा स्तन	अलंकारकारिका	180
यथा हरिक	अलंकारकारिका	179
यथेन्दुबन्धु	कविकल्पलता	269
यदयं रथ	विक्रमोर्वशीयम् (?)	250
यदर्थमाप्तः		138
यदाह धात्र्या	रघुवंशम्	163
यदि मय्यर्पि		186
यदि शेषो		186

उदाहृतांश:	आकरग्रन्थ:/ग्रन्थकार:	पृष्ठाङ्क:
यदि स्यान्म		220
यदुमणे कुरु		450
यन्मया सह	कविकल्पलता	408
यमुनातटम	छन्दोमञ्जरी	56
यमुनाशम्बरं		183
यस्य कृष्णपा	छन्दोमञ्जरी	50
यस्य न सविधे	काव्यप्रकाश:	203
या दातु: सौ	चन्द्रालोक:	223
यन्ति नील		192
याम: सुन्दरि	साहित्यदर्पण:	153
यामुनसैक	छन्दोमञ्जरी	49
यावद् विष्टप	गोपीनाथः	456
यासां सत्य	अमरुकशतकम्	115
युगान्तकाल	शिशुपालवधम्	234
योगेन दलिता		182
रक्ताशोक	मेघदूतम्	322
रतिपतिप्र	शिशुपालवधम्	308
रतिलीला		187
रत्नस्य काव्यस्य	सहृदयानन्दम्	3
रभसादभि	रसमञ्जरी	97
रमणे चर		190
रविकरप	गोपीनाथ:	339
रसप्रसर	साहित्यरत्नाकर:	15
रसिक: शि	गोपीनाथ:	366
रङ्गे बाहुवि	छन्दोमञ्जरी	48
राजन् सप्ता		262
उदाहृतांश:	आकरग्रन्थ:/ग्रन्थकार:	पृष्ठाङ्क:

राजराज स	साहित्यरत्नाकरः	200
राज्ये सारं	काव्यालंकारः	238
रात्रिर्गमि		248
रात्रौ चन्द्रो	कविकल्पलता	413
राधाग्रस्था	गोपीनाथः	317
राममन्मथ	रघुवंशम्	133, 188
रोलम्बा:प	साहित्यदर्पणः	147
लक्ष्मीविलास	प्रतापरुद्रयशोभूषणम्	214
लक्ष्मीविलासा		263
लघुतरदिन	गोपीनाथः	360
✩ लज्जा तिरश्चां	कुमारसम्भवम्	375
लताकुञ्जं गु	चन्द्रकला	172
लवङ्गकलि		310
लिक्षा लक्षा	कविकल्पलता	412
ललनाललाट	दीक्षितगोपीनाथमहापात्रः	374, 375
लीलाविभ्रम	प्रतापरुद्रयशोभूषणम्	74
लोकानन्दन		250
लोलालिपु	रसमञ्जरी	90
वक्त्रस्यन्दि	काव्यप्रकाशः	256
वनेऽखिल		265
वने व्रजन्त्याः	गोपीनाथः	326
वन्दे सदा व्यास	गोपीनाथः	1
✩ वयसी शिशुता	नैषधीयचरितम्	372
वर्षत्यम्बुद		222
वसु यच्छतु		23
वाग्देवी वदना	भर्तृहरि (?)	4

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
वामा केलि	गोपीनाथः	78
वासो वल्ली	छन्दोमञ्जरी	49
वाहिन्यः का	प्रतापरुद्रयशोभूषणम्	70
विकचकमल	शिशुपालवधम्	60
विचिन्वतीः	नैषधीयचरितम्	314
विजितारिपु	प्रतापरुद्रयशोभूषणम्	71
वितरणगुण	प्रतापरुद्रयशोभूषणम्	177
विद्या ददाति		237
विनयति सु	शिशुपालवधम्	151
विनये न विना		10
✩ विपंच्या गायन्ती	सौन्दर्यलहरी	389
विपदः स		252
विपिनविहा	छन्दोमञ्जरी	58
विपिने क्व	राघवविलासः	157
विभाति वि	कविकल्पलता	418
विम्बोष्ठं बहु	शिशुपालवधम्	58
वियोगिनी	नैषधीयचरितम्	309
विरतसस्य	शिशुपालवधम्	359
विरहजनि	गोपीनाथः	229
विरहविधुर	दीक्षितगोपीनाथमहापात्रः	390
विललाप स	रघुवंशम्	168
विललास	छन्दोमञ्जरी	46
विलोकनेनैव	शिशुपालवधम्	165
विलोक्य वि		190
विवृण्वती	कुमारसंभवम्	106
विशदच्छा	कविकल्पलता	418
उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः

विसृष्टरागा	कुमारसंभवम	239
वीणादौ व		10
वीर त्वामव		167
✩ विराग्रसर		389
वृषभानुसु	गोपिनाथः	332
वृषापेहि परक्षेत्रादा		258
वृषापेहि परक्षोत्रादि		258
वेणीमूलेवि	कर्णामृतम्	61
✩ वैश्वानरस्य	दीक्षितगोपीनाथमहापात्रः	375
व्यपोहितं लो	किरातार्जुनीयम्	117
व्याकोषपुष्प	गोपीनाथः	237
व्यामोहादप	अलंकारकारिका	179
शठान्यस्याः	अमरुकशतकम्	79
शताङ्गमारुह्य	मालतीमाधवम्	330, 333
शतेषुरेष	कविकल्पलता	419
शरदिकुसुम	ऋतुसंहारम्	356, 358
✩ शशधरकले	वाग्देवरथः	381
शशिमुकुट	कविकल्पलता	415
शशिवदना	छन्दोमञ्जरी	48
शास्त्रोपस्कृत	नीतिशतकम्	11
शिरामुखैः स्य	नागानन्दम्	160
शिरोरुहैः श्रो	ऋतुसंहारम्	353
✩ शीतार्ताः शिशि	दीक्षितगोपीनाथमहापात्रः	365
शीतार्ता इव		360
✩ शिशिरकाल	शिशुपालवधम्	364
✩ शिशिरेऽप्य	दीक्षितगोपीनाथमहापात्रः	365

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
शुकशावः श	कविकल्पलता	408
शुम्भच्छुण्डा	साहित्यरत्नाकरः	173
शून्यं वासगृ	अमरुकशतकम्	72, 143, 154
शून्येऽपि गग		169
शूरा अमरतां		182
शूली दण्ड	गोपीनाथः	221
शृणोत्यस्या	गोपीनाथ	222
शेफालिकां	साहित्यदर्पणः	147
शोणं वीक्ष्य	साहित्यदर्पण	79
शैला इवोन्नता		224
श्यामा क्षौम	साहित्यरत्नाकरः	217
श्रियः कुरूणा	किरातार्जुनीयम्	32
श्रियः पतिः	शिशुपालवधम्	33
श्रीकण्ठकण्ठ	कविकल्पलता	417
श्रीकृष्ण भो	कविकल्पलता	275
श्रीकृष्णं भक्त	गोपीनाथः	1
श्रीमद् गंगा	गोपीनाथः	457
श्रीमद् विठुल		376
श्रीमल्लताभ	किरातार्जुनीयम्	331
श्रीरामरावण	कविकल्पलता	417
श्रुताप्सरोगी	कुमारसंभवम्	85
श्रुतिसुखभ्रम	रघुवंशम्	337
श्रुत्वा काकति	प्रतापरुद्रयशोभूषणम्	71
श्रुत्वा यान्तं	दशरूपकम्	113
श्वाशान्मुञ्च	साहित्यदर्पणः	117,121,146
संकुचन्ति स	चन्द्रालोकः	220

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
संकेतकाल	ध्वन्यालोकः	257
संग्रामधीर	कविकल्पलता	417
संग्रामे नि		185
✫ संवर्तके इव	दीक्षितगोपीनाथमहापात्रः	387
संसारविष	भर्तृहरिः (?)	19
स एव सुरभि		106
स कीचकै	रघुवंशम्	336
सखि कर्पू	प्रतापरुद्रयशोभूषणम्	128
सखि पश्य	चन्द्रालोकः	257
✫ सखि मुखमपि	दीक्षितगोपीनाथमहापात्रः	383
सचन्दनाम्बु	ऋतुसंहारम्	343
सज्जनोदु		192
✫ सत्कविरसना	गोवर्द्धनाचार्य	388
सत्कान्ति या	गोपीनाथः	254
सत्पक्वफ	गोपीनाथः	341
सदा चरति		191
सदामरवि		187
सदा विलास	कविकल्पलता	418
✫ सदृशोर्जन	नैषधीयचरितम्	377
सद्यः कर		232
सद्यः पुरीप	हनुमन्नाटकम्	129
सद्यः शिरांसि	चन्द्रालोकः	240
स धन्यः खग	गोपीनाथः (?)	227
स न जिग्ये		243
सन्ततानन्त		170
सभायां तव	गोपीनाथः	228

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
समदमधुप	गोपीनाथः	263
समायाते ना	प्रतापरुद्रयशोभूषणम्	130
समीक्ष्य पु	रघुवंशम् (?)	137
समुद्गतस्वे	ऋतुसंहारम्	341
सरले साहस	मालतीमाधवम्	330
सरसिजमनु	अभिज्ञानाशाकुन्तलम्	109
सरोविकासि		237
सर्वदोमाधव		227
सविद्युदम्भो	ऋतुसंहारम्	348
सविभ्रमैः स	ऋतुसंहारम्	340
✩ सवृतचौल	रघुवंशम्	369
सशीकराम्भो	ऋतुसंहारम्	354
✩ सहसन्तीं		361
सहस्व कति		258
स हि त्रयाणा	छन्दोमञ्जरी	64
सा चन्द्रसुन्दर	रसमञ्जरी	81
साधु दूति पु		228
सा पत्युः प्र	अमरुकशतकम्	86
सा मंगलस्नान	कुमारसम्भवम्	46
सार्थकानर्थक		134
सार्धं मनोरथ	शृङ्गारतिलकम्	91
✩ सितं वसनं		98
✩ सिन्दूरविन्दु	दीक्षितगोपीनाथमहापात्रः	377
सुतनु जहि	अमरुकशतकम्	170
✩ सुदतीरदनैः	दीक्षितगोपीनाथमहापात्रः	386
सुधाकर इव	गोपीनाथः	211

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
सुनयने नयने		196
सुनीतिशास्त्रं		32
सुभग त्वत्क		115
सुमेरुशिखर	कविकल्पलता	418
सुरद्रुमूलम	छन्दोमञ्जरी	60
सुरनरकिंन		451
सुललितक	गोपीनाथः	342
सुललितम	गोपीनाथः	315, 334
सुवासितं ह	ऋतुसंहारम्	347
सूचीमुखेन	सहृदयानन्दम्	173
स्थिताः क्षणं	कुमारसम्भवम्	239
स्निग्धं दृष्टि		120
स्फुरत्सौदा		418
✰ स्फुर्जद्धुर्जटि	दीक्षितगोपीनाथमहापात्रः	213
स्मरवेगवती	छन्दोमञ्जरी	45
स्मरस्मेरान्	प्रतापरुद्रयशोभूषणम्	125
स्मरातुरां दै	गीतगोविन्दम्	53
स्मरार्धचन्द्रे	नैषधीयचरितम्	312
स्मरेण हृदये		237
✰ स्मितज्योत्स्ना	सौन्दर्यलहरी	386
✰ स्मितेन गौरी	नैषधीयचरितम्	377
स्मेरराजीव		202
स्वकीयं हृदयं		241
स्वच्छाम्भः	शिशुपालवधम्	113
स्वपिहि त्वं		190
स्वर्गः किं यदि		45

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
स्वर्धुनीसलि	कविकल्पलता	414
स्वल्पमेवाम्बु	चन्द्रालोकः	251
स्वाभाविके	गोपीनाथः	255
स्वामिन् गो	प्रतापरुद्रयशोभूषणम्	72
स्वामिन् भ	शृङ्गारतिलकम्	90
स्वामिनिःश्व	भिक्षाटनः	93
स्वामी मुग्ध	साहित्यदर्पणः	166
स्वेदावगाहि	गोपीनाथः	344
हंसपंक्तिरपि	घटकर्परकाव्यम्	350
हंसीव भूपतेः	कुवलयानन्दम्	210
हंहो धीरसमीर		240
✩ हत्वा कटाक्ष		380
हनूमानब्धि	चन्द्रालोकः	243
हन्त हन्त ग		196
हरन्ति हृद		191
हरस्तु किंचि	कुमारसंभवम्	166
हरितारुण	कुमारसम्भवम्	334
हरिमातङ्गस	कविकल्पलता	419
हरे सोमराजी	छन्दोमञ्जरी	49
हस्ते धृत्वापि	रसमञ्जरी	87
हाटकेश्वरया	कविकल्पलता	416
हा तातोति क्र	रघुवंशम्	59
हा हतोऽस्मि		138
हिमकालमवे	गोपीनाथः	363
✩ हिमपतन	दीक्षितगोपीनाथमहापात्रः	361
हिमाद्रिविंध्य	कविकल्पलता	414

उदाहृतांशः	आकरग्रन्थः/ग्रन्थकारः	पृष्ठाङ्कः
हिमाद्रिसदृशो		414
हिमाद्रिं त्वद्य		255
हीरकाणां नि		192
हुताग्निकल्पैः	ऋतुसंहारम्	339
✫ हृदिकुट्टमि		110
हे राधिकाकृष्ण	गोपीनाथः	455
ह्रदतटनिकट	छन्दोमञ्जरी	50
ह्रीवेरकाभ्या	गोपीनाथः	335

□

परिशिष्टम् - २

श्रीगोपीनाथपात्रविरचिते कविचिन्तामणौ
उद्धृतानां
ग्रन्थानां/ ग्रन्थकारणां सूचीं

ग्रन्थः / ग्रन्थकारः

अनर्घराघवम्
अमरकोषः
अमरुशतकम्
अलंकारकारिका
अलंकारसंग्रहः
आग्नेयपुराणम्
उत्तररामचरितम्
उत्पलमाला
उदात्तराघवम्
ऋतुक्रीडाविवेकः
ऋतुसंहारम्
कण्ठाभरणम्
कलाङ्कुरनिबन्धः
कविकण्ठपाशः
कविकल्पलता

ग्रन्थः / ग्रन्थकारः

कविगजाङ्कुशः
कर्णामृतम्
कर्णामृतसुवर्णचषकटीका
कामशास्त्रम्
काव्यप्रकाशः
काव्यादर्शः
काश्यपः
कुमारसंभवम्
कुवलयानन्दः
कोहलीयम्
गणोशाष्टकम्
गाथासप्तशती
गीतगोविन्दम्
गीतगोविन्दश्रुतिरंजनीटीका
गीतप्रकाशः
गीतरत्नमाला

ग्रन्थः / ग्रन्थकारः

गोवर्धनः
गोविन्दलीलमृतम्
घटकर्परकाव्यम्
चन्द्रकलानाटिका
चन्द्रालोकः
चन्द्रिका
चमत्कारचन्द्रिका
चाटुकारसंग्रहः
चौरपञ्चाशत्
छन्दोगोविन्दम्
छन्दोमञ्जरी
दशरूपकम्
दीक्षितगोपीनाथमहापात्रः
ध्वन्यालोकः
नवरत्नमाला
नागानन्दम्
नारदसंहिता
नीतिशतकम्
नैषधीयचरितम्
पञ्चसायकः
पिङ्गलछंन्दःसूत्रम्
प्रतापरुद्रयशोभूषणम्
प्रपञ्चसारः
प्रभावतीपरिण्यम्

ग्रन्थः / ग्रन्थकारः

भट्टिकाव्यम्
भारविकाव्यम्
भारतरत्नकोषः
भावप्रकाशः
भृङ्गदूतम्
भोजचम्पूः
भोजराजीयम्
महानाटकम्
महाभारतम्
माघकाव्यम्
मालतीमाधवम्
मुकुन्दमाला
मुक्ताचरितम्
मेघदूतम्
रघुवंशम्
रतिकला
रतिरहस्यम्
रत्नमाला
रत्नावली
रसतरंगिणी
रसमञ्जरी
राघवविलासः
रामचन्द्रविहारम्
रासपंचाध्यापीतोषणीटीका

ग्रन्थः / ग्रन्थकारः

- रुक्मणीपरिणयम्
- रुद्रादयः
- रूपगोस्वामी
- लटकमेलकम्
- वसिष्ठसंहिता
- वासुदेवरथः
- विक्रमोर्वशीयम्
- विश्वकोषः
- विष्णुपुराणम्
- वीरचरितम्
- वेणीसंहारम्
- वैराग्यशतकम्
- शाकिनीसहकारः
- शाकुन्तलम्
- शारदातिलकम्
- शालिहोत्रम्
- शृङ्गारशतकम्

ग्रन्थः / ग्रन्थकारः

- श्रुतवोधः
- संगीतकौमुदी
- संगीतनारायणम्
- संगीतरत्नमाला
- संगीतशिरोमणिः
- संगीतसारः
- सहृदयानन्दम्
- स्मरदीपिका
- साहित्य चन्द्रोदयः
- साहित्यचूडामणिः
- साहित्यदर्पणः
- साहित्यरत्नाकरः (धर्मसूरिः)
- साहित्यरत्नाकरः (?)
- सिंहभूपालीयम्
- सौन्दर्यलहरी
- हनूमन्नाटकम्
- हरनायकः

* * *

SANSKRIT SANSTHAN DEEMED UNIVERSITY (UNDER MINISTRY OF H.R.D. GOVT.
ACCESSION NO. ....
DATE............

परिशिष्टम् - ३

परामृष्टानां ग्रन्थानां सूची

BIBLIOGRAPHY

मुद्रिताः ग्रन्थाः

ग्रन्थकारः	ग्रन्थः	संस्करणम्	संकेतः
अप्पयदीक्षितः	कुवलयानन्दः	उद्यानपत्रिका तिरूपतिः 1969	अप्प. कुव.
अप्पयदीक्षितः	कुवलयानन्दः	निर्णयसागरप्रेस बम्बई 1917	अप्प.कुव.
अमरसिंहः	अमरकोशः	चौखम्बासंस्कृत-सीरीज, वाराणसी 1978	अम.अ.को.
अमरसिंहः	अमरकोशः	उत्कलसाहत्यप्रेस, कटक, 1922	अम.अ.को.
अमरुकः	अमरुशतकम्	चौखम्बासंस्कृत-सीरीज, वाराणसी 1978	अम.अ.श.
अमरुकः		मोतिलालबनारसीदास दिल्ली 1983	अम.अ.श.
अमृतानन्दयोगी	अलंकारसंग्रहः	अडयर्लाइब्रेरी मद्रास, 1949	अमृ.अलं
आनन्दवर्धनः	ध्वन्यालोकः	चौखम्बाविद्याभवन, वाराणसी 1965	आन. ध्वन्या.
कोण P.V.	History of Sanskrit Poetics इत्यस्य हिन्दीरूपान्तरः संस्कृतकाव्यशास्त्रका	मोतिलालबनारसीदास दिल्ली 1966	काणे.

ग्रन्थकारः	ग्रन्थः	संस्करणम्	संकेतः
	इतिहास		
काह्नुचरणमिश्र	आलोचनामाला (ओडिआभाषायाम्)	ओडिशापब्लिशिंहाउस् कटक, ओडिशा-1954	काह्नु.आलो
कालिदासः	अभिज्ञान्शाकुन्तलम् वाराणसी -1976	काशीहिन्दूविश्वविद्यालयः	कालि.अ.शा
कालिदासः	(कालिदासग्रन्थावली)		
कालिदासः	ऋतुसंहारम्	वारणसी	कालि.ऋतु-
कालिदासः	कुमारसंभवम्	वाराणसी	कालि.कुमा.
कालिदासः	कुमारसंभवम्	चौखम्बाविद्याभवन, 1970	कालि.कुमा.
कालिदासः	मेघदूतम्	चौखम्बासंस्कृतसंस्थान, संवत् -2034 मोतिलाबनारसीदास,-1979	कालि.मेघ.
कालिदासः	(कालिदासग्रन्थावली)	काशीहिन्दू विश्वविद्यालयः 1976	
कालिदासः	रघुवंशम्	काशीहिन्दूविश्वविद्यालयः 1976	कालि.रघु.
कालिदासः	रघुवंशम्	चौखम्बासंस्कृतसीरीज् संवत् -2034	
कालिदासः	विक्रमोर्वशीयम्	संस्कृतपरिषद्, उसमानिआविश्वविद्यालयः हैदराबाद -1966	कालि.विक्र.
कालिदासः	(कालिदासग्रन्थावली)	काशीहिन्दूविश्वाविद्यालयः 1976	
कालिदासः	श्रुतबोधः	अमरवाणीयन्त्रालयेप्रकाशितः वाराणसी द्वितीयसंस्करणम्	कालिश्रुत
कुन्तकः	वक्रोक्तिजीवितम्	चौखम्बासंस्कृतसीरीज	कुन्त.वक्रो.
कुलशेखरः	मुकुन्दमाला	रामकृष्णमठ, मद्रास.	कुल.मुकु.

ग्रन्थकारः	ग्रन्थः	संस्करणम्	संकेतः
कृष्णकुमारः	अलंकारशास्त्रका इतिहास	साहित्यभण्डार, सुभाषवजार, मेरठ, 1982	कृष्ण.अलं.
कृष्णानन्दकविराजः	सहृदयानन्दम्	चौखम्बाविद्याभवन,1968	कृष्णा.सह.
केदारनाथमहापात्रः	खुरुधाइतिहास (ओडिआभाषया)	विनोदविहारी,कटक,1983	केदा.खुरु
केशव मिश्रः	अलंकारशेखरः	निर्णयसागरप्रेस, वम्बई 1926	केश.अलं.
कोक्कोकमहर्षिः	रतिरहस्यम्	फ्रीमैन एंड़ कम्पनी,काशी 1922	कोक्को.रति.
क्षेमेन्द्रः	औचित्यविचारचर्चा	चौखम्बासंस्कृतसीरीज, 1976	गङ्गा.छ.म.
गजपतिनारायणदेवः	संगीतनारायणम्	ओडिशासंगीतनाटकएकाडेमी, भुवनेश्वर1966	गज.संगी
घटकर्परः	घटकर्परकाव्यम्	विवेकपब्लिकेशनज्, 3/346 समदरोड, आलीगढ -1975	घट.घट.
चतुर्वेदीद्वारकाप्रसादशर्मा	संस्कृतशब्दकौस्तुभः	रामनारायणलाल-बेनीप्रसाद, इलाहावाद -1978	चतु.सं.शकौ
जगन्नाथमिश्रः	रसकल्पद्रुमः	ओडिशासाहित्यएकाडेमी भुवनेश्वर -1965	जग.र.क.
जयदेव	गीतगोविन्दम्	ग्रन्थमन्दिर,कटक2 1983	जय.गीत.
जयदेव	गीतगोविन्दम्	चौखम्बासंस्कृतसीरीज आफिस् 1976	जय.गीत.
दण्डी	काव्यादर्शः	चौखम्बाविद्याभवन-1984	दण्डि.का.द.
देवेश्वरः	कविकल्पलता	सिद्धेश्वरप्रेस,कलिकता, 1895	देवे.कवि.

ग्रन्थकारः	ग्रन्थः	संस्करणम्	संकेतः
धनञ्जयः	दशरूपकम्	चौखम्बाअमरभारती प्रकाशन,1979	धन.दश.
धर्मसूरिः	साहित्यरत्नाकरः (प्रथमभागः)	संस्कृतपरिषत्, उसमानियाविश्व विद्यालयः हैदराबाद1972	धर्म.सा.र.
धर्मसूरिः	(द्वितीयभागः)	" 1974	धर्म.सा.र
धर्मसूरिः	(तृतीयभागः)	" 1981	धर्म.सा.र.
नारायणपण्डितः	हितोपदेशः	निर्णयसागरप्रेस,बम्बई 1947	नारा.हितो.
नारायणपण्डितः	हितोपदेशः	चौखम्बासंस्कृतप्रतिष्ठान 38 U.A. जवाहरनगर, दिल्ली 1987	नारा.हितो.
नारायणपण्डितः	हितोपदेशः	मोतिलालवनारसीदास दिल्ली 1980	नारा.हितो.
नीलमणिमिश्रः	ओडिआरामसाहित्य (ओडिआभाषया)	ओडिशाहित्यएकाडेमी भुवनेश्वर1980	नील.ओ.राम.
नीलमणिमिश्रः	ओडिशारेसंस्कृत लेखा ओ लेखक	ओडिशासाहित्यएकाडेमी भुवनेश्वर1962	नील.ओ.सं.ले.
पण्डितराजजगन्नाथः	रसगङ्गाधरः	मोतिलालबनारसीदास, दिल्ली1983	पण्डि.रस.
पाणिनिः	अष्टध्यायी	चौखम्बासंस्कृतसीरीज आफिस, वाराणसी 1976	पाणि.अष्टा.
पीयूषवर्षजयदेवः	चन्द्रालोकः	चोखम्बासंस्कृतसीरीज आफिस,1979	पीयू.चन्द्रा.
बलदेवउपाध्यायः	संस्कृतसाहित्य का इतिहास	शारदानिकेतन 37.B. रवीन्द्रपुरी, दुर्गाकुण्ड,बारणसी-5(1978 A.D.)	बल.संस्कृ

ग्रन्थकारः	ग्रन्थः	संस्करणम्	संकेतः
भट्टिकविः	भट्टिकाव्यम्	चौखम्बासंस्कृतसीरीज आफिस-1977	भट्टि.भट्टि.
भरतः	नाट्यशास्त्रम्	चौखम्बासंस्कृतसीरीज आफिस -1972	भर.नाट्य.
भर्तृहरिः	नीतिशतकम्	चौखम्बासुरभारती प्रकाशन-1982	भर्तृ.नीति.
भर्तृहरिः	(भर्तृहरिकृतं शतकत्रयम्)	भारतीयविद्याभवन, बम्बई 1946	भर्तृ.नीति.
भर्तृहरिः	शृङ्गारशतकम्	चौखम्बाविद्याभवन, 1982	भर्तृ.शृंगा.
भर्तृहरिः	(भर्तृहरिशतकत्रयम्)	भारतीयविद्याभवन, बम्बई-1946	भर्तृ.शृंगा.
भर्तृहरिः	वैराग्यशतकम्	चौखम्बाविद्याभवन, 1982	भर्तृ.वैरा.
भर्तृहरि	वैराग्यशतकम्	हिन्दीदुनियाँप्रकाशन हिन्दूस्थानीहिन्दी सभा, हैदरावाद-1960	भर्तृ.वैरा.
भर्तृहरि	(भर्तृहरिशतकत्रयम्)	भारतीयविद्याभवन, बम्बई 1946	भर्तृ.वैरा.
भवभूतिः	उत्तररामचरितम्	चौखम्बासंस्कृतसीरीज आफिस 1973	भव.उत्त.
भवभूतिः	महावीरचरितम्	लोकभारतीप्रकाशन् 15 A. महात्मागांधीरोड इलाहाबाद-1973	भव.महा.
भवभूतिः	मालतीमाधवम्	मोतिलालबनारसीदास 1967	भव.मा.मा.
भानुदत्तः	रसतरङ्गिणी	वेंकटेश्वरप्रेस प्रकाशन बम्बई-4 शक 1836	भानु.र.त.
भानुदत्तः	रसमञ्जरी	श्रीहरिकृष्णनिबन्धभवन वाराणसी -1978	भानु.र.म.

ग्रन्थकारः	ग्रन्थः	संस्करणम्	संकेतः
भामहः	काव्यालंकारः	चौखम्बासंस्कृतसंस्थान वाराणसी-1981	भाम.काव्या.
भारविः	किरातार्जुनीययम्	चौखम्बासंस्कृतसीरीज आफिस 1968	भार.किरा.
भोजराजः	चम्पूरामायणम्	चौखम्बाअमर भारती 1979	भोज.चम्पू
भोजराजः	चम्पूरामायणम्	निर्णयसागरप्रेस, बम्बई 1956	भोज.चम्पू
भोजराजः	सरस्वतीकण्ठाभरणम्	चौखम्बा ओरियंटलिया, वाराणसी 1976	भोज.सर.
मम्मटः	काव्यप्रकाशः	भाण्डारकर ओरियंटल रिसर्च इंष्टिच्युट्, पुना, 1965	मम्म.काप्र.
माघः	शिशुपालवधम्	वेकटेश्वरप्रेस,बम्बई शक-1847	माघ.शिशु.
यास्कः	निरुक्तम्	आर्यसाहित्यमण्डलि. अजमेर, संवत् 2023	यास्क.निरु.
राजवंशमहायः हीरा	संस्कृतसाहित्यका इतिहास	चौखम्बा अमर भारती वाराणसी 1977	हीरा.संस्कृ.
राजशेखरः	कर्पूरमञ्जरी	मोतिलालबनारसीदास,दिल्ली 1983	राज.कर्पू
राजशेखरः	काव्यमीमांसा	चौखम्बासंस्कृतसीरीज आफिस 1931	राज.का.मी.
रुद्रटः	काव्यालंकारः	चौखम्बाविद्याभवन,वाराणसी 1966	रुद्र.काव्या.
रुद्रटः	काव्यालंकारः	मोतिलालबनारसीदास,दिल्ली 1983	रुद्र.काव्या.
रुय्यकः	अलंकारसर्वस्वम्	भारतीयविद्याभवन प्रकाशन 1 U.B. जवाहरनगर,दिल्ली(1982A.D.)	रुय्य.अलं

ग्रन्थकारः	ग्रन्थः	संस्करणम्	संकेतः
रेवाप्रसादद्विवेदी	आनन्दवर्धन	मध्यप्रदेश हिन्दी ग्रन्थ अकादमी भोपाल 1972	रेवा. आन.
वाग्भट्टः	वाग्भट्टालंकारः	चौखम्बाविद्याभवन, वाराणसी 1957	वाग्भ.वाग्भटा
वामनः	काव्यालंकारसूत्राणि	मोतिलालबनारसीदास, दिल्ली 1983	वाम.का.सू
वामनः	काव्यालंकारसूत्रवृत्तिः	चौखम्बाअमरभारतीप्रकाशन वाराणसी -1979	वाम.का.सू
वाल्मीकिमहर्षिः	रामायणम् (उत्तरकाण्डः)	सत्यवादीप्रेस, कटक 1957	वाल्मी.रामा.
विद्यानाथः	प्रतापरुद्रयशोभूषणम्	संस्कृतशिक्षापरिषत् मैलापुर,मद्रास 1979	विद्या.प्र.रु.
विह्लणः	चौरपञ्चाशिका	चौखम्बासंस्कृतसीरीज आफिस. 1971	विह्ल.चौर.
विश्वनाथः	चन्द्रकलानाटिका	आर्किओलॉजि& म्युजियम भुवनेश्वर, ओडिशा 1958	विश्व.चन्द्र.
विश्वनाथः	चन्द्रकलानाटिका	देवभाषाप्रकाशन,दारागंज इलाहाबाद,संवत् -2023	विश्व.चन्द्र.
विश्वनाथः	साहित्यदर्पणः (लक्ष्मीटीकायुक्तः)	चौखम्बासंस्कृतसीरीज 1967	विश्व.सा.द.
विश्वनाथः	साहित्यदर्पणः (लक्ष्मीयुक्तः)	मेहरचन्दलछमनदास दरियागंज,दिल्ली,1982	विश्व.सा.द.
विश्वेश्वरः	चमत्कारचन्द्रिका	मेहरचन्दलछमनदास दरियागंज,दिल्ली,1972	विश्वे.च.च.
व्यासदेवः	महाभारतम्	गीताप्रेस,गोरखपुर,उ.प.	व्यास.महा.
शंकराचार्यः	सौन्दर्यलहरी	सद्ग्रन्थनिकेतन,पुरी,1997	शंक.सौ.
शंखधरः	लटकमेलकम्	चौखम्बाविद्याभवन,1962	शंख.लट.
श्रीहर्षः	नैषधीयचरितम्	चौखम्बाअमर-भारती-प्रकाशन 1983	श्रीहर्षः.नैष.

CSUGCKL 2
015:gxl
26335
Acc.No: 26335

Distributor :

PRATIBHA PRAKASHAN
(Oriental Publishers & Book-Sellers)
2[illegible], Shakti Nagar, Delhi - 110007